साहित्यवल्लरी

प्रणेता
डा ॥ एन्. लक्ष्मीनारायणभट्टः

Published with the Financial assistance from the
RASHTRIYA SANSKRIT SANSTHAN
[DEEMED UNIVERSITY]
NEW DELHI

ॐ

साहित्यवल्लरी

प्रणेता

डा ॥ एन्. लक्ष्मीनारायणभट्टः
प्राध्यापकः
श्री. म. सि. प्र. संस्कृतमहाविद्यालयः
उडुपी–५७६१०१
कर्णाटकराज्यम्

प्रकाशिका
महालक्ष्मीः एम्.
'अमृतम्' २–७९. डि४, षष्ठः उपमार्गः,
सुब्रह्मण्यनगरम् सन्तेकट्टे पोस्ट्,
पुत्तूरुग्रामः, उडुपी–५७६१०५
कर्णाटकराज्यम्

Published with the
80% Financial assistance from the

RASHTRIYA SANSKRIT SANSTHAN
[DEEMED UNIVERSITY]
NEW DELHI

शालि. शकः – १९३२ क्रिस्तशकः – २०११


BIBILOGRAPHICAL DATA

Title of the Book	:	**SAAHITYAVALLAREE** Critical Study of literary works
Writter	:	**Dr. N. LAXMINARAYANA BHATTA** Professer in Alankaara Shastra SMSP. Sanskrit College **UDUPI** – 576101. Karnataka.
Publisher	:	Smt. Mahalaxmi. M 2-79 D4. 'Amrutam' 6th Gross. Subrahmanya Nagara Post - Santekatte. Puttur village. **UDUPI** -576105. Karnataka

Language	: Samskrita
Edition	: First
Year	: 2011
No.of Pages	: 328+22+4
No.of copies	: 500
Price	: Rs.98/-
©	: Publishers
Printing & Binding	: Bharath Press Kalsanka, **UDUPI** – 576102. Karnataka.



वदनकमलहासाच्चन्द्रिकां व्यर्थयन्ती
निबिडकचकलापात्कुर्वती न्यक्तमिस्रम् ।
मधुरविशदवाक्यात् कोकिलान्मूकयन्ती
मम विधिरमणी सा मानसे स्थैर्यमेतु ॥



ॐ

गणपतये नमः

पूर्वाभाष्यम्

इह हि जगति पुंसां प्रवृत्तिः निवृत्तिश्चेति मार्गद्वयं वर्तते । तत्र यस्मिन् मार्गे समेषामपि स्वभावतः प्रवृत्तिः सः प्रवृत्तिमार्गः । प्रवृत्तिश्च विषयान् प्रति आभिमुख्येन गमनम् । तच्च मनःषष्ठानामिन्द्रियाणां मोचनेन भवति । तदा जीवस्य संसरणम् । अत्र सुखप्रकाशोऽल्पीयान्, दुःखान्धकारो भूयान् । अन्यस्तु निवृत्तिमार्गः । तत्र हि विषयेभ्यो निवृत्तिः भवति । निवृत्तिश्च प्रत्यागमनम् । तच्चेन्द्रियाणां निग्रहणेन भवति किन्तु मार्गेणास्मिन् प्रयाणमतीव दुष्करम् । अत्र दुःखं क्रमेण हीयते सुखं च विलक्षणं प्रतिक्षणं समेधते । सत्यां चास्यां निवृत्तौ संसारान्मुक्तो जीवः प्रकृतौ वर्तमानः परां निर्वृतिमुपगच्छति । सेयं निर्वृतिः वेदान्तशास्त्रात् सिध्यतीति तस्यैव शास्त्रधुरीणत्वेनाभ्युपपत्तिः । यद्यपि सांख्यन्यायादीनि सन्ति शास्त्राणि मुक्तेः प्रतिपादकत्वेन प्रथितानि तथापि न तेषां वेदसंवादित्वमिति प्रज्ञावता पुरुषेण आदौ आदृतान्यपि पर्यन्ते तानि हातव्यान्येव भवन्ति ।

प्रवृत्तिमार्गे धर्मादयः त्रयः पुरषार्थाः गौणास्तु तत्पर्यवसायिनो बहवः । तस्मादत्र बहूनि शास्त्राणि । तेष्वन्यतममिदं साहित्यम् । अलङ्कार इति नामान्तरम् । काव्यमीमांसापरेऽस्मिन् शास्त्रे तस्य लक्षणम्, तत्प्रयोजनम्, तद्विभागः, तत्प्रभेदप्रपञ्चः, तद्गता वृत्तिः, तद्गतो दोषगुणरीत्यलङ्कारादिः, तदीयः समयः, तत्रत्यमौचित्यं चेत्यादयो विषयाः प्राधान्येन विचारणीया भवन्ति । सर्वेषामेतेषां विषयाणां विश्रान्तिः रसे इति हेतोः तस्यैव काव्ये आत्मभूतत्वम् । रसश्च परमार्थतो विचारे क्षणिक आभासमानश्च कश्चिन्मोक्षः । नायं शाश्वतिकः, आस्वादसमकालिकत्वात् । नापि वास्तविकः, विषयसंवलनात् । एतादृशरसस्यन्दिना काव्येन गुडेन बालका इव कोमलमतयः समाकृष्टा भवन्ति येन 'रामादिवद्वर्तितव्यं न रावणादिवत्' इत्युपदेशमवाप्य मार्गेणैव क्रममाणा क्रमेण शास्त्रं प्रति अभीमुखीभवन्ति, परमपुरुषार्थं च अवाप्नुवन्ति । तल्लोकशास्त्रयोः अन्तराले सेतूयमानस्यास्य काव्यस्य व्यासवाल्मीकिप्रभृतिभिः महर्षिभिः आविष्कृतस्य निर्विवादं तावत् परिग्राह्यत्वम् ।

काव्यमीमांसापरेऽस्मिन् शास्त्रे ये विषया विम्रष्टव्यत्वेन प्रागुक्ताः प्रायेण ते समस्ता भामहाद्यैः जगन्नाथान्तैः सर्वैरपि विमर्शचणैः आघ्रातचराः । तस्मादत्र विम्रष्टव्यं नान्यदवशिष्यते । तथापि अनृषीणां तेषां तत्त्वे विसंवादस्य सम्भवात् तदाकूतं कात्स्न्र्येन विदतामपि बुधानामवश्यं द्वापरो जागर्ति । अत एव कस्मिंश्चित् विषये प्रश्ने कृते गृहीतनिखिलग्रन्थसारस्यापि प्राज्ञस्य मुखात् एकमुखोदया वागेव न निःसरति किन्तु सन्देहात् नानामुखोदया । स्थिते चैवम्, का वार्ता पुनरन्येषाम्? तस्मात् सर्वाणि मतानि सङ्कलय्य तत्र सिद्धान्तभूतस्य मतस्य परीक्षणमपेक्ष्यते यस्यां दिशि मन्ये न केनाप्येतावन्तं कालं पदं कृतम् । तस्मादयं यत्नः । अयं च यत्नः सफलो विफलो वेत्यत्र पठितारो भवन्त एव प्रमाणम् ।

कृतेरस्याः पठनेन झटित्येव सिद्धान्तस्य ज्ञानं भवतीति नाहं ब्रवीमि किन्तु तद्दिशाभिमुखीं युक्तिभूयिष्ठां काञ्चित् विचारपरिपाटीमवश्यं भवन्तः प्राप्नुवन्तीति तु दृढकण्ठम् । अन्ततः तावन्मात्रस्यापि भवतां प्राप्त्या जनोऽयमात्मानं धन्यं मन्यते ।

कृतावस्यां सर्वेषां विषयाणां निरूपणं न सुकरं नतरां तु व्यासेन । कथञ्चित् महता यत्नेन क्रियमाणमपि तत्केवलं सुधियां नैरस्याय ग्रन्थस्य च गौरवाय । तस्मात् विमर्शवित्तानाम्, तत्तद्विषये च स्वसमयं प्रकटीकृतवतां मम्मट–आनन्दवर्धन–दीक्षित–जगन्नाथप्रभृतीनां कतिपयानामेव मतमत्र समासेन विचारितम् । तत्र यद्युक्तिसहं तदेव सिद्धान्तत्वेन स्थापितम् । अथ सर्वेषामपि मतं परीक्ष्यमाणं सदोषमिति प्रतिभाति तर्हि किमत्र तावत्सिद्धान्तो भवितुमर्हतीति अनाग्रहजुषा मया स्वकीयमपि मतं प्रकाशितं प्रपञ्चितं च सोपपत्तिकम् । तच्च वस्तुतस्तु, अत्र विचार्यते, चिन्त्यमिदम् इत्यादिभिः वाक्यप्रतीकैः सुविशदमेव प्रतीयते प्रणिधानेन पठतां समुत्सुकानाम् ।

एतेन भरताद्यानां जगन्नाथान्तानां विचारैः समेधिते साहित्यशास्त्रे कुशला एव पुरुषाः कृतावत्र अधिकारिणो भवितुमर्हन्ति नान्ये इत्युक्तं भवति । ये पुनः शास्त्रमिदं प्रविविक्षवः प्रविष्टमात्राश्च सन्ति मन्ये तेषां कृतिरियं निश्चप्रचमयश्चणकायेत । यद्वा, प्रवर्तन्तां तेऽपि यदि कुतूहलिनः, गच्छता कालेन कञ्चन संस्कारमाप्य सारग्राहिणो भविष्यन्ति । नहि सरस्यनवतीर्णाः प्लवमानानां दर्शनमात्रेण तत्क्रियायां कुशला भवन्ति । केः पुनः तर्हि? सरः प्रविश्य असकृन्निमग्ना उन्मग्नाश्च । नहि च सकृत्

सकृज्जातेन टङ्काघातेन शिलाः प्रतिमा भवितुं शक्नुवन्ति । काः पुनस्तर्हि? असकृज्जातेन तेन त्याज्यं भागं त्यजन्त्यः शेष्यं च रक्षन्त्यः ।

क्वचित् महत्स्वप्यालङ्कारिकेषु य आक्षेपोऽत्र कृतो वर्तते स उग्र इव भाति, वस्तुतः स नोग्रः तदभिमानजत्वात्, किमयं व्याहरतीति श्रोतॄणां कुतूहलोत्पादनार्थं तथा विधानात्, पथिप्रदर्शकानां विमानने तात्पर्याभावाच्च । नहि कोऽपि विचारवान् जिगमिषुः मार्गविधानेन उपकुर्वन्तं सज्जनं थूत्कारेण लघूकर्तुमिच्छति । अथ लघुकरोति तर्हि तत्तस्यैव दोषः न तु पथिकृतो महीयसः । ततश्च कदाचिदाक्षेपवचनेन भ्रान्ताः सन्तो भवन्तः मामन्यथा मा गृह्णन्तु, मा च निश्चिन्वन्तु मां तदवधीरणव्यसनिनम् । प्रसङ्गेऽस्मिन् महिमभ स्य वचनमेतत् स्मृतिपथमायाति –

इह सम्प्रतिपत्तितोऽन्यथा वा ध्वनिकारस्य वचोविवेचनं नः ।
नियतं यशसे प्रपत्स्यते यन्महतां संस्तव एव गौरवाय ॥

यत्रावश्यकमिति भाति तत्र टिप्पणं प्रदत्तम् येन विवक्षितास्यार्थस्यावगतौ पाठकानां किञ्चित् सौकर्यं जायेत । क्वचित् संहितायां विवक्षितुं शक्यायामपि सन्धिः न कृतः पठने वाक्ययोजने च सौकर्यं स्यादिति धिया ।

कृतेरस्याः प्रणयने वस्तुतः कारणीभूताः वैयाकरणधुरीणा हसन्मुखा आप्ताः सहृदयाश्च श्रीमन्तः सो. ति. नागराज–महाबलेश्वरभट्टप्रभृतयः अन्ये च सखायः यैः सह सति समागमे यथावकाशं चापलेन व्याकरणादौ शास्त्रे कतिषुचन विषयेषु चर्चां कुर्वन्नासम् । गच्छता कालेन स्वशास्त्रेऽपि निर्णयनायिनीं काञ्चित् कृतिं किमर्थं न रचयेयमिति विचारः समुत्पन्नः यस्यैव फलं सम्प्रति भवतां पुरतो दृश्यते । तदहं प्रसङ्गेऽस्मिन् तान् सर्वान् स्मरामि । अत्र ये विषयाः तेषु कतिपये **'अप्पयदीक्षितानां साहित्यशास्त्रीयकृतीनां विमर्शात्मकमध्ययनम्'** इत्यस्मिन् शोधप्रबन्धे मया विचारिताः सन्ति यस्तावत् तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठे साहित्यविभागे प्राध्यापकस्य तत्रभवतः श्रीमतः प्रो. लक्ष्मीनरसिंहभट्टमहाभागस्य मार्गदर्शनेन कृतो वर्तते । तस्मात् परम्परया कृतोपकारे तस्मिन्नप्यन्त्यन्तं कृतज्ञोऽस्मि ।

अन्यदिदम् – अस्याः कृतेः प्रकाशनेऽसमर्थोऽहं राष्ट्रियसंस्कृतसंस्थानं वदान्यं तत्कुलपतिं च तत्रभवन्तं श्रीमन्तं डा. राधावल्लभत्रिपाठिमहाभागं शास्त्रप्रियं विज्ञाय धनेन साहाय्यमयाचम् । कृतिमिमां परिशील्य शते अशीतिं [८०%] रूप्यकाणि

साहाय्यं संस्थानात् प्रदाप्य मामुपकृतवानस्ति । अनेन प्रकाशने या समस्या कालोरगीव मे भयं ददती अवर्तत सा पश्यत्येव मयि दूरं गतेति ससन्तोषं निवेदयामि । अस्मिंश्च कर्मणि विशेषत कृतप्रयत्नं संस्थानस्य कुलसचिवं तत्रभवन्तं श्रीमन्तम् डा. आर्, देवनाथमहोदयं सदा स्मरति मे मनः । तदत्यन्तोपकारिणौ तावुभावपि महान्तौ कृतज्ञः सन् सर्वथा मनसा नानमीमि, उपकारकं च संस्थानं सर्वदा सास्मरीमि ।

कृतावस्यां वाक्ययोजनादिद्वारा कृतोपकारौ स्तः भगिनी डा. शान्तला वयस्यश्च संस्कृतभारतीप्रमुखः डा. एच्. आर्. विश्वासः । उपकारं च तं स्मरन् तयोरभ्युदयं भगवन्तं प्रार्थये । अन्ये च कतिपये मच्छिष्याः साक्षात् परम्परया वा उपकरणेन मामधमर्णं कृतवन्तः । तेभ्यः आशिषमन्तरेण किमन्यद् प्रदद्याम्?

स्युर्नामात्र मुद्रणे, प्रतिपादने, निष्कर्षे, वाक्यप्रयोगादौ वा दोषाः, अज्ञानवैचित्त्यादीनां मनुष्ये स्वाभाविकत्वात् तथापि मनस्विनो भवन्तः तान् सर्वान् सहमाना गुणानेव गृह्णन्ति दोषांश्च जहतीति मे विश्वासः । प्रकृतिरियं हि महतां यद्दोषगुणहानोपादानबुद्धिः । ये पुनरसहृदयाः दोषान् प्रदर्श्य प्रदर्श्य मां हसेयुः । सा तावत् तेषां प्रकृतिः यत्ते स्वयं किञ्चिदपि न कुर्वन्ति कुर्वतश्च निराशयन्ति । हसन्तु ते कामम्, वृश्चिका दंशनमन्तरेण किमन्यत् कुर्वन्ति? नहि कुक्कुरा बुक्कन्तीति मतङ्गजो मार्गं जहाति । कृतेरस्या ग्राह्यत्वे हेयत्वे वा युक्तिदृष्ट्यो विद्वांसः प्रमाणम् न पुनस्ते मुधा मुखराः । सन्त्यत्र विद्वांसः ये खल्ववश्यं मन्ये मां पन्थानं दर्शयिष्यन्ति । अस्य च परिष्करणे निर्दोषीकरणे वा यद्यस्ति सचेतसां तेषां हितवचनं तर्हि नूनमयं नतमौलिः श्रोतुमुत्सहते इति सप्रश्रयं निवेदयन् विरमामि ॥

विवेचितं यथाशक्ति काव्यतत्त्वं सयुक्तिकम् ।
नीरक्षीरविवेकेन विद्वानत्र प्रवर्तताम् ॥

उडुपी [रौप्यपीठम्] कर्णाटकम् — विदुषां वशंवदः
शालि. शकः – १९३२ — नरसीपुरम्, लक्ष्मीनारायणभट्टः
क्रिस्तशकः – २०११

विषयानुक्रमणिका

प्रथमः स्तबकः – काव्यस्वरूपनिरूपणम् १–४८

१. सम्प्रदायानां विवरणम् ------------- १

१. अलङ्कारसम्प्रदायः ५
२. रीतिसम्प्रदायः ६
३. ध्वनिसम्प्रदायः ९
४. औचित्यसम्प्रदायः १४
५. वक्रोक्तिसम्प्रदायः १६
६. रससम्प्रदायः २१
* भट्टलोल्लटस्य मतम्
* भट्टशङ्कुकस्य मतम्
* भट्टनायकस्य मतम्
* अभिनवगुप्तस्य मतम्

२. काव्यलक्षणम् ------------- २३

* प्राचीनमतानां निरूपणम् २३
* शब्दार्थयुगलस्यैव काव्यत्वमिति समर्थनम् ३०
* प्राचीनमतपरीक्षणम् ३५
* काव्यलक्षणं किं भवितुमर्हति? ३७
* प्रकारान्तरेण लक्षणस्य विचारः ४०

द्वितीयः स्तबकः – काव्यविभागः ४९–६५

* प्राचीनानां मतम् ४९
* प्राचीनमतानां परीक्षणम् ५३
* विभागान्तरस्य प्रदर्शनम् ५६
* प्राचीनसम्मतानां रसाष्टविधत्वादीनां विमर्शनम् ६०

तृतीयः स्तबकः – काव्यकारणम् ६६–७१

* प्राचीनानां मतस्य विशदीकरणम् ६६
* प्राचीनमतानां परीक्षणं निष्कर्षश्च ७०

चतुर्थः स्तबकः – काव्यप्रयोजनम् ७२–७८

* प्राचीनमतानां विवरणम् ७२
* कोऽत्र निष्कर्षः ७३

पञ्चमः स्तबकः – वृत्तिनिरूपणम् ७९–१९४
* प्राचीनानां मतस्य निरूपणम् ७९
* किं मतमत्र ज्यायः? ८१
* प्राचीनानां मतस्य परीक्षणम् ८३
* अर्थत्रैविध्यम् ८५
१. अभिधानिरूपणम् -------- ८६
* लक्षणे मतभेदः ८७
* नानामतानां परीक्षणम् ८८
* दीक्षितकृतलक्षणे जगन्नाथस्याक्षेपः तत्समाधानं निष्कर्षणं च ८९
२. अभिधाप्रभेदनिरूपणम् -------- ९३
* प्राचीनमतानां सोदाहरणं विवरणम् ९३
* किमत्र युक्तम्? ९६
३. लक्षणानिरूपणम् -------- ९७
* लक्षणे मतभेदः ९८
* नानामतानां परीक्षणम् १०२
* लक्ष्यार्थस्य प्रतीतिः कथम्? १०७
४. लक्षणाप्रभेदनिरूपणम् -------- १०९
* नानामतानां निरूपणं प्रभेदानां चोदाहरणनिर्देशनम् १०९
* शुद्धसाध्यवसानाया जहल्लक्षणायामेवान्तर्भावः ११०
* मुखं चन्द्र इत्यत्र लक्षणा नास्तीति प्रतिपादनम् १२१
* मुखं चन्द्र इत्यत्र जगन्नाथस्याक्षेपः तथा तत्समाधानम् १२६
* किं मतं तावदत्र ग्राह्यम्? १३०
* कस्तावदत्र सिद्धान्तो भवितुमर्हति? १३९
५. व्यञ्जनानिरूपणम् -------- १४०
* प्राचीनमतनिरूपणं तथा तत्परीक्षणम् १४०
* किं तावदस्या लक्षणम्? १४३
६. व्यञ्जनाप्रभेदनिरूपणम् -------- १४५
१. अभिधामूलव्यञ्जना १४५
* लक्षणे मतभेदः १४५
* मम्मटमतम्

* ध्वनिकारमतम्
* लोचनकारमतम्
* अप्पयदीक्षितमतम्
* प्राचीनमतनिराकरणपूर्वकं जगन्नाथमतम् १५१
* कस्तावदत्र निर्णयः? १५५
* नानार्थकशब्दस्थले युगपदेवार्थद्वयस्य प्रतीतिः १६३
* व्यङ्ग्यस्य सिद्धिः न प्रमाणान्तरेणेत्युपपादनम् १६४

२. लक्षणामूलव्यञ्जना १६७
* व्यङ्ग्यस्य सिद्धिः न प्रमाणान्तरेणेत्युपपादनम् १६८

३. आर्थव्यञ्जना १६९

७. व्यञ्जनाविसंवादः १७१

१. भट्टलोल्लटस्य मतं तथा तन्निराकरणम् १७१
२. भट्टमुकुलस्य मतं तथा तन्निराकरणम् १७३
३. धनिकस्य मतं तथा तन्निराकरणम् १७५
४. भाट्टमीमांसकानां मतं तथा तन्निराकरणम् १७८
५. प्राभाकराणां मतं तथा तन्निराकरणम् १७९
६. महिमभट्टस्य मतं तथा तन्निराकरणम् १८०
७. नैयायिकानां मतं तथा तन्निराकरणम् १८२

८. व्यञ्जनाया विलक्षणत्वम् १८२
* व्यञ्जनाया अङ्गीकार्यत्वेन समर्थनम् १८४

९. संयोगादीनां निरूपणम् १८६

१. संयोगः
२. विप्रयोगः
३. साहचर्यम्
४. विरोधिता
५. अर्थः
६. प्रकरणम्
७. लिङ्गम्
८. शब्दान्तरसन्निधिः
९. सामर्थ्यम्
१०. औचिती
११. देशः
१२. कालः
१३. व्यक्तिः

१४. स्वरः
१५. अभिनयः
१६. अपदेशः

षष्ठः स्तबकः – काव्यप्रभेदनिरूपणम् १९५–२४८

१. उत्तमकाव्यम् ––––– १९५
* प्राचीनानां मतम् ………… १९५
* प्राचीनमतानां परिशीलनम् ………… २००
* कस्तावदत्र निर्णयः साधुः? ………… २०१
* रसो नाम कः? ………… २०२
* रससूत्रव्याख्यानम् ………… २०८
१. भट्टलोल्लटस्य मतम्
२. शङ्कुकस्य मतम्
३. भट्टनायकस्य मतम्
४. नवीनानां मतम्
५. अभिनवगुप्तस्य मतम्
* रसे सम्भवतां विघ्नानां निरूपणम् ………… २२१
* जगन्नाथकृतमभिनवगुप्तमतस्य विवरणं तन्नाक्षेपश्च … २२३
* कस्तावदत्र निर्णयो ज्यायान्? ………… २२५
* रसे चैतन्यस्वरूपत्वस्य समर्थनम् ………… २२८
* रसस्य रसत्वादिनाष्टविधत्वमिति प्राचीनमतस्य निरूपणम् २३७
* जगन्नाथकृतं तत्प्रत्याख्यानम् ………… २३८
* रसे संलक्ष्यक्रमत्वस्य असंलक्ष्यक्रमत्वस्य च विचारः २३९
२. मध्यमकाव्यम् ––––– २४२

सप्तमः स्तबकः – दोषनिरूपणम् २४९–२८६

* दोषाणां लक्षणम् ………… २४९
१. पदगता दोषाः ––––– २५१
१. श्रुतिकटुत्वम्
२. च्युतसंस्कृतिः
३. अप्रयुक्तत्वम्
४. असमर्थत्वम्
५. निहतार्थत्वम्
६. अनुचितार्थत्वम्
७. निरर्थकत्वम्
८. अवाचकत्वम्

९. अश्लीलत्वम्
१०. सन्दिग्धत्वम्
११. अप्रतीतत्वम्
१२. ग्राम्यत्वम्
१३. नेयार्थत्वम्
१४. क्लिष्टत्वम्
१५. विधेयाविमर्शः
* पर्युदासप्रसज्यप्रतिषेधविचारः २५४
१६. विरुद्धमतिकृत्त्वम्
* दोषाणामाश्रयस्य निर्णयः २६५
२. पदांशगता दोषाः ----- २६७
१. श्रुतिकटुत्वम्
२. निहतार्थत्वम्
३. निरर्थकत्वम्
४. अवाचकत्वम्
५. अश्लीलत्वम्
६. सन्दिग्धत्वम्
७. नेयार्थत्वम्
३. वाक्यगताः दोषाः ----- २६८
अ] पदसाधारणा दोषाः २६९
१. दुःश्रवत्वम्
२. अप्रयुक्तत्वम्
३. निहतार्थत्वम्
४. अनुचितार्थत्वम्
५. अवाचकत्वम्
६. अश्लीलत्वम्
७. सन्दिग्धत्वम्
८. अप्रतीतत्वम्
९. ग्राम्यत्वम्
१०. नेयार्थत्वम्
११. क्लिष्टत्वम्
१२. अविमृष्टविधेयांशत्वम्
१३. विरुद्धमतिकृत्त्वम्
आ] वाक्यमात्रगता दोषाः २७४
१. वर्णानां प्रतिकूलत्वम्
२. आहतविसर्गत्वम्

३. लुप्तविसर्गत्वम्
४. विसन्धित्वम्
५. हतवृत्तत्वम्
६. न्यूनपदत्वम्
७. अधिकपदत्वम्
८. कथितपदत्वम्
९. पतत्प्रकर्षता
१०. समाप्तपुनरात्तत्वम्
११. अर्धान्तैकपदता
१२. अभवन्मतयोगः
१३. अनभिहितवाच्यत्वम्
१४. अपदस्थपदत्वम्
१५. अस्थानस्थसमासत्वम्
१६. सङ्कीर्णत्वम्
१७. गर्भितत्वम्
१८. प्रसिद्धिहतत्वम्
१९. भग्नप्रक्रमत्वम्
२०. अक्रमत्वम्
२१. अमतपरार्थता
* दोषेषु विशेषविचारः २७९
४. अर्थगता दोषाः ------ २८०
१. अपुष्टत्वम्
२. कष्टत्वम्
३. व्याहतत्वम्
४. पुनरुक्तत्वम्
५. दुष्क्रमत्वम्
६. ग्राम्यता
७. सन्दिग्धत्वम्
८. निर्हेतुत्वम्
९. प्रसिद्धिविरुद्धत्वम्
१०. विद्याविरुद्धत्वम्
११. अनवीकृतत्वम्
१२. नियमेऽनियमः
१३. अनियमे नियमः
१४. विशेषेऽविशेषः

१५. अविशेषे विशेषः
१६. साकाङ्क्षत्वम्
१७. अपदयुक्तत्वम्
१८. सहचरभिन्नत्वम्
१९. प्रकाशितविरुद्धत्वम्
२०. विध्ययुक्तत्वम्
२१. अनुवादायुक्तत्वम्
२२. त्यक्तपुनःस्वीकृतत्वम्

५. रसगता दोषाः ----- २८४

अष्टमः स्तबकः – गुणनिरूपणम् २८७–३००

* प्राचीनानां मतेन लक्षणम् २८७
* प्राचीनमतेन प्रभेदाः तेषां च लक्षणम् २८८
* प्राचीनमतानां परीक्षणम् २९०
* जगन्नाथोऽत्र किं मन्यते? २९३
* कस्तावदत्र निर्णयः? २९४
* रसेषु माधुर्यादीनां स्थितिः २९६
* कस्तावत् निर्णयः? २९७

नवमः स्तबकः – रीतिनिरूपणम् ३०१–३०४

* रीतिलक्षणं तद्विभागश्च ३०१
* कस्तावत् सिद्धान्तः? ३०४

दशमः स्तबकः – अलङ्काराणां लक्षणं तद्विभागश्च ३११– ३२८

* अलङ्काराणां लक्षणे प्राचीनानां मतं तथा निष्कर्षश्च ३१२
* अलङ्काराणां विभागः ३१५
* शास्त्रेऽस्मिन् कीदृशः शाब्दबोधः स्वीकार्यः ३१६
* शाब्दबोधे विषये मतभेदः ३१६
* कस्तावत् निर्णयः साधुः? ३१९
* शाब्दिकमतं न साधु ३१९
* पश्य मृगो धावतीत्यत्र दोषो न भवति ३२३
* प्रथमान्तविशेष्यकबोधाङ्गीकारे बाधकं नास्ति ३२५
* नैयायिकमीमांसकमतयोरनुपादेयत्वम् ३२७

———0———

सङ्केताक्षरविवरणम्

अ.को	अमरकोशः, प्र. का.– प्रथमः काण्डः
अभिनव.	अभिनवभारती
अष्ट.	अष्टाध्यायी
औचित्य.	औचित्यविचारचर्चा
का.द	काव्यदर्पणः
का.प्र	काव्यप्रकाशः, प्र. उ.– प्रथमः उल्लासः
का.मी	काव्यमीमांसा, प्र. अ.– प्रथमः अध्यायः
कारि.	कारिकावली
का.वा.	कात्यायनवार्तिकम्
काव्याद.	काव्यादर्शः
काव्यानु.	काव्यानुशासनम्
काव्याल	काव्यलङ्कारः रुद्रटकृतः
काव्यालं	काव्यलङ्कारः
का.सू	काव्यालङ्कारसूत्रवृत्तिः, प्र.अ, प्र.अ. – प्रथमम् अधिकरणम्, प्रथमः अध्यायः
कुमार.	कुमारसम्भवम्, प्र. स. — प्रथमः सर्गः
कु.व.	कुवलयानन्दः
गीता.	भगवद्गीता
चन्द्र.	चन्द्रालोकः, प्र.म – प्रथमो मयूखः
चन्द्रिका.	चन्द्रिका, मदनमोहनझाशर्मकृता रसगङ्गाधरव्याख्या
जै.सू	जैमिनिसूत्रम्
तन्त्र.	तन्त्रवार्तिकम्
द.रू	दशरूपकम्
ध्वनि.	ध्वन्यालोकः, प्र.उ. – प्रथमः उद्योतः
ना.शा	नाट्यशास्त्रम्, ष.अ. – षष्ठः अध्यायः
निरुक्त.	निरुक्तम्
न्या.सि.मु.	न्यायसिद्धान्तमुक्तावली
प.ल.म	परमलघुमञ्जूषा
पा.भा	पातञ्जलभाष्यम्
प्रताप.	प्रतापरुद्रीयम्
बृहदा.	बृहदारण्यकोपनिषत्

भा.सा.	भाट्टसारः
भा.र	भाट्टरहस्यम्
म.भा.	महाभारतम्
मर्मप्र.	गुरुमर्मप्रकाशः
माघ.	माघकाव्यम स–१. –प्रथमः सर्गः
मालविका	मालविकाग्निमित्रम्, द्वि.अ. – द्वितीयः अङ्कः
मुण्डक.	मुण्डकोपनिषत्
रघु.	रघुवंशः, स–१. –प्रथमः सर्गः
रस.	रसगङ्गाधरः, द्वि.आ – द्वितीयम् आननम्
लो.	लोचनम्, प्र.उ. –प्रथमः उद्योतः
व.जी.	वक्रोक्तिजीवितम्, प्र.उ. – प्रथम उन्मेषः
वाक्य.	वाक्यपदीयम्
वृत्त.	वृत्तरत्नाकरः
वृत्ति.वा.	वृत्तिवार्तिकम्, प्र.प. – प्रथमः परिच्छेदः
वै.म.सि.	वैयाकरणसिद्धान्तमञ्जूषा
वेणी.	वेणीसंहारम्, प्र.अ. – प्रथमः अङ्कः
वै.भू.स.	वैयाकरणभूषणसारः
शक्ति.	शक्तिवादः
श.त	शब्दतरङ्गिणी
सर्वदर्शन.	सर्वदर्शनसङ्ग्रहः
सा.द	साहित्यार्पणः, प्र.प. – प्रथमः परिच्छेदः
सि.कौ	सिद्धान्तकौमुदी

* * *

साहित्यवल्लरी

ॐ

॥ गणपतये नमः ॥

साहित्यवल्लरी

प्रथमः स्तबकः

काव्यस्वरूपनिरूपणम्

सरसिजदलतुल्ये लोचने या वहन्ती
विधुकरसदृशं या बिभ्रती मन्दहासम् ।
श्रितजनसुखदात्री शोभते या शरण्या
मम हि मनसि सेयं भारती सन्निधत्ताम् ॥१॥

ओष्ठेन बिम्बं नयनेन पद्मं केशेन गाढं तिमिरप्रतानम् ।
कण्ठेन शङ्खं वदनेन चेन्दुं निरासयन्तीं जननीं नतोऽस्मि ॥२॥

न याच्यसे देवि! धनं प्रभूतं न वा गृहं नापि विभूषणादि ।
न चैव यानं न च वृन्दमेषां याचे परं केवलमम्ब! बुद्धिम् ॥३॥

अज्ञानकूपे पतनं गभीरे प्राप्तोऽस्ति मातस्तव सूनुरेकः ।
वक्तव्यमुक्तं तदनु प्रमाणं वात्सल्यपूर्णं हृदयं त्वदीयम् ॥४॥

साहित्यवल्लरीमेतां काव्यतत्त्वविवेचनीम् ।
लक्ष्मीनारायणो भट्टः कुरुते विदुषां मुदे ॥५॥

अथ काव्यानुशासनम् । शिष्यतेऽनेनेति शास्त्रम् । तच्च वाक्यम् । तेन शासनं चाज्ञातचरस्यार्थस्य लक्षणविभागादिना ज्ञापनम् । काव्ये तादृशोऽर्थो रसः । तस्य च ज्ञापनं भवतीति हेतोः साहित्यस्यास्य शास्त्रपदव्यपदेश्यत्वम् । न चात्र गुणालङ्कारादीनामपि तथा ज्ञापनात् रसमात्रस्य उल्लेखनं न युक्तमिति वाच्यम्, तेषां समेषां रस एव विश्रान्तेरुररीकरणात् । ननु जातस्य जन्तोः संसारात् यो मोक्षः परमपुरुषार्थः तत्प्रतिपादकत्वेनैव वाक्यस्य शास्त्रत्वं न तु यत्किञ्चिदर्थस्य प्रतिपादकत्वेन – मैवम्, तथात्वे हि तस्य शास्त्रमूर्धन्यत्वेनाभ्युपगमः । न च तस्यैव शास्त्रत्वं न पुनः अन्यस्येत्याग्रहो बुधानां युज्यते, छन्दःशास्त्रादौ व्यभिचारात् । तत्र व्यवहारो

लाक्षणिक इति तु केनचित्प्रमाणेन कस्यचिदर्थस्य शास्त्रशब्दमुख्यार्थत्वेन निर्णये, पश्चाच्च तस्य बाधे सति सम्भवति नो चेद्वचनमात्रम् ।

ननु यद्विचाराय शास्त्रमिदं प्रवृत्तं तत्काव्यमेव तावदनुपादेयम्, असत्यार्थ-प्रतिपादकत्वात्, यथा –

गुणानुरागमिश्रेण यशसा तव सर्पता ।
दिग्वधूनां मुखे जातमकस्मादर्धकुङ्कुमम् ॥

अत्र तादृशेन यशसा दिग्वधूनां मुखेऽर्धकुङ्कुमं सम्पन्नमिति योऽर्थः स सुतरां न सम्भवति । असदुपदेशकत्वादपि, यथा मम चाणक्यविरागे –

चौर्यं यद्यपि निकृष्टं कथयन्ति मनीषिणः ।
तथापि जीविकार्थं तत् कृतमप्यकृतं मतम् ॥

अत्र जीविकार्थं चौर्यं कृतमपि न दोषायेत्यसदुपदेशो वर्तते । असभ्यार्थ-प्रतिपादकत्वात् खल्वपि, यथा –

हन्तुमेव प्रवृत्तस्य स्तब्धस्य विवरैषिणः ।
यथाशु जायते पातो न तथा पुनरुन्नतिः ॥

अत्र शत्रुमारणोद्युक्तस्य स्थिरस्य सततं रन्ध्रमन्विष्यतो नृपस्य प्रमादात् कार्यहानिः यथा भवति न तथा तत्सिद्धिरिति प्रकृतार्थस्य प्रतीतौ सत्यां प्रतीयमानमर्थान्तरं सुरतसम्बन्धित्वात् अश्लीलम् । तस्मात् शास्त्रमेतत् अनुपादेयमिति चेत् – मैवम्, आद्ये हि तादृशेन यशसा दिग्वधूनां मुखेऽकस्मादर्धकुङ्कुमं जातमित्यर्थेन गुणानुरागयोः सर्वत्रापि व्यापनस्य प्रतीतिरिति तदर्थस्य राजोत्कर्षप्रयोजकत्वं वर्तते, द्वितीये इतिवृत्तवशायातत्वेन निबद्धस्यापि चोरो वक्तेति तद्वैशिष्ट्यादर्थस्य हेयत्वेनावधारणम्, अन्तिमे तु असभ्यस्यापि तदर्थस्य प्रकृतान्तरकामशास्त्रसम्बन्धित्वेनावश्यं निरूपणीयत्वम् । नहि मनःसंवादिनो लोकव्यवहारान् निबध्य श्रोतॄन् पुमर्थाभिमुखान् चिकीर्षतो विपश्चितो गर्ह्योऽपि प्रस्तावानुपाती व्यवहारः सुत्यजो भवति । काव्यालापांश्च वर्जयेत् इत्यादिकं तु वचनं

सदुपदेशशून्यकाव्यविषयकमिति, शास्त्राधिकृतप्रज्ञावत्पुरुषोद्देश्यकमिति वा ग्रहणे नासङ्गतम् । किञ्च यदीदं काव्यं न स्यात् तर्हि प्रवृत्तिभूमेर्विरहेण महान् हि सुकुमारमतीनां समूहोऽमार्गगामी नितरां व्यसनमापद्येत, समाजस्य च कण्टकवत् पीडायै कल्पेत । सति पुनरस्मिन् काव्यमार्गे स एव 'रामादिवत् वर्तितव्यं न रावणादिवत्' इत्याद्युपदेशेन साधुजनसमाश्रितं पन्थानं सेवमानः तस्यैवोपकारायेति काव्यमेतदवश्यं ग्राह्यम् ।

अन्यच्च, काव्यमार्गस्यास्य विरहे सुकुमारमतीनां वेदान्तप्रतिपाद्यमोक्षस्य स्थूलरूपेणापि वा कथं प्रत्यायनम्? न च तेषां तेन प्रयोजनं नास्तीति वाच्यम्, सर्वेषामपि तदाभिमुख्येनैव नेतव्यत्वात् । वेदान्ते हि सर्वासां चित्तवृत्तीनां ध्वंसे सति मोक्ष इत्यभ्युपेयते । अस्य च मोक्षस्य स्वरूपं प्रज्ञावतामेव प्रतीतं भवितुं शक्नोति नान्येषाम् । शास्त्रेणानेन शान्ताभिधानस्य मोक्षस्य यत्प्रतिपादनम् तेन शाश्वतस्य मोक्षस्याप्रतीतावपि स्थौल्येन तु प्रतीतिरवश्यं भवति, तथाहि – काव्ये रसः तावत् जीवितभूत इत्येतत् सर्वसम्मतम् । रस्यते इति व्युत्पत्त्या रसशब्दोऽयं रसो भावश्चेति उभयपरः। रसश्च शृङ्गारादिः नवविधः । भावस्तु निर्वेदादिः गुरुदेवादिविषयकरतिश्चेति चतुस्त्रिंशद्विधः । सर्वेषामेतेषां धर्मार्थेषु त्रिष्वेवाद्येषु पुरुषार्थेषु सम्भवः । तेषामन्यतमस्य शान्तस्य तु निखिलचित्तवृत्तिध्वंसरूपशमस्थायिकस्य केवलं निवृत्तिप्रधाने मोक्षे । एतेन [१]काव्यदृष्ट्या शान्तः शास्त्रदृष्ट्या तु मोक्ष इति विज्ञेयम् । तत्र स्यान्नाम वेदान्तप्रतिपाद्यो मोक्षः शाश्वतिक आत्यन्तिकश्च । काव्यात् जायमानस्तु शान्त आस्वादसमकालिकत्वात् नश्वरः, विभावादिविषयकत्वात् किञ्चिन्मात्रश्चेति वैलक्षण्यं तथापि साम्यं तावदनपलाप्यम् । एतेन शान्तोऽयं महतो भवनस्येव मोक्षस्य विज्ञानाय

१. सर्वेषामिव शान्तस्यापि रसस्य पूर्वावस्था परावस्था चेति अवस्थाद्वयम् । तत्र पूर्वावस्थामात्रं काव्यस्य विषयः । परावस्था तु वेदान्तशास्त्रस्येति विषयविभागः । परावस्थागतस्यैव शान्तस्य मोक्षशब्देन व्यवहारः, यदुक्तम् – तदेवमनुक्रमणीनिर्दिष्टेन वाक्येन भगवद्व्यतिरेकिणः सर्वस्यान्यस्यानित्यतां प्रकाशयता मोक्षलक्षण एवैकः परः पुरुषार्थः शास्त्रनये काव्यनये च तृष्णाक्षयसुखपरिपोषलक्षणः शान्तो रसः महाभारतस्याङ्गित्वेन विवक्षित इति सुप्रतिपादितम् । ध्वनि. च.उ. का–५.

कृता काचित् लघ्वी प्रतिकृतिरिवेत्युक्तं भवति । तदेवं प्रवृत्तिजीवितानां धर्मार्थकामानां बाध्यमानत्वे सति यथा पर्यन्ते मोक्षः तथा सर्वेषां रसानां भावानां च बाध्यमानत्वे सति पर्यन्ते शान्त इति बोध्यम्, यदाह मुनिः –

[२]न यत्र दुःखं न सुखं न चिन्ता न द्वेषो नापि मत्सरः ।
समः सर्वेषु भूतेषु स शान्तः प्रथितो रसः ॥
भावा विकारा रत्याद्याः शान्तस्तु प्रकृतिर्मतः ।
विकारः प्रकृतेर्जातः पुनस्तत्रैव लीयते ॥
स्वं स्वं निमित्तमासाद्य शान्ताद्भावः प्रवर्तते ।
पुनर्निमित्तापाये च शान्त एवोपलीयते ॥ इति ।

प्रकृतिविकृतिभावश्च शृङ्गारादेः शान्तेन न मृद्घटयोरिव किन्तु क्षुभित-प्रसन्नयोः सरोवरयोरिव । अस्ति च लोके प्रयोगः यथा प्रसन्ने सरोवरे – भोः! इयं हि प्रकृतिः । क्षुभिते च यथा – भोः! इयं च विकृतिः ॥ तद्वदिहापि । तथा च काव्यमिदं शान्तस्याभिव्यञ्जनेन शतादिगुणं तदतिशायिनो वेदान्तप्रतिपाद्यमोक्षस्य परिचायकं सत् सुकुमारमतीनां तदाभिमुख्येन प्रवृत्तौ निमित्तं भवतीति अवश्यमुपादेयम् ॥

तद्विचारपरं शास्त्रमेतत् साहित्यशब्देन व्यपदिश्यते, शब्दार्थयोः सहभावस्य अनितरसाधारणस्य प्रतिपादनात् । नहि शास्त्रान्तरे एतादृशं साहित्यमुपलभ्यते । ननु भोः! तत्रापि साहित्यमस्ति – सत्यम्, तथापि गुणालङ्कारादिसंस्कृतं यादृशमत्र न तत्र तादृशमस्ति । अलङ्कारशब्देनापि व्यपदिश्यते । पूर्वे हि भामहादयो विद्वांसो यमकोपमादेरलङ्कारवर्गस्य आत्मत्वं मन्यमानाः स्वकृतौ तमेव विस्तरेण निरूपयामासुः, येन गच्छति काले शास्त्रमिदम् अलङ्काराणां प्राधान्येन प्रतिपादकं तन्नाम्नैव प्रथां गतम्, मल्लग्रामवत् । यद्यपि पश्चादर्वाचीनैः रसादेः पदार्थान्तरस्यात्मत्वमिति व्यवस्थापनात् अलङ्काराणां प्राधान्यं कथामात्रावशेषम् तथापि तदेवाधुनापि प्रवर्तते, गतानुगतिकत्वात् लोकस्य । यद्वा, 'काव्यं ग्राह्यमलङ्कारात्, सौन्दर्यमलङ्कारः' [३]इत्युक्त्या अलङ्कारो नाम

२. ना.शा. ष.अ. शान्तरसनिरूपणम् । उल्लेखः, लो.ध्वनि. तृ.उ. का–२६
३. का.सू. प्र.अधि. प्र.अ.

सौन्दर्यम् । तस्य चात्र शब्दार्थनिष्ठस्यैव ग्रहणम्, प्रकृतत्वात् । तच्च 'स च दोषगुणहानोपादानाभ्याम्' इति वचनेन दोषाणां हानात् गुणानां चादानात् सिध्यति । एतादृशस्यैव सौन्दर्यापरपर्यायस्य अलङ्कारस्य प्रतिपादकत्वेन शास्त्रमिदं तन्नाम्ना व्यवहृतमित्यस्तु । एतेन व्यपदेशस्य असाधारणधर्म-प्रयोज्यत्वम् उपपादितं भविष्यतीत्यौचित्यमपि सम्पद्यते ॥

काव्येऽस्मिन् रसो गुणोऽलङ्कारो ध्वनिः वक्रोक्तिः रीतिः औचित्यं तथाविधमन्यच्चेति भूयांसोऽर्थाः सन्ति । तेषु कस्य तावत्सारभूतत्वमिति विषये महती विप्रतिपत्तिः वर्तते बुधेषु । अनया च विप्रतिपत्त्या तत्तत्प्राधान्यपराः षट् सिद्धान्ता जनिं गताः येषां शास्त्रेऽस्मिन् सम्प्रदायशब्देन प्रस्थानशब्देन च व्यवहारः । समासेन एषां निरूपणं क्रियते –

१. अलङ्कारसम्प्रदायः

अलङ्क्रियते शब्दः अर्थश्च अनेनेति अलङ्कारः शोभाधायको धर्मः । स च शब्दनिष्ठः शब्दालङ्कारः अर्थनिष्ठस्तु अर्थालङ्कारः । आद्यो यमकानुप्रासादिः अन्त्यश्च उपमारूपकादिः । सुन्दरं शब्दार्थयुगलं तावत् काव्यम् । सौन्दर्यं च यमकोपमादिनेति काव्ये तस्यैव प्राधान्यम् । तस्मात् तस्यैव चात्मशब्देन व्यपदेशः । सम्प्रदायस्यास्य प्रवर्तको भामहः । जयदेव–रुद्रट–उद्भटादयोऽपि एतमेव सम्प्रदायमनुसरन्ति, [४]यदाहुः –

* न कान्तमपि निर्भूषं विभाति वनितामुखम् ।
* अनेन वागर्थविदामलङ्कृता विभाति नारीव विदग्धमण्डना । इति भामहः ।
* अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती ।
  असौ न मन्यते कस्मादनुष्णमनलङ्कृती । इति जयदेवः ।
* गुणालङ्काररहिता विधवेव सरस्वती । इति रुद्रटः ।

एतेषां मतेन रसादयोऽपि रसवदादिशब्दव्यपदेश्या अलङ्कारा एव केचन । तत्र भरतः उपमादीन् चतुरोऽलङ्कारान् अङ्गीचकार, भामह एकोनचत्वारिंशतम्, उद्भट एकचत्वारिंशतम्, जयदेवश्च शतम् । एवमुत्तरोत्तरं विमर्शकैः नवनवानाम्

४. १. काव्यालं. प्र.प. का–१३ तृ.प.का–५८ २. चन्द्र. प्र.म. का–८ ३. काव्याल.

अभ्युपगमेन अलङ्काराणां प्रपञ्चः क्रमेण विकासं गत इति सर्वेषामपि स्फुटमेवाभासते । यद्यपि अलङ्काराणामियत्ता ब्रह्मणापि न निश्चेतुं शक्या, उक्तिवैचित्र्याणामनन्तत्वात् तथापि दिग्दर्शनाय तैरेतावतां प्रदर्शनम् । अनयैव दिशा यद्यस्ति अलङ्कारान्तरं तत्स्वयमेव विज्ञेयमिति तेषामाकूतम् । न च संङ्ख्यया नियमने तदाकूतमिति विज्ञेयम्, उत्तरोत्तरं कृतस्योपसंख्यानस्य असाधुत्वापत्तेः । अत एव दीक्षितादिभिः कृतं नवानामपि केषाञ्चिदलङ्काराणां परिगणनं न दोषाय ॥

वस्तुतस्तु अलङ्कारस्यात्मत्वमिति यदुक्तम् – तच्चिन्त्यम्, शोभाकारि-धर्मस्य आभरणस्थानीयत्वमिति सारभूतत्वासम्भावात् । अथैतद्वचनम् आतिशायनिकत्वादुपादेयतायां तात्पर्यग्राहकमिति मन्यते तर्हि दोषाभावः ॥

२. रीतिसम्प्रदायः

रीङ् गताविति धातोः सा व्युत्पत्त्या रीतिरुच्यते इति भोजराजस्य वचनात् रीङ् इति धातोः रिणन्ति गच्छन्ति गुणा अस्यामित्यधिकरणे क्तिनि रीतिशब्दो निष्पद्यते । रीतिश्च गुणवान् पदविन्यास इति वामनः । तन्मतेन तावत् अस्याः सारभूतत्वादात्मत्वम्, यदाह – 'रीतिरात्मा काव्यस्य, विशिष्टा पदरचना रीतिः,विशेषो गुणवत्ता' ॥ गुणाश्च शब्दार्थयोः शोभाकारिणो धर्माः । ते च –

श्लेषः प्रसादः समता माधुर्यं सुकुमारता ।
अर्थव्यक्तिरुदारत्वमोजःकान्तिसमाधयः ॥

इत्युक्तदिशा शब्दगता दश अर्थगताश्च दशेति विंशतिः समाननामानो [५]विभिन्नलक्षणाश्च । इयं च रीतिः वैदर्भी गौडीया पाञ्चाली चेति त्रिविधा ।

५. काव्यशोभायाः कर्तारो धर्मा गुणाः । तेषु शब्दगुणा यथा – १. मसृणत्वं श्लेषः, एकपदवद्भासनमिति यावत् । २. शैथिल्यं प्रसादः. केवलस्य शैथिल्यस्य दोषत्वात् ओजोमिश्रितशैथिल्यं प्रसाद इति बोध्यम् । ३. मार्गभेदः समता, मार्गश्च रीतिः । ४. पृथक्पदत्वं माधुर्यम् । ५. अजरठत्वं सुकुमारता, अपारुष्यमिति यावत् । ६. अर्थव्यक्तिहेतुत्वम् अर्थव्यक्तिः । ७. विकटत्वमुदारत्वम्, विकटत्वं पदानां नृत्यप्रायत्वम् । ८. गाढबन्धत्वमोजः । ९. आरोहावरोहक्रमः समाधिः. बन्धस्य गाढत्वं शैथिल्यं चेति यावत् । १०. औज्ज्वल्यं कान्तिः, पुराणच्छायाविरह इति यावत् ।

तत्र वैदर्भी समग्रगुणा । गौडीया ओजःकान्तिमती । पाञ्चाली माधुर्यसौकुमार्योपपन्ना । एतासु प्रथमा ग्राह्येति तदाशयः ।

यद्यपि अर्वाचीना ध्वनिकारादयो गुणरीत्योः भेदं मन्यमाना गुणस्याधारत्वं रीतेश्चाधेयत्वम् इत्यभिप्रयन्ति । आधाराधेयभावश्च एषां मतेन [६]नियम्यनियामक–भावः । ततश्च रीतेर्नियम्यत्वं गुणस्य तु नियामकत्वमिति सिध्यति । एतच्च 'गुणानाश्रित्य तिष्ठन्ती माधुर्यान् व्यनक्ति सा' इति कारिकया व्यक्तं भवति । माधुयादिभिर्गुणैः नियम्यमाना रीतिः रसस्य व्यञ्जिका भवतीति तदर्थः । उद्भटादयस्तु घटरूपयोरिव रीतेः धर्मित्वं गुणस्य च धर्मत्वमित्यातिष्ठन्ते । वामनः पुनः [७]गुणवत्पदविन्यासस्यैव रीतित्वम् आचक्षाणः तयोरभेदम् उररीकरोतीति विशेषः । एतेन अर्वाचीनानां मतेन पदविन्यासमात्रस्य रीतित्वम्, वामनस्य मतेन गुणवतः तस्येति वैलक्षण्यमभिहितं भवति । ध्वनिकारेण तु–

असमासा समासेन मध्यमेन विभूषिता ।
तथा चाल्पसमासेति त्रिधा सङ्घटनोदिता ॥

इति तत्प्रभेदानां समासस्य सत्त्वासत्त्वाभ्यां विभजनात् तन्मतेन रीतिस्वरूपनिर्णये समासमात्रस्य प्रयोजकत्वं न तु वर्णानामपीत्यवगम्यते । अत एव –

अर्थगुणाः पुनः यथा – १. घटना श्लेषः , घटना च क्रियासन्ततिरूपः यः क्रमः, विदग्धचेष्टितरूपं यत्कौटिल्यम्, अप्रसिद्धवर्णनाविरहरूपं यदनुल्बणत्वम्, उपपादक–युक्तिविन्यासरूपा च या उपपत्तिः एषां मेलनम् । २. अर्थवैमल्यं प्रसादः, प्रकृतोपयोगिनः अर्थमात्रस्य परिग्रह इति यावत् । ३. अवैषम्यं समता सुगमत्वं वा । ४. उक्तिवैचित्र्यं माधुर्यम् । ५. अपारुष्यं सुकुमाता । ६. वस्तुस्वभावस्फुटत्वम् अर्थव्यक्तिः । ७. अग्राम्यत्वमुदारत्वम् । ८. अर्थस्य प्रौढिरोजः, प्रौढिः नाम

पदार्थे वाक्यरचना वाक्यार्थे च पदाभिधा ।
प्रौढिर्व्याससमासौ च साभिप्रायत्वमस्य च ॥

९. अर्थदृष्टिः समाधिः, अयोनेः अन्यच्छायायोनेर्वा अर्थस्य दर्शनमिति यावत् । १०. दीप्तरसत्वं कान्तिः । का.सू. तृ.अधि. अ–१,२.

६. सङ्घटनाया धर्मा गुणा इति भट्टोद्भटादयः, धर्माश्च धर्म्याश्रिता इति प्रसिद्धो मार्गः । गुणपरतन्त्रेति अत्र नाधाराधेयभाव आश्रयार्थः । नहि गुणेषु सङ्घटना तिष्ठतीति । तेन राजाश्रयः प्रकृतिवर्ग इत्यत्र यथा राजाश्रयौचित्येन अमात्यादिप्रकृतय इत्ययमर्थः, एवं गुणेषु परतन्त्रस्वभावा तदायत्ता तन्मुखप्रेक्षिणी सङ्टनेत्ययमर्थो लभ्यत इति भावः । लो. तृ.उ. सङ्घटनानिरूपणम्

७. विशिष्टा पदरचना रीतिः । विशेषो गुणवत्ता । का. सू. प्र.अधि. द्वि.अ. सूत्रम्–७.

[८]यस्त्वलक्ष्यक्रमव्यङ्ग्यो ध्वनिर्वर्णपदादिषु ।
वाक्ये सङ्घटनायां च प्रबन्धेष्वपि दीप्यते ॥

इति वदन् सङ्घटनातः पृथगेव वर्णानां रसं प्रति व्यञ्जकत्वम् आचष्टे। राजशेखरस्तु [९]वर्णविन्यासक्रमो वृत्तिरिति व्याहरन् वर्णानामेव तस्मिन् प्रयोजकत्वम् न पुनः समासस्येति विपरीतम् ।

एषा च रीतिः उद्भटानन्दवर्धनप्रभृतिभिः सङ्घटनाशब्देन, मम्मट-राजशेखरप्रभृतिभिः वृत्तिशब्देन, दण्डिकुन्तकप्रभृतिभिस्तु मार्गशब्देन व्यवह्रियते। तत्र रुद्रटो विश्वनाथश्च वैदर्भ्यादिभिः सह लाटिकेति व्यतिरिक्तमपि कञ्चित् प्रकारम् अभ्युपगच्छतः । भोजराजस्तु आवन्ती मागधी चेति प्रभेदान्तरद्वयमभिदधानो रीतेः षड्विधत्वम्, तदुक्तम् –

वैदर्भी चाथ पाञ्चाली गौडी चावन्तिका तथा ।
लाटीया मागधी चेति षोढा रीतिरिष्यते ॥

'विदर्भादिषु दृष्टत्वात् तत्समाख्या' इति वामनस्य वचनात् सर्वेऽपीमे रीतिप्रकाराः देशभेदेन प्रवृत्ता इत्यवगम्यते अन्यथा तथाभिधानम् असङ्गतमेवापद्येत। न चैवं सति वाङ्गी-औल्कली-कार्णाटीप्रभृतीनां बहूनामपि प्रभेदानां परिगणेयत्वापत्तिरिति वाच्यम्, तथा सम्भवतां तेषां पूर्वोक्तेष्वेवान्तर्भावात् नानन्त्यप्रसङ्ग इति तस्याभिप्रायः। कुन्तकस्तु [१०]रीतिप्रकाराणां नामकरणे तत्तद्देशदृष्टत्वं न निमित्तम्, देशानामनन्तत्वेन निरवधिकभेदकल्पनाप्रसङ्गात्, तत्तद्भेदस्य देशान्तरेऽपि दर्शनेन व्यभिचारापाताच्च। तस्मात् कविस्वभावस्यैवात्र निमित्तत्वम् । तत्स्वभावस्य यदि कोमलत्वं तर्हि कोमलानामेव शब्दानां स्फुरणमिति सुकुमारो बन्धः, यदि गाढत्वं तर्हि कठोराणामेवेति विचित्रः, अथ सङ्करः तर्हि उभयविधानामिति मध्यम इति पदविन्यासस्य त्रैविध्यात् रीतेरपि त्रैविध्यमित्यभिधत्ते । यद्यपि

८. ध्वनि. तृ.उ. का-२.
९. का.मी. तृ.अ.
१०. व.जी. प्र.उ. का-२४.

कविस्वभावस्यानन्त्यात् पूर्ववत् प्रभेदानन्त्यस्य प्रसङ्गः तथापि तथाङ्गीकार्यस्य तस्य प्रागुक्तप्रभेदत्रयबहिर्भूतत्वाभावात् न दोष इति तदभिप्रायः।

वस्तुतस्तु रीतेरात्मत्वं न चतुरस्रम्, मनुष्यत्वेन कल्पिते काव्ये तस्या अवयवसंस्थानतुल्यत्वात्, तत्प्रभेदेषु वैदर्भ्यादिषु तारतम्यस्य अभ्युपगमाच्च। नहि असमानप्रभेदः कश्चित् पदार्थः आत्मा भवितुमर्हति । अन्यच्च, तारतम्यकल्पनमपि असङ्गतम्, निकृष्टत्वेन परिगणिताया अपि गौडीयाया रौद्रादौ रसे अत्यन्तानुकूलत्वेनानुभवात् । अन्यच्च, विन्यासस्य शब्दधर्मत्वेन शब्दस्य च शरीरस्थानीयत्वेन तन्निष्ठधर्मस्यात्मत्वं कथं तावत् वक्तुं शक्यते? तद्रीतेरात्मत्वं गगनकुसुमायितम् । यत्पुनः रीतीनां विभजने देशभेदस्य उपाधित्वमिति निर्णीतमन्येन, अन्येन च कविस्वभावभेदस्येति – तदुभयमपि असाम्प्रतम्, रसस्वभावभेदस्यैव तत्रोपाधित्वमिति सप्रपञ्चमुत्तरत्र रीतिप्रकरणे निरूपयिष्यते ॥

३. ध्वनिसम्प्रदायः

ध्वनतीति व्युत्पत्त्या ध्वनिः व्यञ्जकः शब्दोऽर्थश्च । ध्वन्यते इति व्यङ्ग्यः। ध्वननमिति व्यञ्जनाव्यापारः । ध्वन्यतेऽत्रेति काव्यविशेष इति पदार्थपञ्चकं ध्वनिपदवाच्यम् । काव्ये वाच्यलक्ष्याभ्यामतिरिक्तोऽप्यर्थो वर्तते व्यङ्ग्याभिधानः। अयं चार्थः अङ्गनायां शरीरात् लावण्यमिव वाच्यात् व्यतिरिक्तः प्रतिभाति । तत्र काव्यरूपस्य ध्वनेरिदं तावत् [११]लक्षणम् –

> **यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ ।**
> **व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः ॥**

पञ्चविधानामपि ध्वनीनां समनियतत्वात् एकस्य लक्षणे ज्ञातेऽन्यस्यापि तत्सुज्ञानमिति पृथक् पृथक् लक्षणं नोक्तम् । तच्च व्यञ्जकीभूतः प्रधानः शब्दो ध्वनिः, तादृश एव च प्रधानोऽर्थो ध्वनिः, प्रधानार्थविषया व्यञ्जना ध्वनिरित्यादिकं स्वयमेव विज्ञेयम् । अयं च ध्वनिशब्दः पञ्चसु यत्र कुत्रचिदप्यर्थे प्रयुज्येत, यथा – 'शब्दो व्यञ्जकतां बिभ्रद् ध्वन्युक्तेर्विषयीभवेत्' इत्यादौ

११. ध्वनि. प्र.उ. का–१३.

व्यञ्जकीभूते शब्दे। 'कस्यचिद् ध्वनिभेदस्य सा तु स्यादुपलक्षणम्' इत्यादौ व्यङ्ग्ये। 'भक्त्या बिभर्ति नैकत्वं रूपभेदादयं ध्वनिः' इत्यादौ व्यञ्जनायाम्। 'व्यङ्क्ः काव्यविशेषः' इति प्रकृतवाक्ये तु काव्यविशेषे।

ननु ध्वनेरात्मत्वमिति यदुक्तं तन्न श्रद्धातुं शक्यम्, काव्यस्यात्मा ध्वनिरित्यत्र व्यङ्ग्यस्य ध्वनित्वमभिधाय ततोऽनुपदमेव योऽर्थः सहृदयश्लाघ्यः इति कारिकया वाच्येऽपि ध्वनित्वाभ्युपगमेन व्याहतत्वादिति चेत् – नैष दोषः, लोचनकारेणात्र प्रतिविधानात्, तथाहि – योऽर्थः सहृदयश्लाघ्य इत्यत्रार्थशब्देनार्थसामान्यस्य ग्रहणम्। तस्य च सहृदयश्लाघ्य इति विशेषणात् प्रतीयमानरूपविशेषेऽवस्थानं भवति, यथा – परोपकारी जनः सर्वेषाम् आनन्ददायकः इति वाक्ये जनशब्देन प्रतिपादितस्य तत्सामान्यस्य परोपकारीति विशेषणात् सज्जनेऽवस्थानम्। तद्वदत्रापि प्रतीयमानस्यैव काव्यात्मत्वमुक्तं भवति न पुनः वाच्यार्थस्यापि। नहि वाच्यः कोऽपि सहृदयश्लाघ्यो भवितुं शक्नोति। यद्यप्यर्थस्य अपातत एकत्वम् तथापि विभागबुद्ध्या विचारे विवेकिनां वाच्यः प्रतीयमानश्चेति सूक्ष्मवैलक्षण्यप्रयुक्तं शाखाद्वयमवश्यं प्रतीयते। अत एवान्यस्य सहृदयश्लाघ्यत्वेन अन्यस्य चातथात्वेन प्रतीतेरुपपत्तिः। तत्र यः प्रतीयमानरूपो भागः प्रागुक्तादेव विशेषादात्मेति कथ्यते न पुनः तच्छून्यमर्थान्तरम्। अविवेकिनस्तु संवलितत्वनैयत्यात् प्रतीयमानमर्थं न वाच्यात् व्यतिरिक्ततया ग्रहीतुं शक्नुवन्ति चार्वाका इव शरीरादात्मानम्। एवमत्र वाच्यः प्रतीयमानश्चेति विभागः अर्थसामान्यस्यैव न पुनः सहृदयैः श्लाघ्यमानस्य काव्यात्मनः प्रतीयमानस्येति न काप्यत्रासङ्गतिः। तथा चायं तद्विवक्षितोऽर्थः – यस्तावदर्थः प्रतीयमानावच्छेदेन सहृदयश्लाघ्यः सन् काव्यात्मेति व्यवस्थितो भवति तादृशस्यार्थसामान्यस्य वाच्यः प्रतीयमानश्चेति द्वौ भेदौ न तु द्वावप्यात्मानौ काव्यस्य। अयं तावद् दृष्टान्तः – यस्तावत् वृक्षः चिरावस्थायिसारः सन् गृहादिनिर्माणे उपयोगी भवति तस्य मृदुः कठिनश्चेति द्वौ भेदाविति॥

वस्तुतस्तु एवं समाधानेऽपि न तत्रत्यवृत्तिग्रन्थस्य सङ्गतिः। वृत्तिग्रन्थः तावदयम् – काव्यस्य हि ललितोचितसन्निवेशचारुणः शरीरस्येवात्मा

साररूपतया स्थितः सहृदयश्लाघ्यो योऽर्थः तस्य वाच्यः प्रतीयमानश्चेति द्वौ भेदौ ॥ किञ्चैवं समाधाने सति अनात्मनि वाच्ये सहृदयश्लाघ्यत्वाभावप्रसङ्ग इति रूपकोत्प्रेक्षादेरग्राह्यत्वापत्तिः । तस्मात् प्रकारान्तरेणैव समाधानं युक्तम्, तदेवं प्रतिभाति – काव्यस्यात्मा ध्वनिरिति बुधैरित्यत्र ध्वनिशब्देन व्यङ्ग्योऽर्थः, व्यञ्जकीभूतः शब्दः, तादृश एव चार्थः, व्यञ्जना चेति अर्थचतुष्कस्य ग्रहणं सम्भवति, बाधकाभावात् । न चैकस्य काव्यस्य कथं चत्वार आत्मानो भवितुं शक्नुवन्तीति शङ्क्यम्, चतुर्णामपि समनियतत्वेन एकस्मिन्नेव पर्यवसानात्, यथा – काव्यस्यात्मा व्यञ्जकः शब्द इत्युक्तौ व्यङ्ग्यव्यञ्जनयोरपि तत्त्वं सिद्धं भवति, यत्र व्यञ्जकः तत्र व्यङ्ग्यस्य व्यञ्जनायाश्च अवश्यम्भावात् । एवं काव्यस्यात्मा व्यञ्जकोऽर्थ इत्युक्तौ पूर्ववदेव तयोरप्यात्मत्वं सिद्धं भवति । एवं काव्यस्यात्मा व्यङ्ग्य इत्युक्तौ अन्ययोरपीत्येतत्सर्वं यथायथं स्वयमेव विज्ञेयम् । तत्र व्यञ्जकीभूतोऽर्थः तावत् वाच्य एव भवति नान्य इत्येतत् समेषां प्रायेण ज्ञातचरमिति न वक्तव्यतामर्हति । काव्यविशेषरूपस्य तु अर्थस्य सतोऽप्यत्र ग्रहणं न सम्भवति, काव्यस्यात्मा ध्वनिकाव्यमिति वैयधिकरण्येनान्वयस्यासम्भवात् ।

एवमर्थचतुष्टये ध्वनिशब्दस्य सिद्धे 'उच्चरद्भूरिकीलालः शुशुभे वाहिनीपतिः' इत्यादौ शब्दशक्तिमूलध्वनौ व्यञ्जको यो वाहिनीपत्यादिः शब्दः, सादृश्यरूपं यद् व्यङ्ग्यम्, वाहिनीपत्यादिशब्देन यार्थान्तरस्य व्यञ्जना, तत्सर्वघटितं च यत् वाक्यरूपं काव्यं ते चत्वारोऽपि ध्वनिशब्दवाच्या भवन्ति । 'यत्रासौ वेतसः पान्थ! तत्रेयं सुतरा सरित्' इत्यादौ अर्थशक्तिमूलध्वनौ तु व्यञ्जको यो वाच्यार्थः, अभिप्रायविशेषो यो व्यङ्ग्यः, वाच्यार्थेन यार्थान्तरस्य व्यञ्जना, तत्सर्वघटितं च यत् वाक्यरूपं काव्यं ते चत्वार इति विशेषः । तदिदं ध्वनिशब्दस्यार्थपञ्चकं कण्ठतोऽनुक्तमपि कारिकाकारस्याभिमतमेव, प्रयोगात्, तथाहि – तत्र व्यङ्ग्यार्थरूपध्वनेः भाक्तत्वाशङ्कायां भक्त्या बिभर्ति नैकत्वमिति व्यञ्जनाव्यापारस्य लक्षणाव्यापारेण समानरूपत्वं नास्तीति प्रतिपाद्य निराकरणात् ध्वनिशब्दस्य व्यञ्जनार्थकत्वं सिद्ध्यति । नहि कयोश्चिदर्थयोः अभेदस्याशङ्कायाम् अन्ययोरेव द्वयोर्भेदं निरूप्य तन्निराकरणं

क्रियमाणं सङ्गतिमुपयाति। एवं 'शब्दो व्यञ्जकतां बिभ्रद् ध्वन्युक्तेर्विषयीभवेत्' इति प्रयोगात् व्यञ्जकशब्दार्थकत्वम् । ततस्तुल्यन्यायात्, ध्वनतीति व्युत्पत्तेरभ्युपगमात्, प्रसिद्धत्वेन बहुधान्यैर्व्याकृतत्वेन चानिरूपणेऽपि निरूपणयोग्यत्वेन निर्णयाच्च व्यञ्जकीभूतस्य वाच्यार्थस्य ध्वनित्वमिति सिध्यति। नहि ध्वनित्वेनाप्रक्रान्तोऽर्थः ध्वनिनिरूपणपरस्य पुंसो निरूपणीयतां भजते । तदेवं वाच्यस्य व्यङ्ग्यस्य च ध्वनित्वे सिद्धेऽर्थसामान्यं मनसि निधाय तद्विभागाभिप्रायेण 'अर्थरूपध्वनेः तावत् वाच्यः प्रतीयमानश्चेति द्वौ भेदौ, इत्यभिधाने न कथञ्चिदपि दोष इति न काप्यत्रासङ्गतिः । एतेन व्यञ्जकीभूतस्य वाच्यार्थस्यैव ध्वनित्वं न पुनः यस्य कस्याप्यर्थस्येत्युक्तं भवति ॥ ततश्च 'शारदा शारदाम्भोजवदना' इत्यादौ 'मुखं चन्द्र इव सुन्दरम्' इत्यादौ च व्यङ्ग्यस्याभावात् न वाच्यार्थस्य वाचकस्य वा व्यञ्जकत्वमिति न तयोः ध्वनिशब्देन व्यपदेशः । अनुपदोक्ते उच्चरद्भूरिकीलालः इत्यादौ यत्रासौ वेतसः पान्थ इत्यादौ च तस्य सद्भावात् अस्त्येव व्यञ्जकत्वविशिष्टस्य वाचकस्य वाच्यस्य च तद्व्यपदेश इति ग्रन्थकारस्याशयो बोध्यः ॥

तत्र केचित् ध्वनिः नास्तीति वदन्ति । तेषां वादत्रयम् – गुणालङ्काराणामेव शब्दार्थशोभाकारित्वात् तद्व्यतिरिक्तो ध्वनिर्नास्तीति प्रथमः पक्षः । व्यतिरिक्तत्वेऽपि शोभाकारित्वं नास्तीति द्वितीयः । शोभाकारित्वेऽपि गुणालङ्कारेष्वेवान्तर्भावात् नास्तीति तृतीयः । तेषां सर्वेषामपि वादानामयम् [१२]उपसंहारः –

यस्मिन्नस्ति न वस्तु किञ्चन मनःप्रह्लादि सालङ्कृति
व्युत्पन्नै रचितं च नैव यद्वक्रोक्तिशून्यं च यत् ।
काव्यं तद्ध्वनिना समन्वितमिति प्रीत्या प्रशंसन् जडो
नो विद्मोऽभिदधाति किं सुमतिना पृष्टः स्वरूपं ध्वनेः ॥

अपरे ध्वनिं भाक्तं कथयन्ति । शब्दानामर्थो मुख्योऽमुख्यश्चेति द्विविधः । तत्र मुख्येऽर्थेऽभिधा । अमुख्ये तु लक्षणेति स्थिते अर्थान्तरस्याभावात्

१२. ध्वनि. प्र.उ. का–१. ग्रन्थकृत्समानकालभाविना मनोरथनाम्ना कविना कृतमिदं पद्यमिति लोचनकारः ।

व्यापारान्तरस्य प्रसक्तिरेव नास्तीति नास्ति व्यतिरिक्तो ध्वनिर्नाम व्यापारः कश्चिदिति तेषामाशयः । अन्ये पुनः ध्वनिम् अनिर्वचनीयमाकलयन्ति । आनन्दवर्धनेन सर्वानेतान् पक्षान् निराकृत्य ध्वनेरात्मत्वं व्यवस्थापितमिति स एवास्य सम्प्रदायस्य प्रवर्तक इत्यभ्युपेयते। सोऽयं व्यङ्ग्यरूपो ध्वनिः वस्तुरूपोऽलङ्काररूपो रसरूपश्चेति त्रिविधः ।

ननु व्यङ्ग्यस्यार्थस्य किं कारणं ध्वनिशब्देन व्यपदेशः? उच्यते, [१३]वैयाकरणा हि अर्थप्रतिपत्तिकारिणः स्फोटस्य व्यञ्जकान् वर्णान् ध्वनिशब्देन व्यवहरन्ति। तेषु वर्णेषु यद् व्यञ्जकत्वं तदवलोक्य सादृश्यात् प्रथमं शब्देऽर्थे च ध्वनिशब्देन व्यवहारः कृतः पश्चात्तु यस्य यस्य व्यञ्जकत्वेन योगो वर्तते तद्रूपत्वं च तस्य सर्वस्यापि । तेन शब्दवाच्यव्यङ्ग्यादयः पञ्चार्थाः ध्वनिशब्दस्य।

योऽयं ध्वनिरधुना निरूपितो वर्तते पुरातनकविनिबद्धार्थस्य प्रतिपादिकापि वाणी तेन नवत्वमायाति । तत्रापि विशेषतो रसध्वनिना । तेन स्पृष्टश्चेत् प्रतिपादितचरोऽप्यर्थः नव इवाभाति मधुमास इव द्रुमः । अनेन ध्वनेः माहात्म्यं विशदं भविष्यति ।

आलङ्कारिकेष्वेव एतादृशस्य ध्वनेः विरोधिनः कुन्तकः, महिमभट्टः, धनिकः, मुकुलः, लोल्लटः, भट्टनायकश्च [१४]इत्येते प्रधानाः सन्ति । तत्र महिमभट्टो नैयायिकमतानुयायी अन्ये च सर्वे मीमांसकमतानुयायिनः ।

आनन्दवर्धनेन ध्वनिसामान्यस्यैव आत्मत्वमभिहितम् तथापि तद्व्याख्याता लोचनकारो वस्त्वलङ्कारयोः रसे पर्यवसायित्वात् अप्राधान्यमित्यभिप्रयन् काव्यस्यात्मा ध्वनिरित्यत्र रसध्वनिरेव काव्यस्यात्मेति ग्रन्थकारस्याशयं विवृणोति। ध्वनिसम्प्रदायोऽयं रससम्प्रदायात् नातीव भिद्यते यतो ध्वनिसम्प्रदाये वस्त्वलङ्काररसरूपस्य त्रिविधस्यापि ध्वनेरात्मत्वम्, रससम्प्रदाये तु रसमात्रस्येति विशेषः ।

१३. पा.भा. पस्पशायां येनोच्चारितेन इति वाक्यस्य व्याख्यानम्। प्रदीपः

१४. कुन्तको विचित्राभिधामात्रम् अङ्गीकरोति। महिमभट्टोऽनुमानेनैव ध्वनेर्गतार्थत्वम् आचष्टे। धनिकः पुनः अभिधापरपर्यायया तात्पर्यवृत्त्या। मुकुलोऽभिधातिरिक्तं वृत्त्यन्तरं नानुमन्यते। भट्टलोल्लटः दीर्घदीर्घतरया तयैवाभिधया सर्वस्याप्यर्थस्य प्रतीतिमभ्युपैति। भट्टनायकस्तु अभिधा भावना चैव तद्भोगीकृतिरेव चेति वदन् व्यञ्जनां नोल्लिखति ।

वस्तुतस्तु ध्वनेरात्मत्वं न युक्तम्, वस्त्वलङ्कारयोः रसपर्यवसायित्वादेव अप्राधान्यमिति सारभूतत्वाभावेन आत्मत्वायोगात् । तल्लोचनकारोक्तं समञ्जसम् इत्यस्माकं प्रतिभाति ॥

४. औचित्यसम्प्रदायः

उचितस्य भाव औचित्यम् । इदमौचित्यं काव्य आवश्यकमिति [१५]भरतोऽभिप्रैति ।

अदेशजो हि वेषस्तु न शोभां जनयिष्यति ।
मेखलोरसि बन्धे च हास्यायैवोपजायते ॥

[१६]आनन्दवर्धनोऽपि

अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम् ।
प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत् परा ॥

इति वदन् रसस्यैतत् परमपरिपोषकम् इत्याशेते । क्षेमेन्द्रः पुनः औचित्यस्य सारभूतत्वं मन्यमानः [१७]तस्यैवात्मत्वम् इत्याकलयति –

अलङ्कारास्त्वलङ्कारा गुणा एव गुणाः सदा ।
औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम् ॥

अत एवायमस्य सम्प्रदायस्य प्रवर्तक इत्युच्यते । इदमौचित्यं [१८]रसस्यापि जीवितमिति तन्मतम्, यदाह –

औचित्यस्य चमत्कारकारिणश्चारुचर्वणे ।
रसजीवितभूतस्य विचारं कुरुतेऽधुना ॥

ननु किमिदम् औचित्यम्? तत् [१९]तेनैवाभिहितम् –

उचितं प्राहुराचार्याः सदृशं किल यस्य यत् ।
उचितस्य च यो भावस्तदौचित्यं प्रचक्षते ॥

औचित्यमेतत् पदे वाक्ये प्रबन्धेऽर्थे गुणेऽलङ्कारे रसादौ च सर्वत्रापि सम्भवति । तत्र दिग्दर्शनाय तदुक्तप्रकारेण पदे औचित्यं प्रदर्श्यते, यथा –

१४. वृत्तौ. १५. ना.शा. त्रयो.अ. का–६९.
१६. ध्वनि. तृ.उ. १७. औचित्य. का–४.
१८. औचित्य. का–३. १९. औचित्य. का–७.

परिम्लानं पीनस्तनजघनसङ्गादुभयत-
स्तनोर्मध्यस्यान्तः परिमिलनमप्राप्य हरितम्।
इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः
कृशाङ्ग्यास्सन्तापं वदति बिसिनीपत्रशयनम् ॥

अत्र विरहपीडितायाः सागरिकायाः कृशाङ्गीति यद्विशेषणं तत्तु परम् औचित्यमावहति। अत्रैव च पुनः आविष्करोतीत्यर्थे तदतिशयमभिव्यञ्जयतो वदतीति शब्दस्य प्रयोगोऽपि। क्वचिदनौचित्यमपि भवति, यथा –

सद्यः पुरीपरिसरेऽपि शिरीषमृद्वी
सीता जवात्त्रिचतुराणि पदानि गत्वा ।
गन्तव्यमस्ति कियदित्यसकृद्
ब्रुवाणा रामाश्रुणः कृतवती प्रथमावतारम् ॥

अत्र कियत् गन्तव्यमस्तीति असकृत् ब्रुवाणेति अनवधानेन असकृच्छब्दस्य प्रयोगात् कर्तव्यगौरवस्य ज्ञानमेव नास्तीति प्रतीत्या विद्वद्धुरीणायामपि सीतायामविवेकित्वं विज्ञायत इति परमनौचित्यम् । अवशमिति शब्दस्य प्रयागे तु शिरीषकोमलशरीरा सा ज्ञातकार्यगौरवापि क्लेशेन सर्वथा चलितुमशक्नुवती तथा प्रायुङ्क्तेति प्रतीत्या तन्निवर्तनात् अदोषत्वं स्पष्टमेव प्रतिभाति । वाक्ये यथा –

देवो दयावान् विजयो जितात्मा यमौ संयममाननीयौ
इति ब्रुवाणस्स्वभुजं प्रमार्ष्टि यः कीचकाकालिककालदण्डम्।
धीरः स किर्मीरजटासुरारिः कुबेरशौर्यप्रशमोपदेष्टा
दृष्टो हिडिम्बादयितः कुरूणां पर्यन्तरेखागणनाकृतान्तः ॥

अत्र रौद्ररसवर्णने प्रक्रान्ते भीमस्य कीचकाकालिककालदण्डप्रभृतीनि यानि विशेषणानि तैः रौद्ररसो जागरित इवावभासते इति तादृशविशेषणघटितं वाक्यमत्रातितरामुचितम् । तत्रैवानौचित्यं यथा –

नाले शौर्यमहोत्पलस्य विपुले सेतौ समिद्वारिधेः
शश्वत्खड्गभुजङ्गचन्दनतरौ क्रीडोपधाने श्रियः ।

आलाने जयकुञ्जरस्य सुदृशां कन्दर्पदर्पो परं
श्रीदुर्योधनदोष्णि विक्रमपरे लीनं जगन्नन्दतु ॥

अत्र विक्रमैकरसस्य दुर्योधनस्य भुजे वर्णनीये समिद्धारिसेतुप्रभृतीनि यानि विशेषाणानि तेषु सर्वेषु कार्कश्यप्रत्यायकत्वात् उचितेष्वपि शौर्योत्पलनालरूपं तु विशेषणं मार्दवप्रतीतिकारित्वात् अत्यन्तमनुचितम् । एवमन्यत्रापि बोध्यम् । अथेदमौचित्यं नास्ति तर्हि तत्काव्यम् अवश्यमुपहास्यतां यास्यति, [२०]यदुक्तम् –

कण्ठे मेखलया नितम्बफलके तारेण हारेण वा
पाणौ नूपुरबन्धनेन चरणे केयूरपाशेन वा
शौर्येण प्रणते रिपौ करुणया नायान्ति के हास्यताम्
औचित्येन विना रुचिं प्रतनुते नालङ्कृतिर्नो गुणः ॥

वस्तुतस्तु औचित्यस्य आवश्यकत्वे न कस्यपि विप्रतिपत्तिः किन्तु तस्यात्मतायाम् अवश्यं सा भवति, तथाहि – इदं पदवाक्यादिकमत्र उचितमिति इदं चानुचितमिति यदौचित्यम् अनौचित्यं च निर्णीयते तत् किमपेक्षम्? नहि किञ्चिदप्यनपेक्ष्य औचित्यमनौचित्यं वा निर्णेतुं शक्यम्, सापेक्षताशीलत्वात्। कृते च विचारे तत्तावत् रसापेक्षमिति ज्ञायते । ज्ञाते च तस्मिन् तस्यैवात्मत्वं वक्तव्यम् न पुनः तदपेक्षजीवितस्य एतस्य । नहि प्रधाने सति अप्रधानस्य आत्मत्वं कल्पयितुं शक्यम् । औचित्यमेतत् रसस्योपनिषदिति रसस्य जीवितमिति वा यत्र तत्र श्रूयमाणं यद्वचनं तत्तु रसे तदवश्यम्भावस्य बोधनेनापि चरितार्थम् न पुनः तस्यैव जीविततत्वमिति बोधनेनैव । एतच्च औचित्यं रसात्मतावादिनामपि सम्मतम् । तदेवम् औचित्यस्यात्मत्वं न कथञ्चिदपि श्रद्धातुं शक्यम् ॥

५. वक्रोक्तिसम्प्रदायः

वक्रम् अभिधानं वक्रोक्तिः । वक्रं च विचित्रम्, चमत्कारजनकमिति यावत् । अभिधानम् अभिधाव्यापारः । प्राभाकरमतानुसारित्वादेवास्य

२०. औचित्य. का–६.

मतेऽभिधातिरिक्तो व्यापारो नास्ति । विवक्षितेऽर्थे साधारणानां यादृशः प्रयोगः तत्र विदग्धानामन्य एव प्रयोगः, यथा – साधारणाः वाणी शारदाम्भोजवदनेति, उच्चरद्रक्तः सेनापतिरशोभतेति, मुखं सुन्दरमिति च प्रयुञ्जते । विदग्धास्तु तत्रैवार्थे [21]शारदा शारदाम्भोजवदनेति, [22]उच्चरद्भूरिकीलालः शुशुभे वाहिनीपतिरिति, मुखं चन्द्र इव सुन्दरमिति च विलक्षणम् । एतेन साधारणानां विदग्धानां च प्रयोगयोः विशेषः स्फुटो भवति । एतदेव मनसि निधाय कुन्तको वक्रोक्तेः लक्षणं तावत् [23]इदमभिधत्ते –

वक्रोक्तिः वैदग्ध्यभङ्गीभणितिरुच्यते ।

वक्रोक्तिर्नाम प्रसिद्धाभिधानव्यतिरेकिणी विचित्रैवाभिधा । वैदुष्यविशिष्टं वचनमिति यावत् । चमत्कारजनकमभिधानमिति विवक्षितोऽर्थः । इयं च शब्दार्थयुगलरूपस्य काव्यस्य काचिदलङ्कृतिः ।

केचित् स्वभावोक्तिरपि शब्दार्थयोरलङ्कृतिरिति मन्यन्ते – तदसत्, स्वभावो नाम भवतोऽस्मात् अभिधानप्रत्ययाविति पदार्थस्य स्वरूपभूतो धर्मः । तस्य यद्यलङ्कृतित्वं तर्हि सर्वोऽप्यर्थोऽलङ्कारवान् जायेत, अलङ्कार्यस्यार्थस्याभावोऽपि प्रसज्येत । किं बहुना? शाकटिकादिवाक्यस्यापि स्वभावोक्तिघटितत्वात् काव्यत्वाङ्गीकारप्रसङ्गः । अन्यच्च, स्वभावोक्तेरलङ्कारत्वे उपमादेरलङ्कारान्तरस्य च समावेशे तयोर्भेदस्य स्फुटत्वे संसृष्टिः अस्फुटत्वे तु सङ्कर इति एक एवालङ्कारो निश्चीयेत । ननु स्वभावो वस्तुधर्मः, स च साधारणः सातिशयश्चेति द्विविधः । तत्र साधारणवस्तुधर्मविशिष्टोऽर्थः शरीरम् सातिशयवस्तुधर्म-विशिष्टस्तु स्वभावोक्तिरिति विभागे न पूर्वोक्तदोषाणां सम्भव इति चेत् – मैवम्, साधारणवस्तुधर्मस्य शोभाराहित्यात् काव्यप्रपञ्चेऽनुपादानमिति सातिशयस्यैवार्थस्य शरीरत्वेनाभ्युपगन्तव्यत्वात् । नहि शरीरमलङ्कारो भवति, भेदात् । न च शब्दमात्रं शरीरस्थानीयं न त्वर्थ इति वाच्यम्, आधाराभावेन रूपकादेरलङ्कारस्य दुर्निवेशत्वप्रसङ्गात् । नह्यसत्यां भित्तौ चित्रस्यालेखनं कोविदोऽपि कर्तुं क्षमते । तस्मात् स्वभावोक्तेरलङ्कारत्वं शशशृङ्गायितम् ।

२१. रघु. स–४. सञ्जी. २२. कुव. श्लेषालङ्कारप्रकरणम् ।
२३. व.जी. प्र.उ. का–१०.

वक्रोक्तिरियं वर्णविन्यासवक्रता, पदपूर्वाधवक्रता, पदपरार्धवक्रता, वाक्यवक्रता, प्रकरणवक्रता, प्रबन्धवक्रता चेति षड्विधा । तत्र वर्णविन्यासवक्रता यथा – सौन्दर्यधुर्यं स्मितम् ।

अत्र रेफयकारसंयोगस्य सकृदावृत्तिः शब्दे परां शोभामानयति । यमकम् अनुप्रासश्चेति सर्वोऽपि शब्दालङ्कारः अत्रैव प्रभेदेऽन्तर्भवति । पदवक्रतायां पूर्वार्धवक्रता परार्धवक्रता चेति द्वौ भेदौ । तत्र पूर्वार्धं धातुप्रातिपदिकन्यतरा प्रकृतिः परार्धं च प्रत्ययः । तयोराद्येऽमी प्रभेदाः सम्भवन्ति उदाहरणानि च –

१. रूढिवैचित्र्यवक्रता यथा – रामोऽस्मि सर्वं सहे ।

अत्र राम इति रूढशब्दः अत्यन्तदुःखसहत्वादिधर्मविशिष्टं रामं बोधयति।

२. पर्यायवक्रता यथा –

अ) अङ्गराज! सेनापते! राजवल्लभ! रक्षैनं भीमाद्दुःशासनम् ।

आ) तव प्रसादात् कुसुमायुधोऽपि ।

अनयोराद्ये अश्वत्थाम्नो वचने कर्णस्य ये त्रयः पर्यायाः ते सर्वेऽप्यत्र दुःशासनत्राणाशक्तत्वप्रयुक्तम् उपहासं द्योतयन्ति, अन्त्ये तु स्मरस्य वचने कुसुमायुध इति विशेषणं तस्मिन् असारायुधत्वं द्योतयति ।

३. उपचारवक्रता यथा – हस्तापचेयं यशः ।

अत्र यशसो हस्तापचेयत्वविशेषणेन मूर्तत्वज्ञानमिति गाढप्रसृतत्वं प्रतीयते ।

४. विशेषणवक्रता यथा – दाहोऽम्भःप्रसृतिम्पचः प्रचयवान् बाष्पः प्रणालोचितः ।

अत्र विरहिण्या वर्णने जलोष्णीकारकाद्यर्थकं यदम्भःप्रसृतिम्पचादिकं विशेषणं तेन दाहादौ अत्यन्ततीव्रत्वादेः प्रतीतिः भवति ।

५. संवृतिवक्रता यथा –

अ) तान्यक्षराणि हृदये किमपि ध्वनन्ति ।

आ) पृष्ठतः प्रणयिनो निषेदुषः कानि कान्यपि न चकार लज्जया ।

अत्राद्ये किमपीति न्यासात् तादृशाक्षराकर्णनेन हृदयगते भावेऽनुभवैक-गोचरत्वपर्यवसितम् अनिर्वचनीयत्वं प्रतीतं भवति । एवं वाक्यान्तरेऽपि।

६. वृत्तिवैचित्र्यवक्रता यथा – पाण्डिम्नि मग्नं वपुः ।

अत्र पाण्डु वपुरिति वक्तव्ये पाण्डिम्नि मग्नमिति प्रतिपादनेन वपुषि अत्यन्तपाण्डुत्वं प्रकाशितं भवति ।

७. लिङ्गवक्रता यथा – मैथिली तस्य दाराः ।

अत्र भिन्नलिङ्गस्य शब्दस्य सामानाधिकरण्येन प्रयोगो विचित्रतामायाति।

८. क्रियावक्रता यथा –

अ) प्रपन्नार्तिच्छिदो नखाः ।

आ) स दहतु दुरितं शाम्भवो वः शराग्निः ।

अनयोराद्ये अमूर्ताया आर्तेः छेदनं प्रतिपाद्यते परत्र तु तादृशस्यैव दुरितस्य भस्मीकरणमिति नखेषु शराग्नौ च विलक्षणक्रियाजनकत्वप्रतीत्या लोकोत्तरत्वं प्रतीयते। एवमेषामुदाहरणान्तरेष्वपि बोध्यम् । अन्त्ये तु त्रयः । तत्र –

१. संख्यावैचित्र्यं यथा – मैथिली तस्य दाराः ।

अत्र मैथिलीत्यस्य सामानाधिकरण्येन भिन्नवचनकस्य शव्दस्य प्रयोगो वैचित्र्यमाददाति ।

२. कारकवैचित्र्यं यथा – त्रायन्तां वो मधुरिपोः प्रपन्नार्तिच्छिदो नखाः।

अत्राचेतनेष्वपि चेतनत्वमारोप्य कर्तृत्वस्य प्रकल्पनात् नखेषु सर्वशक्तत्वं गम्यते ।

३. पुरुषवैचित्र्यं यथा – अयं जनः प्रष्टुमनास्तपोधने! न चेद्रहस्यं प्रतिवक्तुमर्हसि।

अत्र अयं जन इति प्रयोगात् वक्तरि ताटस्थ्यस्य प्रतीतिः भवति ।

वाक्यवक्रतायां रसादिः प्रायेण च सर्वेऽप्यलङ्कारा अन्तर्भवन्ति, [२४]यदुक्तम् –

वाक्यस्य वक्रभावोऽन्यो भिद्यते यः सहस्रधा ।
यत्रालङ्कारवर्गोऽसौ सर्वोऽप्यन्तर्भविष्यति ॥

२४. व.जी. प्र.उ. का–२०.

यद्यप्यर्थशक्त्युद्भवध्वनिप्रभेदत्वेन परिगणेयानां कुत्रान्तर्भाव इति नोक्तम् तथापि अत्रैवेति निर्णीयते, अन्यत्रासंभवात् ।

प्रकरणवक्रतायाः शाकुन्तले दुर्वाससः शापवृत्तान्तस्य विन्यासेन नायके निर्दोषत्वस्य प्रतिपादनमुदाहरणम् । प्रबन्धवक्रतायाः पुनः रामचरितप्रधाने काव्ये 'रामादिवद्वर्तितव्यम् न रावणादिवत्' इत्युपदेशस्य प्रतिपादनम् । तापसवत्सराजे 'मन्त्रिभिः विपदि वर्तमानस्य राज्ञः रक्षणं कर्तव्यम्' इत्युपदेशस्य प्रतिपादनम् । महाभरते तु 'सर्वमिदम् अशाश्वतम्, यदस्ति शाश्वतं तदर्थं प्रयतस्व' इत्युपदेशस्य । एवमन्यत्रापि स्वयमूह्यम् ।

तदेवं वक्रोक्तेः षट्सु प्रभेदेषु आधुनिकैः सूरिभिराख्याता ध्वनिगुणालङ्कार-प्रभृतयः सर्वेऽपि काव्यविशेषा अन्तर्भवन्ति । तस्मात् वक्रोक्तिः न साधारणः कश्चिदलङ्कारः किन्तु समग्रकाव्यव्यापकं किञ्चिदन्यदेव तत्त्वमिति विज्ञायते।

वक्रोक्तिरियं सर्वेषामलङ्काराणां जीवनाधायकः कश्चिदर्थ इति भामहः, [२५]यदाह –

सैषा सर्वत्र वक्रोक्तिरनयाऽर्थो विभाव्यते ।
यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना ॥

दण्डी अपि समग्रं वाङ्मयं स्वभावोक्तिः वक्रोक्तिश्चेति द्विधा भिन्नमिति [२६]आचष्टे –

श्लेषः सर्वासु पुष्णाति प्रायो वक्रोक्तिषु श्रियम् ।
भिन्नं द्विधा स्वभावोक्तिः वक्रोक्तिश्चेति वाङ्मयम् ॥

एवं सत्यपि वक्रोक्तेः भेदोपभेदलक्षणोदाहरणैः निरूप्यात्मत्वेन व्यवस्थापनात् कुन्तकस्यैव एतत्सम्प्रदायप्रवर्तकत्वेन निर्णयः ॥

वस्तुतस्तु वक्रोक्तेरात्मत्वं न सम्भवति, तारतम्यघटितार्थगर्भत्वात् । अत्र हि वक्रोक्तौ यथा रसादिरन्तर्भवति तथा तदपेक्षया निकृष्टा यमकोपमादयश्च सर्वेऽपि शोभाकारिविशेषाः । नह्यर्थः कश्चित् निम्नोन्नतभावापन्नभेदवान् सारभूतार्थवाचिना आत्मशब्देन व्यपदिश्यते, व्याहतत्वात् । तस्मात् वक्रोक्तेः

२५. काव्यालं. द्वि.प. का-८५. २६. काव्याद. द्वि.प. का-३६३.

प्रतिपादनं नाम साधाराणानां वाक्येषु अवर्तमानस्य प्रत्युत कवीनां वाक्येषु वर्तमानस्य कस्यचित् तत्त्वस्य बोधनम् न पुनः तन्नत्यस्य सारभागस्य । तस्मात् वक्रोक्तेः आत्मत्वं चिन्त्यम् ॥

६. रससम्प्रदायः

रस्यते इति व्युत्पत्त्या भावो रसपदवाच्यः । भावाश्च चित्तवृत्तिविशेषाः । ते च रत्यादयोऽष्टौ, निर्वेदादयः त्रयस्त्रिंशत्, स्तम्भादिसात्त्विकभावाश्च अष्टाविति [२७]एकोनपञ्चाशदिति भरतः । गुर्वादिविषयकरत्या पञ्चाशत् इत्यपरे । सांसारिकक्लेशादिप्रयुक्तस्य निर्वेदस्य परिगणनेऽपि जगदनित्यत्वज्ञानप्रयुक्तो न परिगणित इति तस्यापि परिगणने एकपञ्चाशत् इत्यन्ये । तत्र चित्ते स्थिरतया वर्तमानत्वात् रत्यादीनां स्थायित्वम् । निर्वेदादीनाम् आविर्भावतिरोभावशालित्वात् व्यभिचारित्वम् । स्तम्भादीनां सत्त्वोद्रेके सत्येवाविर्भवतां कार्यरूपत्वात् अनुभावत्वम् इति विभागः । तत्र यद्यपि निर्वेदादीनां व्यभिचारिणां कार्यत्वादनुभावत्वमेव तथापि क्वचित्तेषां प्राधान्येन प्रतीयमानत्वं सम्भवतीत्यभिप्रायेणानुभावेभ्यः पृथक् परिगणनम् । स्तम्भादीनां तु न क्वचिदपि तथेत्यभिप्रायेणानुभावेष्वेव परिगणनमिति विशेषः । रसस्यास्य निष्पत्तिः विभावादिसंयोगात्, तदाह [२८]भरतः –

विभावानुभावव्यभिचारिसंयोगात् रसनिष्पत्तिः ॥

तत्र विभावयति रत्यादिम् उद्बोधयतीति उद्बुद्धं च परिपोषयतीति विभावः । अत एव स आलम्बनम् उद्दीपनं चेति द्विविधः । स आलम्बनविभाव उच्यते यमालम्ब्य रत्यादिरुद्भवति । स च शकुन्तलादुष्यन्तप्रभृतिः । स च उद्दीपनविभावः यो रत्यादिमुद्दीपयति । स च भ्रमरझङ्कारः कोकिलप्रणादः तथाविधश्चान्यः । अनुभावयति कार्यभूतत्वात् उद्बुद्धं रत्यादिं सम्यक् प्रत्याययतीति अनुभावः, स्तम्भस्वेदादिः कटाक्षविक्षेपादिश्च । विशेषात् आभिमुख्येन चरन्तीति समनियततया आविर्भवन्तीति व्यभिचारिणो निर्वेदादयः

२७. ना.शा. स.अ. का–१०६.

२८. ना.शा. ष.अ.

त्रयस्त्रिंशत् गुर्वादिविषयकरतिश्च । एतेषां संयोगात् स्थायिरूपस्य रसस्य निष्पत्तिरित्यर्थः ।

सूत्रेऽस्मिन् रससंयोगनिष्पत्तिपदानाम् अर्थे भूयान् विवादो वर्तते । तत्र प्रसिद्धा ये व्याख्याकाराः तन्मतानुसारेण एषामर्थो विव्रीयते ।

१. भट्टलोल्लटः

विभावानुभावव्यभिचारिणां संयोगात् विभावस्य रत्यादिना जन्यजनकभावात् सम्बन्धात्, अनुभावस्य प्रत्याय्यप्रत्यायकभावात्, व्यभिचारिणश्च पोष्यपोषकभावात् रसस्य अनुकार्यनिष्ठरत्यादेः उत्पत्तिः प्रतीतिः पुष्टिश्च । दुष्यन्ताद्यनुकर्तरि नटे आरोपस्य अभ्युपगमात् सहृदयानां चमत्कारः । तत्र जन्यजनकभावस्य प्रत्याय्यप्रत्यायकभावस्य पोष्यपोषकभावस्य च उपचेयोपचायकभावरूपसामान्यशब्देन ग्रहणम् । ततश्चा मतेऽस्मिन् उपचितो रत्यादी रसः अनुपचितस्तु स्थायीति मन्तव्यम् । रसस्य चानुकार्ये रामादावुत्पात्तिरित्यङ्गीकारात् अयमुत्पत्तिवाद इत्युच्यते ।

२. शङ्कुकः

सम्यङ्-मिथ्या-संशय-सादृश्यात्मकज्ञानाद् विलक्षणे ज्ञाने विषयो यो नटः तद्रूपे पक्षे विभावादिभिः कृत्रिमैरप्यकृत्रिमतया गृहीतैः संयोगात् अनुमाप्यानुमापकभावात् सम्बन्धात् रसस्य रत्यादेः निष्पत्तिरनुमितिः । अनुमेयस्यापि रत्यादेः स्वसौन्दर्यवशात् अस्वाद्यत्वम् । अयमनुमितिवादः ।

३. भट्टनायकः

विभावादीनां शकुन्तलात्वादिधर्मविशिष्टानां शकुन्तलादीनां संयोगात् स्त्रीत्वादिसाधारणधर्मविशिष्टतया भावकत्वव्यापारेण भावनात् रसस्य सहृदयनिष्ठरत्यादेः निष्पत्तिः सत्त्वोद्रेकप्रकाशानन्दमयसंविद्विश्रान्तिरूपेण भोगेन विषयीकृतिः । तादृशसंविद्विश्रान्तिविशिष्टतया भोग इति यावत् । मतेऽस्मिन् भावकत्वं भोजकत्वं चेति व्यापारद्वयमधिकम् । अयं भुक्तिवादः ।

४. अभिनवगुप्तः

विभावादीनां शकुन्तलाप्रभृतीनां भावनया साधारणत्वेन गृहीतानां संयोगात् व्यङ्ग्यव्यञ्जकभावात् सम्बन्धात् रसस्य चिद्विशिष्टस्थाय्यात्मनः निष्पत्तिः अभिव्यक्तिः रसस्य स्थाय्युपहितचिदात्मनो वा निष्पत्तिः स्वरूपेण प्रकाशनम्। अयं व्यक्तिवाद इत्युच्यते ।

रसोऽयं लोल्लटस्य मतेन अनुकार्ये, शङ्कुकमतेन अनुकर्तरि, भट्टनायकस्य अभिनवगुप्तस्य च मतेन सहृदय इति बोध्यम् । अद्यत्वे अयमेव सम्प्रदायः सर्वैरपि समाद्रियमाणो विराजते । विस्तरेण पुनरुत्तरत्र निरूपयिष्यते ।

एवं च शास्त्रमिदं यद्विचारार्थं प्रवृत्तं तादृशं काव्यं किंस्वरूपमिति जिज्ञासायाम् इदमुच्यते –

काव्यलक्षणम्

काव्यशब्दोऽयं कविशब्दात् ब्राह्मणदित्वात् [१]ष्यञि निष्पन्नः कविकर्मणि वर्तते। राजशेखरस्तु [२]कवृ वर्णे इति धातोः कर्मणि ण्यत्प्रत्ययेऽयं शब्द इत्यभिप्रैति – तदसत्, पाणिनीयतन्त्रे तद्धातोरदर्शनात् । तन्त्रातरेणाभिधानम् इत्युक्तेऽपि कार्यादिशब्दवत् अस्यापि शब्दस्य विशेष्यनिघ्नत्वापत्तिः । नहि अस्मिन्नर्थेऽयं शब्दः पुंसि स्त्रियां वा आम्नातो वर्तते । [३]काव्य इति शब्दः पुंसि यद्यपि वर्तते तथापि भार्गवार्थकत्वात् तेन प्रकृते न कोऽप्यर्थः ।

* प्राचीनमतानां निरूपणम्

काव्यमिदं शब्दरूपमिति दण्डि–विश्वनाथ–जगन्नाथप्रभृतय आमनन्ति। इमानि तावत् तदुक्तानि लक्षणानि –

१. **काव्यं तदिष्टार्थव्यवच्छिन्नपदावली** इति काव्यादर्शे ।

२. **वाक्यं रसात्मकं काव्यम्** इति साहित्यदर्पणे ।

३. **रमणीयार्थप्रतिपादकः शब्दः काव्यम्** इति रसगङ्गाधरे ।

---

१. गुणवचनब्राह्मणादिभ्यः ष्यञ् कर्मणि च [अष्ट. ५.१.१२४] २. का.मी. तृ.अ

३. शुक्रो दैत्यगुरुः काव्य उशना भार्गवः कविः । अ.को. दिग्वर्गः ।

तत्र दर्पणकारस्यायमाशयः – मम्मटेन तावत् 'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि' इति लक्षणमुच्यते । अत्र तच्छब्देन पूर्वकारिकागतं काव्यमिति पदं परामृश्यते । शब्दार्थावित्यस्य अदोषौ सगुणौ चेति द्वे पदार्थरूपे विशेषणे, क्वापि पुनरलङ्कृती इति तु वाक्यार्थरूपम् । दोषाश्च शब्दगताः दुःश्रवत्वादयः अर्थगताश्च अपुष्टार्थत्वादयः । गुणा माधुर्यौजःप्रसादाख्याः त्रयः । अलङ्काराश्च शब्दगता यमकानुप्रासप्रभृतयः अर्थगताश्च उपमारूपकप्रभृतयः । क्वापि पुनरनलङ्कृती इत्यत्रेषदर्थे नञः प्रयोगात् तस्य च संख्यया परिमेयेऽलङ्कृत्यादौ अन्वयाभावात् अस्फुटार्थे विश्रान्तिः । ततश्च अनलङ्कृती इत्यस्य अस्फुटालङ्कारावित्यर्थः । एवमत्रास्फुटालङ्कारयोः शब्दार्थयोः काव्यत्वे सिद्धे स्फुटालङ्कारयोः तत्त्वं कैमुतिकन्यायेनावश्यं सिध्यतीति न तदर्थं यतनीयम् । तथा च लक्षणवाक्यस्यायमर्थः –

दुःश्रवत्वापुष्टत्वादिदोषरहितौ माधुर्यादिगुणसमन्वितौ स्फुटालङ्कारौ अस्फुटालङ्कारौ वा शब्दार्थौ काव्यम् ॥

एतच्चिन्त्यम् – शब्दार्थावित्यस्य अदोषौ इति यद्विशेषणं तन्न समञ्जसम्, दुष्टं काव्यमिति व्यवहारस्यासङ्गतत्वापत्तेः, पुनश्च

न्यक्कारो ह्ययमेव यदरयस्तत्राप्यसौ तापसः
सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः ।
धिग् धिक्छक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा
स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः ॥

इति पद्ये ध्वनिकाव्यस्योदाहरणत्वेन निर्णीतेऽव्याप्तेः । अत्र हि अयमेव न्यक्कार इति विधेयस्य न्यक्कारस्य प्राधान्येन निर्देशे कर्तव्ये न्यक्कारो ह्ययमिति वैपरीत्येन निर्देशात् विधेयस्याप्राधान्यमिति विधेयाविमर्शदोषो वर्तते । विधेयाविमर्शश्च प्राधान्येन प्रतिपाद्यस्य अप्राधान्येन प्रतिपादनम् । यत्र हि द्वयोरर्थयोः उद्देश्यविधेयभावः तत्रोद्देश्यस्य प्रथमं निर्देशः ततो विधेयस्येति पौर्वापर्यं नियतम् । अत एव 'मुखं चन्द्रः' 'देवदत्तः शूरः' इत्येव निर्देशः न

तु 'चन्द्रो मुखम्' 'शूरो देवदत्तः' इति विपरीतोऽपि। कुमारिलभट्टोऽपि एतदेवाभिप्रैति, यथा –

अनुवाद्यमनुक्त्वैव न विधेयमुदीरयेत् ।
न ह्यलब्धास्पदं किञ्चित् कुत्रचित् प्रतितिष्ठति ॥

एवं स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैरिति चतुर्थपादेऽपि स्वर्गग्रामटिकाविलुण्ठनोच्छूना एते भुजा व्यर्था इति भुजानुद्दिश्य विधेयत्वेन प्रतिपादनीयस्य व्यर्थत्वस्य वृथोच्छूनेति भुजविशेषणतावच्छेदककुक्षौ निवेश्य अनुवाद्यत्वेन प्रतिपादनात् स एव दोषो विभावनीयः ।

नचात्र यत्र भागे दोषः तस्याकाव्यत्वं यत्र पुनरदोषः तस्य काव्यत्वमित्यभ्युपगमे किं बाधकमिति वाच्यम्, विधेयाविमर्शेन समग्रकाव्यस्यैव दूषणात्, तथाहि – दोषा हि नित्या अनित्याश्चेति द्विविधाः। तत्र च्युतसंस्कारादयो दोषा नित्याः प्रकृतविधेयाविमर्शादयस्तु अनित्याः । अनित्यत्वं चैतेषां कादाचित्कत्वेन। तच्च कथमिति विचारे रसस्यापकर्षकत्वानपकर्षकत्वाभ्याम् इति स्पष्टम् । एतेन रसापकर्षका धर्मा इति दोषाणां लक्षणं सिद्धं भवति । रसश्च समग्रकाव्यगत इति तद्दूषकस्य विधेयाविमर्शादेः जले विषबिन्दोरिव पूर्वमेकदेशगतत्वेन भासमानस्यापि पर्यन्ते स्पष्टमेव सर्वदेशगतत्वम् । ततश्चात्र अदोषावित्यस्य सङ्गमनाभावात् स्फुटैवातिव्याप्तिः। न चेष्टापत्तिः, शब्दार्थयोः सर्वथा निर्दोषत्वस्यासम्भवेन काव्यत्वस्य निर्विषयत्वापत्तेः।

यद्येवम्, अदोषावित्यत्र अनुदरा कन्येत्यादाविव ईषदर्थे नञः प्रयोगः

तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः ॥

इति वचनात् । तस्य पुनः संख्यापरिमेये दोषेऽनन्वयात् दुर्बलत्वे पर्यवसानमिति दुर्बलदोषौ शब्दार्थौ काव्यमिति लक्षणवाक्यार्थः । ततश्चेह विधेयाविमर्शस्य सद्भावेऽपि तस्य दुर्बलत्वात् लक्षणस्य नाव्यप्तिरिति चेत् – निर्दोषयोः शब्दार्थयोः काव्यत्वासिद्धिप्रसङ्गात् । कैमुतिकन्यायेन कथञ्चित्

सिद्धावपि कुष्ठादिदोषयुक्ते पुरुषे पुरुषत्वस्येव सदोषे हि काव्ये काव्यत्वस्याबाधिततया स्थितेः सम्भवात् । नहि दोषाः पदार्थानां स्वरूपं नाशयितुं शक्नुवन्ति किन्तु तेषु तरतमभावं विधातुम् । अत एव रत्नादेः लक्षणे चिकीर्षिते न तन्नत्यं विशेष्यं कीटानुवेधादिदोषराहित्येन व्यावर्त्यते। तस्माददोषाविति विशेषणमयुक्तम् ।

यत्पुनः सगुणाविति द्वितीयं विशेषणं तदपि तथा, गुणानां रसधर्मत्वेन शब्दार्थधर्मत्वाभावात् । नहि अन्यनिष्ठो धर्मोऽन्यत्र सम्भवति । न च गुणानां रसधर्मत्वेऽपि व्यञ्जकतासम्बन्धेन शब्दार्थयोरपि सम्भव इति वाच्यम्, तथाविधस्य तस्योत्कर्षाधायकत्वेन स्वरूपनिर्णायकत्वाभावात् । नहि उत्कर्षाधायका धर्मा लक्षणवाक्ये निवेशिताः पदार्थानां स्वरूपमवगमयन्ति। अन्ये हि उत्कर्षाधायका धर्माः अन्ये च स्वरूपनिर्णायकाः ।

नन्वेवं सगुणावित्यस्य सरसावित्यर्थः, गुणानां रसेनाविनाभाव इति तत्पदेन तद्धर्मिणो रसस्यापि स्वीकर्तुं शक्यत्वात् – मैवम्, एवं हि विवक्षितेऽर्थे सरसाविति प्रयोग एव औचित्यमावहति न तु सगुणाविति पारम्परिकः । रसो हि व्यञ्जकताख्येन साक्षात् सम्बन्धेन शब्दार्थयोः वर्तते गुणास्तु स्वाश्रयव्यञ्जकतेति पारम्परिकेण । नहि राजमार्गे विद्यमाने वाममार्गमबुधोऽप्यवलम्बते । ननु तस्य पङ्किलत्वे बुधेनापि वाममार्गस्यावलम्बनं दृष्टमेवेति चेत् – विषमोऽयमुपन्यासः, पङ्किलत्वसदृशस्य दार्ष्टान्तिकेऽभावात् । न च प्रयोगस्य परम्परासम्बन्धमूलकत्वेऽपि विवक्षितार्थस्य सिद्धिर्भवतीति दोषाभाव इति वाच्यम्, एवं प्रयोगस्य विवेकिभिरनङ्गीकारात् । नहि कोऽपि विद्वान् सप्राणिको देशः इति विवक्षायां प्राणिनि शौर्यमवश्यं भवतीति सशौर्यको देश इति प्रयोगं कर्तुमुत्सहते । तस्मात्सगुणाविति द्वितीयमपि विशेषणमयुक्तम् ।

यत्पुनः अनलङ्कृती पुनः क्वापीति तृतीयं विशेषणं तदपि तथा, अलङ्कारसहितत्वस्य उत्कर्षप्रयोजकत्वात् । यच्च पुनः तस्मिन्नेव प्रस्तावे अस्फुटालङ्कारवत्त्वस्य यः कौमारहर इति पद्यमुदाहरणत्वेन निर्दिष्टम् – तदपि अविचारितरमणीयम्, वराद्यनुपभोगस्य कारणस्याभावेऽपि उत्कण्ठारूपकार्यस्य

उत्पादात् किमत्र विभावना, वराद्युपभोगस्य कारणस्य सद्भावेऽप्यनुत्कण्ठारूप-कार्यस्य अनुत्पादात् किं वा विशेषोक्तिरिति तयोः सन्देहसङ्करस्य स्फुटत्वात्। स्यान्नाम विभावनाविशेषोक्ती अस्फुटे किन्तु तयोः सङ्करः स्फुट एवेति कथं तदुक्तस्य साङ्गत्यम्। तल्लक्षणान्तरमेवात्र युक्तम् यच्चैवं भवितुमर्हति –

वाक्यं रसात्मकं काव्यम् ॥

अत्र वाक्यमिति विशेष्यम्। रसात्मकमिति तु विशेषणम्। रस एवात्मा सारभूतो यस्येति तदर्थः। रस्यत इति व्युत्पत्त्या शृङ्गारादिः नवविधो रसः, निर्वेदादिः त्रयस्त्रिंशत्संख्याको भावः, रसाभासः, भावाभासः, भावशान्तिः, भावोदयः, भावसन्धिः, भावशबलत्वं चेत्यष्टौ गृह्यन्ते। तत्र विभावानुभाव-व्यभिचारिभिः सहृदयेऽभिव्यक्तो रत्यादिः स्थायी भावो रसः, तादृश एव निर्वेदादिः भावः, अनौचित्येन प्रवृत्तौ तावेव रसाभासभावाभासौ, भावस्य शान्तौ उदये च भावशान्तिभावोदयौ, समबलयोः द्वयोर्भावयोः अभिभाव्याभिभावकतया समावेशो भावसन्धिः, पूर्वपूर्वभावोपमर्दकतया भावानां समावेशो भावशबलत्वमिति विवेकः।

एतादृशे रसे सत्येव काव्यं जीवति अन्यथा मृतमिव विभाति। अत एव प्राचीनैः रसस्यैव सारभूतत्वं मन्यमानैः काव्यप्रयोजनप्रस्तावे 'रसास्वादसुख-पिण्डदानद्वारा वेदशास्त्रविमुखानां सुकुमारमतीनां राजपुत्रादीनां विनेयानां रामादिवद्वर्तितव्यम् न रावणादिवत्' इत्यादिना बहुषु अंशेषु सत्स्वपि रसास्वादस्यैव उल्लेखः कृतो नान्यस्य। महिमभट्टेनापि 'काव्यस्यात्मन्यङ्गिनि रसदिरूपे न कस्यचिद्विमतिः' इति कथयता रसस्यैव प्रधानत्वम् अङ्गीकृतम्। ध्वनिकारेणापि 'नहि कवेरितिवृत्तमात्रनिर्वाहेणात्मपदलाभः इतिहासादेरेव तत्सिद्धेः' इत्याचक्षाणेन रसस्य प्रतिपादनमेव कवित्वस्य प्रयोजकत्वम् इत्यभ्युपगतम्। किं बहुना! अग्निपुराणे भगवान् व्यासोऽपि 'वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम्' इति ब्रुवाणः रसस्यैव जीवितत्वमिति सावधारणम् अभ्युपैति। तदेवं काव्ये रसस्य मुख्यत्वमिति स्थिते तदात्मकवाक्यस्यैव काव्यत्वं युक्तमिति तथाभिहितम्। न चात्र व्यङ्ग्यात्मकस्य वाक्यस्यैव काव्यत्वमिति वाच्यम्, देवदत्तो ग्रामं गच्छति, गतोऽस्तमर्क इत्यादीनामपि

वाक्यानां काव्यत्वापत्तेः, आद्ये तद्भृत्यं प्रति 'तदनुसरणं कुरु' इत्यस्य अन्त्ये पुनः 'सन्ध्यावन्दनं कुरु' इत्यादेश्च व्यङ्ग्यस्य प्रत्ययात् ।

ननु रसात्मकस्यैव वाक्यस्य यदि काव्यत्वम् तर्हि

अत्ता एत्थ णिमज्जइ एत्थ अहं दिअसअं पलोएहि ।
मा पहिअ! रत्तिअन्धिअ! सेज्जाए मह णिमज्जइसि ॥

इति पद्ये 'प्रच्छन्नो मदन्तिकमायाहि' इति वस्तुनो व्यङ्ग्यत्वादव्याप्तिप्रसङ्गः – नैष दोषः, अत्रापि गृहस्वामिन्याः कस्याश्चित् पान्थेऽनौचित्येन रतिरिति शृङ्गररसाभासत्वेन रसात्मकत्वस्य निर्बाधत्वात् ॥

जगन्नाथस्य पुनरयम् – यत्तु मम्मटादिभिः शब्दार्थयुगलस्य काव्यत्वम् इत्युच्यते तदसाम्प्रतम्, काव्यमुच्चैः पठ्यते, काव्यादर्थोऽवगम्यते, काव्यं श्रुतम् अर्थो न ज्ञात इत्यादिना व्यवहारेण शब्दमात्रे काव्यपदशक्तेर्निर्णयात्। न चायमौपचारिकः प्रयोग इति वाच्यम्, शब्दार्थयुगलस्य मुख्यार्थत्वे विसंवादात्। अथवास्तु शब्दार्थयुगलस्यैव काव्यत्वम् किन्तु तत्काव्यत्वं शब्दार्थयोः व्यासज्यवृत्ति आहोस्वित् प्रत्येकपर्याप्तम्? नाद्यः, एको न द्वौ इति न्यायेन विरोधात्, शब्दमात्रात्मकत्वेन श्लोकवाक्यं काव्यं नेति वक्तव्यताप्रसङ्गाच्च । नान्त्यः, एकस्मिन् काव्ये कृते काव्यद्वयं कृतमिति व्यवहारापत्तेः । तस्मात् वेदादेरिव काव्यस्यापि शब्दमात्ररूपत्वमुचितम् ।

अदोषाविति विशेषणमयुक्तम्, दुष्टं काव्यमिति व्यवहारस्य दुरुपपदत्वप्रसङ्गात्। न च वृक्षोऽयं मूलावच्छेदेन कपिसंयोगाभाववान् शाखावच्छेदेन च कपिसंयोगीतिवत् काव्यमिदं पूर्वार्धेन सदोषम् उत्तरार्धेन च निर्दोषमिति प्रयोगः सुतरामुपपद्यत एवेति वाच्यम्, संयोगादाविव काव्यत्वेऽव्याप्यवृत्तित्वस्यानभ्युपगमात्। सगुणौ सालङ्कारौ चेति विशेषणद्वयमपि अयुक्तम्, वक्तृवैशिष्ट्यादिवशेन नानार्थाभिव्यञ्जके 'उदितं मण्डलमिन्दोः' 'गतोऽस्तमर्कः' इत्यादौ अव्याप्त्यापत्तेः, गुणालङ्काराणाम् अव्यवस्थितत्वेन लक्षणस्य अनिर्णायकत्वापत्तेश्च । नहि स्वतोऽव्यवस्थिताः पदार्था अन्यत्र व्यवस्थापकतां व्रजन्ति । न चेदमकाव्यमिति शक्यं वक्तुम्, चमत्कारित्वस्य

अनुभवात् । अन्यच्च, शौर्यादिवत् आत्मधर्माणां गुणानाम् अलङ्काराणां च हारादिवत् शरीरोपस्कारकाणां शरीररूपत्वस्यानुपपत्तिः ।

यत्पुनः रसवदेव वाक्यं काव्यमिति दर्पणकारेण निर्णीतम् – तदप्ययुक्तम्, वस्त्वलङ्कारप्रधानस्य वाक्यस्याकाव्यत्वापत्तेः । न चेष्टापत्तिः, कविनिबद्धस्य तादृशवाक्यस्य नीरसत्वेन अग्राह्यत्वापत्तेः । न च तत्रापि परम्परया रसस्पर्शो वर्तत एवेति वाच्यम्, एवं रसस्पर्शस्य सद्भावेऽपि यदि काव्यत्वं तर्हि मृगो धावति, गौश्चरतीत्यादेरपि वाक्यस्य काव्यत्वप्रसङ्गः । तस्मादन्यदेव लक्षणमत्र विधेयम्, यदेवमेवं भवितुमर्हति – **रमणीयार्थप्रतिपादकः शब्दः काव्यम्** ॥

अत्र रमणीयत्वं लोकोत्तराह्लादजनकज्ञानगोचरत्वम् । आह्लादश्च चमत्कारः । तत्र लोकोत्तरत्वं च तद्गतः चमत्कारत्वापरपर्यायः अनुभवसाक्षिको जातिविशेषः । तदेवमाह्लादे लोकोत्तरत्वस्य विशेषणात् चैत्र! धनं ते दास्यामीत्यादौ न काव्यत्वप्रसङ्गः । एवं लक्षणे वाचक इति शब्दस्य निवेशे तादृशार्थ–वाचकमात्रस्य काव्यत्वप्रसक्तिः । लक्षक इत्यस्य निवेशे तादृशार्थलक्षकमात्रस्य काव्यत्वप्रसक्तिः । व्यञ्जक इत्यस्य निवेशे तु तादृशार्थव्यञ्जकमात्रस्य काव्यत्वप्रसक्तिरिति सर्वेषां साकल्येन सङ्ग्रहाय साधारणस्य प्रतिपादकशब्दस्य निवेशः । शब्द इति एकवचनं जात्यभिप्रायेण । रमणीयार्थकः शब्द इति तु फलितोऽर्थः ॥

अर्थरूपमिति भरतः, यदुक्तम् –

इतिवृत्तं तु काव्यस्य शरीरं परिकीर्तितम् इति नाट्यशास्त्रे । इतिवृत्तं वृत्तोऽर्थः ।

व्यापाररूपमिति भट्टनायक–महिमभट्ट–भट्टतौतादयः, यदाहुः –

१. **शब्दप्राधान्यमाश्रित्य तत्र शास्त्रं पृथग्विदुः ।**
अर्थे तत्त्वेन युक्ते तु वदन्त्याख्यानमेतयोः ॥
द्वयोर्गुणत्वे व्यापारप्राधान्ये काव्यगीर्भवेत् । इति हृदयदर्पणे ।

२. **कविव्यापारो हि विभावनादिसंयोजनात्मा रसाभिव्यक्त्यव्यभिचारी काव्यमुच्यत** इति व्यक्तिविवेके ।

३. **अनुभावविभावानां वर्णना काव्यमुच्यते** इति काव्यकौतुके ।

व्यापारः क्रिया । सा च प्रथममते सामान्यरूपेणैव निर्दिष्टा । द्वितीयमते विभावादिसंयोजनात्मा कविव्यापार इति वचनात् व्यापारोऽयं कविनिष्ठं विभावादेः प्रतिपादकत्वमिति ज्ञायते । तृतीयमते तु अनुभावविभावानां वर्णनेति वचनात् तन्निष्ठमेव विभावानुभावयोः प्रतिपादकत्वमिति विशेषः । एवमत्र प्रथममते शब्दनिष्ठो व्यापारः काव्यं मतान्तरेण तु कविनिष्ठं प्रतिपादकत्वमिति भेदः।

शब्दार्थयुगलरूपमिति भामह–वामन–मम्मट–आनन्दवर्धनप्रभृतयः प्रायेण सर्वेऽपि शिष्टाः, यदाहुः –

१. शब्दार्थौ सहितौ काव्यम् इति भामहः ।

२. काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोः वर्तते इति वामनः ।

३. तददोषौ शब्दार्थौ सगुणावनलङ्कृती क्वापि इति काव्यप्रकाशे ।

४. शब्दार्थशरीरं तावत् काव्यम् इति ध्वन्यालोके ।

५. शब्दार्थौ निर्दोषौ प्रायस्सालङ्कारौ च काव्यम् इति काव्यालङ्कारसारसङ्ग्रहे उद्भटः।

६. अदोषौ सगुणौ सालङ्कारौ च शब्दार्थौ काव्यम् इति काव्यानुशासने हेमचन्द्रः।

७. गुणालङ्कारसहितौ शब्दार्थौ दोषवर्जितौ काव्यम् इति यशोभूषणे विद्यानाथः।

८. शब्दार्थौ वपुरस्य इति एकावल्यां विद्याधरः । एवमन्यदपि बोध्यम्।

* शब्दार्थयुगलस्यैव काव्यत्वमिति समर्थनम्

अत्र विचार्यते – तत्र शब्दमात्रस्य काव्यत्वं न युक्तम्, काव्यं ज्ञातम्, काव्यं बुद्धम् इत्यादेः व्यवहारस्य असाधुत्वापत्तेः । नाप्यर्थमात्रस्य, काव्यं श्रुतमित्यादेः तथात्वापत्तेः । इतिवृत्तं तु काव्यस्य शरीरं परिकीर्तितम् इति महर्षेर्वचनं तु तस्यापि शरीरत्वसद्भावाभिप्रायेण न पुनः तन्मात्रस्यैव तदित्यभिप्रायेणेति नासङ्गतिः । नापि व्यापारस्य, प्रतिपादकस्य प्राधान्ये शास्त्रत्वम्, प्रतिपाद्यस्य प्राधान्ये पुराणत्वम्, प्रतिपादनस्य प्राधान्ये तु काव्यत्वम् इत्यत्राविवादेऽपि काव्यं श्रुतम्, काव्यं ज्ञातम् इत्युभयविधव्यवहारस्य दुरुपपादत्वापत्तेः, तुल्यन्यायेन पुराणस्यार्थरूपत्वेन लक्षणीयत्वापत्तेश्च । न चेष्टापत्तिः, पुराणं श्रुतमित्यादेः व्यवहारस्य अयुक्तत्वप्रसङ्गात् । यत्पुनः विभावादिसंयोजनादिः कविनिष्ठो व्यापारः काव्यम् इत्युक्तम् – तदप्यसाधु, कविनिष्ठस्य तस्य साक्षात् काव्यनिष्ठत्वाभावात् । नहि अन्यनिष्ठो धर्मः अन्यस्य

व्यवहारे निमित्तं भवति । ननु कविकर्म काव्यमिति निर्वचनात् कर्मणश्च क्रियारूपत्वात् किमर्थं तन्निष्ठव्यापारस्य काव्यत्वं न भवतीति चेत् – भ्रान्तोऽसि, कर्मपदस्य [४]क्रियाशब्दवत् भावे इव कर्मण्यपि मनिन्प्रत्ययस्याभ्युपगमात्। तेनात्र कवेः कृतिरितिवत् तत्कृतमित्यप्यर्थः । अत एव घटोऽयं कुलालस्य कर्मेति सामानाधिकरण्येन प्रयोग उपपन्नो भवति ।

तस्मात् शब्दार्थौ काव्यमित्येव युक्तम्, परिशेषात्, कविकर्मत्वस्य समानत्वेन परस्परानुविद्धत्वेन च समप्राधान्याच्च । कविकर्मत्वं च शब्दे यथा – शारदा शारदाम्भोजवदनेति यमकादौ, उच्चरद्भूरिकीलालः शुशुभे वाहिनीपतिरित्यादौ च शब्दशक्तिमूलध्वनौ । अनयोराद्ये वाक्ये समानाकारस्य भिन्नार्थकस्य शब्दान्तरस्य अन्वेषणे कवेः प्रतिभाव्ययः अन्त्ये पुनः प्रकृतोपयोग्यर्थद्वयप्रतिपादकस्य शब्दस्य । अत एव तत्र शब्दस्य परिवृत्त्यसहत्वम् । अर्थे यथा – मुखं चन्द्र इव सुन्दरमित्युपमादौ,

जलकेलितरलकरतलमुक्तपुनःपिहितराधिकावदनः ।
जगदवतु कोकयूनोर्विघटनसङ्घटनकौतुकी कृष्णः ॥

इत्यादौ चार्थशक्तिमूलध्वनौ । अनयोराद्ये नानाविधेषु अर्थेषु सत्स्वपि यदीयसादृश्ये प्रतिपादिते सति प्रकृते वस्तुनि प्रकर्षस्य सिद्धिः तादृशचन्द्ररूपार्थस्य अन्वेषणे कवेः प्रतिभाव्ययः अन्त्ये तु अभिव्यक्तेन यदर्थेन पूर्ववत् प्रकृते प्रकर्षस्य सिद्धिः तादृशचन्द्राभेदं प्रति व्यञ्जकस्यार्थस्य। अत एवात्र शब्दाः परिवृत्तिं सहन्ते । शब्दार्थयोः उभयोरपि यथा –

[५]पहिअ ण एत्थ सत्थरमत्थि मणं पत्थरत्थले गामे ।
उण्णअं पओअरं पेक्खिऊण जइ वससि ता वस ॥

---

४. कृञः श च [अष्ट.३.३.१००] इति सूत्रेण डुकृञो भावे शप्रत्यये टापि निष्पन्नस्य क्रियाशब्दस्य कृतिरित्यर्थः कर्मणि निष्पन्नस्य तु कार्यमित्यर्थः ।

५. पथिक! नात्र स्रस्तरमस्ति मनाक् प्रस्तरस्थले ग्रामे ।
उन्नतं पयोधरं प्रेक्ष्य यदि वससि तद्वस ॥ [छाया] उल्लेखः सा.द. प्र.प.

अत्र नानार्थकानां सत्थरादिशब्दानां प्रयोगात् यथा शब्दानामन्वेषणे प्रतिभाव्ययः तथा व्यञ्जनाया वक्तृवैशिष्ट्यसमुत्थितत्वात् अर्थस्यान्वेषणेऽपि इत्युभयोरपि कविकर्मत्वम्। यथा वा –

[६]शयिता सविधेऽप्यनीश्वरा सफलीकर्तुमहो मनोरथान्।
दयिता दयिताननाम्बुजं दरमीलन्नयना निरीक्षते ॥

इति शृङ्गारादिरसध्वनौ । अत्र व्यञ्जकानां विभावादीनामर्थानां तद्रसानुकूलानां च कोमलानां शब्दानामन्वेषणे कवेः प्रतिभाव्ययः । ननु कोमलैः शब्दान्तरैः प्रतिपादिते सत्यपि शृङ्गारस्य प्रतिपत्तिरिति कथमत्र शब्दानामन्वेषणे प्रतिभाव्ययः कथं च तत्प्रयुक्तं परिवृत्त्यसहत्वमिति चेत् – उच्यते, अत्र हि विवक्षितेऽर्थे प्रतिपादनीये कोमला इव कठोरा अपि शब्दाः सन्ति किन्तु कविः कठोरान् विहाय कोमलानेव शब्दान् गृह्णातीति तेषामन्वेषणे कवेः प्रतिभाव्ययोऽवश्यं सम्भवति । यत्पुनः परिवृत्त्यसहत्वं नास्तीत्याक्षेपः स एवं समाधीयते – शब्दाः तावदुभयथा व्यञ्जका भवन्ति अर्थसापेक्षत्वेन तन्निरपेक्षत्वेन च । तत्र शब्दानां यदि अर्थसापेक्षत्वेन व्यञ्जकत्वं तर्ह्येव तेषां परिवृत्त्यसहत्वम्, यथा उच्चरद्भूरिकीलालेति शब्दशक्तिमूलध्वनौ । अथ तन्निरपेक्षत्वेन व्यञ्जकत्वं तर्हि तेषां तन्न सम्भवति, यथाधुनोक्ते वाक्ये। ततश्चात्र शब्देषु प्रतिभाव्यये सत्यपि न परिवृत्यसहत्वम् । एतेन शब्देषु परिवृत्त्यसहत्वे सति प्रतिभाव्ययो नियमेन भवति, प्रतिभाव्यये सति तु परिवृत्यसहत्वं न तथेत्युक्तं भवति ॥

परस्परानुविद्धत्वं च सार्वत्रिकमपि क्वचिदेव प्रतीतिगोचरः । तत्रार्थस्य शब्देनानुवेधो यथा –

उदेति सविता ताम्रः ताम्र एवास्तमेति च ।
सम्पत्तौ च विपत्तौ च महतामेकरूपता ॥

इति श्लोके द्वितीयताम्रशब्दस्य स्थाने रक्तशब्दस्य प्रयोगे । अत्र हि सामान्यरूपेण उत्तरार्धेन पूर्वार्धस्य समर्थनात् भगवतः सवितुः उदयास्तमययोः

६. रस. प्र.आ. ध्वनिकाव्यनिरूपणम् ।

एकरूपत्वं विवक्षितम्। तच्च तदैव सिध्यति यदि ताम्रशब्दप्रयोगात् परं पुनः ताम्रशब्द एव प्रयुज्यते। रक्तशब्दस्य प्रयोगे तु पूर्वम् अर्थे ताम्रशब्दस्य विशेषणतया प्रतीतिः अधुना रक्तशब्दस्येति विशेषणभेदात् सुविशदमेव अन्यरूपत्वम्। अत एव तथा प्रयोगे क्रमभङ्गाख्यो दोष इति शब्दप्रयोगकुशलाः प्राञ्चः। यदि पुनः अर्थे शब्दस्य विशेषणतया प्रतीतिः नाभ्युपेयते तर्हि प्रतीतिवैषम्यविरहात् कथं तद्दोषस्योपपादनम्? अत एव [७]हरिणाभिधीयते –

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते॥

एवमर्थस्य शब्देनानुवेधोऽपि। स च यथा – घटशब्दमुच्चारयेत्यभिप्रायेण घटमुच्चारय इत्युक्तौ सत्याम् अन्येन घटनमित्युच्चारणे सति आक्षेपकरणादयं विज्ञायते। आक्षेपकरणं च तदैव संगच्छते यदि तद्वाक्यस्य घटार्थकघटशब्दम् उच्चारयेति वक्तुः तात्पर्यमभ्युपगम्यते। अभ्युपगते च तस्मिन् तस्येहाननुसरणात् आक्षेपकरणमिति सङ्गतं भवति। न चात्र उच्चारणाधिक्यात् आक्षेपकरणम्, उच्चारयितुस्तेन श्रमोत्पत्तावपि आक्षेपकर्तुः तदसंभवात्। नहि लोके फलमेकम् अपेक्षमाणः कश्चिद्विवेकी स्वधनेनैव अनेकं फलमानीय समर्पयन्तमन्यं पुमांसमाक्षिपति।

तदेवं शब्देनार्थस्य अर्थेन च शब्दस्यानुवेधनात् उभयोः समप्राधान्यम्। अत एव महाकविभिः कृताः [८]वागर्थाविव सम्पृक्तौ इति [९]शब्दार्थाविव सत्कविर्द्वयं विद्वानपेक्षते इत्यादयश्च प्रयोगाः सुतरां साधुतामुपयान्ति।

किञ्च लोके व्याकरणादिकं योऽधीते, यश्च वेत्ति तयोरुभयोरपि वैयाकरणादिशब्देन व्यपदेशो दृश्यते। अत एव तदर्थद्वये कृतस्य प्रयोगस्य साधुत्वनिर्वाहाय पाणिनिः [१०]तदधीते तद्वेद इति सूत्रमारभमाणः अणादिप्रत्ययम् अनुशास्ति। यद्येकतरस्य प्राधान्यं तर्हि कथमेतस्य समर्थनम्?

७. वाक्य. ब्रह्मकाण्डः, का–११४.
८. वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥ इति समग्रं पद्यम्। रघु. प्र,स.श्लो–१.
९. माघ. द्वि.स. श्लो–८६. नालम्बते दैष्टिकतां न निषीदति पौरुषे इति पूर्वार्धम्।
१०. अष्ट. [४.५.५९]

किञ्च काव्यस्य शब्दमात्ररूपत्वे काव्यं बुध्यते, काव्यं ज्ञातम् इत्यादेः प्रयोगस्यानुपपत्तिः । अर्थमात्ररूपत्वे काव्यं पठ्यते, काव्यं श्रुतम्, काव्यादर्थोऽवगम्यते इत्यादेरनुपपत्तिः । एवमुभयोः सदोषत्वे तृतीयैव गतिर्ज्यायसीति काव्यस्य तदुभयरूपत्वेनैव निर्णयः साम्प्रतम् ।

अन्यच्च, काव्यस्य शब्दार्थयोः एकतरमात्ररूपत्वे तत्तत्पक्षे तत्तस्य प्राधान्यादन्यस्य विशेषणकुक्षौ निपतनात् अप्राधान्यमिति तत्तच्छक्तिमूलध्वनेः प्रभेदानाम् अन्यशक्तिमूलध्वनिप्रभेदैः समस्कन्धत्वेन परिगणनं यत्कृतं तदसङ्गतमेव जायेत। क्रियते च सर्वैः तथा परिगणनम्, यथा – संलक्ष्यक्रमव्यङ्ग्यो ध्वनिस्तावत् शब्दशक्त्युद्भवः अर्थशक्त्युद्भवश्चेति द्विविधः। तयोराद्यः वस्तुरूपः अलङ्काररूपश्चेति द्विप्रभेदः । अन्त्यस्तु व्यङ्ग्यव्यञ्जकभेदात् द्वादशप्रभेदः इत्यादिना । किं बहुना? दोषगुणादीनां सर्वेषामपि तथा समस्कन्धत्वेन परिगणनं पूर्ववदसङ्गतमेव सम्पद्येत ।

अन्यच्चेदम्, ये काव्यं शब्दरूपमित्यामनन्ति तन्मतेनार्थः शरीरस्थाने सन्निविशते उतस्वित् न? नाद्यः, तथा सति शरीरस्थानीयशब्देन सह समप्राधान्येन परिगणेयस्य तस्य रसाभिव्यञ्जकं वाक्यं काव्यम्, अर्थ–प्रतिपादकः शब्दः काव्यमिति विशेषणत्वं प्रकल्प्य पश्चादप्राधान्यमङ्गक्रियते कुतः? नान्त्यः, एवं सति शब्दमात्रं शरीरमिति आभरणवत् शरीराश्रितानाम् उपमाद्यर्थालङ्काराणाम् आश्रयाभावप्रसङ्गात् । ननु लक्षणेऽर्थस्य विशेषणत्वेऽपि शब्देन प्रतिपाद्ययोः वाच्यव्यङ्ग्ययोरर्थयोः यो वाच्यः स एव उपामादीनामाश्रय इत्यभ्युपगमात् नास्ति दोष इति चेत् – मैवम्, तदापि स्थितः स एव समस्यावेतालः । नह्येवमुक्तौ प्राक् कृतस्य आक्षेपस्य निरासो भवति येनेदं साधीयो गृह्येत? तस्मात् शब्दार्थौ काव्यमित्येव युक्तम् ।

ननु समप्राधान्यमित्येतत् न युज्यते, अर्थप्रतीत्यर्थं शब्दस्य प्रयोग इति शब्दस्य साधनत्वमर्थस्य च साध्यत्वमित्यवगमात् । नहि साध्यसाधनयोः समप्रधानभावं वैधेयोऽपि नाभ्युपैति – मैवम्, इह हि यद्यपि कविकर्मत्वादिना शब्दार्थयोः समप्रधानभावो बाह्यः, साध्यसाधनभावेन तु प्रधानाप्रधानभाव आन्तरः तथापि प्रथमस्यैव काव्यमिति व्यवहारे निमित्तत्वं नान्त्यस्य, यथा

स्त्रीपुंसयोः नियम्यनियामकभावेन प्रधानाप्रधानभावे सत्यपि मिथुनमिति व्यवहारे स्वरूपादिना प्राप्तस्य समप्रधानभावस्य। नहि मिथुनत्वं स्त्रीमात्रेण सिध्यति नापि पुरुषमात्रेण, व्यासज्यवृत्तित्वात् । एवमिहापि। एतेन काव्यत्वं मिथुनत्वमिव व्यासज्यवृत्ति न पुनः प्रत्येकमात्रपर्याप्तमिति सिद्धं भवति। एतेन [११]द्वित्वावच्छिन्नार्थप्रतिपादकत्वात् काव्यशब्दस्य द्विवचनापत्तिः, एकस्मिन् काव्ये कृते काव्यद्वयं कृतमिति व्यवहारापत्तिश्चेति जगन्नाथेन यदुक्तं तत्सर्वं परास्तं वेदितव्यम् ।

श्लोकवाक्यं काव्यमिति प्रयोगस्तु यद्यपि वाक्यस्य शब्दमात्ररूपत्वात् न सङ्गतः तथापि तस्य लाक्षणिकत्वाभ्युपगमात् वक्ष्यमाणलक्षणानुसरणाद्वा न दोषः । एतेन काव्यं श्रुतम्, काव्यं ज्ञातम् इत्यादय एकतरमात्रवृत्तयः सर्वेऽपि प्रयोगा व्याख्याता भवन्ति । अपौरुषेयं वाक्यं वेदः इति वाक्यविदां लक्षणं तु परिवृत्यसहत्वप्रयुक्तात् प्राधान्यात् न तु वस्तुस्थित्यनुरोधात्, अन्यथा तत्रापि वेदो ज्ञात इत्यादिप्रयोगस्यासङ्गत्यापत्तिः । काव्ये [१२]'गामाक्रम्य विभूतिभूषितनू राजत्युमावल्लभः' इत्यादौ शब्देषु परिवृत्यसहत्वे सत्यपि आत्यन्तिकस्य तस्य विरहात् न वेददृष्टस्य शब्दप्राधान्यस्य व्यभिचारप्रसङ्गः। एतेन आत्यन्तिकस्य परिवृत्त्यसहत्वस्य सद्भावादेव वेदशब्दानां प्राधान्यम्, तदनुरोधेनैव वाक्यविदां लक्षणमिति नासङ्गतिरित्युक्तं भवति ।

* प्राचीनमतपरीक्षणम्

नन्वस्तु भोः! शब्दार्थावेव काव्यमिति, किन्तु तस्य लक्षणं किम्? – यत्नः क्रियते, अत्र हि विमर्शकानां नैकविधस्य मतस्योपलम्भात् परीक्षयैव तन्निर्णयं भविष्यति । तत्र भामहादयः काव्यं शब्दार्थयुगलत्वेन निर्णीय साहित्यं तल्लक्षणम् इत्यामनन्ति । गुणालङ्कारसंस्कृतत्वमिति वामनः । मम्मटादयः तेन सह निर्दोषत्वमपि उपसञ्चक्षते । विश्वनाथः पुनः काव्यं

११. रस. काव्यलक्षणप्रकरणे ।
१२. दुर्गालङ्घितविग्रहो मनसिजं सम्मीलयंस्तेजसा
प्रोद्यद्राजकलो गृहीतगरिमा विष्वग्वृतो भोगिभिः ।
नक्षत्रेशकृतेक्षणो गिरिगुरौ गाढां रुचिं धारयन् इति पूर्वं पादत्रयम् ।

शब्दत्वेन निर्णीय रसात्मकत्वमेव तल्लक्षणम् इत्यभिधत्ते । रमणीयार्थ–प्रतिपादकत्वमिति जगन्नाथः । महिमभट्टस्तु व्यापाररूपत्वेन तन्निर्णीय विभावादिरेव तदिति वदन् अन्याविधामेव काञ्चित् सरणिमनुगच्छति । एवं भट्टतौतप्रभृतयः । तदेवमुच्चावचः सिद्धान्तः ।

एतेषु किं लक्षणं ज्यायः? एतदत्र विचार्यते – [१३]लक्षणं नाम लक्ष्यतेऽनेनेति व्युत्पत्त्या लक्षणीयपदार्थगतः कश्चिद्धर्मः । स च धर्मः काकवद्देवदत्तस्य गृहमित्यादौ देवदत्तगृहादेः काकादिः । सास्नादिमान् गौः इत्यादौ गवादेः सास्नाद्यादिः । अनयोः आद्यस्य पदार्थे कदाचिद्दर्शनात् कदाचिच्चादर्शनात् तात्कालिकलक्षणशब्देन व्यवहारः। अन्त्यस्य तु सार्वदिकत्वात् स्वरूपलक्षणशब्देनेति विशेषः । अनयोः प्राशस्त्यात् अन्त्यमेव लक्षणं सर्वत्र लक्षणशब्देन गृह्यते इति स्थितिः । स्थिते चैवम्, काव्यस्य तादृशो धर्मः क इति विचारणीयम् यो धर्मः स्वरूपलक्षणशब्देन व्यवहर्तुं शक्येत, यद्बलेन इदं काव्यम्, इदं च अकाव्यम् इति व्यतिरेकोऽपि गम्येत ।

तत्र न तावत् साहित्यं लक्षणं भवितुमर्हति, तस्य सर्वत्र भावेन काव्यस्वरूपनिर्णयं प्रति अप्रयोजकत्वात् प्रत्युत घटमानयेत्यादावपि वाक्ये तस्य भावेन काव्यव्यवहारापत्तेश्च । ननु साहित्यस्य सार्वत्रिकत्वेनातिप्रसङ्ग इति तच्छब्देन विलक्षणमेव साहित्यं ग्राह्यमिति चेत् – अस्तु, बाढं ग्रहीष्यते, प्रथमं तस्य स्वरूपं निरुच्यताम् ।

नापि गुणालङ्कारसंस्कृतत्वं निर्दोषत्वं च तथा, उत्कर्षमात्रप्रयोजकत्वात्। नहि गुणालङ्कारसंस्कृतं निर्दोषं च शब्दार्थयुगलं काव्यमित्युक्ते कस्यापि पुंसः सामग्र्येण काव्यत्वबुद्धिः संभवति । अथ सम्भवतीत्युच्यते तर्हि शौर्योत्साहादिमान् कटककुण्डलादिविशिष्टो निर्दोषश्च प्राणी मनुष्य इत्युक्तेऽपि तुल्यन्यायात् मनुष्यमात्रस्य बुद्धिः सम्भवेत् ।

नापि रसात्मकत्वम्, वस्त्वलङ्कारप्रधानानां वाक्यानामकाव्यत्वापत्तेः, अर्थशक्तिमूलध्वनौ वस्त्वलङ्कारत्वाभ्यां विभजनस्य तत्कृतस्य अयुक्ततापत्तेश्च।

१३. लक्ष दर्शनाङ्कनयोरिति धातोः करणार्थे करणाधिकरणयोश्च [अष्ट.३.३.११७] इति करणे ल्युट् ।

रमणीयार्थप्रतिपादकत्वमपि तथा, जलकेलितरलकरतलेति पद्येऽर्थशक्ति-मूलध्वनौ राधिकावदनं चन्द्र इति रूपकस्याभिव्यञ्जकेऽर्थे लक्षणस्यासञ्चारात् अव्याप्त्यापत्तेः। न च तत्प्रतिपादके शब्दे लक्षणस्य सञ्चारान्नास्ति दोष इति वाच्यम्, तत्प्रतिपाद्येऽर्थे रमणीयत्वाभावेनाव्याप्तेः तादवस्थ्यात्। नह्यत्र रूपकाभिव्यञ्जकोऽर्थो रमणीयो वर्तते येन लक्षणमेतत् साधीयो घटेत। एवं चात्र शब्देन यदर्थस्य प्रतिपादनं न तत्र रमणीयत्वम्, यत्र च रमणीयत्वं न तदर्थप्रतिपादकत्वं शब्दे किन्तु अर्थे इति एकं संधित्सतोर्भवतः अपरस्य प्रच्यवः। किञ्च रमणीयं रमणीयमित्युच्यते तत्प्रयोजकस्य पुनरनभिधानमिति अपलापस्य सम्भवात् चैत्र! धनं ते दास्यामीत्यादावपि वाक्ये काव्यत्वप्रसङ्गः। यद्यपि लोकोत्तराह्लादजनकज्ञानगोचरता इत्युच्यते तथापि मुखं चन्द्र इव सुन्दरमित्यादौ आह्लादे लोकोत्तरत्वमस्ति अनुपदोक्ते तु तन्नास्तीत्यस्य वादमात्रत्वात् अव्यवस्थापकत्वम्।

न च विभावादिरपि काव्यस्य लक्षणम्, रसपदार्थसय सद्भाव एवार्थस्य विभावादिरूपतासम्भवेन तच्छून्ये

स्तनाभोगे पतन् भाति कपोलात्कुटिलोऽलकः।
शशाङ्कबिम्बतो मेरौ लम्बमान इवोरगः॥

इति स्वात्मविश्रान्तार्थके [१४]पद्ये सिंहो माणवक इत्यादौ च वाक्ये विभावादिरूपलक्षणस्य विरहादतिप्रसङ्गात्। तस्मात् लक्षणान्तरमेवात्र साधीयः।

* काव्यलक्षणं किं भवितुमर्हति?

तत्रेदं प्रथमं निवेदनीयम् – कस्यचित् प्रभेदस्य भेदोपभेदपुरस्सरं साकल्येन ज्ञाने सत्यपि तद्गतासाधारणधर्मावगतिः प्रज्ञाप्रकर्षे सत्येव सम्भवति नान्यथेति निर्विवादम्। अत एव प्रत्यहं दृश्यमानानामपि पाषाणादीनां पदार्थानां लक्षणे पृष्टे मौनमेवास्माकं प्रतिक्रिया भवति न तु वचनम्। स्थिते चैवम्, अमूर्तस्यास्य काव्यस्य यल्लक्षणं तस्याख्यानं मन्दमतीनां नो दुष्करम् असाम्प्रतं च तथापि प्राचीनानां लक्षणेषु सदोषत्वेन निर्णीतेषु निर्दोषस्य लक्षणस्य कथने यत्नः

१४. रस. द्वि.आ. उपमालक्षणप्रकरणम्।

कश्चिदवश्यं कार्यः अन्यथा दोषोद्धाटनमात्रेण प्राज्ञंमन्येषु वयमपि परिगणिताः स्यामेति मनागत्र प्रवृत्यते न तु दर्पात्। तदेवं विचार्यते – कवयो हि किमर्थं काव्यानि कुर्वन्ति? सहृदयानाम् आनन्दजननार्थमिति चेत् – तर्हि तदन्यतोऽपि सम्भवतीति कुतोऽत्रैवेति प्रश्नः। लोकोत्तरस्यानन्दस्य जननार्थमिति चेत् – युक्तमभिहितम्, तदर्थमेव कवीनां प्रवृत्तिरिति निर्विवादसिद्धत्वात्। स्थिते चैवम्, तल्लोकोत्तरानन्दः काव्ये कस्माद्भवतीति तावत् विचारणीयं प्रथमम्।

स तावत् अलङ्कारात् न भवति, आभरणस्थानीयत्वात्। नापि गुणात्, शौर्यादिस्थानीयत्वात्। नापि पदविन्यासरूपात् मार्गात्, अवयवसंस्थान-विशेषरूपत्वात्। अस्यां स्थितौ, काव्यगतात् कस्मात् तावत् अंशात् तादृशानन्द इति पुनर्विचारे श्रोतृगतरत्यादिव्यञ्जकत्वम् अन्तरेण नान्यः कोऽप्यंशः नः प्रतीतिपथमायाति। तत्र च तद्रत्यादिरेव रस इति स्थिते व्यञ्जकतासम्बन्धेन तद्वत्त्वमेव काव्यस्य असाधारणो धर्म इति तदेवास्य लक्षणं सम्पद्यते। युक्तं चेदम्, रसे सति काव्यं जीवति अन्यथा मृतकल्पं विभासते इति समेषामनुभवात्। एतेनेदं लक्षणं निर्गलितम् –

रसात्मकौ शब्दार्थौ काव्यम्॥

शब्दार्थयोः रसात्मकत्वं व्यञ्जकतासम्बन्धेन। तत्र शब्दस्य वर्णसमुदायरूपस्य कोमलत्वादिमत्त्वेन रसात्मकत्वम्, अर्थस्य तु विभावादिरूपत्वेनेति विशेषः। न चात्र शब्दस्य अर्थनिरपेक्षत्वेनैव रसव्यञ्जकत्वम् उच्यते कुत इति शङ्क्यम्, अर्थस्य विभावादिरूपत्वे पार्थक्येन व्यञ्जकत्वस्याभ्युपगमात्। एतेन अर्थसापेक्षस्य व्यञ्जकत्वं रसातिरिक्तस्थले, यथा शब्दशक्त्युद्भवध्वनौ। तन्निरपेक्षस्य पुनरत्रेति विषयविभागः सिद्धो भवति। तत्र वर्णानां रसव्यञ्जकत्वं [१५]ध्वनिकारेणाप्युक्तम् –

शषौ सरेफसंयोगो ढकारश्चापि भूयसा।
विरोधिनः स्युः शृङ्गारे तेन वर्णा रसच्युतः॥
त एव तु निवेश्यन्ते बीभत्सादौ रसे यदा।
तदा तं दीपयन्त्येव तेन वर्णा रसच्युतः॥

१५. ध्वनि. तृ.उ. का–३,४.

रसशब्दश्चात्र रस्यते इति व्युत्पत्त्या रसभावादिपरः न तु शृङ्गारादिमात्रपरः।

ननु यदीदमेव काव्यस्य लक्षणं तर्हि वस्त्वलङ्कारयोः यत्र प्राधान्येन प्रतीतिः तत्राव्याप्तिः प्रसज्येत – अत्र ब्रूमः, इमौ वस्त्वलङ्काररूपौ अर्थौ क्वचित् वाच्यौ क्वचिच्च व्यङ्ग्यौ भवतः । तयोश्च यदि प्राधान्यं तर्हि रसाभिव्यञ्जने प्रवृत्तेन कविना कुतः तयोः उपादानमिति व्यर्थत्वशङ्कायां सार्थक्योपपादनाय चिरादपि तयोः रसे पर्यवसानमभ्युपेयम् । ततश्च समुद्राभिमुखस्य नदीजलस्य सेतुना निरोधात् किञ्चित्कालं विश्रान्तौ सत्यामपि सेतोर्भेदने यथा समुद्रं प्रत्येव गमनं तथाऽत्रापि प्रथमं प्राधान्येन प्रतीतयोरपि विचारवशात् पश्चात् रसे एव पर्यवसानमिति अप्राधान्येनैव प्रतीतिः । अथ अप्राधान्यं तर्हि स्थिरत्वासम्भवात् रसे पर्यवसानमित्येतत् हेलयैव सिद्धम् । लोकेऽपि योऽप्रधानो भवति स प्रधानानुगामी दृश्यते । ननु क्वचित् ताटस्थ्यमपि दृश्यते – लोके तथा दर्शनेऽपि प्रकृतोपयोगिमात्रं सङ्गृह्णतः कवेः प्रबन्धे तथा दर्शनाभावात् ।

नन्वेवमपि रसव्यञ्जकत्वाभावात् विरोधाभासादौ यमकानुप्रासादौ च काव्यत्वमेव तावन्न सिध्येत् – अत्र ब्रूमः, यमकविरोधाभासादिर्हि शब्दादेः धर्मः । तत्र च धर्ममात्रस्यावस्थानं न सम्भवतीति अविनाभावात् शब्दादेः धर्मिण आक्षेपो भवति। ततश्च धर्मिणि यदि रसाभिव्यञ्जकत्वं तर्हि तद्धर्मस्यापि भवतीति दोषाभावः । नहि धर्मो धर्मिणो भिद्यते येन तत्रापि लक्षणस्य सङ्गमने यत्नः क्रियेत । ननु भोः! अन्यदेव पृष्टम् अन्यदेवाभिहितम् । नहि रिक्तः कूपः तृष्णामुपशमयति । यत्र रसस्य गन्धोऽपि नास्ति तादृशे विरोधाभासादिघटिते वाक्ये काव्यत्वं कथमिति पृष्टोऽसि, शब्दार्थयोः रसाभिव्यञ्जकत्वे सति तत्रत्ययमकोपमादेः काव्यत्वं सम्भवति इत्यन्यदेवाभिदधासि, साधु खल्विदमुच्यते – आम्रान् पृष्टः कोविदारानाचष्टे। अवलोक्यतां स्पष्टप्रतिपत्तये, इमानि हि [१६]वाक्यानि सन्ति –

१६. १. कुव. विरोधाभासालङ्कारः   २. कुव. कारणमालालङ्कारः
३. रस. प्र.आ. चतुर्थकाव्यप्रभेदनिरूपणम् ।

विनापि तन्वि! हारेण वक्षोजौ तव हारिणौ ।
नयेन श्रीः श्रिया त्यागः त्यागेन विपुलं यशः ।
शारदा शारदाम्भोजवदना वदनाम्बुजे ।
गोत्रात्रिपुत्रनेत्राय गोत्रात्रे ते नमो नमः ।

कथमेषां विरोधाभासादिघटितानां रसाभिव्यञ्जकत्वम्? ततश्च काव्यत्वम्? – उच्यते बाढम्, अत्रापि यदि शब्दार्थयोः रसाभिव्यञ्जकत्वं तर्हि तद्धर्मस्यापि तत्त्वमबाधितम् । अथ नास्ति रसाभिव्यञ्जकत्वं तर्हि काव्यत्वमपि नास्तीति निर्णयः । अत एव ध्वनिकार एवमादौ स्थले काव्यत्वं नास्तीति मन्यते,[१७] यदुक्तं तेन चित्राख्यं काव्यं विमृशता – न तन्मुख्यं काव्यम्, काव्यानुकारोऽसौ ॥ अग्रे च पुनः तदेवाधिकृत्य विचारयता – एतच्च कवीनां विशृङ्खलगिरां रसादितात्पर्यमनपेक्ष्यैव काव्यप्रवृत्तिदर्शनात् अस्माभिः परिकल्पितम् । इदानीन्तनानां न्याय्ये काव्यनयव्यवस्थापने क्रियमाणे नास्त्येव ध्वनिव्यतिरिक्तः काव्यप्रकारो यतः परिपाकवतां कवीनां रसादितात्पर्यविरहे व्यापार एव न शोभते ॥ तदनु तत्रैवाग्रे पुनरपि – इदानीन्तनकविकाव्यनयोपदेशे क्रियमाणे प्राथमिकानाम् अभ्यासार्थिनां यदि परं चित्रेण व्यवहारः प्राप्तपरिणतीनां तु ध्वनिरेव काव्यमिति स्थितम् इत्यादि ॥ एवं च एतावता सन्दर्भेण निराकृतपूर्वमपि दर्पणकारोक्तमेव लक्षणं युक्तं भवतीति स्थितम् । तत्र वाक्यमित्यस्य स्थाने शब्दार्थाविति पदं विन्यास्यमिति परं विशेषः ।

* प्रकारान्तरेण लक्षणस्य विचारः

ननु च भोः! यदि शब्दार्थयुगलं रसात्मकमेव काव्यमिति साग्रहं भण्यते तर्हि यमकोपमादिघटितेषु वस्त्वलङ्कारघटितेषु च वाक्येषु कवीनां सहृदयानां च प्रवृत्तिरेव न स्यात् । यत्र हि कवीनां प्रतिभाव्ययः सहृदयानां च प्रवृत्तिः तत्र केनचित् काव्यप्रकारेण स्वीकृतेन भवितव्यम् । तत्र भवेन्नाम रसात्मक–शब्दार्थयुगलस्य सर्वोत्कृष्टकाव्यत्वमिति किन्तु तेन तस्यैव काव्यत्वमिति आग्रहो न विचारवतां शोभते । ध्वनिकारेण तु सर्वोत्कृष्टं काव्यं मनसि

१७. ध्वनि. तृ.उ. का–४२.

निधाय तस्यैव कर्तव्यत्वमित्युपदिशता तदाभिमुख्यसम्पादनार्थं मन्ये तथाभिहितं न तु चित्राख्यस्य काव्यस्य काव्यत्वमेव नास्तीत्यभिप्रायेण। बाधकाभावे सति योग्यत्वे च सति बहवो नन्वनुग्राह्या भवन्ति। ततश्च बह्वनुग्राहकं लक्षणान्तरमेव अत्रोचितमिति चेत् – बाढमस्तु, तर्हि एवमत्र विचार्यते –

लोके यानीमानि नानारूपाणि वाक्यानि श्रूयन्ते तेषु रामो ग्रामं गच्छति, चैत्रः पचति, वृक्षः प्ररोहति इत्यादीनां वाक्यानां तावन्न काव्यत्वम् । मुखं चन्द्र इव सुन्दरम्, [१८]सर्वदो माधवः पायात्स योऽगङ्गामदीधरत्, हारेण विनापि हारिणौ इत्यादीनां पुनः काव्यत्वमेषणीयम्, प्रतिभाव्ययस्य दर्शनात्। स्थिते चैवम्, पूर्वेषु अविद्यमानः उत्तरेषु पुनः विद्यमानः काव्यत्वप्रयोजको धर्मः क इति विचारे रमणीयत्वमन्तरेण नान्यः कोऽपि धर्मो वक्तुं शक्यते । एवं चेदं लक्षणं सिद्धम् –

रमणीयौ शब्दार्थौ काव्यम् ।

ननु शब्दार्थयोः रमणीयत्वं किंस्वरूपमिति आख्यातव्यम् अन्यथा लक्षणस्य दुर्बोधत्वप्रसङ्गः – उच्यते, रमणीयत्वं चमत्कारजनकत्वम्। तत्र रसध्वनिस्थले शब्दार्थयोः व्यञ्जकत्वेन। व्यञ्जकत्वं च शब्दे तत्तद्रसानुकूलवर्णघटितत्वेन, अर्थे पुनः विभावादिरूपत्वेन । वस्त्वलङ्कारध्वनिस्थले तु यत्र शब्दशक्तिमूलध्वनिः, यथा –

[१९]शनिरशनिश्च तमुच्चैर्निहन्ति यस्मै कुप्यसि नरेन्द्र त्वम् ।
यत्र प्रसीदसि पुनः स भात्युदारोऽनुदारश्च ॥

इत्यादौ, तत्र विवक्षितबह्वर्थप्रतिपादकत्वेन रमणीयत्वम् । यत्र तु अर्थशक्तिमूलध्वनिः निर्णीयते, यथा –

[२०]अइपिहुलं जलकुंभं घेत्तूण समागदम्मि सहि! तुरिअम्।
समसेससलिलणीसासणीसहा वीसमामि खणम् ॥

---

१८. कुव. श्लेषालङ्कारप्रकरणम् ।
१९. उल्लेखः का.प्र. च.उ. शब्दशक्तिमूलध्वनिप्रकरणम्।
२०. अतिपृथुलं जलकुम्भं गृहीत्वा समागतास्मि सखि! त्वरितम्।
श्रमस्वेदसलिलनिःश्वासनिस्सहा विश्राम्यामि क्षणम्। उल्लेखः का.प्र. द्वि.उ

इत्यादौ, तत्र गोप्यत्वादिविशिष्टतया प्रतिपादनेन । [२१]निश्वासान्ध इवादर्श इत्यादौ लक्षणामूलध्वनिस्थले अर्थस्योक्त्यन्तराशक्यतया प्रतिपादनेन रमणीयत्वम् । एवं गुणीभूतव्यङ्ग्यस्थलेऽपि अनेनैव प्रकारेण तन्निर्णेतव्यम् ।

अधमकाव्यस्थले शब्दालङ्कारेषु अनुप्रासे वर्णसाम्यरूपे समानां वर्णानां भिन्नपदगतत्वेन अर्थे सति भिन्नार्थकत्वेन वा रमणीयत्वम् । एतेन नयनम्, नवनीतमित्यादौ स्वरूपेण वर्णसाम्ये सत्यपि अखण्डपदगतत्वात् न [२२]छेकानुप्रासः । यशः, चय इत्यादौ समानस्थानकत्वेन वर्णसाम्ये सत्यपि तस्मादेव हेतोः न [२३]श्रुत्यनुप्रासः । बालका वदन्तः पश्यन्तः खादन्तश्च गच्छन्तीत्यत्र स्वरव्यञ्जनसमूहस्य भिन्नपदगतत्वेऽपि भिन्नार्थकत्वाभावात् [२४]नान्त्यानुप्रासः । एवं प्रकारान्तरेऽपि । [२५]यमके अवर्त्यमानावर्तमानयोः तद्घटितयोर्वा अर्थभेदेन रमणीयत्वम् । तेन दिने दिने सा परिवर्धमानेत्यादौ नायमलङ्कारः । श्लेषे तु वाक्यार्थयोः वर्ण्यत्वस्य अवर्ण्यत्वस्य वर्ण्यावर्ण्यत्वस्य वा सद्भावेन । तेन श्वेतो धावतीत्यादौ शुनकोऽस्मादस्मात् प्रदेशात् धावतीति श्वेतवान् धावतीत्यनेकस्य वाक्यार्थस्य प्रतीतावपि न श्लेषः । एवमन्येष्वपि शब्दालङ्कारेषु ।

अर्थालङ्कारेष्वपि उपमादौ सादृश्यस्य वर्ण्यवृत्तिधर्मातिशयाधायकत्वेन रमणीयत्वम् । एतेन घटः पट इव द्रव्यम् इत्यादौ नोपमालङ्कारः, तत्र घटो

---

२१. रविसङ्क्रान्तसौभाग्यः तुषारावृतमण्डलः ।
निःश्वासान्ध इवादर्शः चन्द्रमा न प्रकाशते ॥ इति समग्रं पद्यम् ।

२२. छेको व्यञ्जनसङ्घस्य सकृत्साम्यमनेकधा । व्यञ्जनसमूहस्य क्रमेण स्वरूपेण च सकृदावृत्तिरित्यर्थः । सा.द. द.प. का-३.

२३. उच्चार्यत्वाद्यदेकत्र स्थाने तालुरदादिके ।
सादृश्यं व्यञ्जनस्यैव श्रुत्यनुप्रास उच्यते ॥ सा.द. द.प. का-५.

२४. व्यञ्जनं चेद्यथावस्थं सहाद्येन स्वरेण तु ।
आवर्त्यतेऽन्त्ययोज्यत्वादन्त्यानुप्रास एव तत् ॥ सा.द. द.प. का-६.

२५. सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः ।
क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते ॥ सा.द. द.प. का-८.

द्रव्यमित्युक्तौ यावतो द्रव्यत्वस्य प्रतीतिः पट इवेति योजनेऽपि तावत एवेति द्रव्यत्वेऽतिशयस्याप्रतीतेः । मुखं चन्द्र इवेत्युक्तौ तु सा भवत्येव, मुखं सुन्दरमित्युक्तौ यावतः सुन्दरत्वस्य प्रतीतिः चन्द्र इवेति योजने ततोऽप्यधिकस्य प्रतीतेः । सालकं ते वदनं सभ्रमरं कमलमिवेत्यादौ तु साधारणधर्मस्य बिम्बप्रतिबिम्बभावापन्नत्वेन सादृश्यघटितत्वमिति सादृश्यस्य रमणीयत्वम् । सकलकलं नगरं चन्द्रमण्डलमिवेत्यादौ पुनः भिन्नयोरर्थयोः एकशब्देन प्रतिपादनात् ।

विरोधाभासादौ विरोधस्य प्रातिभासिकत्वेन रमणीयत्वम् । एतेनापेक्षाबुद्ध्या प्रयुक्ते देवदत्तः कृशोऽपि पीनः इत्यादौ नायमलङ्कारः । एवं सर्वत्रापि रमणीयताप्रयोजकं यत्किञ्चित् स्वयमेवान्वेष्यम् । यत्र तु कृतेऽपि अन्वेषणे तादृशं किञ्चिदपि नोपलभ्यते, यथा- देवदत्तो ग्रामं गच्छतीत्यादौ तत्र काव्यत्वमेव नास्तीति निर्णयः । एवं यत्र यत्र प्रतिभाव्ययः तत्र सर्वत्रापि चमत्कारस्य अवश्यम्भावात् कथञ्चित् तत्र काव्यत्वेन भवितव्यम् । नहि मुखं सुन्दरमितिवत् मुखं चन्द्र इव सुन्दरमिति वाक्यं प्रतिभाव्ययादृते प्रयोक्तुं शक्यते । अत एव गङ्गायां घोषः, कुन्ताः प्रविशन्ति, आयुर्घृतमित्यादीनां [२६]वाक्यानां काव्यत्वम् न तु तत्स्थाने प्रयुक्तानां गङ्गातीरे घोषः, कुन्तधारिणः प्रविशन्ति, आयुष्कारणं घृतम्, वाहीको मूर्ख इत्यादीनाम् ।

ननु भोः! बाढमस्तु, तथापि एवं सति एतादृशानां कतिपयानां वाक्यानां प्रयोगमात्रेण कश्चित् कविरित्युच्येत – उच्यतां भोः! कुतस्ते मत्सरः ? नास्ति मत्सरः, व्यवहारातिप्रसङ्गो भवतीति चेत् – एवं तर्हि कवनशील एव कविरित्यङ्गीक्रियते । अलं चिन्तया ।

नन्वस्य लक्षणस्य शब्दशक्तिमूलध्वनौ यमकानुप्रासादौ अर्थशक्तिमूलध्वनौ च अव्याप्तिः, आद्ययोः शब्दमात्रस्य अन्त्ये पुनरर्थमात्रस्येति उभयोरपि

२६. मुखं चन्द्र इत्यत्र सदृशयोः पदार्थयोरभेदे प्रतिपादिते यथा रूपकालङ्कारः यथा च काव्यत्वम् तथा समीपयोः गङातीरयोः, संयुक्तयोः कुन्तपुंरुषयोः, कार्यकारणयोश्च आयुर्घृतयोः अभेदे प्रतिपादिते अलङ्कारः कश्चित् काव्यत्वं च अभ्युपगम्येत । तदैव सङ्गतिरित्यस्माकं प्रतिभाति । तत्र तृतीये वाक्ये हेत्वलङ्कारोऽभ्युपगम्यते यच्च युक्तम् ।

२७. फलव्यापारयोर्धातराश्रये तु तिङः स्मृताः । वै.भू.सा. का–१२.

रमणीयत्वाभावात् – मैवम्, अन्यस्मिन् रमणीयत्वे तत्सम्बन्धात् अन्यत्रापि तत्सम्भवात् दोषाभावः । यद्वा, शब्दार्थौ इत्यत्र शब्दार्थौ च शब्दार्थौ चेति द्वन्द्वयोरेकशेषः । ततश्च द्वितीयेन शब्देन रमणीयताशालिशब्दार्थयोः सङ्ग्रहे प्रथमेन तादृशस्य एकैकस्यापि सङ्ग्रहो भविष्यति । एतेन यथा धातोः [२७]फलव्यापारोभयार्थवृत्तेः देवदत्तः तण्डुलं पचतीति कर्त्रर्थकलकार-समभिव्याहारे तण्डुलाभिन्नाश्रयवृत्तिः या विक्लित्तिः तज्जनको यो व्यापारः तदाश्रयो देवदत्त इति धात्वर्थीभूतफलात् व्यापारस्य प्राधान्यम्, देवदत्तेन तण्डुलः पच्यते इति कर्मार्थकलकारसमभिव्याहारे देवदत्ताभिन्नाश्रयवृत्तिः यो व्यापारः तज्जन्या या विक्लित्तिः तदाश्रयः तण्डुल इति तादृशादेव व्यापारात् फलांशस्य प्राधान्यम्, देवदत्तेन भूयते इति भावार्थकलकारसमभिव्याहारे तु देवदत्ताभिन्नाश्रयावृत्ति भवनम् इत्युभयोः समानं प्राधान्यं तथैवात्रापि क्वचित् शब्दस्य प्राधान्यम्, क्वचिदर्थस्य क्वचित् पुनरुभयोरिति विभावनीयम् ।

ननु भोः! एवमपि रमणीयत्वं नानुगतीकृतमि लक्षणमिदमस्माकं दुरवबोधमेव प्रतिभाति? – अये महात्मन्! वेतालवन्मां गृह्णन् न मुञ्चसि कुतः? इयतापि न तृप्तोऽसि ? अस्तु, क्रियतेऽनुगमनम् । तदेवं गृह्यताम्, शब्दे रमणीयत्वं यमकाद्यलङ्कारयोगात् व्यञ्जकत्वाद्वा । अर्थे तत्त्वं तु कल्पितत्वात्, तथाहि –

वाङ्मयं यदिदं विभासते तत् काव्यं शास्त्रं चेत्युभयथा प्रवृत्तम् । तत्र काव्ये यावानर्थो वर्तते स सर्वोऽपि कल्पितो भवति । अत एव सोऽसत्यः । शास्त्रे पुनरर्थः सर्वोऽपि वास्तविकः । अत एव स सत्यः । न तत्र जात्वपि कल्पितार्थस्य संस्पर्शः । यथा यथा सत्यस्यार्थस्य प्रतिपादनं तथा तथा शास्त्रे प्रकर्षः । यथा यथा तु असत्यस्य तथा तथा निकर्षः । यदि क्वचिदसत्यार्थो दृश्यते तर्हि अनुपदमेव तस्य सत्येऽर्थे पर्यवसानम्, यथा – [२८]वायुर्वै क्षेपिष्ठा देवतेत्यर्थवादादौ । अत्र सर्वासां देवतानां क्षिप्रगामित्वे समानेऽपि वायोः तदतिशयकल्पनं बाधितं सत् वायुदेवतायाः क्षिप्रगामित्वेन

२८. वायव्यं श्वेतमालभेत भूतिकाम इति विधिः । अयं तच्छेषः ।

तद्देवताकविधेः स्तुतौ पर्यवस्यति । कल्पितार्थस्य चमत्कारित्वात् तद्द्वारा तद्देवताकविधौ आभिमुख्यसम्पादनार्थम् एवं प्रतिपादनमिति बोध्यम् । एवं या निशा सर्वभूतानाम्, द्वा सुपर्णा सयुजा सखाया इत्यादावपि बोध्यम् । न च व्याकरणादौ सर्वस्यापि प्रकृतिप्रत्ययविभागस्य कल्पितत्वात् कथं पूर्वोक्तस्य सङ्गतिरिति वाच्यम्, शास्त्रशब्देन वेदान्तस्यैव ग्रहणात् । तत्र हि 'स अत्मा तत्त्वमसि श्वेतकेतो' इत्यादौ वर्तत एव सत्यार्थप्रतिपादकत्वम् । यद्वा, व्याकरणादौ पारमार्थिकदृष्ट्या कल्पितत्वेऽपि व्यावहारिकदृष्ट्या सत्यत्वमवश्यं वर्तते ।

काव्ये पुनः सर्वथा कल्पितस्यैवार्थस्य प्रतिपादनम् । नात्र जात्वपि वास्तविकार्थस्य संस्पर्शः । यथा यथा हि असत्यास्यार्थस्य प्रतिपादनं तथा तथा तस्मिन् प्रकर्षः । यथा यथा तु सत्यस्य तथा तथा निकर्षः । यदि पुनः सत्यार्थो दृश्यते तर्हि स दोषायैव कल्पते, तदेतद् ध्वनितं ध्वनिकारेण – [२९]नहि कवेः इतिवृत्तमात्रनिर्वहेणेन किञ्चित् प्रयोजनम्, इतिहासादेरेव तत्सिद्धेः ॥ एवं काव्यं शास्त्रं चेत्युभयं परस्परमत्यन्तविरुद्धस्वभावम् । एवमपि क्वचित् शास्त्रं काव्यच्छायामनुहरति क्वचिच्च काव्यं शास्त्रच्छायाम् । तदा तु सङ्करः । सङ्कीर्णे तस्मिन् यद्यपि पूर्वोक्तस्य व्यभिचारः तथाप्यसङ्कीर्णतायामेवेदं वचनमिति मन्तव्यम् ।

काव्ये हि यावन्तोऽर्थाः ते सर्वेऽप्यसत्याः । यदि कल्पितत्वं नास्ति तर्हि काव्यत्वमेव न भवति, तथाहि – मुखं चन्द्र इव सुन्दरमित्यत्र मुखे चन्द्रस्य सादृश्यं कल्पितम्, उपमानोपमेययोः न्यूनाधिकगुणशालित्वात् । मुखं चन्द्र इत्यत्र चन्द्रस्याभेदः, भेदस्यैव सिद्धत्वात् । [३०]सौधाग्राणि पुरस्यास्य स्पृशन्ति विधुमण्डलम् इत्यत्र विधुमण्डलसंयोगः, तदभावस्यैव प्रत्यक्षत्वात् । [३१]नयेन श्रीः श्रिया त्यागः त्यागेन विपुलं यशः इति कारणमालादौ कार्यकारणभावः, व्यभिचारात् । नहि नये सति सम्पत्तिरवश्यं भवति सम्पत्तौ सत्यां दानम्, दाने सति वा यशः । एतेन यत्र वास्तविक एव कार्यकारणभावः [३२]सङ्गात्

२९. ध्वनि. तृ.उ. का–१४.
३०. कुव. अतिशयोक्तिप्रकरणम् ।
३१. कुव. कारणमालालङ्कारप्रकरणम् ।
३२. गीता. द्वि अ. श्लो–६२, ६३.
३३. कुव. काव्यलिङ्गालङ्कारप्रकरणम् ।
३४. कुव. अर्थान्तरन्यासालङ्कारप्रकरणम् ।

संजायते कामः कामात् क्रोधोऽभिजायते इत्यादौ तत्र नायमलङ्कारः। [३३]जितोऽसि मन्दकन्दर्प ! मच्चित्तेऽस्ति त्रिलोचन इत्यत्र काव्यलिङ्गे चित्ते शिवस्य अवस्थातुमशक्यत्वात् कन्दर्पपराजयस्य समर्थकत्वेन विवक्षितोऽर्थः कल्पितः । [३४]हनुमानब्धिमतरद्दुष्करं किं महात्मनामित्यत्र अर्थान्तरन्यासेऽपि महात्मानः सर्वेष्वपि कार्येषु समर्था इत्यर्थोऽसम्भवात् कल्पितः । एवमन्यत्रापि । मुखं सुन्दरम्, चैत्रो गृहं यातीत्यादौ कल्पितत्वाभावात् नातिप्रसङ्गः । गतोऽस्तमर्कः, उदितं मण्डलमिन्दोरित्यादौ तु सत्यपि व्यङ्ग्ये अर्थस्य कल्पितत्वाभावान्न काव्यत्वम् । एतेन [३५]तादृशेषु वाक्येषु काव्यत्वमुररीकुर्वन् जगन्नाथः प्रत्युक्तः । आयुर्घृतम्, गङ्गायां घोषः, कुन्ताः प्रविशन्तीत्यादौ आयुर्घृतयोः गङ्गातीरयोः कुन्तपुरुषयोश्च अभेदस्य कल्पितत्वात् निर्विवादमेव काव्यत्वम् ।

ननु भोः! कल्पितार्थप्रतिपादकत्वे सति यदि काव्यत्वम् तर्हि वह्निना सिञ्चति, गजो गगने डयते, मशको मन्दरं वहति, पिपीलिकाः समुद्रं पिबन्तीत्यादीनामपि वाक्यानां तत् प्रसज्येत – मैवम्, प्रयोजनाभावेन तथा कल्पनस्यैवासम्भवात् । नहि विवेकिनः प्रयोजनमन्तरेण प्रवृत्तिं विन्दन्ति । मुखं चन्द्र इवेत्यत्र साम्यस्य कल्पने मुखे सौन्दर्यातिशयस्य प्रतीतिः प्रयोजनम्, मुखं चन्द्र इत्यत्राभेदस्य मुखे चन्द्रकार्यकारित्वस्य, सौधाग्राणीत्यादौ तेषु परमोन्नतत्वादेः । निश्वासान्ध इवादर्श इत्यत्र लक्षणामूलध्वनौ आदर्शे विच्छायत्वादेः । उच्चरद्भूरिकीलालेत्यत्र सेनापतौ समुद्रसादृश्यस्य, [३६]पहिअ ण एत्थ इत्यादौ यद्युपभोगक्षमोऽसि तर्हि आस्वेति सर्वत्रापि यत्किञ्चिदर्थस्य

---

३५. रस. प्र.आ. काव्यलक्षणप्रकरणम् । भामहोऽपि एवमेवाभिप्रैति, यथा –
गतोऽस्तमर्को भातीन्दुर्यान्ति वासाय पक्षिणः ।
इत्येवमादि किं काव्यं वार्तामेनां प्रचक्षते ॥ काव्यालं. द्वि.अ. का–८७.

३६. पन्थिअ! ण एत्थ सत्थरमत्थि मणं पत्थरत्थले गामे ।
उण्णअं पओहरं पेक्खिऊण जइ वससि ता वससु ॥
(पथिक! नात्र स्रस्तरमस्ति मनाक् प्रस्तरस्थले ग्रामे ।
उन्नतं पयोधरं प्रक्ष्य यदि वससि तद्वस ॥) छाया । सा.द. च.प. का–७.

प्रतीतिः प्रयोजनमस्ति । प्रयोजनमन्तरेण मूर्खोऽपि न चेष्टते किं पुनः मतिमतां मूर्धन्यः कविः? आस्तामेतत् ।

एतादृशे काव्ये कल्पितोऽर्थः लोके क्वचित् सम्भवति, यथा –

[३७]अत्ता एत्थ णिमज्जइ एत्थ अहं दिअसअं पलोएहि ।
मा पहिअ रत्तिअन्धिअ ! सेज्जाए मह णिमज्जहिसि ॥

अत्र यो वाच्यार्थः स लोकेऽपि सम्भवितुमर्हति । क्वचिच्च न, यथा –

शिखरिणि क्व नु नाम कियच्चिरं किमभिधानमसावकरोत्तपः ।
सुमुखि ! येन तवाधरपाटलं दशति बिम्बफलं शुकशावकः ॥

अत्र तरुण्यधरवत् पाटलस्य बिम्बफ्लस्यास्वादने तथा विशिष्टस्य तपस आचरणं कारणमिति योऽर्थः स सर्वथा न सम्भवति । तदेवं कल्पितार्थयोगादेव काव्यमिदम् अपरिमितम्, [३८]तदुक्तम् –

अपारे काव्यसंसारे कविरेकः प्रजापतिः
यथास्मै रोचते विश्वं तथेदं परिवर्तते ॥ इति ।

शास्त्रं तु वास्तविकार्थयोगात् परिमितम् । अत एव काव्यं स्रोत इव । यच्च प्रभवात् स्यन्दमानं क्रमेण तथा विस्तारं भजते यत्र स्थितस्य पुरुषस्य निखिलं जगदेव अक्षिसात् सम्पद्यते । शास्त्रं तु गुहेव । यस्यान्तः प्रविष्टस्य मार्गः तथा क्रमेण सङ्कुचन् भवति येन पर्यन्ते तस्य स्वप्रतीतिमन्तरेण नान्यत् किञ्चिदपि विभासते । तत्र स एकमात्रो भवति । तदेवं काव्यस्येदं लक्षणं पर्यवसन्नम् –

यमकादियुक्तः शब्दः कल्पितश्चार्थ एतदुभयं काव्यम् ॥

नन्वत्र आदिशब्देन व्यञ्जकत्वस्य ग्रहणमिति विशेषणस्य पुनरप्यननुगतत्वम्? स्यान्नाम, विशेष्ये अननुगतत्वस्यैव दोषत्वेनाभ्युपगमात् । शब्दः अर्थश्चेति विशेष्यांशे न पुनरननुगतत्वम्, सम्बद्धत्वात् ।

---

३७. श्वश्रूरत्र निमज्जति अत्राहं दिवसकं प्रलोकय ।
मा पथिक! रात्र्यन्ध! शय्यायां मा निमङ्क्ष्यसि । छाया । उल्लेखः सा.द. प्र.प. का–२.

३८. ध्वनि. तृ.उ. का–४१.वृत्तौ ।

काव्येऽस्मिन् रस आत्मा । तस्य यदि पोषणं तर्हि क्वचिदितिवृत्तस्य परिवर्तनमपि न दोषाय । नहि इतिवृत्तनिवेदनार्थं काव्यं प्रवृत्तम्, प्रवृत्तं पुनः रसरूपसुखमयवस्तुप्रदानद्वारा 'रामादिवत् वर्तितव्यम् न पुना रावणादिवत्' इत्याद्युपदेशेन सुकुमारमतीन् सन्मार्गं प्रति आनयनाय । अत एव इतिवृत्ते बद्धश्रद्धैरपि कविभिः शाकुन्तलरामचरितादौ कृतः कथावस्तुव्यत्ययो न दोषाय सम्पन्नः किन्तु गुणाय ॥

अत्रेदं बोध्यम् – पूर्वं प्राचीनोक्तलक्षणानां निराकरणावसरे मम्मटोक्तं लक्षणं यद्यपि निराकृतम् किन्तु प्रशस्तकाव्यविषयकप्रश्नस्य उत्तरत्वेन तथाभिधानमिति तदाशयस्य परिग्रहे न निराकरणीयताम् अञ्चति । मन्ये तेन किं नाम काव्यम् इति प्रश्नस्योत्तरत्वेन तदभिहितम् । स च प्रश्नः यथा काव्यसामान्यविषयको भवति तथा प्रशस्तरूपतद्विशेषविषयकोऽपि, यदि लोकव्यवहारादिना सामान्यज्ञानं प्रष्टुः सिद्धम् । अत एव को नाम मनुष्य इति केनचित् कृतस्य प्रश्नस्य निर्दोषाङ्गः शौर्योत्साहादिगुणविशिष्टः प्राज्ञः परोपकारी कटककुण्डलाद्याभरणवान् यानादिपरिकरसहितश्च मनुष्य इत्युत्तरं दीयमानं सङ्गच्छते । अयमेवाभिप्रायोऽस्माभिः अनुसरणीयश्च अन्यथा धीमतां धुरन्धरे तस्मिन्नमेधस्त्वं निर्णेयमापद्येत । दर्पणकारेण तु अन्यथैवालोच्य निराकृतमिति विभावयामः ।

तदिदं काव्यं परमपुरुषार्थं प्रति अभिमुखीकर्तव्यानामेव पुंसाम् न त्वभिमुखीकृतानाम् । तेषां खल्वस्त्येव शास्त्रमिति दिक् ॥

इति सत्यभामावेङ्कटसुब्रह्मण्यभट्टयोस्सुतस्य लक्ष्मीनारायणभट्टस्य कृतौ
साहित्यवल्लर्यां काव्यस्वरूपनिरूपणो नाम
प्रथमः स्तबकः ॥

◆✪◆

॥श्रीरस्तु॥

द्वितीयः स्तबकः

काव्यविभागः

विद्याधिदेवतां वन्दे शारदां तिमिरापहाम् ।
यत्प्रसादेन शुष्कापि सर्वा वागमृतायते ॥

काव्ये कदाचित् वाच्य एक एवार्थो भवति, यथा – नयेन श्रीः श्रिया त्यागस्त्यागेन विपुलं यश इत्यादौ। क्वचित् वाच्यव्यङ्ग्यौ, यथा – [1]एकः कृती शकुन्तेषु योऽन्यं शक्रान्न याचते इत्यादौ। क्वचित् वाच्यलक्ष्यव्यङ्ग्याः, यथा – आयुर्घृतम, निश्वासान्ध इवादर्शः चन्द्रमा न प्रकाशते इत्यादौ। यद्यपि एतस्मिन्नर्थत्रये सत्यपि लक्षणाया अभिधापुच्छभूतत्वात् तद्विषयार्थस्य वाच्यवत् सर्वप्रकाशत्वमिति तस्य व्यतिरिक्तत्वेनापरिगणने काव्ये वाच्यो व्यङ्ग्यश्चेति [2]द्वावेवार्थौ इति निर्णयः।

तत्र व्यङ्ग्योऽर्थः काव्ये क्वचित् भवति क्वचिन्न। यदि व्यङ्ग्योऽर्थो भवति तर्हि चमत्कारित्वं वाच्यार्थस्य स्यात् व्यङ्ग्यार्थस्य उभयोर्वा। तत्र वाच्यार्थस्य चमत्कारित्वे कश्चित्प्रभेदः, व्यङ्ग्यार्थस्य चमत्कारित्वेऽपरः, उभयोरपि चमत्कारित्वेऽन्य इति प्रभेदत्रयम्। यदि पुनः व्यङ्ग्यार्थो न भवति तदा शब्दः अर्थश्चेति द्वावेवांशौ। तयोः शब्दस्य चमत्कारित्वे कश्चित्प्रभेदः, अर्थस्य चमत्कारित्वेऽन्यः, उभयोरपि चमत्कारित्वेऽपर इति प्रभेदत्रयम्। एवं त्रयः त्रयश्चेति षट् प्रभेदा अत्र सम्भवन्ति।

* प्राचीनानां मतम्

मम्मटस्तु एतेषु षट्सु केवलं त्रीनेव प्रभेदान् अङ्गीकरोति। तदेवं

१. कुव. अप्रस्तुतप्रशंसाप्रकरणम्।
२. अत एव ध्वनिकारेण वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ इति अर्थस्य द्वैविध्यमुक्तम्।

तन्मतानुसारेण काव्यस्य त्रैविध्यम्, [३]यथा –

* इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः ।
* अतादृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम् ।
* शब्दचित्रमर्थचित्रम् अव्यङ्ग्यं त्ववरं स्मृतम् ।

आद्ये लक्षणेऽतिशयः चमत्कारित्वेन । तच्च प्राधान्यान्न भिद्यते । यद्यपि लोके प्राधान्यचमत्कारित्वयोः भेदो दृश्यते किन्तु काव्ये यतश्चमत्कारः तस्य प्राधान्यमित्यङ्गीकारात् तयोरभेदेन समनियतत्वेन वा परिगणनम् । अत एव असुन्दरव्यङ्ग्यस्य गुणीभूतव्यङ्ग्यप्रकारत्वेन परिगणनं तत्कृतं सङ्गच्छते, अन्यथा तत्रान्यदेव असुन्दरत्वम् अन्यदेव गुणीभूतत्वमिति तथा परिगणनस्यासङ्गतत्वापत्तिः । अत एव च [४]ग्रामतरुणं तरुण्या इत्यत्र 'वञ्जुललतागृहे दत्तसङ्केता नागतेति व्यङ्ग्यं गुणीभूतम्, तदपेक्षया वाच्यस्यैव चमत्कारित्वात्' इति तद्वाक्यस्य सङ्गतिः । ध्वनिकारस्यापि अयमेवाशयः, यदाह – [५]चारुत्वोत्कर्षनिबन्धना हि वाच्यव्यङ्ग्ययोः प्राधान्यविवक्षा ।

एवं चैतन्मतानुसारेण वाच्यव्यङ्ग्ययोः व्यङ्ग्यस्य चमत्कारित्वे ध्वनिर्नामोत्तमं काव्यम्, वाच्यस्य चमत्कारित्वे उभयोः समानचमत्कारित्वे च गुणीभूतव्यङ्ग्यमिति मध्यमम्, शब्दार्थयोरन्यतरस्य चमत्कारित्वे शब्दचित्रम् अर्थचित्रं चेति अधममिति त्रैविध्यं ज्ञेयम् । तत्र यद्यपि शब्दार्थयोरुभयोरपि समानचमत्कारित्वे काव्यस्य कः प्रभेद इति नोक्तम् तथापि प्रभेदान्तरस्य अनभ्युपगमात् अधमकाव्य एव तस्यान्तर्भाव इति निर्णीयते । अधमकाव्यलक्षणे अव्यङ्ग्यमित्यस्य व्यङ्ग्यरहितमित्यर्थः । यद्यपि रूपकोत्प्रेक्षादिषु उपमाया व्यङ्ग्यत्वं तथापि तस्याः क्षुद्रत्वादसत्त्वेन परिगणनमिति नास्ति दोषः । एतदेवं स्फुटीक्रियते –

३. का.प्र. प्र.उ. का–४,५. काव्यलक्षणप्रकरणम् ।
४. ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसनाथकरम् ।
पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया ॥ का.प्र. प्र.उ.
५. ध्वनि. प्र.उ. का–१३.

♦ यत्र व्यङ्ग्यार्थस्य सद्भावः

वाच्यः	व्यङ्ग्यः	काव्यप्रभेदः
१. चमत्कारी	चमत्कारी	मध्यमं काव्यम्। (तुल्यप्राधान्यव्यङ्ग्यम्)
२. अचमत्कारी	अचमत्कारी	प्रभेदो न सम्भवति।
३. चमत्कारी	अचमत्की	मध्यमं काव्यम्।
४. अचमत्कारी	चमत्कारी	उत्तमं काव्यम्।

♦ यत्र व्यङ्ग्यार्थस्य असद्भावः

अर्थः (वाच्यः)	शब्दः	काव्यप्रभेदः
१. चमत्कारी	चमत्कारी	अधमं काव्यम्। (शब्दचित्रार्थचित्रयोः सङ्करः)
२. अचमत्कारी	अचमत्कारी	प्रभेदो न सम्भवति।
३. चमत्कारी	अचमत्कारी	अर्थचित्राख्यमधमं काव्यम्।
४. अचमत्कारी	चमत्कारी	शब्दचित्राख्यमधमं काव्यम्।

जगन्नाथस्तु लोके यः प्रधानः सः अचमत्कारकोऽपि दृश्यते, यश्च चमत्कारी स अप्रधानोऽपीति व्यभिचारस्य दर्शनात् काव्ये प्राधान्य-चमत्कारित्वयोः भेद एवेत्यभ्युपैति। स काव्यं प्रथमं चमत्कारित्वेन पूर्ववत् त्रेधा भिन्दन् ततः प्रथमप्रभेदं प्रधानाप्रधानभावेन द्वेधा भिनत्ति । ततश्च तन्मतेन व्यङ्ग्ये चमत्कारिणि उत्तमं काव्यम्, अचमत्कारिणि मध्यमम्, वाच्यचमत्कारविशिष्टे शब्दे चमत्कारिणि अधममिति प्रथमं प्रभेदत्रयम् । ततः प्रथमप्रभेदे व्यङ्ग्यस्य प्राधान्ये ध्वनिर्नाम उत्तमोत्तमं काव्यम् अन्यथा तु उत्तममिति प्रभेदद्वयम्। वाच्यव्यङ्ग्ययोः समप्राधान्ये मध्यममिति विशेषः। एवं काव्यस्य चातुर्विध्यम् । इमानि तावत् [६]लक्षणानि –

* शब्दार्थौ यत्र गुणीभावितात्मानौ कमप्यर्थमभिव्यङ्क्तः तदाद्यम् ।

* यत्र व्यङ्ग्यमप्रधानमेव सत् चमत्कारकारणं तन्मध्यमम् ।

६. स. काव्यप्रभेदप्रकरणम्।

* यत्र व्यङ्ग्यचमत्कारासमानाधिकरणो वाच्यचमत्कारः तत्तृतीयम् ।

* यत्रार्थचमत्कृत्युपस्कृता शब्दचमत्कृतिः तदधमं चतुर्थम् ।

यत्र शब्दार्थाभ्यां प्रधानः चमत्कारी च व्यङ्ग्यः तत्रोत्तमोत्तमम्, यत्राप्रधानो व्यङ्ग्यः किन्तु चमत्कारी तत्रोत्तमम्, यत्र चमत्कारिव्यङ्ग्यात् वाच्य एवाधिकं चमत्कारी तत्र मध्यमम्, यत्र चमत्कारिशब्दसहितः चमत्कारी वाच्यः तत्राधममित्यर्थः । एतदेवं स्फुटीक्रियते –

♦ यत्र व्यङ्ग्यार्थस्य सद्भावः

वाच्यः		व्यङ्ग्यः		काव्यप्रभेदः
१. चमत्कारी	अप्रधानः		प्रधानः	→ [७]उत्तमोत्तमम्
	प्रधानः	→ चमत्कारी	अप्रधानः	→ [७]उत्तमम्
	प्रधानः		प्रधानः	→ [७]मध्यमम्
२. अचमत्कारी		→ अचमत्कारी		→ प्रभेदो न भवति
३. चमत्कारी	अप्रधानः		प्रधानः	→ [८]मध्यमम्
	प्रधानः	→ अचमत्कारी	अप्रधानः	→ [८]मध्यमम्
	अप्रधानः		प्रधानः	→ [८]मध्यमम्
४. अचमत्कारी	अप्रधानः		प्रधानः	→ [९]उत्तमोत्तमम्
	प्रधानः	→ चमत्कारी	अप्रधानः	→ [९]उत्तमम्
	प्रधानः		प्रधानः	→ [९]मध्यमम्

७. यद्यपि कण्ठरवेण काव्यस्य कः प्रभेद इति नोक्तम् तथापि तत्तत्प्रभेदलक्षणसमन्वयात् तत्तत्प्रभेदो निर्णीयते । तृतीयावस्थायां तु समप्राधान्ये मध्यमतैवेति तदीयवचनात् मध्यमत्वम् ।

८. तिसृष्वप्यवस्थासु मध्यमकाव्यस्य लक्षणं समन्वेतीति तदेव निर्णीतम् ।

९. लक्षणस्य समन्वयात् तत्तत्प्रभेदः । तृतीयावस्थायां समप्राधान्ये मध्यमतैवेति वचनात् मध्यमत्वम् ।

♦ यत्र व्यङ्ग्यार्थस्यासद्भावः

अर्थः (वाच्यः)	शब्दः	काव्यप्रभेदः
१.चमत्कारी	चमत्कारी	अधमम्
२.अचमत्कारी	अचमत्कारी	प्रभेदो न सम्भवति
३.चमत्कारी	अचमत्कारी	[१०]न सम्भवति
४.अचमत्कारी	चमत्कारी	[११]न सम्भवति ।

यद्यप्यधमे काव्ये शब्दचित्रार्थचित्राख्यौ यौ प्रभेदौ स्तः तयोः स्वतन्त्रप्रभेदत्वाङ्गीकारात् काव्यस्य चातुर्विध्यं स्वीकृतमित्येतावदेव वैलक्षण्यं मतेऽस्मिन् मम्मटमतादिति प्रतिभाति किन्तु तदापाततः, मम्मटमतेन हि यत्र केवलं शब्दस्य चमत्कारः तत्र शब्दचित्रम्, यत्र यमकानुप्रासादय इव एकाक्षरपद्मबन्धादयः अर्थचमत्कारशून्याः सर्वेऽपि विशेषा अन्तर्भवन्ति, एतन्मतेन तु अर्थचमत्कारसद्भाव एव यमकादीनां शब्दचित्रत्वम् एकाक्षरपद्मबन्धादिनां तु सर्वथा काव्यत्वमेव न सम्भवति ।

वैलक्षण्यान्तरं खल्वपि, तथाहि – यत्र वाच्यव्यङ्ग्यावुभावपि चमत्कारिणौ तत्र मम्मटमतेन मध्यमकाव्यत्वम् एतन्मतेन तु सति सम्भवे आदिमास्त्रयो भेदा इत्येकं वैलक्षण्यम्, विरोधाभासकारणमालादिः काव्यस्य कस्मिन् प्रभेदेऽन्तर्भवतीति न विचारितमिति द्वितीयम्, चमत्कारसहित इव तद्रहितेऽपि व्यङ्ग्ये प्रसज्यमानं प्रधानाप्रधानभावनिबन्धनं प्रभेदत्रयं न विचारितमिति तृतीयम्, राघवविरहज्वाला इत्यादौ व्यङ्ग्यः अचमत्कारित्वात् गुणीभूत इति मम्मटमतेन, एतन्मतेन तु व्यङ्ग्यः चमत्कारी किन्तु वाच्योपपादकत्वेन गुणीभूत इति चतुर्थम्, अयं स रशनोत्कर्षीत्यादौ शृङ्गारमादाय विचारे प्राचीनमतेन गुणीभूतव्यङ्ग्यत्वम् एतन्मतेन तु ध्वनित्वमित्यादि ।

* प्राचीनमतानां परीक्षणम्

वस्तुतस्तु मम्मटाभिमतो विभागो न समञ्जसः, वाच्यातिशायितामात्रेण

१०. अस्यामवस्थायां विरोधाभासादिः सम्भवति किन्तु तत्र काव्यत्वमेव न सम्भवतीति भाति ।
११. सामान्यलक्षणानाक्रान्तत्वात् काव्यत्वमेव न सम्भवति ।

वस्त्वलङ्कारयोः रसेन समानतया परिगणनस्यानौचित्यात् । रसस्य हि आत्मत्वं वस्त्वलङ्कारयोस्तु तत्पर्यवसायित्वमिति सर्वसम्मतः सिद्धान्तः । यत्र पुनः तयोः प्राधान्येन प्रतीतिः तत्राप्यन्ततो रस एव पर्यवसानं स्वीकरणीयं नो चेत् काव्यस्य नीरसत्वापत्तिः [१२]अयं स रशनोत्कर्षीत्यादौ शृङ्गारस्य करुणाङ्गत्वेऽपि वाच्यात् प्राधान्यस्यानपायात् ध्वनित्वमेव स्वीकार्यम् न तु गुणीभूतव्यङ्ग्यत्वम् । ननु रसवदाद्यलङ्कारस्य निरवकाशत्वप्रसङ्ग इति तथोक्तमिति चेत् – एवमपि ध्वनित्वाङ्गीकारे यो हेतुः तस्यैतावतापि अगलनमिति कथमेतत् समाधानं साधु भवति?

अथवास्तु रसवदलङ्कारस्य सावकाशत्वकल्पनार्थम् एतस्याङ्गीकारः किन्तु शोभाकारिशब्दार्थधर्मस्यैव अलङ्कारत्वात् रसस्य तद्रूपत्वाभावात् कथङ्कारं तस्यालङ्कारत्वमिति प्रथममभिधीयताम् । नहि रसः शब्दार्थयोर्धर्मः, ताभ्यां व्यञ्जनात् । येन यो व्यज्यते स तस्य धर्म इत्यङ्गीकारे घटः प्रदीपस्य धर्म इति वक्तव्यतापत्तिः । किं बहुना? सर्वस्यापि व्यङ्ग्यस्य वाच्यधर्मत्वापत्तिः । ननु रसोऽत्र न वाच्यार्थस्य धर्मः किन्तु व्यङ्ग्यस्य करुणादेरिति चेत् – एवं तर्हि शृङ्गारस्योद्दीपन–विभावरूपतया करुणं प्रति व्यञ्जकत्वात् तुल्यन्यायेन प्रदीपो घटस्य धर्म इति स्वीकारापत्तिः । किञ्च वास्तविकाश्रयाश्रयिभावे सत्येव धर्मधर्मिभाव इति कथं रसस्य वाच्याद्यर्थं प्रति धर्मत्वम्? न च तदभावेऽपि धर्मधर्मिभावोऽभ्युपेयत इति वाच्यम्, चैत्रगतकटककेयूरादेः मैत्रं प्रत्यपि धर्मत्वापत्तेः ।

रसस्य शोभाकारित्वमपि कथम्? नहि रसेन वाच्यार्थो व्यङ्ग्यार्थो वा अलङ्कृतो भवति । अस्तु पुनः तत्र यथा यथा शृङ्गारस्य प्रतीतिः तथा तथा करुणस्य पोषणम् । नह्येतावतालङ्कारत्वस्य सिद्धिः, पोषकत्वालङ्कारत्वयोः भेदात् । अथ पुनरभेदः तर्हि देवदत्तस्य शोभाकारिणि कटककेयूरादाविव पोषके चैत्रादावपि अलङ्कारपदव्यपदेशः स्यात् । ततश्च [१३]प्रधानेऽन्यत्र वाक्यार्थे

१२. अयं स रशनोत्कर्षी पीनस्तनविमर्दनः ।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः ॥ म.भा. स्त्रीपर्व. स्त्रीविलापाध्यायः,अध्यायः–२४. श्लो–१९.

१३. प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः ।
काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः ॥ ध्वनि. द्वि.उ. का–५.

इत्यादिना रसस्याप्राधान्ये सति ध्वनिकारेण यद्रसवदलङ्कारत्वमभिहितम् – तच्चिन्त्यम्, वचनमात्रेण सिद्धान्तस्य प्रतिष्ठापयितुमशक्यत्वात् । [१४]विवक्षा तत्परत्वेनेत्यादिना यदन्यदुक्तम् तत्तु भवति सुतरां साधु, रसाद्युपकारकत्वस्य सद्भावे अलङ्कारस्योचितत्वम्, अन्यथा अनुचितत्वम् इत्याशयमात्रेण अभिधानात् । लोकेऽपि अलङ्कारः क्वचिदुचितो भवति क्वचिच्चानुचितः, यथा – कटककेयूरादिः शृङ्गारिण उचितः यतेस्तु अनुचितः ।

अन्यच्च, प्राधान्यं चमत्कारित्वं च एतदुभयं किमभिन्नम् आहोस्विद्भिन्नम्? नाद्यः, विवक्षितत्वादौ सति प्राधान्यम्, गोप्यतया उक्त्यन्तराशक्यतया श्लिष्टतया तथाविधेन चान्येन प्रकारेण प्रतिपादने सति चमत्कारित्वमिति निमित्तभेदस्य जागरूकत्वात्, लोकेऽपि प्रधानस्य क्वचिदचमत्कारित्वम् चमत्कारिणश्च क्वचिदप्रधानत्वमिति व्यभिचारस्यैव दर्शनाच्च । न द्वितीयः, [१५]वाणीरकुञ्जीरोड्डिणेत्यादौ दत्तसङ्केतः कश्चित् लतागृहं प्रविष्ट इति व्यङ्ग्यस्याचमत्कारित्वेऽपि गुणीभूततया परिगणनस्य तत्कृतस्यायुक्ततापत्तेः । तद्रसस्य अलङ्कारत्वम् असम्भवदुक्तिकम् । तत्रेदं पुनरस्तु, यद् रसस्य क्वचित् प्राधान्येन प्रतिपादनम् क्वचिच्चाप्राधान्येन तथाप्यनयोः प्रकारयोः एकस्मिन्नेव प्रभेदेऽवान्तरप्रभेदत्वम् न तु यथाक्रमं ध्वनिः गुणीभूतव्यङ्ग्यत्वं चेति स्वतन्त्रप्रभेदत्वम् ।

जगन्नाथाभिमतोऽपि विभागः तथैव, वाच्यातिशायितामात्रेण वस्त्वलङ्कारयोः रसेन समानतया परिगणनस्यानुचितत्वमिति प्रागुक्तप्रथमदोषस्यानपगमात् । किञ्च चमत्कारित्वं विभाजकोपाधिं स्वीकृत्य काव्यस्य सकृत् त्रेधा भेदने कृते पुनः प्राधान्यं तथा स्वीकृत्य प्रथमप्रभेदमात्रं भिद्यते न प्रभेदान्तरम्,

---

१४. विवक्षा तत्परत्वेन नाङ्गित्वेन कदाचन ।
काले च ग्रहणत्यागौ नातिनिर्वहणैषिता ॥
निर्व्यूढावपि चाङ्गत्वे यत्नेन प्रत्यवेक्षणम् ।
रूपकादेरलङ्कारवर्गस्याङ्गत्वसाधनम् ॥ ध्वनि. द्वि.उ. का–१८,१९.

१५. वाणीरकुंजोड्डीणसउणिकोलाहलं सुणंतीए ।
घरकम्मवावडाए वहुए सीअंति अंगाइं ॥
वानीरकुञ्जोड्डीणशकुनिकोलाहलं शृण्वत्याः ।
गृहकर्मव्यापृताया वध्वाः सीदन्त्यङ्गानि ॥ [छाया]

तत्किमर्थम्? द्वितीयादिभेदनस्यापि औचित्यात्। नहि समानकक्ष्येषु विषमा दृष्टिः विपश्चितां शोभते। न च अकृतमपि द्वितीयादिभेदनमिष्टमेवेति वाच्यम्, काव्यस्य चातुर्विध्यमिति सिद्धान्तस्य विगलनापत्तेः। किञ्च यत्र विरोधाभासकारणमालादिः अलङ्कारः तस्य नादिमे प्रभेदत्रयेऽन्तर्भावः, व्यङ्ग्यस्य एकान्ततोऽसम्भवात्। नाप्यन्तिमे प्रभेदत्रये, शब्दचमत्कारस्याभावात्। ततश्च कथं तस्मिन् काव्यत्वस्योपपादनम्? न च तस्याकाव्यत्वमेवेति वाच्यम्, स्वयं कृतस्य निरूपणस्यासङ्गतत्वप्रसङ्गात्, ततोऽप्यवरस्य काव्यत्वाभ्युपगमेन अनौचित्याच्च। तस्मात् विभागान्तरमेवात्र समुचितम्।

* विभागान्तरस्य प्रदर्शनम्

तच्चात्र यथामति विधीयते – काव्यं शब्दार्थयुगलरूपमिति यदुक्तं पूर्वं तत्त्रिविधम्, अधममध्यमोत्तमभेदात्। तत्राधमकाव्यस्य काव्यसामान्यलक्षणमेव लक्षणम्। न चासङ्गतिः, यत्र समप्राधान्येन विभागः तत्रैव तस्या अभ्युपगमात्। यत्र पुनः उत्कृष्टापकृष्टभावेन विभागः, तत्र कथञ्चिदपि न सा शङ्कितुं शक्यते। नहि सामान्यलक्षणेन अनाक्रान्तः सन् कश्चित् तेषु श्रेष्ठो भवितुं शक्नोति। तस्मात् तस्य तदेव लक्षणम्। एतस्मिन्नधमे काव्ये क्वचित् शब्दस्य रमणीयत्वम्, यथा – सर्वदो माधवः पायात्स यो गङ्गामदीधरत्, [१६]मुञ्च मानं दिनं प्राप्तं नेह नन्दी हरान्तिके इत्यादौ, [१७]नवपलाश–पलाशवनमित्यादौ च। अत्राद्ये श्लेषवक्रोक्तिप्रभृतीनाम् अर्थसापेक्षाणाम् अलङ्काराणां योगात् रमणीयत्वम् अन्त्ये तु तन्निरपेक्षाणां यमकानुप्रासादीनां योगात्। न चात्र

सत्यर्थे पृथगर्थाया स्वरव्यञ्जनसंहतेः।
क्रमेण तेनैवावृत्तिः यमकं विनिगद्यते॥

इत्यभिधानात् कथं यमकस्य अर्थनिरपेक्षत्वमिति वाच्यम्, अर्थाभावे

१६. कुव. वक्रोक्तिप्रकरणम्।
१७. नवपलाशपलाशवनं स्फुटपरागपरागतपङ्कजम्।
मृदुलतान्तलतान्तमलोकयत्स सुरभिं सुरभिं सुमनोभरैः॥ माघ. स–६. श्लो–२.

सत्यपि तदभ्युपगमात् । लक्षणेऽर्थस्य निवेशनं तु अर्थो यदि वर्तते तर्हि तद्भेदे सत्येव तादृशसंहतेः यमकत्वम् अन्यथा तु स्वरूपेणेति बोधनाय । अर्थस्य रमणीयत्वं यथा – मुखं चन्द्र इव सुन्दरम्, नयेन श्रीः श्रिया त्यागः त्यागेन विपुलं यश इत्यादौ । अत्राद्ये उपमालङ्कारस्य योगात् अन्त्ये तु कारणमालायाः । तदुभयमपि यथा –

अनङ्गमङ्गलभुवस्तदपाङ्गस्य भङ्गयः ।
जनयन्ति मुहुर्यूनामन्तःसन्तापसन्ततिम् ॥

अत्रानुप्रासस्य सत्त्वात् शब्दस्य रमणीयत्वम् रूपकस्य सत्त्वाच्चार्थस्य । मध्यमकाव्यस्य तावदिदं लक्षणम् –

व्यङ्ग्यार्थप्रतिपादकौ शब्दार्थौ मध्यमम् ।

शब्दार्थावित्यत्र द्वन्द्वयोरेकशेष इति पूर्ववत् । अत्रापि क्वचित् शब्दस्य व्यङ्ग्यप्रतिपादकत्वम्, यथा – शनिरशनिश्च तमुच्चैर्निहन्तीत्यादौ । अत्र 'विरुद्धौ द्वौ त्वदनुवर्तनार्थमेकं कार्यं कुरुतः' इति वस्तुनो व्यञ्जकत्वं शब्देषु । अत एव तेषां परिवृत्त्यसहत्वम् । क्वचिदर्थस्य, यथा –

[१८]राघवविरहज्वालासन्तापितसह्यशैलशिखरेषु ।
शिशिरे सुखं शयानाः कपयः कुप्यन्ति पवनतनयाय ॥

अत्र जानकीवृत्तान्तनिवेदनेन राघवः शिशिरीकृत इति वस्तुनो प्रतिपादकत्वमर्थे । अत एव शब्दानां परिवृत्तिसहत्वं वाच्यवैशिष्ट्यस्य चापेक्षणम् । क्वचिदुभयोः, यथा –

[१९]पंथिअ ण एत्थ सत्थरमत्थि मणं पत्थरत्थले गामे ।
उण्णअं पओहरं पेक्खिऊण जइ वससि ता वससु ॥

अत्र 'यद्युपभोगक्षमोऽसि तर्हि आस्व' इति वस्तुन प्रतिपादकत्वम् उभयोरपि । अत एव सत्थरादीनां शब्दानां परिवृत्त्यसहत्वं वक्त्रादिवैशिष्ट्यस्य चापेक्षणम् ।

अत्र प्रथमे तृतीये चोदाहरणे व्यङ्ग्यस्य प्राधान्येन प्रतीतिः मध्यमे तु

१८. रस. प्र, आ. काव्यप्रभेदप्रकरणम् ।
१९. पथिक ! नात्र स्रस्तरमस्ति मनाक् प्रस्तरतले ग्रामे ।
उन्नतं पयोधरं प्रेक्ष्य यदि वससि तद्वस ॥ [छाया] उल्लेखः,सा.द. च.प. शब्दशक्तिमूलध्वनिप्रकरणम्

वाच्योपपादकत्वात् अप्राधान्येनेति विशेषः तथापि प्रधानाप्रधानभावस्य अवान्तरप्रभेदप्रयोजकत्वमेव न तु व्यतिरिक्तप्रभेदप्रयोजकत्वमिति सर्वत्र अविशेषेण मध्यमत्वम् ।

एवमलङ्कारस्यापि व्यङ्ग्यत्वं दृश्यते । तत्र शब्दस्य व्यङ्ग्यप्रतिपादकत्वं यथा –

[२०]अमितः समितः प्राप्तैरुत्कर्षैर्हर्षद! प्रभो ।
अहितः सहितः साधु यशोभिरसतामसि ॥

अत्रामितोऽपि समित इति विरोधालङ्कारस्य व्यञ्जकत्वं शब्देषु । अत एव शब्दानां परिवृत्त्यसहत्वम् । क्वचिदर्थस्य यथा –

[२१]अद्वितीयं रुचात्मानं दृष्ट्वा किं चन्द्र! हृष्यसि ।
भूमण्डलमिदं मूढ! केन वा विनिभालितम् ॥

अत्र त्वं मत्प्रेयसीमुखमिवेति प्रतीपालङ्कारस्य प्रतिपादकत्वमर्थे । अत एव शब्दानां परिवृत्तिसहत्वं वाच्यवैशिष्ट्यस्य चापेक्षणम् । एवमुभयोरपि प्रतिपादकत्वं स्वयमूह्यम् ।

उत्तमकाव्यस्य पुनरिदम् –

रसरूपव्यङ्ग्यार्थप्रतिपादकौ शब्दार्थौ उत्तमम् ।


इह यद्यपि अर्थसापेक्षाणां शब्दानां रसं प्रति व्यञ्जकत्वं नास्ति प्रत्युत तन्निरपेक्षाणाम् । तत्रापि तत्र स्वातन्त्र्येण किन्तु अर्थेन विभावादिरूपेण रसेऽभिव्यज्यमाने तत्सहकारित्वेनेति विशेषः । एतेन रसरूपव्यङ्ग्यप्रतिपादकत्वं केवलमर्थस्य तत्र शब्दानां सहकारित्वं वर्तेत न वा वर्तेतेति द्वयी गतिरित्यभिहितं भवति । तत्र केवलस्यार्थस्य प्रतिपादकत्वं यथा –

[२२]यो यः शस्त्रं बिभर्ति स्वभुजगुरुमादात्पाण्डवीनां चमूनां
यो यः पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्यां गतो वा ।
यो यस्तत्कर्मसाक्षी चरति मयि रणे यश्च यश्च प्रतीपः
क्रोधान्धस्तस्य तस्य स्वयमपि जगतामन्तकस्यान्तकोऽहम् ॥

२०. उल्लेखः का.प्र. च.उ. शब्दशक्तिमूलध्वनिप्रकरणम् ।
२१. रस. द्वि.आ. उपमाप्रकरणम् ।
२२. उल्लेखः ध्वनि. द्वि.उ. का–९. वृत्तौ ।

अत्र अनुगुणशब्दानामभावेऽपि अर्थः केवलो विभावादिरूपो रौद्ररसम् अभिव्यनक्ति। शब्दानां सहकारेण यथा – शयिता सविधेऽप्यनीश्वरेत्यादौ। अत्र कोमलवर्णघटितत्वात् शब्दानां सहकारो वर्तते । शून्यं वासगृहं विलोक्येति पद्ये तु शब्दानां कठोरवर्णघटितत्वात् नास्ति सहकार इति विशेषः । शब्दानां प्रातिकूल्यादेतादृशे स्थले रीतिभङ्गाख्यो दोष उत्तरत्र वक्ष्यते ।

तदिदं काव्यं यत्त्रेधा विभक्तं तत्रोत्तमे काव्ये रसोऽनेकधा विभक्तो वर्तते। तत्र रसः प्रथमं रसो भावश्चेति द्विविधः । रसशब्दश्च प्रथमः रस्यते इति व्युत्पत्त्या रसभावपरः द्वितीयस्तु तयैव व्युत्पत्त्या शृङ्गारादिमात्रपरः । तत्र रस औचित्येन प्रवृत्तोऽनौचित्येन चेति द्विविधः । भावस्तु स्थितिः उदयः शान्तिः शबलता चेति अवस्थापञ्चकेन पञ्चविधः सन् पुनः उचितत्वानुचितत्वाभ्यां प्रत्येकं द्वेधेति दशविधः। सर्वेषामेतेषां पुनः प्रधानत्वाप्रधानत्वाभ्यां द्वैविध्यं वक्तुं शक्यते । रसस्य स्थिरतया वर्तमानत्वात् नोदयादेः सम्भवः, सम्भवे वा न चमत्कार इत्यवस्थाभेदेन भेदो नाङ्गीक्रियते। ननु रसभावयोः अनौचित्येन प्रवृत्तौ दोषत्वमिति कुतः तन्निरूपणम्? – मैवम्, इतिवृत्तवशायातस्य गुणस्येव दोषस्यापि अवश्यनिरूपणीयत्वात् । सोऽयं विभाग एवं निदर्श्यते –



* प्राचीनसम्मतानां रसेऽष्टविधत्व–असंलक्ष्यक्रमत्वादीनां विमर्शनम्

प्राचीनास्तु रस्यते इति व्युत्पत्त्या [२३]रसाद्यष्टकं रसपदेन सङ्गृह्णन्ति । तत्राद्यो रसः शृङ्गारादिनवरसमात्रपरः । [२४]भावो निर्वेदादिः देवादिविषया रतिः उद्बुद्धमात्रश्च स्थायी । अनौचित्येन प्रवृत्तो रत्यादिः [२५]रसाभासः । तादृश एव भावो भावाभासः । [२६]भावस्योदयः भावोदयः । तस्य नाशः भावनाशः । तुल्यबलयोः स्पर्धाभावेन समावेशो भावसन्धिः । पूर्वपूर्वभावनाशकतया तदनाशकतया वा उत्तरोत्तरभावस्याविर्भावो भावशबलत्वम् । तत्र यदिदं रसाद्यष्टकं तत्सर्वम् [२७]असंलक्ष्यक्रममेवेति ध्वनिकारादयः । संलक्ष्यक्रममपि भवतीति [२८]अभिनवगुप्तजगन्नाथादयः । [२९]सर्वेषामेतेषां प्राधान्ये ध्वनित्वम् इतरथा तु अलङ्कारत्वमिति तेषां मतम् ।

वस्तुतस्तु प्राचीनैः यदत्राष्टधा विभक्तम् – तदयुक्तम्, तथाहि – स्थायिव्यभिचारिणोः उचितत्वेन प्रवृत्तत्वे रसो भावश्चेति द्वौ, अनुचितत्वेन प्रवृत्तत्वे रसाभासो भावाभासश्चेति द्वाविति प्रभेदचतुष्टयस्य सम्भवेऽपि न स्वतन्त्रप्रभेदत्वम्, उचितत्वानुचितत्वाभ्यां वैलक्षण्येऽपि तस्मिन् अवान्तरप्रभेद–प्रयोजकत्वस्यैव न्याय्यत्वात् । यदपि पुनः भावात् भावोदयादीनां व्यतिरेकेण परिगणनम् – तदपि तथा, भावे हि स्थित्यवस्था भावोदयादौ उदयाद्यवस्थेति

२३. रसः, भावः, रसाभासः, भावाभासः, भावोदयः, भावशान्तिः, भावसन्धिः, भावशबलता चेत्यष्टौ ।

२४. सञ्चारिणः प्रधानानि देवादिविषया रतिः ।
उद्बुद्धमात्रः स्थायी भाव इत्यभिधीयते ॥ सा.द. तृ.प. का–२६०.

२५. अनौचित्यप्रवृत्तत्व आभासो रसभावयोः । सा.द. तृ.प. का–२६२.

२६. भावस्य शान्तावुदये सन्धिमिश्रतयोः क्रमात् ।
भावस्य शान्तिरुदयः सन्धिः शबलता मता ॥ सा.द. तृ.प. का–२६७.

२७. रसभावतदाभासभावशान्त्यादिरक्रमः ।
ध्वनेरात्माङ्गिभावेन भासमानो व्यवस्थितः ॥ ध्वनि. द्वि.उ. का–३.

२८. अ) यो रसादिरर्थः स एवाक्रमो ध्वनेरात्मा न त्वक्रम एव सः । सक्रमत्वमपि हि तस्य कदाचिद्भवति । तदा चार्थशक्त्युद्भवानुस्वानरूपभेदतेति वक्ष्यते । लो. ध्वनि. द्वि.उ.का ४.
आ) यत्र तु विचारवेद्यं प्रकरणम् उन्नेया वा विभावादयः तत्र सामग्रीविलम्बाधीनं चमत्कृतेर्मान्थर्यमिति संलक्ष्यक्रमोऽप्येष भवति, यथा – तल्पगतापि सुतनु! इति प्रागुदाहृते सम्प्रति इत्येदर्थावगतिर्विलम्बेन । रस. प्र.आ. उत्तमोत्तमकाव्यप्रकरणम् ।

२९. प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः ।
काव्ये तस्मिन्नलङ्कारो रसदिरिति मे मतिः ॥ ध्वनि. द्वि.उ. का–५.

सतोऽपि वैलक्षण्यस्य अकिञ्चित्करत्वात् पूर्ववन्न स्वतन्त्रप्रभेदप्रयोजकत्वम् किन्तु अवान्तरप्रभेदप्रयोजकत्वम् । ननु भावे स्थितेः नान्तरीयकत्वात् भावस्य प्राधान्यम् भावोदयादौ पुनरुदयादेः अवस्थाविशेषस्य। तस्मादेव तेषां भावोदयादिरिति तत्प्रयुक्तो व्यपदेशः । ततश्च प्राधान्येन व्यपदेशा भवन्तीति व्यतिरेक एव युक्त इति चेत् – अत्र जगन्नाथः, एवं हि –

[३०]उषसि प्रतिपक्षनायिकासदनादन्तिकमञ्चति प्रिये ।
सुदृशो नयनाब्जकोणयोरुदियाय त्वरयारुणद्युतिः ॥

अत्र उत्पूर्वकेणैतिना उदयस्याभिधानात् व्यङ्ग्यत्वाभाव इति सम्मतस्यापि भावोदयादिध्वनेरसिद्धिप्रसङ्गः । एवम्

क्षमापणैकपदयोः पदयोः पतति प्रिये ।
शेमुः सरोजनयनानयनारुणकान्तयः ॥

इत्यादावपि शाम्यतिना प्रशमस्याभिधानात् पूर्ववत् अभीष्टस्यासिद्धिप्रसङ्ग इति ॥ युक्तं चेदम्, अवस्थातः तद्वत्येव प्राधान्यात् । तस्मात् अस्मदुक्तप्रकारेणैव विभागो ज्यायान् ।

अन्यच्च, यदपि कैश्चित् विमर्शकैः शयिता सविधेऽप्यनीश्वरेत्यादौ वाच्यव्यङ्ग्ययोः पूर्वापरीभावरूपस्य क्रमस्यास्फुटत्वात् रसादिः असंलक्ष्यक्रम–व्यङ्ग्यः, [३१]तल्पगतापि सुतनुः इत्यत्र [३२]एवं वादिनि देवर्षौ इत्यादौ च सम्प्रत्येवमादिशब्दानामर्थस्य प्रकरणादिज्ञानोत्तरं विशदा प्रतीतिरिति क्रमस्य स्फुटत्वात् संलक्ष्यक्रमव्यङ्ग्य इति विभागोऽङ्गीक्रियते – तदपि न युक्तम्, तत्र शब्दवाच्ययोरेव क्रमस्य स्फुटत्वं न तु वाच्यव्यङ्ग्ययोरित्यनुभवात्। नहि वाच्यार्थे प्रतीते पुनः कालोऽपेक्ष्यते व्यङ्ग्यस्य प्रतीतौ येन क्रमस्य स्फुटत्वं निर्णीयेत । [३३]दृष्टिं हे प्रतिवेशिनीत्यादौ तु वाच्यार्थप्रतीतेः परं वक्रादिवैशिष्ट्यस्य ज्ञाने सत्येव व्यङ्ग्यस्य प्रतीतिरिति निर्विवादं क्रमस्य

३०. रस. प्र. आ. भावोदयादिप्रकरणम् ।
३१. तल्पगतापि सुतनुः श्वासासङ्गं न या सेहे ।
सम्प्रति हृदि गतं प्रियपाणिं मन्दमाक्षिपति ॥ रस. प्र.आ. ध्वनिकाव्यप्रकरणम् ।
३२. एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।
लीलाकुसुमपत्राणि गणयामास पार्वती ॥ कुमार. स–६. श्लो. – ८५.

स्फुटत्वम् । न चेह तथा, व्यञ्जनाया वाच्यवैशिष्ट्यसमुत्थितत्वेन तदतिरिक्तांशस्यानपेक्षणात् । वाच्यवैशिष्ट्यं चेह विभावाद्यन्यतमरूपत्वम् । तच्च वाच्यार्थप्रतीतिकाल एव गृह्यत न व्यवधानमाचरितुं शक्नोति । वक्त्रादिवैशिष्ट्यं तु अर्थात् बाह्यमिति व्यवधानजननेन भवत्येव क्रमं प्रति प्रयोजकम् । ननु मा भूत् वाच्यव्यङ्ग्ययोः क्रमः, शब्दवाच्ययोः तस्य सत्त्वात् तमादाय संलक्ष्यक्रमव्यङ्ग्यत्वस्य उपपत्तिरिति चेत् – सत्यम्, किन्त्वेवमभ्युपगमे एकार्थकानां शब्दानां प्रयोगे झटिति वाच्यार्थस्य प्रतीतिः नानार्थकानां प्रयोगे तु प्रकरणादिज्ञानस्यापेक्षणात् विलम्बेनेति अर्थशक्ति-मूलध्वनावपि पूर्ववत् द्वैविध्यापत्तिः । तस्मात् क्रमस्य संलक्ष्यत्वासंलक्ष्यत्वाभ्यां प्राचीनानां विभागो नास्माकं चित्तमावर्जयति ।


वस्तुतोऽत्र सूक्ष्मेक्षिकया परिशीलने वस्त्वलङ्कारव्यङ्ग्ययोरपि संलक्ष्यक्रमत्वं न युज्यते, वक्त्रादिवैशिष्ट्यस्य प्रबन्धपूर्वभागेन प्रकरणादिना वा पूर्वं ज्ञानात् वाच्यार्थप्रतीतौ सत्यामनुपदमेव व्यङ्ग्यप्रतीतेः जायमानत्वात् । प्राचीनैस्तु मुक्तकादिस्थले पूर्वभागस्याभावात् प्रकरणस्य पश्चात् सम्भाव्यमानस्यापि सिद्धचरत्वाभावात् वक्त्रादिवैशिष्ट्यादेव व्यङ्ग्यस्य प्रतीतिरिति तथाभिहितमिति प्रतिभाति ।

ननु [३४]शून्यं वासगृहमित्यादौ नायिकाया नायके रतिः वर्तते नायकस्य च नायिकायाम् इत्याकारस्य शृङ्गारस्य प्रतीतौ कः चमत्कार इति वाच्यम्, येन तद्व्यञ्जकशब्दार्थयुगले रमणीयत्वमिति काव्यत्वं स्वीक्रियते । न च व्यञ्जनया प्रतिपादनेनैव चमत्कारः, असुन्दरव्यङ्ग्यस्य विलोपापत्तेरिति चेत् – मैवम्, विभावादेः साधारणीकृततया ग्रहणेन रत्यादेरात्मनिष्ठतया प्रतीतेः तत्सम्भवात् ।

---

३३. दृष्टिं हे प्रतिवेशिनि ! क्षणमिहास्मद्गृहे दास्यसि
प्रायेणास्य शिसोः पिता न विरसाः कौपीरपः पास्यति ।
एकाकिन्यपि यामि सत्वरमितः स्रोतस्तमालाकुलं
नीरन्ध्रास्तनुमालिखन्तु जरठच्छेदा नलग्रन्थयः ॥ सा.द. च.प. अर्थशक्तिमूलध्वनिप्रकरणम्

३४. शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनै
र्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम् ।
विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता ॥ उल्लेखः, का.प्र. च.उ. श्लो ३१.



मध्यमे काव्ये यो रसातिरिक्तो व्यङ्ग्यो वर्तते स प्रथमं वस्त्वलङ्कारत्वाभ्यां द्विविधः। ततः तयोः शब्दशक्त्युद्भवत्वेन अर्थशक्त्युद्भवत्वेन उभयशक्त्युद्भवत्वेन त्रैविध्यम्। तेषु आद्यः अभिधामूलत्वेन लक्षणामूलत्वेन च द्विविधः मध्यमोऽपि वास्तविकार्थसमुद्भवत्वेन कल्पितार्थसमुद्भवत्वेन च द्विविधः, पुनश्च प्रत्येकं वस्तुव्यङ्ग्यत्वेन अलङ्कारव्यङ्ग्यत्वेन द्वेधा। अन्त्यः पुनरेकविध एव गण्यते।

मध्यमे काव्ये यो रसातिरिक्तो व्यङ्ग्यो वर्तते स प्रथमं वस्त्वलङ्कारत्वाभ्यां द्विविधः। ततः तयोः शब्दशक्त्युद्भवत्वेन अर्थशक्त्युद्भवत्वेन उभय-शक्त्युद्भवत्वेन त्रैविध्यम् । तेषु आद्यः अभिधामूलत्वेन लक्षणामूलत्वेन च द्विविधः मध्यमोऽपि वास्तविकार्थसमुद्भवत्वेन कल्पितार्थसमुद्भवत्वेन च। अन्त्यः पुनरेकविध एव गण्यते। सर्वेषामेतेषां प्रधानाप्रधानभावेन पुनर्द्वैविध्यम्।

अत्रार्थशक्तिमूले व्यङ्ग्ये कविप्रौढोक्तिनिष्पन्नस्य तन्निबद्धवक्तृप्रौढोक्ति-निष्पन्नस्य चार्थस्य कल्पितार्थ एवान्तर्भावात् न तस्य पार्थक्येन उपसंख्यानम्। ततश्च तत्र द्वावेव प्रभेदौ न त्रयः।

तत्र पुनः रसस्य वस्त्वलङ्कारयोश्च प्राधान्येनाभिव्यक्तौ ध्वनिरिति व्यपदेशः। युक्तश्चायम्, रसिका हि प्रायेण वैयाकरणानां सरणिमेवनुसरन्ति। वैयाकरणास्तु घट इत्यादौ वर्णानामाशुविनाशिनां क्रमेणोच्चारणे समूहस्यासम्भवात् तदभिव्यक्तस्य स्फोटाभिधानस्य किञ्चित्तत्त्वस्य वाचकत्वं स्वीकुर्वन्ति। एवं च तन्मतानुसारेण स्फोटेऽयं ध्वनिशब्दः ध्वन्यत इति कर्मसाधन इति सिद्धम्। ततः तेषामेव सरणिमनुरुन्धाना आलङ्कारिका यस्य यस्य ध्वननेन योगः तस्य तद्युक्तस्य च सर्वस्यापि ध्वनिशब्दव्यवहार्यतां युक्तां भावयन्तो ध्वनतीति व्युत्पत्त्या शब्देऽर्थे च, ध्वननमिति व्यञ्जनाव्यापारे, ध्वन्यतेऽस्मिन्निति काव्यविशेषे, ध्वन्यत इति तत्प्रदर्शितव्युत्पत्त्या पुनः व्यङ्ग्येऽप्यर्थे तत्प्रयोगं समुचितमामनन्ति। अत एवायं तेष्वादरपुरस्सरो वादो ध्वनिकारस्य – [३५]**'प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात् सर्वविद्यानाम्'** ॥ अप्राधान्येन अभिव्यक्तौ तु गुणीभूतव्यङ्ग्यमिति व्यपदेशः।

वस्तुतस्तु स्फोटं प्रति वर्णानां व्यञ्जकत्वमर्थनिरपेक्षम्, तच्चेह रसस्थलमात्रे शब्दानां दृश्यते नान्यत्र तथापि तत्साम्यादेवान्यत्रापि व्यवहार इति ध्वनिशब्देन व्यवहारे व्याकरणशास्त्रस्य मूलत्वम् अनपलाप्यमिति न दोषाभावः।

यद्यपि शब्दशक्तिमूलव्यङ्ग्ये यथाभिधामूलत्वं लक्षणामूलत्वं च तथा [३६]उअ णिच्चलणिप्पंद इत्यादौ व्यङ्ग्यस्य व्यञ्जनामूलत्वमपि सुवचम् तथापि

३५. ध्वनि. प्र.उ. का–१३.

परिवृत्तिमसहमानानां शब्दानामभावात् तन्न सम्भवति । लक्षणामूलव्यङ्ग्ये निश्वासान्ध इवादर्श इत्यादौ अन्धार्थे शब्दान्तरस्य प्रयोगेऽपि व्यङ्ग्यस्य प्रतीतिरिति वस्तुतो न शब्दपरिवृत्त्यसहत्वम् तथापि लक्षकताविशिष्टस्य शब्दस्य तद्वर्तत एवेति नासङ्गतिः । न चात्रापि व्यञ्जकताविशिष्टशब्दानां परिवृत्त्यसहत्वम् अस्त्येवेति वाच्यम्, तत्रार्थानामेव व्यञ्जकत्वमिति शब्देषु तदभावात् । एतेन अभिधामूलव्यङ्ग्ये वाचकताविशिष्टस्य शब्दस्य परिवृत्त्यसहत्वम्, लक्षणामूलव्यङ्ग्ये तु लक्षकताविशिष्टस्येत्युक्तं भवति ।

ननु वस्त्वलङ्कारयोः प्रतीतौ कः चमत्कारो येन तद्व्यञ्जकशब्दार्थयुगलस्य रमणीयत्वमिति काव्यत्वं स्यात्, काव्यस्य चाधमकाव्यादुत्कृष्टत्वं चेति चेत् – उच्यते, शब्दशक्त्युद्भवे अभिधामूले वस्तुव्यङ्ग्ये शनिरशनिश्चेत्यादौ प्रकृते राजनि प्रकर्षाधायकस्य अर्थान्तरस्य प्रतिपादनेन चमत्कारः । तादृश एवालङ्कारव्यङ्ग्ये [३७]असावुदयमारूढ इत्यादावपि चमत्कार इदमेव निमित्तम् । लक्षणामूले व्यङ्ग्ये निःश्वासान्ध इवादर्श इत्यादौ व्यङ्ग्यस्य मालिन्यातिशयस्य उक्त्यन्तराशक्यतया प्रतिपादनेन। अर्थशक्त्युद्भवे वस्तुव्यङ्ग्ये अत्ता एत्थ णिमज्जइ इत्यादौ गोप्यतया प्रतिपादनेन राघवविरहज्वालेत्यादौ तु वाच्यार्थोपपादकत्वेन । [३८]आपतन्तममुं दूरादूरीकृतेत्यादौ अलङ्कारव्यङ्ग्ये भावित्वसूचनेनेति सर्वत्रापि अनेनैव क्रमेण चमत्कारित्वं स्वयमूह्यम् ।

इति सत्यभामावेङ्कटसुब्रह्मण्यभट्टयोस्सुतस्य लक्ष्मीनारायणभट्टस्य कृतौ साहित्यवल्लर्यां काव्यस्वरूपनिरूपणो नाम

द्वितीयः स्तबकः ॥

---

३६. उअ णिच्चलणिप्पंदा भिसिणीपत्तम्मि रेहइ बलाआ ।
णिम्मलमरगअभाअणपरिट्ठिआ संखसुत्ति व्व ॥
पश्य निश्चलनिस्पन्दा भिसिनीपत्रे राजते बलाका ।
निर्मलमरकतभाजनपरिस्थिता शङ्खशुक्तिरिव ॥ [छाया] उल्लेखः, सा.द. द्वि.प. व्यञ्जनाप्रकरणम्

३७. असावुद्यमारूढः कान्तिमान् रक्तमण्डलः ।
राजा हरति लोकस्य हृदयं मृदुलैः करैः ॥ उल्लेखः, कुव. श्लेषप्रकरणम् ।

३८. आपतन्तममुं दूरादूरीकृतपराक्रमः ।
बलोऽवलोकयामास मातङ्गमिव केसरी ॥ उल्लेखः, सा.द. च.प. अर्थशक्तिमूलध्वनिप्रकरणम् ।

॥श्रीरस्तु॥

तृतीयः स्तबकः

काव्यकारणम्

शरच्चन्द्रमयूखायमानवस्त्रसितद्युतिः ।
ज्ञानोदकेन धीवल्लीं शारदा मे निषिञ्चतु ॥

कार्यं कारणं विना न सम्भवति । काव्यं च कार्यमिति तत्रापि केनचित् कारणेन भवितव्यम् । तच्च कारणं किमिति पर्यनुयोगे नानाविधमुत्तरं विमर्शकानाम् ।

* प्राचीनानां मतस्य विशदीकरणम्

तत्र दण्डिमम्मटप्रभृतयः प्रतिभाव्युत्पत्त्यभ्यासानां समवायस्य कारणत्वम् उरीकुर्वन्ति, [१]तदुक्तं दण्डिना –

नैसर्गिकी च प्रतिभा श्रुतं च बहुनिर्मलम् ।
अमन्दश्चाभियोगोऽस्याः कारणं काव्यसम्पदः ॥

मम्मटेन अयमेवार्थो वाक्यान्तरेण प्रतिपादितः –


[२]शक्तिर्निपुणता लोककाव्यशास्त्राद्यवेक्षणात् ।
काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे ॥

अत्राद्ये श्लोके कारणमिति अन्त्ये हेतुरित्येकवचनेन निर्देशात् कारणे एकत्वं विवक्षितमित्येतेषां समूहस्य कारणत्वसिद्धिः । नन्वत्र त्रयाणामप्यर्थानां कारणपदार्थेन पृथक् पृथगेवान्वय इति कथं समूहे कारणत्वस्य सिद्धिः? – मैवम्, आद्ये हि त्रिष्वपि स्थलेषु चकारकरणात् अन्त्ये कारणत्वेनाभिमतान् त्रीनप्यर्थान् निर्दिश्य इतिकरणात् समूहस्यैव कारणत्वमित्यवगम्यते । एतेन समूहस्य एकत्वात् तदभिन्नत्वेन सम्बध्यमाने कारणरूपार्थे विवक्षितमेकत्वमपि सङ्गतं भवति । ननु भोः! चकारकरणेऽपि कायशुद्धिश्च मनश्शुद्धिश्च


१. काव्याद. प्र.प. का–१०३.   २. का.प्र. प्र.उ. का–२.

वाक्यशुद्धिश्च श्रेष्ठत्वे कारणमित्यादौ प्रत्येकमर्थस्यापि कारणत्वं दृष्टम् – सत्यम्, तथापि अमन्दाभियोगादेः एकैकस्य कारणत्वं सर्वथा न सम्भवतीति समूहस्यैव तत्त्वमवधार्यते ।

यद्यपि आद्यश्लोके कारणकलापकुक्षौ नैसर्गिक्या एव प्रतिभायाः प्रवेशात् यत्र मन्त्रादिसिद्धप्रतिभया काव्योत्पत्तिः तत्र कारणाभावेऽपि कार्योत्पत्तिरिति व्यभिचारः तथापि अन्ययोः द्वयोः कारणयोः क्रमेण बहुनिर्मलत्वेन अमन्दत्वेन च विशेषितत्वात् प्रकृष्टकाव्यं प्रत्येव एतेषां कारणत्वमिति निर्णीयते । अत एव काव्यसम्पद इति अतिशयार्थपर्यवसायिसम्पच्छब्दस्य प्रयोगः तत्कृतः सङ्गच्छते । एवं सत्यपि काव्यं प्रति प्रतिभाव्युत्पत्त्यभ्यासानां समूहस्य यत् कारणत्वं तस्य सम्मतं तन्निर्विवादं सिध्यति । तदेवं निदर्श्यते –




यायावरीयः [३]शक्तिमात्रस्य कारणत्वमुररीकरोति । शक्तिरियं न प्रतिभा नापि व्युत्पत्तिः किन्तु तयोर्जनकः पदार्थविशेषः । अत एव 'शक्तस्य प्रतिभाति शक्तश्च व्युत्पद्यते' इत्यादिप्रयोगस्य साधुत्वम् अन्यथा शक्तिप्रतिभयोः शक्तिव्युत्पत्त्योश्च अभिन्नत्वमिति भेदनिबन्धनोऽयं व्यवहारोऽसाधुरेव सम्पद्येत । अस्याश्च शक्तेः समुन्मेषे कारणं समाध्यभ्यासौ । तत्र समाधिः मनसः प्रणिधानम् अभ्यासश्च अविच्छेदेन शीलनम् । तदेवं निदर्श्यते –



हेमचन्द्रस्तु काव्यं प्रति केवला [४]प्रतिभा कारणम् । सा च प्रतिभा

३. का.मी. च.अ.   ४. काव्यानु. प्र.अ.

सहजा औपाधिकी चेति द्विधा। तन्त्रावरणक्षयोपशममात्रात् आविर्भूता प्रतिभा सहजा मन्त्रादेस्तु औपाधिकी। व्युत्पत्त्यभ्यासौ एतदुभयविधाया अपि प्रतिभायाः संस्कारकौ इत्यभिप्रैति। प्रतिभा पुनः नवनवोल्लेखशालिनी प्रज्ञा तन्मतेन। तदेवं निदर्श्यते –



जगन्नाथोऽपि [५]एवमेवाशेते किन्तु व्युत्पत्त्यभ्यासयोः प्रतिभां प्रति संस्कारकत्वं यत्तेनाभिहितं तन्नाङ्गीकरोतीति विशेषः। काव्यं प्रति प्रतिभामात्रं कारणमित्यभ्युपयतः तस्य मतेन प्रतिभां प्रति क्वचित् देवतामहापुरुष-प्रसादादिजन्यम् अदृष्टं कारणम् क्वचिच्च विलक्षणं व्युत्पत्त्यभ्यासद्वयम्। न चैतेषां समूहस्य कारणत्वम्, पञ्चवर्षवयस्के [६]कर्णपूरे बालके चैतन्यानुग्रह-सम्पादितप्रतिभे तथाविधे च व्यक्त्यन्तरे व्युत्पत्त्यभ्यासद्वयमन्तरेणापि काव्यविरचनाया दर्शनात्। न च तत्र जन्मान्तरीयं व्युत्पत्त्यभ्यासद्वयं कल्प्यमिति वाच्यम्, यत्र बलवता वेदादिप्रमाणेन कार्यकारणभावो बोध्यते तत्रैवोपस्थितस्य व्यभिचारस्य वारणार्थं कारणत्वेनाङ्गीकृतस्यार्थस्य जन्मान्तरीयत्वकल्पनम् नान्यत्रेत्यभ्युपगमात्। एतेन प्रकृते च अतादृशस्थले कल्पितोऽयं कार्यकारण-भावोऽसाधुरेवेति सिद्धं भवति ॥

व्युत्पत्त्यभ्यासद्वये वैलक्षण्यं तु कार्योत्पादनसामर्थ्यम्। ततश्च यत्र तयोरीषन्मात्रेण सत्ता तत्र प्रतिभारूपकार्यस्य अनुत्पत्तावपि न व्यभिचारः। प्रतिभा पुनः काव्यघटनानुकूलशब्दार्थोपस्थितिः तन्मतेन।

ननु प्रतिभां प्रति अदृष्टमात्रस्य कारणत्वमभ्युपेयताम् – नैतच्छक्यम्, कियन्तञ्चित् कालं काव्यं कर्तुमशक्नुवति पुरुषे व्युत्पत्त्यभ्यासयोः समुत्पत्तौ काव्यनिर्माणस्य दर्शनात्। न च तत्रापि अदृष्टादेव प्रतिभोत्पत्तिरिति शक्यं

५. रस. प्र.आ. काव्यकारणप्रकरणम्।

६. कर्णपूर इति कश्चित् बालः पञ्चम एव वर्षे चैतन्यानुग्रहेण काव्यं रचितवानिति वदन्ति।

वक्तुम्, व्युत्पत्त्यभ्यासयोः उत्पत्तेः प्रागपि अदृष्टस्य सत्त्वेन पूर्वमेव काव्यनिर्माणप्रसङ्गात् । ननु तत्र अदृष्टान्तरस्य प्रतिबन्धकत्वाङ्गीकारे लाघवमिति चेत् – बहुषु स्थलेषु अदृष्टद्वयकल्पनापेक्षया क्लृप्तव्युत्पत्त्यभ्यासयोरेव कारणत्वकल्पनेऽतितरां लाघवात् । नन्वेवमङ्गीकारे यत्रादृष्टात् प्रतिभा तत्र कारणत्वेनाङ्गीकृतस्य व्युत्पत्त्यभ्यासद्वयस्य, यत्र च व्युत्पत्त्यभ्यासद्वयात् प्रतिभा तत्रापि तथाङ्गीकृतस्य अदृष्टस्य च विरहात् व्यतिरेकव्यभिचारः – नैष दोषः प्रातिस्विकरूपेण कार्यकारणभावस्वीकारे बाधकाभावात् । तथा च अदृष्टजन्यप्रतिभां प्रति अदृष्टमात्रं कारणम्, व्युत्पत्त्यभ्यासद्वयजन्यप्रतिभां प्रति तद्द्वयमात्रं कारणमित्यभिहितं भवति । एवमदृष्टजन्यप्रतिभया काव्यस्योत्पत्तौ व्युत्पत्त्यभ्यासद्वयजन्यप्रतिभारूपस्य व्युत्पत्त्यभ्यासद्वय-जन्यप्रतिभया च तदुत्पत्तौ अदृष्टजन्यप्रतिभारूपस्य कारणस्याभावात् व्यभिचारोपस्थितौ पूर्ववत् प्रातिस्विकरूपेण कार्यकारणभावमङ्गीकृत्यैव दोषो वारणीयः । अथवा मास्तु प्रातिस्विकतया कार्यकारणभावः, प्रतिभासामान्यं प्रत्येव अदृष्टव्युत्पत्त्यभ्यासद्वययोः कारणत्वमङ्गीक्रियते । एतेन प्रतिभाविशेषेष्वपि सामान्यस्यानुस्यूतत्वात् न प्रागुक्तो दोषः पदं करोति ।

ननु यत्र काव्यस्योत्पत्तिः तत्र प्रतिभाकारणीभूतस्य अदृष्टस्य व्युत्पत्त्यभ्यासद्वयस्य वा सकृदुत्पन्नस्य अनपायात् सर्वदैव काव्यस्योत्पत्तिः स्यात् – नेत्याह, तत्र हि प्रधानकारणस्य सद्भावेऽपि अवधानादि-सहकारिकारणस्य विरहेण दोषाभावः । अथवा पापविशेषस्य तत्र प्रतिबन्धकत्वम् अङ्गीक्रियते । प्रतिबन्धाकाभावस्य कार्यसामान्यं प्रति कारणत्वं सकलतन्त्रसिद्धमिति नात्र पुनः तद्वक्तव्यतामर्हति । तदेव बोधशुद्ध्यर्थमेवं निदर्श्यते –

देवतामहापुरुषप्रसादादिजन्यमदृष्टम् → प्रतिभा → काव्यम्

विलक्षणव्युत्पत्त्यभ्यासद्वयम् → प्रतिभा → काव्यम्

अथवा

देवतामहपुरुषप्रसादादिजन्यमदृष्टम्
} ⟶ प्रतिभा ⟶ काव्यम्
विलक्षणव्युत्पत्त्यभ्यासद्वयम्

* प्राचीनमतानां परीक्षणं निष्कर्षश्च –

अत्रेदं चिन्त्यते – तत्र दण्डिमम्मटादिभिः काव्यं प्रति यत् समूहस्य कारणत्वमभिप्रेतम् – तन्न युक्तम्, पञ्चवर्षवयस्के कर्णपूरे व्युत्पत्त्यभ्यास-द्वयविरहिते व्यभिचारात्। न च तत्र जन्मान्तरीयं व्युत्पत्त्यभ्यासद्वयं कल्प्यमिति वाच्यम्, बलवत्प्रमाणेन विरोधाभावात्। यत्र हि श्रुत्यादिना बलवत्प्रमाणेन विरोधः तत्रैव जन्मान्तरीयस्य कल्पनम् न तु यत्र कुत्रापि, अव्यवस्थिततत्वापत्तेः।

यत् पुनः शक्तेः कारणत्वमिति यायावरीयेणाभिप्रेतम् – तदपि चिन्त्यम्, शक्तेः प्रतिभातो व्यतिरेकाभावात्। अथ शक्तिशब्देन सामर्थ्यं विवक्षितमित्युच्यते तर्हि तत्सामर्थ्यं किंविषयकम् इत्युच्यताम्। नहि यत्र कुत्रापि विषये सामर्थ्यं प्रतिभां व्युत्पत्तिं वा जनयितुमीष्टे। सामर्थ्यं तत् शब्दानामर्थानां च संयोजन इति चेत् – भोः! तत्सामर्थ्यमेव प्रतिभावशात् इति विपरीतस्यैव कार्यकारणभावस्य सिद्धिः। अथ गुरूपदेशग्रहणे तदिति चेत् – मैवम्, एतादृशात् सामर्थ्यात् व्युत्पत्तिर्जायेत न तु रसाद्यर्थाभिव्यञ्जक-शब्दार्थोन्मेषशालिबुद्धिरूपा प्रतिभेति पुनरपि वाञ्छितस्यासिद्धिः। अन्यच्च, एतादृशसामर्थ्यस्य कार्यमात्रं प्रति कारणत्वात् विशेषतो निवेदनं नात्र स्वारस्याय। ननु शक्तिशब्देन प्रतिभासामर्थ्याभ्यां विभिन्न एव कश्चित् पदार्थो विवक्षितः – एवमपि न तवेष्टसिद्धिः, विकल्पद्वयासहत्वात्, तथाहि – स पदार्थः किं नियतस्वभावः आहोस्वित् अनियतस्वभावः? नाद्यः, विजातीयकार्यद्वयजनकत्वस्य असम्भवात्। नहि औष्ण्यस्वभावो वह्निः दाहं शैत्यं च जनयितुं शक्नोति। नान्त्यः, सर्वविधकार्यजनकत्वस्य प्रसङ्गात्। नहि नानाकारोऽपि मेघो वर्षणशोषणादीनि सर्वाणि कार्याणि जनयितुमीष्टे। तस्मादिदं न श्रद्धेयम्।

एवं तर्हि शक्तस्य प्रतिभाति शक्तश्च व्युत्पद्यते इति प्रागुक्तस्य वाक्यस्य

का गतिः? उच्यते, शक्तिश्चात्र प्रतिभा । प्रतिभा पुनः अनुरूप-शब्दार्थोन्मेषशालिनी बुद्धिः । प्रतिभाति शब्दार्थजातम् अनयेति व्युत्पत्तेः । तद्वाक्यस्य अयमर्थः- 'प्रतिभावतः शब्दानामर्थानां च समूहः प्रतिभाति प्रतिभावानेव उचितानुचितविवेकवांश्च भवति' ॥ किञ्च एतादृशाः प्रयोगा उच्छृङ्खलताकृताः याथातथ्येन साधव एवेत्याग्रहो न युक्तः, असन्तमप्यर्थं सन्तं परिकल्प्य लोकेन प्रयोगात्, यथा – आकाशो नीलः, कुन्ताः प्रविशन्ति इत्यादिः, यथा चात्रैव विषये 'प्रतिभावान् शक्नोति प्रतिभावांश्च व्युत्पद्यते', 'व्युत्पन्नस्य प्रतिभाति व्युत्पन्नश्च शक्नोतीत्यादिः' ॥ अतो युक्तिजातेनैव वस्तुतत्त्वं समीक्ष्य कश्चिन्निर्णयो विधातव्यो न तु प्रयोगमात्रशरणताम् अवलम्ब्य। अन्यच्चेदम्, शक्तेः कारणत्वाङ्गीकारे ततो जायमानाभ्यां व्युत्पत्त्यभ्यासाभ्यां काव्यस्य न किमपि प्रयोजनमिति तयोरर्जने शिष्टैः क्रियमाणस्य यत्नस्य वैयर्थ्यापत्तिः ।

यदपि पुनः काव्यं प्रति प्रतिभामात्रं कारणम् । सा च सहजा औपाधिकी चेति द्विविधा । द्विविधाया अपि तस्याः संस्कारकौ भवतः व्युत्पत्त्यभ्यासाविति हेमचन्द्रेणाभिहितम् – तत्तु युक्तमिति ब्रूमः न तु तदेव युक्तमिति, यस्मात् देवतामहापुरुषादिप्रसादजन्या या प्रतिभा तया विकलोऽपि कश्चित् व्युत्पत्त्यभ्यासमात्रादेव प्रतिभामवाप्य काव्यं रचयतीति लोके स्पष्टम् । यदि एतन्नाङ्गीक्रियते तर्हि गुरूपदेशग्रहणादौ सर्वैरपि क्रियमाणो यत्नो निरर्थको जायेत । किं बहुना, सर्वोऽपि कविर्बुभूषुः देवतानुग्रहार्थं तपस्येव सश्रद्धं प्रवर्तेत । एवं च देवतानुग्रहादिना यथा प्रतिभा जायते तथा व्युत्पत्त्यभ्यास-द्वयेनापि इति जगन्नाथोक्तमेव साम्प्रतमिति सिद्धम् । तत्र एकेन कारणेन प्रतिभायां समुत्पन्नायां कारणान्तरसमवधाने सति प्रकर्षः सिध्यतीति पुनः विशेषः । एवं च जगन्नथोक्तमेवात्र समञ्जसमित्यस्माकं मतं स्थितम् । तत्र कारणान्तरसमवधाने सति जायमाने वस्तुनि प्रकर्षः सम्भवतीति तेन नोक्तं परं तद्योजनीयमित्यवदातम् ॥

इति सत्यभामावेङ्कटसुब्रह्मण्यभट्टयोस्सुतस्य लक्ष्मीनारायणभट्टस्य कृतौ साहित्यवल्लर्यां काव्यस्वरूपनिरूपणो नाम

तृतीयः स्तबकः ॥

॥श्रीरस्तु॥

चतुर्थः स्तबकः

काव्यप्रयोजनम्

समस्तशास्त्रावगतिक्षमां मतिं तत्त्वानुसन्धानरतां च निर्मलाम् ।
निधेहि मातर्मयि खिन्नमानसे त्वत्पादपङ्केरुहषट्पदायिते ॥

प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते । ततश्च प्रयोजने सत्येव विचारवतां प्रवृत्तिः । काव्येऽपि तेषां प्रवृत्तेर्दर्शनात् तस्यापि केनचित् प्रयोजनेन भवितव्यम् । तच्च प्रयोजनं किमिति आकाङ्क्षायां विमर्शकानां मतभेदोऽस्माकं दृष्टिपथमायाति ।

* प्राचीनमतानां विवरणम्

तत्राह [1]प्रकाशकारः –

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥

कालिदासादीनामिव यशः, धावकादीनमिव धनम्, लोकवृत्तान्तज्ञानम्, मयूरादीनां कुष्टरोगादेरिव अमङ्गलस्य निवृत्तिः वेद्यान्तरस्पर्शशून्यतावान् आनन्दः, रामादिवत् वर्तितव्यं न रावणादिवदित्यादिः कृत्याकृत्यप्रवृत्ति-निवृत्तिकारी कान्तासम्मित उपदेशश्च काव्याद्भवतीति तात्पर्यम् । [2]भामहः किञ्चिदत्र विभिन्नं मन्यते –

धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।
करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम् ॥

---

१. का.प्र. प्र.उ. का–३

२. काव्यालं. प्र.प. का–२.

काव्याद् धर्मादिचतुष्टयं कलाज्ञानं यश आनन्दश्च भवतीति तात्पर्यम् । [३]कुन्तकस्तु

> चतुर्वर्गसाधनोपायः सुकुमारक्रमोदितः ।
> काव्यबन्धोऽभिजातानां सहृदयाह्लादकारकः ॥

इति कथयन् पुरुषादिचतुष्टयमानन्दश्च प्रयोजनमित्यभिप्रैति ॥ [४]दर्पणकारोऽपि

> चतुर्वर्गफलप्राप्तिः सुखादल्पदियमपि ।
> काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते ॥

इत्यभिदधानः कुन्तकोक्तप्रयोजनमेव आनन्दवर्जमनुमोदते । एवमत्र विभज्य विचारे क्रियमाणे यशःआदिकं प्रयोजनमित्येकः पुरुषार्थचतुष्टम् इत्यपरश्चेति द्वौ पक्षौ ।

* कोऽत्र निष्कर्षः

वयमिदं मन्यामहे – वाङ्मयं यदिदं विभासते तत्साधारणं विशेषं चेति द्विधा विभक्तम् । साधारणं च व्यावहारिकवाक्यजातम् । विशेषं पुनः शास्त्रं पुराणं काव्यञ्चेति त्रिविधम् । तत्र शास्त्रं प्रभुसम्मितम् । यथा हि प्रभुः द्वारपालादिसम्मतिसमनन्तरं दर्शनीयः प्राकृतजनानाम् अशक्योपसर्पणश्च भवति तद्वत् वेदोपनिषदादिशास्त्रं शिक्षाद्यवगमोत्तरमेव अवगम्यं साधारणानां चासेवनीयम् । आज्ञाप्रधानेऽस्मिन् वर्णस्य स्वरस्यापि [५]व्यत्ययो महते दोषाय किं पुनः शब्दादेः । एवं [६]वृद्धिरादैच्, [७]तत्त्वमसि इत्यादावपि बोध्यम् । अत एवास्य अद्यापि विकाररहिततयैव श्रवणम् । एवं परिवृत्त्यसहत्वादेव अत्र

---

३. व.जी. प्र.उ. का–७. वृत्तौ.
४. सा.द. प्र.प. का–२.
५. मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥ निरुक्त. का–५.
६. अष्ट. १.१.१.
७. छान्दोग्य. प्र–६. खं–१५. मन्त्रः–३.

शब्दस्य प्राधान्यम्। काव्ये [८]दुर्गालङ्घितविग्रह इत्यादौ शब्दानां परिवृत्त्यसहत्वे सत्यपि तदर्थद्वयप्रतिपादकस्य शब्दान्तरस्य प्रयोगेऽपि न चमत्कारहानिः। एवं स्वेच्छाकेसरिणः स्वच्छस्वच्छायायासितेन्दवः इति यमकादौ स्वच्छस्वच्छविक्लेशितेन्दव इति प्रकारान्तरेण न्यासेऽपि न चमत्कारह्रास इति बोध्यम्। एतेन शास्त्रे शब्देषु परिवृत्त्यसहत्वम् आत्यन्तिकं काव्ये तु ऐच्छिकमित्युक्तं भवति। पुराणं सुहृत्सम्मितम् । यथा हि सुहृत् वक्तव्यमर्थं नानादृष्टान्तोपबृंहितेन युक्तिनिकरेण प्रकरणानुगुणं क्वचित् कठोरया क्वचिच्च कोमलया शैल्या विस्तरेण विशदीकरोति तथा पुराणं नानाकथोपकथाभिः पूर्ववत् । अत्र हि सर्वोऽप्यर्थः सयुक्तिकं निरूप्यते, यथा – अनेन असत्यम् अभिहितं तस्मादस्य ईदृशी विपत्तिः । अनेन गुरूणामनादरः कृतः तस्मादस्य एतादृशं कष्टम् । अनेन दानं कृतं तस्मादस्य प्रभूतमिदमैश्वर्यमित्यादि। न खलु दध्ना जुहोतीत्यादौ शास्त्रे दध्ना हवनं किमर्थमिति कारणं निरूप्यते।

अत्र तु –

एकदा नारदो योगी लोकानुग्रहकाङ्क्षया ।
पर्यटन् विविधान् लोकान्मर्त्यलोकमुपागतः ॥

इत्यादौ साधारणेऽपि वाक्ये मर्त्यलोकागमने लोकानुग्रहकाङ्क्षेति कारणमुपादीयते। तस्मात् शास्त्रे शब्दस्य प्राधान्यम् अनुनयप्रधानेऽस्मिन् तु सयुक्तिकं निरूपणादर्थस्य। अत एव विवक्षितेऽर्थे क्वचित् परिवर्तनं सम्पन्नमपि न महते दोषाय संवृत्तम् ।

काव्यं पुनः आभ्यामुभाभ्यामपि भिद्यते । नात्र प्रतिपादकस्य शब्दस्य प्राधान्यम्। अत एव मुखं चन्द्र इव सुन्दरमित्यादौ सर्वेऽपि शब्दाः परिवृत्तिं

८. दुर्गालङ्घितविग्रहो मनसिजं संमीलयंस्तेजसा
प्रोद्यद्राजकलो गृहीतगरिमा विष्वग्वृतो भोगिभिः।
नक्षत्रेशकृतेक्षणो गिरिगुरौ गाढां रुचिं धारयन्
गामाक्रम्य विभूतिभूषिततनू राजत्युमावल्लभः ॥ उल्लेखः, सा.द. द्वि.प. का–१४.

सहन्ते । नापि प्रतिपाद्यस्यार्थस्य । अत एवानुपदोक्ते वाक्ये मुखे चन्द्रसादृश्यस्य निरूपणे न कापि बलवत्तरा युक्तिः, कमलसादृश्यस्य निरूपणेनापि मुखे प्रकर्षस्य स्वाभीष्टस्य सिद्धेः। एवं कमलसादृश्यस्य निरूपणेऽपि नास्ति युक्तिः, अधिकगुणस्य कस्यचित्पदार्थस्य सादृश्ये निरूपितेऽपि समीहितस्य निष्पादात् । तत्परिशेषात् प्रतिपादनरूपव्यापारस्यैव प्राधान्यम् । तत्प्राधान्यं च चमत्कारजनकत्वात् । अत एव मुखमत्यन्तं सुन्दरमित्युक्तावपि वाक्यस्य न काव्यत्वम् । व्यापारश्च अभिधादिः । काव्यमिदं कान्तासम्मितम् । यथा हि कान्ता कमनीयगात्रा काणत्वादिदोषैः रहिता सौन्दर्यविलासादिभिः समन्विता सुश्लिष्टाभरणा स्वकान्तं वशीकृत्य हितमुपदिशति तथा कवितेयं सुललितशब्दार्थयुगला माधुर्यादिभिः समन्विता दुःश्रवत्वादिभिर्विरहिता यमकोपमादिभिश्च भूषिता तदेवोपदिशति सहृदयम् । अत एव तदिदं सर्वमनुसन्धाय भट्टनायकेनाभिहितम् –

शब्दप्राधान्यमाश्रित्य तत्र शास्त्रं पृथग्विदुः ।
अर्थे तत्त्वेन युक्ते तु वदन्त्याख्यानमेतयोः ॥
द्वयोर्गुणत्वे व्यापारप्राधान्ये काव्यगीर्भवेत् ।

एषु वेदो नाम विषयवैमुख्यमार्गसमाश्रयणेन समाधिगिरिशृङ्गं समारुह्य महतो महत्तत्त्वम् आलोकयद्भिः ततस्तत्रैव विश्रमितुमिच्छद्भिरपि छिन्नप्रायात् पाशादाकर्षणेन मनागवतीर्णैः ऋषिभिः संसारबन्धनं बिभित्सूनां पुंसामनुग्रहीतं किञ्चिदौषधम् । अस्य सेवनेन मोक्षरूपस्वास्थ्यफलस्य नूनं सिद्धिर्भवति किन्त्वेतत् कटुताधिक्यं सहमानानां धीराणामेव नान्येषाम् । तदनु सत्यपि एतस्मिन्नौषधे कटुताभीरूणां न कोऽप्युपयोग इति तेषामप्यभ्युदयेन युयुक्षया ऋषिशार्दूलेन द्वैपायनेन माधुर्यमिश्रं तादृशं किञ्चिदौषधमाविष्कृतं यस्य पुरणमित्यभिधानम् । अस्य सेवनेन यद्यपि प्रागुक्तस्य फलस्य न सपदि सिद्धिः तथापि तत्साधकस्यौषधस्य पाने सामर्थ्यमादधातीति सार्थक्यम् ।

१. वाल्मीकिप्रभृतिभिः ।

एवमौषधद्वये सत्यपि स्वप्नेऽपि ये कटुतां नेच्छन्ति तादृशानां माधुर्यमात्राभिलाषिणां नास्त्युपयोग इति विचिन्त्य तेषामपि उद्धारं समीहमानैः तैरेव [९]ऋषिभिः तदनुयायिभिश्च कालिदासाद्यैः माधुर्यपरमसारं नवीनमेकमौषधं संशोधितं यस्य काव्यमिति व्यपदेशः। अस्यापि सेवनेन प्रागुक्तस्य फलस्य न साक्षात् सिद्धिः तथापि अनुपदोक्तौषधस्य पाने सामर्थ्यमादधातीति पूर्ववदस्य सार्थक्यम् ।

अयमत्र सङ्ग्रहः – यदिदं विशेषरूपं वाङ्मयं शास्त्रं पुराणं काव्यं चेति त्रेधा विभक्तम् तत्र शास्त्रमाज्ञाप्रधानं कठोरं नीरसं शब्दप्रधानं तथा बहुक्लेशावगम्यम् । अत्र यावन्तोऽर्थः सन्ति प्रायेण ते सर्वेऽपि वास्तविकाः। अर्थवादादौ कल्पिता अर्थाः सन्तोऽपि न ते तात्पर्यविषयाः । निशितमतयः अत्राधिकारिणः । काव्यं तु एतद्विपरीतप्रकृतिकम् । तच्च कान्तासम्मितत्वात् प्रार्थनाप्रधानं कोमलं सरसं व्यापारप्रधानं तथानायासावगम्यम् । अत्र यावन्तोऽर्थाः प्रतिपादिताः प्रायेण ते सर्वे कल्पिताः। वास्तविका अर्थाः सन्तोऽपि न ते तात्पर्यविषयाः । अत [१०]एवोक्तम् –

अपारे काव्यसंसारे कविरेकः प्रजापतिः ।
यथास्मै रोचते विश्वं तथेदं परिवर्तते ॥

सुकुमारमतयोऽत्र अधिकारीणः । पुराणं तु अनयोरुभयोरान्तरालिकम्। इदं चानुनयप्रधानम् अर्थप्रधानं च ।

तत्र शास्त्रे ये प्रवृत्तिमन्तः मोक्षरूपाभीष्टावाप्तौ तेषां तदेकमेव वर्त्म । पुराणे ये तेषां तच्च शास्त्रं चेति द्वे क्रमेण । काव्ये पुनः ये तेषां तु तच्च पुरणं च काव्यं चेति त्रीणि । एवमेतेषां त्रयाणामपि धर्मादिसाधनद्वारा मोक्षाख्यपरमपुरुषार्थजनकत्वम् । तत्रास्तु नाम साक्षात्परम्पराभावेन तज्जनकत्वं तथापि तज्जननार्थमेव तेषां प्रवृत्तिरिति तु नापलपनीयतामर्हति । ततश्च पुरुषार्थचतुष्टयं काव्यस्य प्रयोजनमिति यैरुक्तं ते युक्ताभिधायिनः । यशआदिकं

१०. ध्वनि. तृ.उ. चित्रकाव्यप्रकरणम् । ११. ध्वनि. प्र.उ. का–५. लो.

प्रयोजनमिति यैरुक्तं तदपि नायुक्तम्, अमुख्यप्रयोजनकथन एव तेषां तात्पर्यात्। तत्र यशोऽर्थश्च कवेः प्रयोजनम् । व्यवहारज्ञानं कान्तासम्मिततयोपदेशश्च सहृदयस्य। शिवेतरक्षतिः परनिर्वृतिश्च उभयोरपीति विवेकः। न च परनिर्वृतिः कवेः कथमिति शङ्क्यम्, तत्कारणं रसमास्वादयन्नेव सः काव्यं करोतीति स्वीकारात्, तदुक्तं भट्टनायकेन -- '[११]यावत्पूर्णो न चैतेन तावन्नैव वमत्ययम्'। यावत् कविः रसेन नाविष्टो भवति तावत् तं प्रतिपादयितुं न शक्नोतीत्यर्थः। तदेवं पुरुषार्थचतुष्टयं पार्यन्तिकं मुख्यं च प्रयोजनम् यशआदिकं तु प्राथमिकम् अमुख्यं चेत्यस्माकं मतं स्थितम् ।

तदेवं परमार्थतो विचारे काव्यं केवलं सुकुमारमतीनामेव उपादेयं न मध्यममतीनां नापि परिणतमतीनामिति स्पष्टम् । नह्येतावताल्पीयानेव विषयः काव्यस्य भवतीति खेदितव्यम्, जगति शते षण्णवतिः सप्तनवतिः वा जनाः सुकुमारमतय इति तेषामेवाधिक्यात् । असदर्थकत्वात् असत्यार्थकत्वात् असभ्यार्थकत्वाच्च काव्यं सर्वथा नोपदेष्टव्यमिति वादे प्रसक्ते वस्तुस्थितौ तात्पर्यवतां काव्यमीमांसकानाम् इदमेवाभिप्रेयं भविष्यति। एवं च सयुक्तिकस्य तद्वादस्य सुकुमारमत्यतिरिक्तैः अर्थात् प्राज्ञैः जनैः सविषयत्वमिति बोद्धव्यम् । स्थिते चैवम्, काव्यस्य सर्वग्राह्यत्वोपपादन आग्रहवता दर्पणकारेण [१२]यदत्राभिहितम्, 'ननु तर्हि परिणतबुद्धिभिः सत्सु वेदशास्त्रेषु किमिति काव्ये यत्नः करणीय इति न वाच्यम्, कटुकौषधोपशमनीयस्य सितशर्करोपशमनीयत्वे कस्य वा रोगिणः सितशर्कराप्रवृत्तिः साधीयसी न स्यात्' इति – तन्निरस्तं वेदितव्यम्। किञ्च एवमुक्तौ निरवकाशत्वात् भगवत्याः श्रुतेः नैरर्थक्यापत्तिरिति वेदपारम्यसिद्धान्तस्य तेनाप्यङ्गीकृतस्य मूल एव कुठाराघातो

१२. यदि रोगस्य कस्यचिदुपशमनं कटुवौषधसेवनात् भवति खण्डशर्करासेवनादपि तर्हि सर्वोऽपि लोको बुद्धिमान् सितशर्करासेवन एव प्रवर्तते न कटुवौषधसेवने। एवमत्रापि मोक्षः पुरुषार्थः नीरसात् शास्त्रात् भवति सरसाच्च काव्यात् यदि तर्हि सर्वोऽपि बुद्धिमान् जनः काव्य एव प्रवर्तते न तु शास्त्रे। तस्मात् काव्यं सुकुमारमतीनामिव बद्धिमतामपि प्रवृत्तिभूमिरिति काव्यं सर्वेषामप्युपादेयं न पुनः कतिपयानामिति तात्पर्यम्। सा.द.प्र.प.का -२.

भविष्यति । नहि शाखामाश्रितस्य विवेकिनो मूलच्छेदो युज्यते ।

इत्थं काव्यस्य चतुर्वर्गफलकत्वे व्यवस्थापिते यदि किञ्चित् प्रबलां युक्तिमासाद्य काव्यस्य न कथञ्चिदपि मोक्षफलकत्वमिति उपादेयत्वमेव प्रत्याख्यातुमुत्सहते, कामं प्रत्याचष्टाम्, अथापि [१३]द्वा सुपर्णा सयुजा सखाया इत्यादीनां बह्वीनां श्रुतीनामर्थान्तरावगतौ उपकारकत्वात् 'रामादिवत् वर्तितव्यं न रावणादिवत्' इत्याद्युपदेशेन कृत्याकृत्यप्रवृत्तिनिवृत्तिविधानद्वारा सन्मार्गधायकत्वाच्च न केनाप्याक्षेप्तुं शक्यमिति उपादेयत्वस्य निर्विवादं सिद्धिरिति दिक् ॥

इति सत्यभामावेङ्कटसुब्रह्मण्यभट्टयोस्सुतस्य लक्ष्मीनारायणभट्टस्य कृतौ साहित्यवल्लर्यां काव्यप्रयोजननिरूपणो नाम चतुर्थः स्तबकः ॥

१३. मुण्डक. मुण्डक–३. खं–१. मन्त्रः–१.

।।श्रीरस्तु।।

पञ्चमः स्तबकः

वृत्तिनिरूपणम्

वीणां वहन्तीं कमनीयनिःस्वनां
करेण सव्येन जपाक्षमालिकाम् ।
स्मितेन मन्देन निरस्तचन्द्रिकां
नमामि वाणीं शरदभ्रभास्वराम् ।।

लोके बोधनीयं कञ्चिदर्थं मनसि निधाय वक्ता कश्चिच्छब्दान् प्रयुङ्क्ते। तांश्च शृण्वन्तो जना यदि तद्भाषायामभिज्ञाः तर्हि तेषामर्थमवगन्तुं शक्नुवन्ति अन्यथा नैवेत्यनुभवसिद्धम् । तत्र शब्दश्रवणे सत्यपि कुतो न तेषामर्थावगम इति प्रश्ने वृत्तिज्ञानस्य विरहादित्युत्तरम् । एवं तर्हि वृत्तिर्नाम का? कतिप्रकारा च सा? इति जिज्ञासायाम् एतदुच्यते –

* प्राचीनानां मतस्य निरूपणम्

वृतु वर्तने इति धातोः [१]क्तिन्प्रत्यये वृत्तिशब्दस्य निष्पत्तिः । निष्पन्नस्य तस्य कस्मिन्नर्थे वृत्तिरिति विचारे विमतिः मनागस्माकं प्रतीतिपथमायाति। तत्र सङ्केतः शक्तिः, शक्यसम्बन्धो लक्षणेति व्याहरतां नैयायिकानां मतेन यद्यपि इच्छासम्बन्धयोः अन्यतरस्यैव पदार्थस्य वृत्तित्वम् तथापि 'शक्तिश्च पदेन सह पदार्थस्य सम्बन्धः । सा चास्माच्छब्दादयमर्थो बोद्धव्य इति ईश्वरेच्छारूपा' इतीच्छायाः सम्बन्धरूपत्वाभ्युपगमात् सम्बन्धस्यैव वृत्तित्वमिति तदाशयः सिध्यति । अत एव 'वृत्तिश्च शक्तिलक्षणान्यतरसम्बन्धः' इति सामान्यभूताया वृत्तेः सम्बन्धरूपत्वेन निरूपणं तत्कृतं सङ्गच्छते ।

जगन्नाथादयोऽपि शब्दार्थयोः [२]सम्बन्ध एव वृत्तिरित्याशेरते, तथाहि –

---

१. अष्ट. ३.३.९४.   २. रस. द्वि.आ. अभिधानिरूपणप्रकरणम् ।

वृत्तिरर्थप्रतिपत्तौ निमित्तम् । ततश्च स एवार्थो वृत्तिशब्दस्याभिधातव्यो यस्मिन् विज्ञाते शब्दज्ञानवतामर्थस्य सुतरां प्रतीतिर्भवति अन्यथा तु नैव । तादृशोऽर्थः सम्बन्धमन्तरेण नान्यः कश्चित् वक्तुं शक्य इति तस्यैव वृत्तित्वं युक्तम् । यद्यपि व्यापार इत्यर्थान्तरं विद्यते तथापि प्रतिपादकत्वापरपर्यायस्य तस्य ज्ञाने सत्यपि अर्थप्रतिपत्तेरनुन्मेषात् वृत्तित्वमुच्यमानमपि न घटते । नह्येतेषु शब्देषु प्रतिपादकत्वमस्तीति ज्ञानमात्रेण कस्यापि विदुषोऽर्थप्रतीतिर्जायमाना विलोक्यते येन व्यापारस्यैव वृत्तित्वं निर्णीयेत । तस्मात् सम्बन्धस्य वृत्तित्वमवश्यम् एषणीयम् । अत एव शब्दविदादयः '[३]सिद्धे शब्दार्थसम्बन्धे' '[४]औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः' इत्याचक्षाणाः सम्बन्धस्यैवोल्लेखनं कुर्वन्ति नान्यस्य ॥

वैयाकरणमूर्धन्यस्य नागेशस्यापि सम्बन्धस्यैव वृत्तित्वमभीप्सितम् । अत एव सः [५]'पदपदार्थयोः सम्बान्धान्तरमेव शक्तिः वाच्यवाचकभावापरपर्याया' इत्यभिदधानः शक्तेर्लक्षणं सन्बन्धपरमेव निर्णयति ।

मम्मटानन्दवर्धनप्रभृतयस्तु शब्दस्यार्थे यो व्यापारः सैव वृत्तिरित्यभिप्रयन्ति। यद्यपि स्वाशयः तैः न कुत्रापि कण्ठरवेणाख्यातः तथापि स एवमुन्नीयते – शब्दार्थयोः यः सम्बन्धः तत एव सर्वेषां शब्दानां तत्तदर्थे प्रवृत्तिः । प्रवृत्तिश्चेयं पर्यवसाने शब्दस्य प्रतिपादकत्वरूपो व्यापारविशेष एव नान्यः कश्चिदर्थः । यद्यप्यचेतनत्वात् शब्दादौ प्रतिपादकत्वं न सम्भवति तथापि तस्य स्मारकतारूपत्वाभ्युपगमात् नास्ति दोषः । सोऽयं व्यापारविशेषः शब्दार्थ–सम्बन्धादेव समुत्पद्यत इति तं प्रति एतस्य कारणत्वम् । तदेवं कार्यकारणयोः सम्बन्धव्यापारयोः वृत्तित्वं कस्येति विचारे व्यापारस्येति वचनमतीव रमणीयम्, वृत्तेः शब्दसम्बन्धितयैव प्रतीतेः । अथ वृत्तिः सम्बन्धरूपा तर्हि संयोगस्येव तस्य उभयनिष्ठत्वाविशेषात् घटशब्दस्याभिधा कलशरूपार्थेऽस्तीतिवत् कलशरूपार्थस्याभिधा घटशब्द इत्यपि प्रयोगापत्तिः। एतेन प्रतिपादकस्य प्राधान्ये सति शास्त्रत्वम्, प्रतिपाद्यस्य प्राधान्ये सति पुराणत्वम्, प्रतिपादनस्य

३. का.वा. पस्पशायाम्, म.भा. ४. जै.सू. १.१.५.
५. प.ल.मं. शक्तिनिरूपणम् ।

तु प्राधान्ये काव्यत्वमिति प्राचीनानां कृतान्तोऽपि सङ्गतो भवति । सम्बन्धस्य वृत्तित्वे तु एतद्दुरुपपादम् । न च सम्बन्धो व्यापारश्चेत्यभिन्न व पदार्थ इति वाच्यम्, पूर्वापरीभावस्य स्फुटत्वात् । ननु भोः! सर्वमिदं भवितुमर्हति, किन्तु शब्देऽस्मिन् प्रतिपादकत्वं वर्तत इति व्यापारस्य ज्ञाने सति अर्थज्ञानस्यानुन्मेषात् वृत्तित्वमेव तावत् कथं युज्यत इति चेत् – मैवम्, सम्बन्धपूर्वकत्वादेव हि तेन तज्ज्ञानं भविष्यति। [६]कौण्डभट्टप्रभृतीनां सर्वेषां प्राचीनवैयाकरणानां प्रायेणेदमेव मतम् ।

* किं मतमत्र ज्यायः?

तदेवं सम्बन्धस्य वृत्तित्वं व्यापारस्य वा इति द्वौ पक्षौ स्थितौ । अनयोः कतरः पक्षो ग्राह्यतामुपयाति? – इदं विचार्यते, इह हि शब्दात् यत्रार्थस्य प्रतिपत्तिः तत्र सर्वत्रापि इच्छा सम्बन्धो व्यापारश्चेति अंशत्रयमवश्यं भवति। तत्रेच्छा [७]तावत् स्वाभाविकमुख्यार्थप्रतिपत्तौ अस्माच्छब्दादयमर्थो बोद्धव्य इत्याकारेश्वरस्य, कृत्रिममुख्यार्थप्रतिपत्तौ 'टिघुप्रभृतेः शब्दात् अन्त्यस्वरादिक–भागादिरूपोऽर्थो बोद्धव्यः' इत्याकारा पाणिन्यादेः परिभाषकस्येति विवेकः । तयोः ईश्वरेच्छायाः सङ्केतशब्देन व्यवहारः परिभाषकेच्छायास्तु परिभाषाशब्देन। लक्ष्यार्थप्रतिपत्तौ गङ्गायां घोष इत्यादौ 'गङ्गादेः शब्दात् तीरादेरर्थं बोधयामि' इत्याकारा, गतोऽस्तमर्क इत्यादौ पुनः व्यङ्ग्यार्थप्रतिपत्तौ 'अनेन वाक्येन अभिसरणविध्यादिरूपमर्थं बोधयामीत्याकारा' प्रयोक्तुरिति विशेषः ।

तत्र मुख्यार्थप्रतिपत्तिस्थले ईश्वरपरिभाषकयोः या इच्छा तस्याः सादित्वेऽपि अनपायित्वात् नित्यत्वम्, लक्ष्यव्यङ्ग्यार्थप्रतिपत्तिस्थले तु तद्वैपरीत्यात् अनित्यत्वम्। तद्वैपरीत्यं च 'गङ्गायां घोषः' 'गतोऽस्तमर्कः' इत्यादौ सत्या अपि तदिच्छाया गङ्गायां भक्ताः स्नान्तीत्यादौ, गतोऽस्तमर्क इत्यादौ च वस्तुस्थितिनिवेदनपरे विरहात् बोध्यम्।

६. वै.भू.सा.
७. यद्यपि मुख्यार्थप्रतिपत्तिस्थले ईश्वरादीच्छाजन्यं सम्बन्धमवलम्ब्य घटादिशब्देन कलशादिरूपमर्थं बोधयामीत्याकारकम् इच्छान्तरं सम्भवति प्रयोक्तुः तथापि सम्बन्धजन्यायाः तस्याः व्यापारजनकसम्बन्धं प्रति अकारणत्वात् न व्यतिरेकेण परिगणनम् ।

येयमिच्छा ईश्वरस्य पाणिन्यादेः चैत्रादेश्च वक्तुः वर्तते तत एव तत्तच्छब्दस्य तत्तदर्थेन सम्बन्धः, तत एव च तत्तच्छब्दस्य तत्तदर्थे प्रवृत्तिरिति क्रमः। प्रवृत्तिश्चेयं व्यापारविशेषः। सूक्ष्मदृशा विचारे क्रियमाणे स च ज्ञापकत्वरूपः। सोऽपि श्रोतुः अगृहीतशक्तिकत्वे प्रमापकत्वरूपः गृहीतशक्तिकत्वे तु स्मारकत्वरूप इति विशेषः। एवं गतोऽस्तमर्क इति व्यङ्ग्यार्थप्रतिपत्तिस्थलेऽपि अभिसरणविध्यादेः ज्ञातचरस्यैवार्थस्य ज्ञानविषयीकरणात् स्मारकत्वरूपः, अत्ता एत्थ णिमज्जइ इत्यादौ अतथाभूतत्वात् प्रमापकत्वरूप इति वैलक्षण्यं स्वयमेवावगन्तव्यम् ।

व्यापारोऽयं सम्बन्धजन्य इत्युक्तम् । सम्बन्धश्च मुख्यार्थप्रतिपत्तिस्थले शब्दार्थयोः वाच्यवाचकभावः यश्च ईश्वरादीच्छाकृतः। लक्ष्यार्थप्रतिपत्तिस्थले तु लक्ष्यलक्षकभावः यश्च सादृश्यसमवायादिमुख्यार्थसम्बन्धद्वारकः । एतेन सम्बन्धवृत्तित्वपक्षे शब्दार्थयोः सम्बन्धस्य लक्षणात्वे वक्तव्ये शक्यसम्बन्धो लक्षणेति मुख्यलक्ष्यार्थयोः सम्बन्धस्य तत्त्वकथनात् स्फुटैवासङ्गतिरिति बोध्यम्। व्यङ्ग्यार्थप्रतीतिस्थले तु व्यङ्ग्यव्यञ्जकभावः यश्च सादृश्यकार्य-कारणभावादिसम्बन्धद्वारकः ।

तत्र सादृश्यं सम्बन्धः [८]एकः कृती शकुन्तेषु योऽन्यं शक्रान्न याचते इत्यादौ। अत्र शकुन्तवृत्तान्तात् सादृश्येन मानधनस्य कस्यचित् याचकस्य वृत्तान्तः प्रतीयते। सामान्यविशेषभावः [९]'विधाय वैरं सामर्षे इत्यादौ । अत्र सामर्षे वैरिणि निष्क्रियस्य कस्यचित् पुरुषस्य सामान्यरूपात् वृत्तान्तात् 'क्रुद्धे शिशुपाले ताटस्थ्यं न युक्तम्' इति विशेषरूपो वृत्तान्तः प्रतीयते । कार्यकारणभावः [१०]हृतसारमिवेन्दुमण्डलमित्यादौ। अत्र दमयन्तीवदननिर्माणार्थं सारांशहरणेन कारणेन 'तद्वदने लोकोत्तरसौन्दर्यम्' इति तत्कार्यं प्रतीयते । सम्भाव्यसम्भावकभावः [११]अत्ता एत्थ णिमज्जइ इत्यादौ । अत्र वाच्यार्थात

८. कुव. अप्रस्तुतप्रशंसाप्रकरणम् ।

९. विधाय वैरं सामर्षे नरोऽरौ य उदासते ।
प्रक्षिप्योदर्चिषं कक्ष्ये शेरते तेऽभिमारुतम् ॥ उल्लेखः, कुव. अप्रस्तुतप्रशंसाप्रकरणम् ।

१०. हृतसारमिवेन्दुमण्डलं दमयन्तीवदनाय वेधसा ।
कृतमध्यबिलं विलोक्यते धृतगम्भीरखनीखनीलिम ॥ उल्लेखः, कुव. अप्रस्तुतप्रशंसाप्रकरणम् ।

११. अत्ता एत्थ णिमज्जइ एत्थ अहं दिअसअं पलोएहि ।
मा पहिअ! रत्तिअन्धिअ सेज्जाए मह णिमज्जहिसि ॥
(श्वश्रूरत्र निमज्जति अत्राहं दिवसकं प्रलोकय ।
मा पथिक! रात्र्यन्धक! शय्यायां मम निमंक्ष्यसि ॥ [छाया] उल्लेखः, सा.द. प्र.प.का–२.

सम्भावकात् 'रात्रौ प्रच्छन्न आयाहि' इत्यर्थः सम्भाव्यतया प्रतीयते । एवं सर्वत्रापि तत्तत्सम्बन्धः स्वयमेव विज्ञेयः । प्रकृताप्रकृतभावस्तु अत्र सर्वत्रापि व्यापी। अत एव न तस्य पार्थक्येन परिगणनम् । एतेन वाच्यलक्ष्यस्थले प्रथमं पदार्थस्योपस्थितिः ततः संसर्गस्य बोध इति क्रमस्य सद्भावः व्यङ्ग्यार्थस्थले तु साक्षात् वाक्यार्थस्यैव बोध इति वैलक्षण्यं निगदितं भवति । तदिदं पक्षत्रयमेवं विज्ञेयम् –

१. मुख्यार्थप्रतीतिस्थल – ईश्वरस्य परिभाषकस्य वा इच्छा → शब्दार्थयोः सम्बन्धः → शब्दस्यार्थे प्रवृत्तिः → अर्थप्रतीतिः ।

२. लक्ष्यार्थप्रतीतिस्थले – मुख्यार्थबाधादिकम् → वक्त्रिच्छा → शब्दार्थयोः सम्बन्धः → शब्दस्यार्थे प्रवृत्तिः → अर्थप्रतीतिः ।

३. व्यङ्ग्यार्थप्रतीतिस्थले – वक्तृवैशिष्ट्यादिकम् → वक्त्रिच्छा → शब्दार्थयोः सम्बन्धः → शब्दस्यार्थे प्रवृत्तिः → अर्थप्रतीतिः ।

तत्रेश्वरेच्छायाः स्वतन्त्रत्वात् कारणमन्तरेणापि सम्भव इति तत्प्रसङ्गे सम्भवतः अभिधाख्यप्रथमप्रभेदस्य नित्यत्वम् । अन्यत्र वक्त्रिच्छायाः कारणे सत्येव सम्भव इति तत्प्रसङ्गे सम्भवतोः लक्षणाव्यञ्जनाप्रभेदयोस्तु अनित्यत्वम् ।

*** प्राचीनानां मतस्य परीक्षणम्**

इत्थमवस्थिते निर्दिष्टपूर्वेषु नैयायिकानां मतं तावन्न साधु, अनुयोगि-प्रतियोगिविशिष्टस्यैव अर्थस्य सम्बन्धत्वात् इच्छायां तस्यासम्भवात् । ननु इच्छापदेन तज्जन्यवाच्यवाचकभावसम्बन्धस्य ग्रहणमिति नास्ति दोष इति चेत् – अस्तु गृह्यते, तथापि नेष्टसिद्धिः, तस्य संयोगस्येव द्विष्ठत्वेन अनिष्ट-प्रयोगसम्भवस्य प्रागभिधानात् । नन्वेवं तर्हि सम्बन्धप्रयोजिकाया इच्छायाः सर्वत्र भावात् तस्या एव वृत्तित्वमस्तु – मैवम्, इच्छायाः शब्दगतत्वाभावेन तद्वृत्तित्वासम्भवात् । कथञ्चित् तद्गतत्वोपपादनेऽपि व्यापाररूपसन्निकृष्ट-धर्मपरित्यागे कारणाभावाच्च । नहि कोऽपि प्रेक्षावान् जलं पिपासुः कूपमुत्सृज्य नदीमभिगच्छति दवीयसीम् । यद्येवम्, सम्बन्धस्य वृत्तित्वमस्तु – तदपि न साधु, सम्बन्धश्चात्र यद्यपि शब्दस्य मुख्यार्थेन, शब्दस्य अमुख्यार्थेन,

मुख्यार्थस्य चामुख्यार्थेनेति त्रिविधो वर्तते, यथा – गङ्गायां घोष इत्यत्र गङ्गाशब्दस्य प्रवाहेण कश्चित् सम्बन्धः य ईश्वरेच्छावशात् समुत्पन्नः । तस्यैव तीरेणापरः सम्बन्धः यः प्रयोक्त्रिच्छावशात् समुत्पन्नः, प्रवाहस्य तीरेण तु अन्यः यः स्वाभाविकः ।

तेषु आद्यस्य तृतीयस्य च वृत्तित्वं मूर्खोऽपि न व्याहरति, गङ्गायां घोष इत्यादिषु तीरादौ गङ्गायां स्नान्तीत्यादिषु गङ्गादौ चार्थे प्रतिपाद्यमाने वृत्त्यभावस्य निर्णेयत्वप्रसङ्गात्। न द्वितीयस्य, घटशब्दस्याभिधा कलशरूपार्थेऽस्तीतिवत् कलशरूपार्थस्याभिधा घटशब्देऽस्तीति व्यवहारापत्तेः प्रागभिधानात् । नन्वत्र सम्बन्धपदेन शब्दप्रतियोगिकस्यैव ग्रहणम् । तेन अर्थनिरूपितप्रतिपादकताया एव वृत्तित्वं सिध्यतीति चेत् – एवं हि तस्या व्यापाररूपत्वेन सम्बन्ध-वृत्तित्वपक्षस्य विगलनप्रसङ्गः । अथवास्तु नाम सम्बन्धस्यास्य वृत्तित्वम्, किन्तु शक्यसम्बन्धस्य तृतीयकोटित्वेन परिगणितस्य अनुयोगिप्रतियोगिभेदेन विजातीयत्वात् वृत्तिप्रभेदत्वं कथम्? नहि वृक्षत्वेन सजातीयोऽपि तमालः चम्पकस्य प्रभेदो भवितुमर्हति । अन्यो हि शक्यलक्ष्यसम्बन्धः अन्यश्च शब्दलक्ष्यसम्बन्धः । नहि भिन्नकक्ष्ययोरैक्यमुच्यमानं जातुचिद्घटते ।

अतः परिशेषात् व्यापारस्यैव वृत्तित्वम् एष्टव्यम् यच्च साम्प्रतम् । न चात्र व्यापारवृत्तित्वपक्षे शब्दविदादिमतविरोधः, तथा वदतां हि तेषां शब्दार्थ-सम्बन्धविशेषस्य नित्यत्वकथन एव तात्पर्यम् न तु तस्यैवाभिधात्वमित्यत्र। सम्बन्धविशेषस्य नित्यत्वं तज्जन्यव्यापारस्य नित्यत्वमभ्युपगच्छताम् अस्माकमप्यभीष्टमेव । नन्वेवं व्यापारस्य वृत्तित्वे विद्वत्प्रयुक्तत्वाद्धेतोः प्रतिपादकत्वरूपस्य तस्य ज्ञाने सति अगृहीतशक्तिकस्यापि पुंसोऽर्थप्रतीतिः जायेत – नैष दोषः, तेन हि कस्मिंश्चिदर्थे प्रतिपादकत्वमस्तीति सामान्याकारेण ज्ञाने सत्यपि विशेषाकारेणासत्त्वात् । नहि वृक्ष इति सामान्यज्ञाने सति कस्यापि पुंसः अयं तमालः, अयं चन्दनः, स नालिकेरः इति विशेषज्ञानं सम्भवति। अथवाक्षेपोऽयं न केवलमस्माकं पक्षे यावत् सम्बन्धवृत्तित्वपक्षेऽपि। तस्मात् तत्र यत्समाधानं तदेवात्रापि भविष्यति किं भूयसा विवादेन ।

सेयं वृत्तिः [१२]अभिनवगुप्तविश्वनाथप्रभृतिभिः शक्तिशब्देनापि व्यवह्रियते। अन्यैस्तु तच्छब्देन अभिधाभिधानं प्रथमप्रभेदमात्रमिति विशेषः । एवं चेदं वृत्तिलक्षणं मन्तव्यम् –

शब्दादिगतोऽर्थप्रतीत्यनुकूलो व्यापारो वृत्तिः॥

तत्राभिधालक्षणे शब्दमात्रस्य व्यापारौ व्यञ्जना पुनः शब्दार्थादेरिति सर्वगतस्यापि तस्य सङ्ग्रहाय आदिपदोपादानम् । एवञ्च वृत्तिरित्यत्र भावे क्तिन्प्रत्ययः । शब्दस्यार्थे वर्तनमिति तदर्थः । प्रतिपादनमिति यावत् ।

* अर्थत्रैविध्यम्

तत्रार्थः तावत् सन्निकृष्टो मध्यमो विप्रकृष्टश्चेति त्रिविधः । तत्र सन्निकृष्टत्वम् अर्थान्तरेणाव्यवहितत्वम् । न च 'पायात्स्वयमन्धकक्षयकरस्त्वां सर्वदो माधवः' इत्यत्र प्रसिद्धिवशात् क्षयशब्देन नाशरूपार्थस्य प्रतीतौ सत्यां पश्चात् भासमानस्य गृहरूपार्थस्य प्रतीतचरेणार्थेन व्यवधानात् असन्निकृष्टत्वप्रसङ्ग इति वाच्यम्, हरिहरयोरुभयोरपि प्रकृतत्वमिति ताभ्यां स्वस्वविषयक-वाक्यार्थनिष्पत्तये सर्वेषामर्थानां बलादाकर्षणात् अप्रसिद्धस्याप्यर्थस्य प्रसिद्धार्थसमकाल एवावगमनात् । यत्रापि वा प्रकृताप्रकृतभावः तत्रापि वाक्यार्थद्वयनिष्पत्त्यर्थं सर्वेषामाकर्षणं नापलाप्यम्। न च प्रकृतस्य पूर्वं प्रतीतिः अप्रकृतस्य तु परमिति व्यवस्थापनात् नाशार्थेन व्यवहितत्वमिति गृहस्य सन्निकृष्टत्वं बाधितमिति वाच्यम् – तथा व्यवस्थापनस्य अप्रामाणिकत्वमिति परत्र व्यवस्थापयिष्यमाणत्वात् । एतेन प्रसिद्धाप्रसिद्धभावः पदार्थविचारावसरे एव न तु वाक्यार्थविचारावसरे इत्युक्तं भवति ।

मध्यमत्वम् अर्थान्तरेण व्यवहितत्वे सति नियमेन प्रतीयमानत्वम् । विप्रकृष्टत्वं पुनः तस्मिन् सत्येवानियमेन प्रतीयमानत्वम् । न चानेकेनार्थेन व्यवहितत्वमेव तदिति वाच्यम्, गङ्गायां घोष इत्यादौ दोषाभावेपि गतोऽस्तमर्क इत्यादौ तत्सम्भवात् । एत एवार्था अभिधादिवृत्तीनां विषया इति यथाक्रमं

१२. क) तेन समयापेक्षा वाच्यावगमनशक्तिः अभिधाशक्तिः । तदन्यथानुपपत्तिसहाया अर्थबोधन-शक्तिः तात्पर्यशक्तिः इत्यादि । ध्वनि. लो. प्र.उ. का–४.

ख) तिस्रः शब्दस्य शक्तयः । सा.द. द्वि.प. का–२.

वाच्यलक्ष्यव्यङ्ग्यशब्दैः व्यपदिश्यन्ते ।

नन्वेवमपि विप्रकृष्टत्वमनियमेन प्रतीयमानत्वम् इत्येतन्न घटते, तथाहि – [१३]राजा हरति लोकस्येत्यादौ शब्दशक्त्युद्भवध्वनौ अभिधया प्राकरणिकस्येव अप्राकरणिकस्यार्थस्य प्रतीतौ प्रतिपादनवैयर्थ्यशङ्कया औपम्यप्रतीतेः नियमेनाङ्गीकार्यत्वादिति चेत् – मैवम्, यथा हि गतोऽस्तमर्क इत्यादौ वक्तृ-वैशिष्ट्यादिज्ञानात् परं सन्ध्यावन्दनविध्यादेः अर्थान्तरस्य नियमेन प्रतीतौ सत्यामपि तत्त्वकथनाभिप्रायेण प्रोक्तमिति शङ्कायाः सम्भवात् न ततः प्राक् तस्य नियमेन प्रतीतिः, यथा च गङ्गायां घोष इत्यादौ लक्षणागतप्रयोजनवतीत्व-ज्ञानात् परं तीरादेरर्थान्तरस्य नियमेन प्रतीतौ सत्यामपि रूढिमूलत्वशङ्कायाः सम्भवात् न ततः प्राक् तस्य नियमेन प्रतीतिः एवमत्र अर्थान्तरेऽप्राकरणिकत्व-ज्ञानात् परं नियमेन प्रतीतौ सत्यामपि न ततः प्राक् तस्य नियमेन प्रतीतिः, प्राकरणिकत्वशङ्कायाः सम्भवात् । एवं चानियमेन प्रतीयमानत्वमुपाधिज्ञानात् प्रागेवेति बोद्धव्यम् । उपाधिज्ञानात् परं तु सर्वेषामर्थानां नियमेन प्रतीयमानत्वम् इत्येतत् स्वतः सिद्धमिति न तद्वक्तव्यताम् अर्हति । एतेन वाक्यार्थबोधात् पूर्वमपेक्षिता येऽन्तरङ्गा योग्यताप्रभृतयः तेषु सत्सु कस्यचिदर्थस्य नियमेन प्रतीतिः, ये पुनः वाक्यार्थबोधात् परमपेक्षिता अर्थान्तरेऽप्राकरणिकत्वादयः बहिरङ्गाः तेषु सत्सु तस्यानियमेन प्रतीतिरित्युक्तं भवति ।

सेयं वृत्तिः अभिधा लक्षणा व्यञ्जना चेति त्रिधा । तत्रादौ अभिधा क्रमप्राप्तेति सैव प्रथमं प्रपञ्च्यते –

अभिधानिरूपणम्

अभिधेत्ययं शब्दोऽभ्युपसृष्टात् धारणपोषकार्थकात् डुधाञ्धातोः [१]षिद्भिदादिभ्योऽङ् इति भावेऽङ्प्रत्यये निष्पन्नः स्त्रियां वर्तते । अभिधानमित्यर्थः । तच्चार्थं प्रति आभिमुख्येन प्रतिपादनात् ।

इयमभिधा नित्या, अतो घटादिशब्दश्रवणे सर्वेषां नियमेन कलशाद्यर्थस्य

१३. असावुदयमारूढः कान्तिमान् रक्तमण्डलः ।
राजा हरति लोकस्य हृदयं मृदुलैः करैः ॥ उल्लेखः, कुव. श्लेषालङ्कारप्रकरणम् ।

अवबोधः । येषां तु अनवबोधः तेषां सङ्केतस्याग्रहणात् तथेति नासङ्गतिः । एतेन इयमभिधा स्वज्ञानेनेनैव अर्थप्रतिपत्तौ निमित्तम् न पुनः दाहादिकार्ये वह्न्यादिरिव सत्तामात्रेणेति विज्ञेयम् ।

* लक्षणे मतभेदः

अस्या लक्षणे नाना वादा अवतरन्ति – तत्र नैयायिकाः 'इदं पदमिममर्थं बोधयतु' इत्याकारा 'अस्माच्छब्दादमर्थो बोद्धव्यः' इत्याकारा वा इच्छा [२]सङ्केतः । सा च ईश्वरस्याधुनिकस्य चेति द्विविधेति कथयन्तः तयोरीश्वरेच्छां सङ्केतशब्दव्यवहार्यां स्वीकृत्य तामेव शक्तिरित्यवधारयन्ति । तन्मतानुसारेण शब्दशास्त्राद्यभिहितनदीवृद्ध्यादिषु शब्देषु प्रागुक्ताया इच्छाया आधुनिकत्वात् परिभाषेति व्यपदेशः । नव्याः पुनः इच्छामात्रं शक्तिरित्यभ्युपयन्त आधुनिकेच्छाया अपि शक्तित्वं परिगृह्णन्ति ।

मीमांसकेषु भाट्टाः [३]'पदपदार्थयोः स्वाभाविकः सम्बन्धः शक्तिः' इति व्यवहरन्ति । प्राभाकरणां मतेन [४]'पदानामर्थबोधने सामर्थ्यं शक्तिः' । [५]वाचस्पतिमिश्राणां मतेन तु शक्तिर्नाम स्वगोचरं विज्ञानम् । वैयाकरणेषु प्राचीनाः [६]कौण्डभट्टप्रभृतयः अनादिबोधकत्वं शक्तिरिति मन्यमानाः तल्लक्षणं व्यापारपरमाचक्षते । नागेशादयो नवीनास्तु [७]'पदपदार्थयोः सम्बन्ध एव शक्तिः वाच्यवाचकभावापरपर्याया' इति तदेव सम्बन्धपरम् । आलङ्कारिकेषु मम्मटस्तावत्

[८]सङ्केतितश्चतुर्भेदो जात्यादिर्जातिरेव वा ।
स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते ॥

१. अष्ट. ३.३.१०४. २. शक्ति.आदौ । ३. भा.सा.
४. उपोद्घाते, तत्तन्मतभेदसूच्याम् । शब्द.त.
५. आचार्यवाचस्पतिमिश्राः तत्त्वबिन्दौ 'तस्मात् स्वगोचरं विज्ञानमेव शब्दानां व्यापारः स्वार्थबोधे, यदाह भगवान् भाष्यकारः – 'शास्त्रं शब्दविज्ञानादसन्निकृष्टेऽर्थे विज्ञानम्' इति । स एव स्वाभाविकशक्तिशालिनः शब्दस्य स्वशक्त्यार्थधीहेतुतया अभिधेति गीयते' इति ग्रन्थेन शब्दगोचरं ज्ञानमभिधेति व्यवहरन्ति । टिप्पणी –शब्द. त. द्वि.त.
६. शब्द.त द्वि.त. वै.भू.सा. का–३७.अत्र पूर्वोक्तार्थो गम्यते ।
७. वै.सि.मं. आदौ । ८. का.प्र. द्वि.उ. का–८.

इति कथयन् सङ्केतितार्थविषयकः शब्दस्य व्यापार इत्यभिप्रैति । [९]दर्पणकारादीनां प्रायेण सर्वेषां प्राचीनविमर्शकानामिदमेव मतम् । नवीनेषु [१०]'वृत्तिवार्तिककारः 'शक्त्या प्रतिपादकत्वमभिधा' इत्यभिदधानः शक्तेः व्यापाररूपत्वमेव युक्तं मन्यते । जगन्नाथस्तु [११]'शक्त्याख्योऽर्थस्य शब्दगतः शब्दस्यार्थगतो वा सम्बन्धविशेषोऽभिधा' इति वदन् तस्याः सम्बन्धरूपत्वमिति स्फुटमऽस्या लक्षणे नानाकारं मतम् ।

* नानामतानां परिक्षणम्

अत्रेदं भाति – तत्र ईश्वरेच्छारूपः सङ्केतः इच्छामात्रं वा शक्तिरिति नैयायिकानां यन्मतम् – तन्न, इच्छाया वक्तृनिष्ठत्वेन तद्रूपत्वेन निर्णीयमानायां शक्तौ शब्दसम्बन्धित्वस्य दुर्घटत्वापत्तेः । विषयतासम्बन्धेन शब्देऽपि सत्त्वात् तस्यां तत्सम्भवतीति चेत् – एवं तर्हि अर्थेऽपि सत्त्वात् तस्यार्थसम्बन्धित्वमपि निर्णीयताम् । अन्यच्च, इच्छा वक्तृधर्मः अभिधा तु शब्दधर्म इति कथमिच्छाया अभिधात्वम्? किञ्च [१२]विनिगमनाविरहात् 'अस्य शब्दस्य अयमर्थः' इत्याकारकेश्वरज्ञानस्यापि अभिधात्वापत्तिः ।

यत्पुनः पदपदार्थयोः स्वाभाविकः सम्बन्धः शक्तिरिति भाट्टानां मतम् – तदपि सम्बन्धस्योभयनिष्ठत्वेन शब्दस्य शक्तिरर्थेऽस्तीतिवत् अर्थस्य शक्तिः शब्द इति विपरीतप्रयोगस्याप्यापत्तिरिति नोपादेयतां भजते । यदपि पुनः पदानामर्थबोधने सामर्थ्यं शक्तिरिति प्राभाकराणां मतम् – तदपि तथा, वृत्त्यन्तरे सङ्गमनात् अतिव्याप्तेः । नन्वस्मन्मते शक्तिरिति एकैव वृत्तिः । तस्मात् वृत्त्यन्तरं सर्वथा नास्माभिरङ्गीक्रियत इति चेत् – अयि भोः! भवता नाङ्गीक्रियत इत्येतावन्मात्रेण न चलन्ती भूमिर्निश्चला भवति, नापि सुस्थिरो गिरिश्चलने प्रवर्तते । कश्चित्पदार्थो भवतोऽनभीष्ट इति सर्वेषामपि अनभीष्टो न भवति । व्यञ्जनेयं काव्यवर्त्मनि स्थितानां सर्वेषामप्यङ्गीकार्या काचिद्वृत्तिरिति परत्र प्रपञ्चयिष्यते । तदा खलु भवान् शिरःकम्पनेन उच्चैरभिनन्दितुमर्हिष्यति, सम्प्रति मास्तु । स्वशास्त्रे नावश्यकीत्यभिप्रायेण उक्तमिति चेत् – युज्यते, तर्हि साधु एव भाषितं भवता ।

९. सा.द. द्वि.प. का–२.
१०. वृत्ति.वा. प्र.प.
११. रस. द्वि.आ. अभिधानिरूपणम् ।
१२. एकतरपक्षपातिनी युक्तिः विनिगमना ।

यच्चापि पुनः शक्त्याख्योऽर्थस्य शब्दगतः शब्दस्यार्थगतो वा सम्बन्धविशेष इति जगन्नाथेनोक्तं लक्षणम् – तदपि पूर्ववत्, सम्बन्धशक्तित्वपक्षीयदोषेण आक्रान्तत्वात् । किञ्च लक्षणवाक्ये शक्त्याख्य इति यद्विशेषणं तत् स्पष्टप्रतिपत्तये आहोस्वित् व्यावर्तनाय? नाद्यः, एवं हि लक्षणकुक्षितः तस्य बाह्यत्वमेवेति लक्षणस्यास्य लक्षणायामपि सञ्चारादतिव्याप्तेः । नान्त्यः, आत्माश्रयत्वापत्तेः । ततश्च परिशेषात् मम्मट–विश्वनाथ–अप्पयदीक्षितोक्तं लक्षणमेव समादर्तव्यमिति स्थितम् । यद्यपि तेषु लक्षणेषु नानारूपत्वं तथापि तत्केवलं वाक्येन न त्वर्थेनेति न दोषः ।

*** दीक्षितकृतलक्षणे जगन्नाथस्याक्षेपः तत्समाधानम्**

अत्र जगन्नाथः – [१३]ननु शक्त्या प्रतिपादकत्वमिति दीक्षितोक्तलक्षणस्य कथं समादर्तव्यत्वम्? तथाहि – अभिधा हि शब्दवृत्तिः अर्थप्रतिपत्तौ निमित्तमिति निर्विवादम् । सेयमभिधा ज्ञाता निमित्तम् उत तज्ज्ञानमिति विकल्पे, नाद्यः पक्षः परिग्राह्यतामर्हति, प्रतिपादकत्वज्ञानमात्रेण लोके अर्थप्रतिपत्तेरदर्शनात् । नहि शब्देषु अर्थप्रतिपादकत्वमस्तीति ज्ञानमात्रेण प्रेक्षावतामपि अर्थप्रतीतिः जायते किं पुनः मन्दानाम् । अत एव विदुषा केनचित् प्रयुक्तेषु शब्देषु तत्प्रयुक्तत्वाद्धेतोः तेषु प्रतिपादकत्वस्य आनुमानिके ज्ञाने सत्यपि तद्भाषाम् अजानतामर्थप्रतीतिः अजायमाना सङ्गच्छते, अन्यथा तदभिज्ञानामिव तेषामपि तदापत्तिः दुर्वारैव प्रसज्येत ।

अथ ज्ञातैव सा निमित्तमिति पक्षान्तरम्, तदा लक्षणवाक्यस्यायुक्तत्वप्रसङ्गः, यतोहि – तत्र शक्त्येति तृतीयान्तं पदं प्रयुक्तम् । तस्यार्थान्तरं न सम्भवतीति अभिधार्थकत्वे गृहीते अभिधया प्रतिपादकत्वमभिधेति स्फुट एवात्माश्रयो दोषः, तज्ज्ञाने तज्ज्ञानस्यापेक्षितत्वात् । स्फुटापि चासङ्गतिः, तस्यां तस्या एव हेतुत्वकल्पनात् । यदि पुनः स्यात् शक्तिशब्दस्यार्थान्तरं तदा दोषद्वयमेतत् नावकाशेत, किन्तु तादृशं किञ्चिदपि अस्माकं नावभातीति प्रागुक्तं दोषद्वयमत्र अवश्यं वज्रलेप इव तिष्ठति ॥

१३. रस. द्वि.आ. अभिधानिरूपणम् ।

वस्तुतस्तु एतच्चिन्त्यम्, तथाहि – प्रतिपादकत्वं नाम प्रतिपादकशब्दनिष्ठो व्यापारविशेषः । स च ज्ञातोऽर्थप्रतिपत्तौ न कारणम्, ज्ञातविस्मृत-प्रतिपादकत्वकस्यापि पुरुषस्य बोधसम्भवात् । किन्तु तज्ज्ञानम् । न च तस्य ज्ञानमात्रेणार्थप्रतीतिः न भवतीति वाच्यम्, तन्मतेऽपि शब्दार्थ-सम्बन्धज्ञानमात्रेण अर्थप्रतिपत्तेरदर्शनमिति पर्यनुयोगस्य तुल्यत्वात् । न हि कस्यापि पुंसः शब्दस्यास्यार्थेन सम्बन्धो वर्ततेऽर्थस्यास्य च शब्देन इति ज्ञानमात्रेण घटपटादिशब्दात् घटपटाद्यर्थस्य बोधो भवति येन तन्मतं सङ्गच्छेत । ननु घटपटादिशब्दस्य यत्किञ्चिदर्थेन सम्बन्धो वर्तते इति सामान्याकारेण ज्ञानस्य सत्त्वेपि विशेषाकारेणासत्त्वात् न तत्प्रसक्तिरिति चेत् – भोः! विवेकिन्! अत्रापि स एव कटाक्षो निपात्यताम्, यतोऽत्रापि शब्देषु अर्थप्रतिपादकत्वं वर्तते इति सामान्याकारेण ज्ञाने सत्यपि घटपटादिशब्दानां घटपटादिष्वर्थेषु प्रतिपादकत्वमिति विशेषाकारेणासत्त्वात् नार्थविशेषस्य प्रतीतिरिति वक्तुं शक्यते । एतेनाद्ये पक्षे दोषाशङ्की जगन्नाथः प्रत्युक्तः । किञ्चात्र व्यापारस्य सम्बन्धपूर्वकत्वादेव तत्समानयोगक्षेमकत्वमिति नान्योऽपि दोषविशेषः शक्यशङ्कः ।

नन्वेवमपि शक्त्येति तृतीयान्तपदस्य प्रयोगात् आत्माश्रयत्वासङ्गतिरूप-दोषद्वयमनुत्खेयमूलमेवेति चेत् – भ्रान्तोऽसि, शक्तिशब्दस्य सङ्केतार्थकत्वात्, तथाहि – शक्तिशब्दोऽयं विश्वनाथाभिनवगुप्तप्रभृतिभिः वृत्तिसामान्ये प्रयुज्यते, यथा – तिस्रः शब्दस्य शक्तय इत्यादिकं दर्पणे । तेन समायापेक्षा वाच्यावगमनशक्तिः अभिधाशक्तिः । तदन्यथानुपपत्त्यार्थबोधनशक्तिः तात्पर्यशक्तिः । मुख्यार्थबाधादिसहकार्यपेक्षा अर्थप्रतिभासनशक्तिः लक्षणा-शक्तिरित्यादिकं च लोचने । कौण्डभट्टप्रभृतिभिः पुनः अभिधामात्रे । इदं च अनादिबोधकत्वं शक्तिरित्यादेः तदभिमतलक्षणस्य परिशीलने स्पष्टं भवति । नैयायिकैस्तु सर्वथा समानरूपत्वमिति अभिधायां सङ्केते चेति विशेषः । [१४]एतेषु त्रिष्वर्थेषु शक्तिशब्देन दीक्षितानां कोऽर्थो विवक्षित इत्येतत् प्रथमं

१४. ततश्च तत्तन्मतानुसारेण शक्तिसङ्केतादिषु भेदाभेदौ एवं विज्ञेयौ –
* सङ्केतः = शक्तिः = अभिधा – नैयायिकमतम् ।
* सङ्केतः→शक्तिः = अभिधा – जगन्नाथमतम् ।
* सङ्केतः→अभिधा = शक्तिविशेषः – दर्पणलोचनकारयोः मतम् ।
* सङ्केतः = शक्तिः →अभिधा – दीक्षितमतम् ।

विवेचनीयम् । न तावत् वृत्तिमात्रम्, शब्दानां यद्यत् प्रतिपादकत्वं तत्सर्वं वृत्त्यैवेति स्थिते वृत्त्येति पुनर्वचनस्य नैष्फल्यापत्तेः । नहि स्वतःसिद्धं वचनम् अपेक्षते । नाप्यभिधा, आत्माश्रयत्वादिदोषस्य सम्भवात्। न हि कोऽपि मनीषावान् सदोषं वाक्यं प्रयोक्तुमीहते । तस्मात् परिशिष्टत्वेन सङ्केतरूपोऽर्थ एव तेषां विवक्षित इति निर्णये, तृतीयायाश्च हेत्वर्थकत्वे कल्पिते, सङ्केतहेतुकं प्रतिपादकत्वमभिधेति स्वारस्यवाह्येव वाक्यार्थः सिध्यति। सङ्केतस्येच्छारूपस्य प्रागुक्तप्रकारेण व्यापारनिमित्तसम्बन्धं प्रति निमित्तभूतत्वमिति व्यापाराद् व्यतिरिक्तत्वे सिद्धे कथमात्माश्रयत्वं कथं चासङ्गतिः? दीक्षितानां च शक्तिशब्देनायमेवार्थो विवक्षित इत्यत्र तदुक्ताभिधाप्रभेदलक्षणवाक्यं तद्ग्रन्थगतवाक्यान्तरं च प्रमाणम् । तत्र [१५]लक्षणवाक्यं यथा –

* अवयवशक्तिसापेक्षं पदस्यैकार्थप्रतिपदकत्वं योगः ॥
* अवयवसमुदायोभयशक्तिसापेक्षमेकार्थप्रतिपादकत्वं योगरूढिः ॥

अत्र वाक्यद्वयेऽपि भेदैकगामिनः सापेक्षशब्दस्य प्रयोगात् तस्य च प्रतिपादकत्वातिरिक्तार्थग्रहणे सत्येव सङ्गमनात् अर्थान्तरस्यासम्भवाच्च शक्तिशब्दस्य सङ्केतरूपार्थ एव प्रयोग इत्यध्यवसायो भवति । तद्ग्रन्थगत-वाक्यान्तरं यथा –

* शक्तिग्रहमपेक्ष्य तत्प्रतिपादकत्वमभिधेति चेत् .... ।
* ननु शक्त्या साक्षात् प्रतिपादकत्वमभिधा । साक्षादित्यविशेषणे मुख्यार्थशक्तिग्रहमपेक्ष्य तत्प्रतिपादनव्यवधानेन ..... ।
* तद्विषयकशक्तिग्रहमपेक्ष्य तत्प्रतिपादनमभिधेति लक्षणम् .....।

एवमन्यदपि बोध्यम् । तस्मात् सर्वमिदं दीक्षितग्रन्थानाकलनेन निबद्धमिति न तत्कृतलक्षणस्य कोऽपि बाधः ।

नागेशस्तु अत्र दीक्षितलक्षणे [१६]प्रकृत्यादित्वात् धान्येन धनवानित्यादिवत् तृतीयाया अभेदार्थकत्वेन न कश्चिद्दोष इत्याचष्टे । [१७]कश्चिदत्र एतदेव मनसि

१५. वृत्ति.वा. प्र.प. आदौ ।
१६. रस. मर्मप्र. अभिधानिरूपणम् ।
१७. वृत्ति.वा. उपोद्घाते वायुनन्दनपाण्डेयः ।

निधाय आक्षेपसमाधानाभ्यां तदेव द्रढयितुं प्रवृत्तो दृश्यते, यदाह – न चात्र सामान्यविशेषयोरेवाभेदान्वय इति नियमात् तयोरेवाभेदान्वयः सम्भवति, यथा – धान्येन धनवानिति नागेशोक्ते वाक्ये । अत्र धान्यपदेन विशेषः धनपदेन च सामान्यं गृहीतमिति धान्याभिन्नेन धनेन तद्वानिति बोध इति न कश्चिद्दोषः । किन्तु प्रकृतस्थले शक्तिर्विशेषः अभिधापि विशेष इति कथं तयोरभेदेनान्वय इति शङ्क्यम्, शक्तिपदेनात्र वृत्तेर्विवक्षितत्वात् । अस्ति च वृत्तौ शक्तिशब्दस्य प्रयोगः, यथा – तिस्रः शब्दस्य शक्तय इति विश्वनाथस्य असकृच्च लोचनकारस्य । एवं सामान्यविशेषभावस्य उपपन्नत्वादभेदान्वयस्य सङ्गतिरिति ॥

वस्तुताऽयमाक्षेपः समाधानं चेत्युभयमपि न युक्तम्, शक्त्येत्यत्र हि धान्येन धनवानित्यत्रेव तृतीयाया अभेदार्थकत्वमिति वदतो नागेशस्याभिप्रायेण शक्तिप्रतिपादकत्वयोरेव सामान्यविशेषभाव उपपादनीयः न तु शक्त्यभिधयोः । ननु अभिधा प्रतिपादकत्वरूपेति शक्त्यभिधयोः तस्मिन्नुपपादिते शक्तिप्रतिपादकत्वयोरपि स उपपादितो भविष्यतीति चेत् – भवेदेतत्, यदि अभिधाप्रतिपादकत्वयोः सर्वथा समानरूपत्वम्, न च तथा, अग्रे लक्षणाया अपि प्रतिपादकत्वरूपताकथनेन प्रतिपादकत्वस्य व्यापकत्वम् अभिधाया व्याप्यत्वमिति वैरूप्यस्यैव दर्शनात् । किञ्चैवं सामान्यविशेषभाव उपपादितेऽपि विशेषवाचकादेव दृश्यमानाया अभेदार्थकतृतीयाया कथं सामान्यरूपार्थ-प्रतिपादके शक्तिशब्दे श्रवणमिति पर्यनुयोगापत्तिः । किञ्च शक्तेरिव प्रतिपादकत्वस्यापि प्रागुक्तप्रकारेण सामान्यरूपत्वात् उभयोरपि सामान्य-रूपत्वमिति सर्वथा एतादृशप्रयोगस्यासम्भवप्रसङ्गः । तन्नागेशमतेन शक्ति-शब्दस्य अभिधार्थकत्वेन निर्णयो रमणीयः । नन्वेवं सति आत्माश्रयत्वासङ्गत्योः कथं निराकरणम्? तत्तु स एव प्रष्टव्य इत्युत्तरम् । ततश्चेदं लक्षणं फलितम् –

सङ्केतनिमित्तकः शब्दगतोऽर्थप्रतिपत्त्यनुकूलो व्यापारोऽभिधा ॥

अथवा एतदपि भवितुमर्हति –

सङ्केतनिमित्तकमर्थप्रतिपादकत्वम् अभिधा ॥

❖❖❖

अभिधाप्रभेदनिरूपणम्

* प्राचीनमतानां सोदाहरणं विवरणम्

सेयमभिधा रूढिः योगो योगरूढिश्चेति त्रिधेति दीक्षितादयः । एतेषामेव प्रभेदानां केवलसमुदायशक्तिः केवलावयवशक्तिः समुदायावयवशक्तिसङ्करश्चेति नामान्तराणि । तन्मतेन रूढेर्लक्षणं तावदिदम् –

अखण्डशक्तिमात्रेणैकार्थप्रतिपादकत्वं रूढिः ॥

अत्र पाककर्त्राद्यर्थप्रतिपादके पाचकादौ शब्देऽतिव्याप्तिवारणाय शक्तेरखण्डेति समानाधिकरणं विशेषणम् । तेनात्र शक्तेः सद्भावेऽपि तस्या अखण्डत्वाभावान्न दोषः । शक्तिश्चात्र सर्वत्रापि सङ्केतः । तस्मिन्नखण्डत्वम् अवयवार्थाविषयकत्वम् । अखण्डशक्त्यैव पद्माद्यर्थप्रतिपादके पङ्कजादौ शब्दे अतिव्याप्तिवारणाय अवधारणार्थकं मात्रविशेषणम् । एतेनात्र पङ्कजनिकर्त्राद्यर्थ-विषयकस्य शक्त्यन्तरस्यापि सद्भावान्न दोषः । अश्वगन्धादिषु शब्देषु मूलिका-विशेषाद्यर्थे प्रतिपाद्ये शक्त्यन्तरस्यानपेक्षितत्वात् रूढिरेवेति लक्षणसमन्वयो न दोषाय ।

अनया योऽर्थः प्रतिपाद्यते स केवलः, अनन्वितेनार्थान्तरेण सहचरितश्चेति द्विविधः । तत्प्रभेदद्वयस्यापि [१]इदमुदाहरणम् –

यत्ते पदाम्बुरुहमम्बुरुहासनेड्यं
धन्याः सकृदीश! भवन्ति मुक्ताः ।
नित्यं तदेव भजतामतिमुक्तलक्ष्मी-
र्युक्तैव देव! मणिनूपुरमौक्तिकानाम् ॥

अत्र मण्यादेरतिमुक्तादेश्च शब्दात् क्रमेण मण्यादेः वासन्तीपुष्पस्य च प्रतीतिरिति रूढिः । तत्राद्येऽर्थान्तरस्यानवभासात् मण्यादिरर्थः केवलः अन्त्ये तु मौक्तिकातिक्रान्तरूपार्थस्य प्रतिभासात् वासन्तीपुष्पोऽर्थः तदर्थेनानन्वयितया

१. अयमर्थः–अये विष्णो! धन्याः खलु पुरुषाः ब्रह्मणा स्तूयमानं तव पादारविन्दयुगलं सकृदवाप्य मुक्ता भवन्ति किन्तु तदेव पादारविन्दयुगलं सन्ततमाश्रयतां मणिनूपुरमौक्तिकानां या वासन्तीपुष्पकान्तित्वेनाध्यवसिता मौक्तिकातिशायिनी सम्पत्तिः सा पुनः युक्तैव वर्तते न मुक्तिं गतेति विस्मयजनकोऽयं विषयः ।

सहचरितः । स्यान्नामेह मौक्तिकातिशायिनी सम्पत्तिः साक्षात् वासन्तीपुष्पकान्तिरिति अतिमुक्तालक्ष्मीपदेन बोधितयोरर्थयोः अभेदेनान्वयः तथापि तदेकदेशातिमुक्तशब्देन बोधितयोः वासन्तीपुष्पमौक्तिकातिक्रान्तरूपार्थयोः न स इति अनन्वितेनार्थान्तरेण सहचरितत्वं निर्बाधम् । योगस्य तावदिदम् –

अवयवशक्तिमात्रसापेक्षं पदस्यैकार्थप्रतिपादकत्वं योगः ॥

अत्राखण्डशक्त्या मण्याद्यर्थप्रतिपादके मण्यादिशब्देऽतिव्याप्तिवारणाय शक्तेरवयवेति व्यधिकरणं विशेषणम् ।

अनेन योर्थः प्रतिपाद्यते सोऽपि केवलः, अनन्वितेनार्थान्तरेण सहचरितश्चेति द्विविधः । तत्प्रभेदद्वयस्यापि [२]एतदुदाहरणम् –

अस्तु त्रयीमयतनुस्तव लम्बनाली–
रत्नैस्तथापि परिभूयत एव भानुः ।
सोढः सतां बत निशान्तमुपागताना–
मेवं तिरस्कृतिकृदीश्वर! क सुवृत्तैः ॥

अत्र सुवृत्ततिरस्कृतिकृदादेः निशान्तादेश्च शब्दात् क्रमेण सुचरितादेः रात्र्यन्तभागादेश्च अर्थस्य प्रतीतिरिति रूढिः । यद्यप्यत्र निशान्तम् उपागतानां तिरस्कृतिकृदिति पदसमूहेन प्रतिपादितयोरर्थयोः अभेदेनान्वयः तथापि तदेकदेशभूतनिशान्तशब्दप्रतिपादितयोः अर्थयोः न स इत्यनन्वितेन अर्थान्तरेण सहचरितत्वं पूर्ववदेव निर्बाधम् । योगरूढेः पुनरिदम् –

अवयवसमुदायोभयशक्तिसापेक्षमेकार्थप्रतिपादकत्वं योगरूढिः ॥

यद्यपि पङ्कजादेः शब्दात् पङ्कजनिकर्तृरूपः पद्मरूपश्चेति द्वयोरर्थयोः प्रतीतिः तथापि तयोरर्थयोः व्याप्यव्यापकभावात् पश्चादभेदेनान्वये एकीभूतार्थस्य सिद्धिः । सिद्धे च तस्मिन् भागावच्छेदेनोभयोरपि शक्त्योरपेक्षेति लक्षणानुगतिः । इदमुदाहरणम् –

२. अयमर्थः – विष्णो ! सूर्योऽयं यद्यपि वेदमयशरीरः लम्बकान्तिश्चेति समेषां पूजनीयः तथापि तं तव रत्नानि यत् तिरस्कुर्वन्ति तदुचितम्, यतः गृहं प्राप्तानां सज्जनानामवमाननेन यदभिन्नं रात्रेरन्तभागं प्राप्तानां नक्षत्राणां विच्छायीकरणं तत्कुर्वन् कोऽपि पुमान् सुचरितैः सोढुं न शक्यते ।

[३]पक्षद्वयक्रशिमपोषविभाव्यमान-
चान्द्रायणव्रतनिषेवण एव नित्यम् ।
कुर्वन् प्रदक्षिणमुपेन्द्र! सुरालयं ते
लिप्सुर्मुखाब्जरुचिमेष तपस्यतीन्दुः ॥

अत्रावयवशक्त्या सुरालयशब्दात् देवमन्दिरस्य प्रतीतिः समुदायशक्त्या तु मन्दरस्य। तयोरुभयोः व्याप्यव्यापकभावात् अभेदेनान्वये देवमन्दिराभिन्न-मन्दररूपविशिष्टार्थस्य प्रतीतिरिति तयोरुभयोः सङ्करः ॥

वस्तुतस्तु दीक्षितकृतेषु त्रयाणां प्रभेदानां लक्षणेषु अर्थस्यैकेति विशेषणं व्यर्थम्, साधारणत्वात् । नहि साधारणोऽंशः लक्षणकुक्षिं प्रविष्टः पदार्थस्वरूपज्ञानमाधातुं प्रभवति । न चातिमुक्तादौ शब्दे रूढिलक्षणस्य अव्याप्तिवारणाय तदिति वाच्यम्, वासन्तीपुष्पादावर्थे प्रतिपादनीये अखण्डशक्तिमात्रस्य अपेक्षितत्वात् । स्यान्नाम तत्रार्थान्तस्य प्रतीतिः तथापि न तत्र लक्षणसङ्गतौ कोऽपि बाधः । [४]एतेन 'यद्यपि अतिमुक्तलक्ष्मीः वासन्तीमुकुलशोभैव मुक्तातिशायिनी सम्पदिति अभेदाध्यवसानार्थम् अतिमुक्तशब्दस्यावयवार्थोऽपि विवक्षितः तथापि तस्य वासन्तीपुष्प-गतत्वेनाप्रतिपादनात् तत्र रूढिरेव । एतदतिव्याप्तिवारणाय एकपदमर्थवत्' इति दीक्षितैः यदुक्तं तन्नातीव श्लिष्यतीति बोध्यम् । किञ्च लक्षणस्य क्वचिदतिव्याप्तौ विशेषणस्य निवेशनम् अव्याप्तौ तु निवेशितस्यापि अपसारणमिति स्थिते कुतोऽत्राव्याप्तिप्रसक्तौ विशेषणस्य निवेशनम्? तदयुक्तमेव एकेति विशेषणम् ।

[५]जगन्नाथोऽपि त्रिधेत्यभिप्रैति । यद्यपि नाना मतानि निरूप्य शब्दिकानां सिद्धान्तस्य पर्यन्ते निरूपणात् तेषां सिद्धान्त एव तस्याभिमत इति प्रतिभाति तथापि 'विशिष्टस्य विशिष्टार्थे रूढेरेवाभ्युपगमादित्यपि वदन्ति' इति वदन्तीति

३. अयमर्थः–हे उपेन्द्र! चन्द्रोऽयं त्वन्मुखारविन्दसुषमाभिलाषी कृष्णपक्षे शरीरस्य शोषणेन शुक्लपक्षे तत्पोषणेन च चान्द्रायणव्रतमनुतिष्ठन् देवमन्दिरं सुमेरुपर्वतं च प्रदक्षिणीकुर्वन् तपस्यां विदधातीव ।

४. वृत्तिवा. प्र.प. अभिधानिरूपणम् ।

५. रस. द्वि.आ. अभिधानिरूपणम् ।

शब्देन स्वारस्याभावव्यञ्जनात् पूर्वं त्रैविध्येन विभजनाच्च त्रेधेत्येव तदाशयः सिध्यति ।

[६]**नैयायिकास्तु** अनन्वितार्थद्वयप्रतिपादकत्वेन वैलक्षण्यस्य सत्त्वात् अश्वगन्धादिषु शब्देषु न योगरूढिरिति प्रभेदः किन्तु यौगिकरूढिरिति अन्य एव कश्चित्प्रभेद इत्याशेरते । अयं तेषामाशयो भाति – वाङ्मये सूक्ष्मदृष्ट्या विलोकिते शब्दाः चतुर्धा विभक्ता अस्माकं प्रतीतिपथमायान्ति । तेषु लावण्यनूपुरादयः शब्दाः प्रथमाः, येभ्यः प्रकृतिप्रत्ययावयवज्ञानम् अन्तरेणैव कान्तिविशेषादेरर्थस्य प्रतीतिः । पाचकपाठकादयो द्वितीयाः, येभ्यः तज्ज्ञाने सत्येव पाककर्त्रादेरर्थस्य प्रतीतिः । जलजपङ्कजादयः तृतीयाः, येभ्यः प्रकृतिप्रत्ययाद्यवयवज्ञाने सति जलजनिकर्त्रादेरर्थस्य प्रतीतिः । तदज्ञाने तु तदन्वययोग्यतद्विशेष्यभूतकमलादेः अर्थान्तरस्य । अशोकाश्वगन्धादयस्तु चतुर्थाः, येभ्यः प्रकृतिप्रत्ययाद्यवयवज्ञाने सति शोकशून्यादेरर्थस्य प्रतीतिः तदज्ञाने पुनः वृक्षविशेषादेरर्थान्तरस्य तदनन्वितस्य । तदेवमसङ्कीर्णतया उपलम्भात् शब्दानां चातुर्विध्ये सिद्धे तद्गतशक्तेरपि तदेव सिध्यति ॥

* किमत्र युक्तम्?

वस्तुतस्तु त्रिधेत्येवोचितम्, अश्वगन्धादिषु शब्देषु प्रथमद्वितीयाभ्यामेव निर्वाहात्, तथाहि – अश्वगन्धारसं पिबेदित्यादौ प्रकृतिप्रत्ययाद्यवयवज्ञानस्य अनपेक्षितत्वात् रूढ्या मूलिकाविशेषस्य प्रतीतिः । अश्वगन्धा वाजिशालेत्यादौ तस्यापेक्षितत्वात् योगेन वाजिसौरभविशिष्टायाः । तस्मादतिरिक्तप्रभेदकल्पनं न सामञ्जस्यं बिभर्ति । ननु केवलायां रूढौ रूढिरिति व्यवहारः, केवले च योगे योग इत्यवश्यमभ्युपेयम् अन्यथा योगरूढिरिति प्रभेद एव विलीयेत । स्थिते चैवम्, अश्वगन्धादिषु शब्देषु रूढिर्योगश्चेति द्वयोरभ्युपगमे कथं तावत् तद्गतकैवल्यस्योपपादनम्? उच्यते, विषयभेदेनावस्थानात् । नहि विषयभेदे सति विरुद्धयोः द्वयोर्धर्मयोः समावेशः सम्पन्नोऽपि तद्गतकैवल्यं भङ्क्तुं शक्नोति । अत एव शत्रुषु केवलदुःखदायके मित्रेषु च केवलसुखदायके कस्मिंश्चित्

६. न्या.सि.मु. शब्द.खं. का–८१.

पुरुषे स्थितयोः केवलसुखदायकत्वकेवलदुःखदायकत्वयोः धर्मयोः कैवल्यस्य न भङ्गः। ततश्चात्र मूलिकाविशेषे प्रतिपाद्ये केवला रूढिः, वाजिसौरभविशिष्टे तु केवलो योग इति न किञ्चिदसामञ्जस्यम् । यत्पुनरभिप्रेतम्, शब्दानां चातुर्विध्यात् तद्गतशक्तेरपि चातुर्विध्यमिति – तन्न, शब्देषु कतिविधा शक्तिरिति प्रश्नेऽर्थभेदेन एव तद्भेदस्य निर्णेतव्यत्वात् । शब्दभेदेनेति तु न युक्तम्, अन्ततः तस्याप्यर्थभेद एव पर्यवसानात् । अतः त्रेधेति निर्णयो रमणीयः ।

ननु सर्वेषु भेदेषु प्रकृतिप्रत्ययविभागस्य काल्पनिकत्वात् शाब्दिकोक्तरीत्या अभिधाया रूढिमात्ररूपत्वमिति कुतो नाङ्गीक्रियते? साधु पृष्टमायुष्मता, पारमार्थिकदृष्ट्या साधुत्वेऽपि व्यावहारिकदृष्ट्या तदभिप्रायस्यासाधुत्वादिति गृह्यताम् । नहि व्यावहारिकदशायां केनचित् प्रश्ने कृते सत्यमपि पारमार्थिक-दशयोत्तरं दीयमानं स्वारस्याय कल्पते । तस्मात् अभिधाया रूढिः योगः योगरूढिश्चेति त्रयः प्रभेदा इत्येव साम्प्रतम् । तेषां लक्षणं कृतपूर्वेण विवरणेन ज्ञातमपि दृढतायै पुनरुच्यते –

* अखण्डसङ्केतनिमित्तकमर्थप्रतिपादकत्वं रूढिः ।
* सखण्डसङ्केतनिमित्तकमर्थप्रतिपादकत्वं योगः ।
* उभयरूपसङ्केतनिमित्तकमर्थप्रतिपादकत्वं योगरूढिः ।

प्रतिपादकत्वं चात्र प्रतिपत्त्यनुकूलो व्यापारः । अखण्डत्वम् अवयवार्थाविषयकत्वम् । तद्विपरीतं तु सखण्डत्वम् । उभयरूपत्वं तु कस्मिंश्चिदर्थे अवयवार्थाविषयकत्वेन अन्यस्मिंस्तु तद्विषयकत्वेनेति दिक् ॥

❖❖❖

लक्षणानिरूपणम्

लक्षणेत्ययं शब्दो लक्ष दर्शनाङ्कनयोरिति चौरादिकाद्धातोः [१]ण्यासश्रन्थो युच् इति युचि टापि च सति निष्पद्यते । व्यापारो वृत्तिरिति पक्षे प्रत्ययो भावे सम्बन्धो वृत्तिरिति पक्षे तु करण इत्येतत्सर्वम् अभिधावदत्रापि प्रत्येयम् । लक्षणाया लक्षणं सम्बन्धपरं व्यापारपरं चेति द्विविधमस्माकं

१. अष्ट. ३.३.१०७.

प्राधान्येन प्रतिभासते । तत्र सम्बन्धपरं लक्षणं नैयायिकमीमांसकादीनां व्यापारपरं तु [२]प्राचीनवैयाकरणानां प्रायेण चालङ्कारिकाणाम् । सर्वमिदम् अनतिविस्तरेण प्रतिपाद्यते ।

* लक्षणे मतभेदः

तत्र [३]शक्यसम्बन्धो लक्षणेति नैयायिकाः । सम्बन्धस्यैव च लक्षणात्वं युक्तम्, गङ्गायां घोष इत्यादौ गङ्गाद्यर्थप्रतियोगिकसम्बन्धस्य ज्ञाने सत्येव गङ्गादिशब्दस्य तीरादावर्थे प्रवर्तमानत्वात् । यद्यपि तार्किकवृद्धैः 'शक्यात् अशक्यस्योपस्थितिः' इति लक्षणमुच्यते तथापि उपस्थितेः ज्ञानरूपत्वेन शब्दवृत्तित्वासम्भवात् अशक्यस्योपस्थितिः येनेति व्यधिकरणबहुव्रीहिणा, उपतिष्ठतेऽनयेति क्तिनः करणार्थकत्वस्वीकारेण वा सम्बन्धपरत्वं सुवचमिति दोषाभावः ॥ वस्तुतोऽत्र लक्षणे मुख्यार्थबाधादेः निमित्तस्य नास्त्युपादानम् तथापि अतिप्रसङ्गभयात् तत्तेषां सम्मतमेवेति निर्णयः । एवञ्च मुख्यार्थबाधे रूढिप्रयोजनयोः अन्यतरस्मिंश्च सति शक्यस्य सम्बन्धो लक्षणेति मतं पर्यवसन्नम् ।

बोध्यसम्बन्धो लक्षणेति [४]मीमांसकाः । सम्बन्धस्य शक्यप्रतियोगिकत्वं न साधु, तथा सति गभीरायां नद्यां घोष इत्यादौ [५]वायुर्वै क्षेपिष्ठा देवतेत्यर्थवादादौ च सम्बन्धस्य वाक्यार्थप्रतियोगिकत्वेन शक्यप्रतियोगिकत्वाभाव इति यथाक्रमं गभीरनदीतीररूपार्थे क्षिप्रप्रसादत्वेन वायुदेवतायाः प्रसंशनीयत्वमित्यर्थे च लक्षणाया अनुन्मेषप्रसङ्गः । ननु आद्ये विवक्षितार्थे नदीपदमात्रस्य लक्षणा गभीरपदार्थस्य च तात्पर्यग्राहकत्वम्, अन्त्ये तु वृत्त्यन्तरमिति चेत् – मैवम्, विनिगमकाभावेन वैपरीत्यस्यापि सुवचत्वेन आद्ये अव्यवस्थितत्वप्रसङ्गात् अन्त्ये वृत्त्यन्तरस्याप्रामाणिकत्वेन अभ्युपगन्तुमशक्यत्वात् । एवं तर्हि वाक्यार्थसम्बन्धो लक्षणेत्युच्यते – नैतद्युक्तम्, गङ्गायां घोष इति प्रसिद्धोदाहरण

२. कौण्डभट्टप्रभृतीनाम् ।
३. लक्षणा शक्यसम्बन्धस्तात्पर्यानुपपत्तितः । कारि. शब्द. खं. का-८२.
४. कुमारिलभट्टप्रभृतयः ।
५. वायव्यं श्वेतमालभेतेति विधिः । अयं तच्छेषः ।

एव लक्षणाया असद्भावप्रसङ्गात् । तस्मादुभयोः गत्योः सबाधत्वे तृतीयैव गतिर्ज्यायसीति अस्मदुक्तमेव लक्षणमादर्तव्यम् ।

तत्र बोध्यश्च शक्य इव वाक्यवेद्योऽप्यर्थो भवतीति न कुत्रापि दोषसंस्पर्शः । एतेन अर्थवादे प्रतीतिसिद्धस्य अर्थान्तरस्योपपादनं कथमिति पर्यनुयोगो दत्तोत्तरः सम्पन्नः । सम्बन्धश्च विशिष्टबुद्धिनियामक एव गृह्यते । ततश्च यत्र विशिष्टबुद्धिः सम्भवति तादृशे गङ्गायां घोषः, कुन्ताः प्रविशन्ति, इत्यादावेव स्थलेऽस्याः स्वीकारः, यत्र पुनः तादृशी बुद्धिः न सम्भवति, मुखं चन्द्रः, अग्निर्माणवक इत्यादौ, तत्र गौणीति व्यतिरिक्ताया वृत्तेरभ्युपगमः । नह्यत्र गङ्गाविशिष्टं तीरम्, कुन्तविशिष्टाः पुरुषा इति पूर्ववाक्यादिव चन्द्रविशिष्टं मुखम्, अग्निविशिष्टो माणवक इति विशिष्टबुद्धिः सम्भवति । गुणात् साधारणधर्मात् आगता गौणीति अस्या अर्थवान् व्यपदेशः, [६]तदुक्तम् – 'लक्ष्यमाणगुणैर्योगात् वृत्तेरिष्टा तु गौणता' ॥ एतेन यत्र सादृश्यं सम्बन्धः तत्र गौणी यत्र पुनः तदितरः तत्र लक्षणेत्युक्तं भवति ।

[७]**वैयाकरणास्तु** 'सति तात्पर्ये सर्वे सर्वार्थवाचकाः' इति भाष्यवाक्यात् सर्वत्रापि शक्त्यैव अभिमतार्थस्य बोधसम्भवेन लक्षणेति व्यतिरिक्तवृत्ति–कल्पनम् अयुक्तं मन्यन्ते । ततश्च तन्मतानुसारेण गङ्गायां स्नान्तीत्यादेर्व्यवहारात् गङ्गादिशब्दानां यथा प्रवाहादौ शक्तिः निर्णीयते तथा गङ्गायां घोष इत्यादेस्तु तीरादावपि । तत्र पुनः शक्तिबोध्यस्यार्थस्य प्रयोगप्राचुर्यात् एकत्र प्रसिद्धत्वम् अन्यत्र तद्वैपरीत्याद् अप्रसिद्धत्वमिति केवलं भेदः । तस्मात् लक्षणेति अप्रसिद्धा शक्तिरेव नातिरिक्तः कश्चिद् व्यापारः, [८]तदेतदुक्तं हरिणा –

एकमाहुरनेकार्थं शब्दमन्ये परीक्षकाः ।
निमित्तभेदात्सर्वत्र सार्वार्थ्यं प्रतिपद्यते ॥
यथा सास्नादिमान् पिण्डो गोशब्देनाभिधीयते ।
तथा स एव गोशब्दो वाहीकेऽपि व्यवस्थितः ॥
सर्वशक्तेस्तु तस्यैव शब्दस्यानेकधर्मिणः ।
प्रसिद्धित्यागाद्गौणत्वं मुख्यत्वं वोपजायते ॥ इत्यादि ।

६. तन्त्र. १.४.२२. ७. कौण्डभट्टप्रभृतयः । ८. वाक्य.

नन्वेवं सति घटशब्दात् पटस्यापि बोधः स्यात् – नैष दोषः, तात्पर्यस्य नियामकत्वात् । अत एव 'सति तात्पर्ये' इत्युक्तम् । तात्पर्यं च पारमेश्वरमेव न तु आस्माकीनमिति नातिप्रसङ्गः । एवं च पटादौ तात्पर्याभावादेव न तद्बोधापत्तिरिति बोध्यम् । किञ्च लक्षणायाम् अभिधाव्यतिरिक्तत्वस्वीकारे गौरवम्, कार्यकारणभावस्य अनेकत्वप्रसङ्गात्, तथाहि – शब्दबोधं प्रति प्रत्यक्षादिप्रमाणजन्योपस्थितेः कारणत्ववारणाय उपस्थितेः वृत्तिजन्यत्व-विशेषणमवश्यं देयम् । वृत्तिश्चाभिधा लक्षणा चेति शाब्दबोधे अभिधा-जन्योपस्थितेः लक्षणाजन्योपस्थितेश्च पृथक् पृथक् कारणत्वं वक्तव्यमिति स्फुटमेव तावत् कार्यकारणभावस्यानेकत्वम् । एवमुपस्थितावपि सङ्केतस्य मुख्यार्थबाधादेश्च पृथक् पृथगेव कारणत्वमिति तत्रापि तदनेकत्वं स्वयमूह्यम् ।

[९]**नागेशभट्टस्तु** गङ्गायां स्नान्तीत्यादौ गङ्गायां गङ्गात्वं वास्तविकम्, गङ्गायां घोष इत्यादौ लक्ष्ये तीरे तदेवारोपितमिति शक्यतावच्छेदकारोप इति लक्षणाया लक्षणं भवितुमर्हतीत्यभिप्रैति ।

आलङ्कारिकेषु **प्रकाशकारो** लक्षणाया लक्षणं मन्यमान इत्थमभिधत्ते –

[१०]मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात् ।
अन्यार्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया ॥

मुख्यार्थबाधे तत्सम्बन्धे रूढिप्रयोजनयोरन्यतरस्मिंश्च सति शब्दस्यार्थान्तरे यो व्यापारः सा लक्षणा । इयं वक्त्रा शब्दे कल्पिता वृत्तिः न पुनः अभिधावत् नैसर्गिकीति कारिकार्थः ।

तत्र मुख्यार्थबाधादीनां यत्कारणत्वं [११]तद्दण्डचक्रन्यायेन, रूढिप्रयोजनयोः तदेव तृणारणिमणिन्यायेन । मुख्यार्थबाधः तात्पर्यानुपपत्त्या । अन्वयानुपपत्तिः नियमेनानया व्याप्यत इति गङ्गायां घोष इत्यादौ अन्वयानुपपत्त्या मुख्यार्थ-

९. वै.सि.मं. लक्षणानिरूपणम् । १०. का.प्र. द्वि.उ. का–९.

११. कार्यं प्रति कारणत्वेन वहवः पदार्था यत्राङ्गीकृता भवन्ति तत्र क्वचित् समूहस्य कारणत्वं क्वचिच्च प्रत्येकमिति द्वयी गतिः । तयोराद्ये स्थले दण्डचक्रन्यायस्योल्लेखः अन्त्ये तु तृणारणि-मणिन्यायस्य। नहि दण्डचक्रादयो घटं प्रति कारणत्वेनाङ्गीकृताः व्यस्ताः तत्कार्यं जनयन्ति किन्तु समवेताः । तृणारणिमणयस्तु वह्निं प्रति कारणत्वेनाङ्गीकृता व्यस्ता एव तत्कार्यं जनयितुं शक्नुवन्ति समवेतास्तु किं पुनः? न तत्र समूहोऽपेक्ष्यते । तदेवं कारणस्य द्वैविध्यम् ।

बाधनिर्णयेऽपि न दोषः । तात्पर्यानुपपत्तिः प्रकरणादिना वक्तुरर्थान्तर एव तात्पर्यं न पुनः मुख्यार्थ इति ज्ञाने सति । अन्वयानुपपत्त्यैव मुख्यार्थबाध इत्याग्रहे काकेभ्यो दधि रक्ष्यताम्, नक्षत्रं दृष्ट्वा वाचं विसृजेत् इत्यादौ लक्षणाविरहप्रसङ्गः । योगः संयोगादिः सम्बन्धः । रूढिः अनदिर्वृद्धव्यवहारः । प्रयोजनं फलम् । लक्षणाप्रयोज्यादपि एतस्य तां प्रत्येव निमित्तत्वम् अध्ययनेन वसतीत्यादाविव प्रवर्तकत्वेनेति बोध्यम् ।

अप्पयदीक्षितास्तु अत्र विषये प्रकाशकारस्यैव पन्थानमनुसरन्ति, [१२]यदुक्तम्–

मुख्यार्थसम्बन्धेन शब्दस्य प्रतिपादकत्वं लक्षणा ॥

मुख्यार्थसम्बन्धश्च विशिष्टबुद्धिनियामक इव तदनियामकोऽपि गृह्यते अन्यथा [१३]उपकृतं बहु तत्र किमुच्यत इति पद्ये लक्षणैव न स्यात् । गन्धमात्रेणापि सादृश्यस्यानुपलम्भात् गौणीति वचनं न साधु । किञ्च गौणी लक्षणातो न व्यतिरिच्यते, अनुपदोक्तरीत्या सम्बन्धसामान्यस्यैव लक्षणाप्रयोजकत्वात्, उपाधिभेदस्य विरहाच्च । एतेन मुखं चन्द्र इत्यत्र गौणी लक्षणाया एव प्रभेदः न तु व्यतिरिक्ता वृत्तिः ।

यद्यप्यत्र मुख्यार्थबाधादेरुपादानं नास्ति तथापि मुख्यार्थसम्बन्धेन अर्थप्रतिपादकत्वे अभिहिते मुख्यार्थे बाधितत्वस्य स्फुटत्वात् उत्तरत्र निरूढा फलवती चेति विभजनात् निमित्तान्तरं समस्तं तेषां सम्मतमेवेति विज्ञायते। विश्वनाथेन न नूतनं किञ्चिदाख्यातम् किन्तु प्रकाशकारोक्तमेव अनूदितम्, [१४]यथा –

मुख्यार्थबाधे तद्युक्तो ययान्योऽर्थः प्रतीयते ।
रूढेः प्रयोजनाद्वासौ लक्षणा शक्तिरर्पिता ॥ इति ।

जगन्नाथस्तु [१५]शक्यसम्बन्धो लक्षणेति नैयायिकोक्तमेवानुवदन् मुख्यार्थ–बाधस्तावत् नान्वयानुपपत्त्या, तथा सति काकेभ्यो दधि रक्ष्यतामित्यादौ

१२. वृत्तिवा. द्वि.प.
१३. उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम् ।
विदधदीदृशमेव सदा सखे! सुखितमास्व ततः शरदां शतम् ॥
१४. सा.द. द्वि.प. का–५.
१५. रस. द्वि.आ. लक्षणानिरूपणम् ।

लक्षणाया अनुल्लासप्रसङ्गः । तस्मात् तात्पर्यानुपपत्त्यैव सः । तत्र तात्पर्यानुपपत्तिः यद्यपि [१६]मुख्यार्थतावच्छेदके तात्पर्यविषयान्वयिता-वच्छेदकताया अभावः, तात्पर्यविषयान्वये मुख्यार्थतावच्छेदकविशिष्ट-तत्प्रतियोगिकताया अभावश्चेति द्वेधा निर्वक्तुं शक्यते तथापि तयोराद्यो न युज्यते, प्रयोजनस्योपपादनाय लक्ष्यस्य शक्यतावच्छेदकविशिष्टतया प्रतीतेः अभ्युपगन्तव्यत्वात् गङ्गायां घोष इत्यत्र तीरस्य गङ्गात्वेन प्रतीतौ मुख्यार्थतावच्छेदकं गङ्गात्वमेव तात्पर्यविषयीभूतेन आधाराधेयभाव-सम्बन्धेनान्वयिनि तीरेऽवच्छेदकं भवति न तदभाव इति तात्पर्यानुपपत्तेरभावात् लक्षणाविरहप्रसङ्गः । द्वितीये पक्षे तु नायं दोषः यतः तदनुसारेण तीरघोषयोरेव आधाराधेयभावः सम्बन्धः न तु गङ्गाघोषयोरिति तात्पर्यविषयान्वय आधाराधेयभावे तीरस्यैव प्रतियोगित्वं न मुख्यार्थस्य नतरां तु तदर्थतावच्छेदक-विशिष्टस्य तस्येति निरुक्तस्यान्वयः सुतरां सम्भवति । तद् द्वितीयपक्षरीत्यैव तात्पर्यानुपपत्तेः निर्वचनं कर्तव्यमित्याह ।

चूडामणिदीक्षितस्तु लक्षणायामर्थबोधकत्वे अन्वयानुपपत्तिः न निमित्तम्, छत्रिणो यान्तीत्यादौ अव्याप्तिप्रसङ्गात् । नहि छत्रिषु अच्छत्रिषु च गच्छत्सु कृतेऽस्मिन् प्रयोगे छत्रिशब्दमुख्यार्थस्यान्वये काप्यनुपपत्तिः सम्भवति । नापि तात्पर्यानुपपत्तिः निमित्तम्, गतोऽस्तमर्क इत्यादौ तयैवार्थान्तरस्य भानेन व्यञ्जनायामतिप्रसङ्गात् । तस्मात् –

[१७]तात्पर्यविषयीभूतार्थान्वयानुपपत्तितः ।
शक्यभिन्नार्थधीहेतुर्व्यापारो लक्षणोच्यते ॥

इत्येव लक्षणं कर्तव्यमित्यभिप्रेत्य लक्षणेऽर्थस्य शक्यभिन्नत्वेन विशेषणमभिधायामतिव्याप्तेः वारणायेत्याचष्टे । तदेवं स्थितं लक्षणाया लक्षणविषये नैकविधं मतम् ।

* नानामतानां परीक्षणम्

अत्रेदं चिन्त्यते – वस्तुतः कार्यकारणभावेनावस्थितेषु इच्छासम्बन्ध-व्यापारेषु व्यापारस्यैव वृत्तित्वं युक्तत्वमिति प्रागुक्तरीत्या तत्परमेव लक्षणं

१६. रस. द्वि.आ. लक्षणानिरूपणम् । १७. का.द. द्वि.उ. का–२०.

साधु। तच्च प्रकाशकारादीनाम्। तत्रापि मुख्यार्थबाधादीनां समेषामंशानां क्रोडीकरणात् प्रकाशकारस्यैव लक्षणं साम्प्रतम्। नन्वत्र मुख्यार्थबाधस्य यदुपादानं तत्कुतः? उच्यते, तदभावे हि गङ्गायां स्नान्तीत्यादावपि शीतत्व-पावनत्वादेः प्रयोजनस्य वक्तुं शक्यत्वेन लक्षणास्वीकारप्रसङ्गः। रूढिप्रयोजनयोः उपादानमपि कर्तव्यम्, नो चेत् आगमनतात्पर्येण गच्छामीति प्रयोगे पुनश्चायमेवार्थो ममाभिप्रेत इत्याग्रहे कथं तस्य निराकरणम्? सम्बन्धस्यापि तथा, अन्यथा यत्किञ्चिदर्थस्य लक्ष्यत्वापादनप्रसङ्गः।

तत्र नैयायिकमीमांसकादीनां यत्सम्बन्धपरं लक्षणम् – तन्न ग्राह्यम्, तत्सम्बन्धस्य अर्थप्रतीतिनिमित्ते शब्दार्थसम्बन्धे निमित्तत्वात्। एतच्च प्रतिपादितचरमपि स्फुटप्रतिपत्तये मनागिव पुनः प्रतिपाद्यते – इह हि गङ्गाशब्दस्य तीरार्थेन लक्ष्यलक्षकभावः सम्बन्धः, गङ्गार्थस्य च तेनैवार्थेन संयोगः सामीप्यं वेति सम्बन्धद्वयं वर्तते। तत्र नैसर्गिको यो द्वितीयः सम्बन्धः तस्मिन्नवगते सत्येव अनेनेममर्थं प्रतिपादयामीति वक्त्रिच्छायाः सम्भव इति तज्जन्यस्य प्रथमसम्बन्धस्य अनित्यत्वम् तस्यैव च अर्थप्रतिपत्तिहेतुत्वम्। नहि तादृशे कस्मिंश्चित् सम्बन्धे सति विगणय्य तं तत्कारणस्यान्यस्य कस्यचित् सम्बन्धस्य लक्षणात्वमुच्यमानं विवेकवतां शोभते। नहि घटं प्रति कुलालस्य कारणत्वेऽपि तज्जनकस्य कारणत्वं सम्भवति। किञ्च उच्यमानमपि तन्न घटते, शक्यस्य बाधितत्वेन तस्येव तत्सम्बन्धस्यापि कुर्वद्रूपताया अपगमात्, शक्यप्रतियोगिकत्वेन वृत्तेरर्थवृत्तित्वप्रसङ्गाच्च। न चेष्टापत्तिः, शक्यस्य लक्षकलाक्षणिकादिशब्दैः व्यवहार्यताप्रसङ्गात्, गङ्गादौ शब्दे तदप्रसङ्गाच्च। लाक्षणिक इति शब्दो यद्यप्यर्थे वर्तते तथापि तत आगत इति तीरादावर्थे न तु गङ्गादिशब्दे। अस्तु तर्हि गङ्गादिशब्दप्रतियोगिकस्य सम्बन्धस्य – मैवम्, प्रागुक्तादेव हेतोः। किञ्च वृत्तेः योऽभिधाख्यः प्रथमः सम्बन्धः तस्य शब्दार्थगतसम्बन्धरूपत्वम् यश्च द्वितीयः तस्य अर्थद्वयगतसम्बन्धरूपत्वमिति वैषम्यम्।

[१८]यदुक्तं पुनः मीमांसकैः, गभीरायां नद्यां घोष इत्यत्र नदीपदस्य

१८. भा.सा. शब्दनिरूपणम्।

गभीरनदीतीरार्थे लक्षणा गभीरपदस्य तात्पर्यग्राहकत्वमित्येतत् नोपपद्यते, विनिगमकाभावादिति – तच्चिन्त्यम्, विशेष्यत्वप्रयुक्तप्राधान्यस्य विनिगमकत्वेन सत्त्वात् । नहि प्रधानाप्रधानयोः युगपदुपस्थितौ कार्यं कुत्रेति सन्देहो सुधीनां संजायते । यद्वा, एकदेशान्वयोऽस्यु को बाधः? पदार्थः पदार्थेनान्वेति न तदेकदेशेनेति प्रायवचनम्, न नियमः, अन्यथा चैत्रस्य गुरुकुलमित्यादौ सर्वत्रापि लक्षणास्वीकारप्रसङ्गः । न चेष्टापत्तिः, मुख्यार्थबाधस्याननुभवात्।

यदपि वायुर्वै क्षेपिष्ठा देवतेत्यादेरर्थवादस्य विवक्षितेऽर्थान्तरे लक्षणेत्युक्तम् – तत्र प्रष्टव्यम्, तत्र या लक्षणा सा किं निरूढा आहोस्वित् प्रयोजनवती? नाद्यः, अपसिद्धान्तात् । नान्त्यः, प्रयोजनस्याप्रत्ययात् । किञ्च, अभिधा-विषयस्यार्थस्य बाधे तत्स्थानीयस्यार्थान्तरस्य नियमेन पदार्थरूपत्वमिति तद्विषयिकाया लक्षणाया वाक्यार्थविषयकत्वं कथमिति पर्यनुयोगप्रसङ्गः । एवं तर्हि तत्रार्थान्तरस्य बोधः कया वृत्त्या? व्यञ्जनया वाच्यवैशिष्ट्य-समुत्थितया । ननु व्यञ्जना नास्माभिः स्वीक्रियते – नायं व्यञ्जनाया दोषः प्रत्युत युष्माकम्, साधु खल्वेतदभिहितम् – [१९]नह्येषः स्थाणोरपराधः यदेनमन्धो न पश्यति पुरुषापराधः स भवति ॥ एवं तर्हि अस्तु सा व्यञ्जना, प्रथमं तदुच्यतां किंस्वरूपा सा कतिप्रभेदा तदाविर्भावे किं बीजम् तदभ्युपगमे च का युक्तिः – सर्वमेतत् स्पष्टमग्रे प्रपञ्चयिष्यते। तावत् कुतूहलं रक्ष्यताम्।

यत्पुनः वैयाकरणैरुक्तम्, सति तात्पर्ये सर्वे सर्वार्थवाचकाः इति भाष्यात् गङ्गादिशब्दानां प्रवाहादाविव तीरादावपि शक्तिर्निश्चीयत इति – एतच्चिन्त्यम्, यदि अर्थद्वयेऽपि शक्तिः तर्हि अन्यत्रार्थे अन्यशब्दप्रयोगस्य हेतोरभावेन व्यञ्जनाया अनुल्लासे कथं तावत् शीतत्वपावनत्वादीनां प्रत्ययः? प्रसिद्धादन्यस्मिन् अर्थे प्रयोगादिति चेत् – न,

[२०]मय्येव जीर्णतां यातु यत्त्वयोपकृतं हरे!
नरः प्रत्युपकारार्थी विपत्तिमभिकाङ्क्षति ॥

इत्यादौ कप्यादावपि विष्ण्वादिगतधर्मावभासप्रसङ्गः, हेतोश्च सत्त्वात् कलिङ्गः साहसिक इत्यादौ निरूढलक्षणोदाहरणेऽपि प्रयोजनस्याङ्गीकर्तव्यत्वापत्तिः ।

१९. निरुक्त. निरुक्तम् प्र.अ. पादः–५. २०. कुव. अनुज्ञालङ्कारप्रकरणम् ।

किञ्च सति तात्पर्ये इत्युच्यते, तात्पर्यं कस्य? परमेश्वरस्य आहोस्वित् अस्मदादेः? परमेश्वरस्यैव तात्पर्यम्, तस्य च देवतामहर्षिवृद्धपरम्परातः अस्माकमवगतिरिति चेत् – अस्तु अस्तु बाढमस्तु, किन्तु तत्तात्पर्यं नित्यमाहोस्वित् अनित्यम्? यदि नित्यम् तदा तीरार्थेऽपि तस्य नित्यत्वात् तदर्थस्य नियमेन प्रतीतिरापद्येत, शब्दस्य च नानार्थकत्वं प्रसज्येत । ननु प्रसिद्धार्थस्य बाधे सत्येवार्थान्तरस्य प्रतीतिरिति नास्ति दोषः – एवमपि उपाधिभेदात् सिध्यन् अभिधातो व्यतिरेकः कथङ्कारं निवारयितुं शक्यः? अथानित्यमिति पक्षः तदा तत्प्रयुक्तशक्तेरपि अनित्यत्वमिति तीराद्यर्थप्रत्ययस्य पाक्षिकत्वापत्तिः । इत्थं प्रथमः पक्षो गलितः । नाप्यस्मदादेः तात्पर्यम्, लोकव्यवहारस्य व्याकुलताप्रसङ्गादिति द्वितीयोऽपि गलितः । वृत्ति-जन्योपस्थितिसामान्यस्यैव शाब्दबोधे कारणत्वाङ्गीकारात् नापि तदुत्थापितं गौरवम् । वस्तुतः यत्र सामान्याकारेण कार्यकारणभावः तत्र सर्वत्रापि विशेषाकारेण कार्यकारणभावस्यानेकत्वं स्वाभाविकमिति न गौरवमुद्भावनीयम् ।

ननु भोः सर्वमप्येतत् ॐ इति ब्रूमः किन्तु सति तात्पर्ये इति वाक्यस्य का गतिः? लक्षार्थाभिप्रायेणेति गृह्यताम् । अत एव निमित्तभेदात् सर्वत्र सार्वार्थ्यमुपपद्यते इत्यस्योपपत्तिः । यदि पुनः साक्षात्कृताशेषशब्दरहस्यस्य अबाधितार्थकशब्दोच्चारणसम्प्राप्तपावित्र्यमुखारविन्दस्य भगवतो वचनमेतत् मुख्यार्थाभिप्रायेणैव सङ्गतिं नेयमिति आगृह्यते तर्हि समेषां शब्दानां सर्वार्थवाचकत्वमिति ऋजुमार्गेणैवास्तु अर्थकल्पनम् । तदनुभवस्तु योगमार्ग-समासादितस्वच्छताशालिमनोमुकुराणां महात्मनामेव न तु अस्मदादीनां निरन्तरविषयानुसन्धानमलीमसचेतसामिति नासङ्गतिः । इह तु लोकयात्राम् अनुसृत्यैव विचार इति न तद्वाक्यविरोधः ।

यत्पुनः नागेशभट्टेन शक्यतावच्छेदकारोपो लक्षणेत्युक्तम्, – तन्मन्दम्, एकस्या वृत्तेः द्वयोः प्रभेदयोः एकस्य सम्बन्धरूपत्वम् अन्यस्यारोपरूपत्वमिति वैलक्षण्यात् । ननु [२१]पुंयोगादाख्यायाम् इति सूत्रे चतुर्भिः प्रकारैः 'अतस्मिन् स इत्येतद्भवति' इत्यादिभाष्यस्वारस्याद् एवमुक्तमिति चेत् – न, लक्षणास्थल

२१. अष्ट. ४.१.४८.

एवं भवतीति कल्पनेनापि तदन्वयस्य सुकरत्वात्। लक्षणास्थले च लक्ष्ये शक्यतावच्छेदकस्यारोपः सर्वेषामपि आलङ्कारिकाणां सम्मतः, तदुक्तं प्रकाशकारेण – '[२२]तटादीनां गङ्गादिशब्दैः प्रतिपादने तत्त्वप्रतिपत्तौ हि प्रतिपिपादयिषितप्रयोजनसम्प्रत्ययः'॥ जगन्नाथेनापि – '[२३]शक्यतावच्छेदक–रूपेण लक्ष्यमाणस्य स्वीकारात्'॥ एवमन्येषामपि प्रायेणेदमेव मतम्।

यत्पुनः चूडामणिदीक्षितेन लक्षणमुक्तम् – तस्य तात्पर्यं किमित्येव न ज्ञायते, तथाहि – तात्पर्यविषयीभूतार्थान्वयानुपपत्तितः शक्यभिन्नार्थधीहेतुः व्यापारो लक्षणेत्यन्वयः। लक्षणास्थले यस्य तात्पर्यविषयीभूतत्वं न तस्यान्वयेऽनुपपत्तिः। यस्य चान्वयेऽनुपपत्तिः न तस्य तात्पर्यविषयत्वम्, यथा – गङ्गायां घोष इत्यत्र तीरस्य तात्पर्यविषयत्वं किन्तु न तस्यान्वयेऽनुपपत्तिः। प्रवाहस्यान्वयेऽनुपपत्तिः किन्तु न तस्य तात्पर्यविषयत्वम्। ततश्च तात्पर्यविषय–भूतस्यार्थस्य अन्वयानुपपत्तेर्हेतोः इत्यस्य सङ्गमनं कथम्? तदेवं पूर्वार्धस्य स्फुटैवासङ्गतिः। नन्वत्र तात्पर्यविषयीभूतेति अन्वयस्य विशेषणं नार्थस्य। ततश्च तात्पर्यविषयीभूतस्य अर्थान्वयस्य अनुपपत्तौ यो व्यापारः सा लक्षणेति साङ्गत्यसिद्धिरिति चेत् – अस्तु बाढम्, तथापि पूर्वार्धस्य कथमत्र सार्थक्यम्? तथाहि – पूर्वोदाहरणे तात्पर्यविषयीभूतः सम्बन्ध आधाराधेयभावः। तस्य चानुपपत्तिः घोषप्रवाहयोः सम्भवन्त्यपि नोल्लेखनमर्हति, व्यभिचाराभावात्। नहि स्वत एव सिद्धोऽर्थो वचनं नापेक्षते, व्यर्थत्वात्। किञ्च पक्षेऽस्मिन्नर्थेति अन्वयस्य यद्विशेषणं तन्निरर्थकम्।

ननु भोः! अन्यच्च हृदये कृतम् अन्यच्चाख्यातम्। अधुना तु यथाहृदयगतम् अभिधीयते, श्रूयताम् – तात्पर्यविषयीभूतार्थे अन्वयानुपपत्तिरिति सप्तमीतत्पुरुषः। सप्तमी च विषयार्थिका। ततश्च तात्पर्यविषयीभूतार्थविषये यान्वयानुपपत्तिः इत्यर्थ इति चेत् – अये व्याख्यानचुञ्चो! बाढमभ्युपेयते, किन्तु काकेभ्यो दधि रक्ष्यतामित्यत्र कथमस्य सङ्गतिरिति कृपालुना वक्तव्यम्। तत्र हि दध्युपघातकरूपतात्पर्यविषयीभूतार्थविषये काकरूपमुख्यार्थस्य अन्वये अनुपपत्तिरेव नास्ति। किञ्च विवक्षितेऽस्मिन्नर्थे सामर्थ्याभावात् समासोऽपि

२२. का.प्र. द्वि.उ. का–१०.

२३. रस. द्वि.आ. लक्षणानिरूपणम्।

दुरुपपादः। अन्यच्च, तात्पर्यानुपपत्तेः लक्षणाहेतुत्वे गतोऽस्तमर्क इत्यत्र व्यञ्जनायां कथमतिव्याप्तिः? शक्यभिन्नेति विशेषणात् नञिवसदृशन्यायेन शक्यभिन्नस्य तत्सदृशस्य पदार्थान्तरस्यैव उपस्थितेः। नहि पदार्थविषया काचित् वृत्तिः वाक्यार्थं विषयीकरोति । अथवास्तु, यथाकथञ्चित् अभिमतस्यार्थस्योपपादने कृतेऽपि न तस्य सर्वेषां स्फुटतया प्रतीतिरिति अस्वारस्यमित्यलं विवादेन ॥

तदेवं विचारे प्रकाशकारेण यदुक्तं तदेव लक्षणायाः परिष्कृतं लक्षणमिति विज्ञायते ॥

* लक्ष्यार्थस्य प्रतीतिः कथम्?

तत्र लक्ष्यं शक्यतावच्छेदकरूपेण भातीति प्रकाशकारप्रभृतयः सर्वेऽप्यालङ्कारिकाः। [२४]लक्ष्यतावच्छेदकरूपेणेति नैयायिकाः। उभयरूपेणेति मतं यद्यपि कस्येति न ज्ञायते तथापि [२५]आकरग्रन्थे केचिच्छब्देन केषाञ्चिद् ग्रहणात् सोऽपि पक्षः केषाञ्चित् सम्मत इत्यवगम्यते।

अत्रास्माकमिदं भाति – य एते त्रयः पक्षाः सन्ति तेषु नैयायिकानां पक्षो न साम्प्रतम्, लक्ष्यतावच्छेदकरूपेण भानमित्यङ्गीकारे गङ्गायां घोष इत्यत्र तीरस्य तीरत्वेन रूपेणेति शीतत्वपावनत्वादेः प्रयोजनस्य दुर्घटत्व-प्रसङ्गात्, गङ्गातीरे घोष इत्यतो वैलक्षण्याभावात्। नन्वन्यस्मिन्नर्थे अन्यशब्दस्य प्रयोगात् प्रयोजनस्य सिद्धिरिति चेत् – स्यादेतत्, यदि गङ्गात्वप्रत्यय एव प्रयोजनमिति भाव्यते। कुत एतत्? अन्यस्मिन्नर्थे अन्यशब्दस्य प्रयोगे सोऽर्थः तच्छब्दमुख्यार्थतावच्छेदकविशिष्टतया कथञ्चित् भासेत न तु कदापि तत्समनियतधर्मविशिष्टतया । ननु गङ्गात्वे भासिते समनियतत्वात् शीतत्वपावनत्वादेरपि भासो भविष्यति – एवं हि तत एव हेतोः शुक्लत्व-द्रवीभूतत्वादेरपि धर्मस्य भासः स्यात् । असम्भवादेव न भास इति तु न समाधानम्, वस्तुगत्या शीतत्वपावनत्वादेरपि धर्मस्य गङ्गागतत्वेन तीरादौ भासाभावप्रसङ्गात्। वास्तविकतया भासाभावेऽपि आरोपिततया भासो निर्बाध

२४. न्या.सि.मु. शब्द. खं.　　　२५. रस. द्वि.आ. लक्षणायामतिशयोक्तौ च स्पष्टमेतत्।

इति चेत् – एवं तर्हि शुक्लत्वादिधर्मविषयेऽपि सैव दृष्टिर्दीयताम्।

तृतीयोऽपि पक्षः तथा – तीरत्वप्रतीतौ हेतुभूतस्य तीरपदोपादानस्य इहाभावात्। न च स्वभावादेव प्रतीतिरिति वाच्यम्, स्वभावात् सत्ता प्रतिपाद्येत न तु तस्य प्रतीतिः। किञ्च गङ्गात्वतीरत्वयोः ऐकाधिकरण्यविरोधात् एकस्य प्रतीतौ अन्यस्याप्रतीतिरिति युगपद् द्वयोः प्रतीतिरेव न घटते। तस्मात् शक्यतावच्छेदकरूपेणैव लक्ष्यस्य प्रतीतिरिति स्थाने।

स्थिते चैवम्, रसगङ्गाधरव्याख्याने [२६]चन्द्रिकायां शक्यतावच्छेदकरूपेण लक्ष्यमाणस्य स्वीकारकथा ग्रन्थोक्ता कथं सङ्गतेति तु विचारणीयम्, यतः –

कचतस्त्रस्यति वदनं वदनात्कुचकुड्मलं बिभेति।
मध्याद्बिभेति नयनं नयनादधरः समुद्विजति॥

इत्यत्र क्रमशः कच–वदन–कुच–मध्य–नयन–अधरपदानां राहु–चन्द्र–कमल–सिंह–हरिण–पल्लवरूपार्थेषु लक्षणायां कचत्वादिरूप-शक्यतावच्छेदकरूपेण राह्वादिलक्ष्यमाणार्थस्वीकारे त्रासादेरनुपपत्तिरिति यदुक्तम् – तन्न क्षोदक्षमम्, व्यङ्ग्यरूपकोदाहरणे अस्मिन् लक्षणाकथाया एवाभावात्। अत्र हि नायिका प्रकृतेति तत्सम्बन्धिनां कचादीनां प्रकृतत्वम् राह्वादीनां तु अप्रकृतत्वम्। वाक्यस्य नायिकावर्णनपरत्वात् यथाकथञ्चिदत्र प्रकृतेभ्य एव कचादिभ्यः त्रासादेरुपपादनं कर्तव्यम् न तु अप्रकृतेभ्यो राह्वादिभ्यः। तच्च कथमिति विचारे प्रकृतेषु कचादिषु अप्रकृतानाम् अभेदमङ्गीकृत्य। अभेदश्च वैयञ्जनिक इति स्फुटमेवेतत् व्यङ्ग्यरूपकस्य उदाहरणम्। चन्द्रिकाकारोक्तदिशा लक्षणायाः स्वीकारे 'राहोः चन्द्रः त्रस्यति चन्द्रात् कमलं बिभेति' इत्याद्यर्थस्य सिद्धौ वाक्ये नायिकावर्णनपरत्वं कथं सङ्गस्यते? सर्वमिदं व्यङ्ग्यरूपकस्य [२७]उदाहरणान्तरे परिशीलिते सुव्यक्तं भविष्यति –

जलकेलितरलकरतलमुक्तपुनःपिहितराधिकावदनः।
जगदवतु कोकयूनोर्विघटनसङ्घटनकौतुकी कृष्णः॥

अत्र हि राधिकावदनस्य पिधानापिधानाभ्यां यथाक्रमं सङ्घटनं विघटनं

२६. रस. द्वि.आ. लक्षणानिरूपणम्। २७. उल्लेखः, सा.द. पं.प. का–४.

च यत् प्रतिपादितम् तत्तस्मिन् चन्द्राभेदं स्वीकृत्यैव उपपादनीयम् न तु साक्षाच्चन्द्रात् । अप्रकृतात् तस्मात् तदुपपादने राधिकावर्णनपरस्य वाक्यस्य का सङ्गतिः । एवं [२८]कस्तूरिकातिलकमालि! विधाय सायमित्यादौ जगन्नाथीयपद्येऽपि बोध्यम् । तस्मात् शक्यतावच्छेदकरूपेणैव लक्ष्यस्य प्रतिभास इति युक्तम् ॥

❖❖❖

लक्षणाप्रभेदनिरूपणम्

एतावता लक्षणायाः स्वरूपं विचारितम् इत उत्तरत्र तद्विभजनमधिकृत्य विचार्यते । किन्तु स्वरूप इवात्रापि विप्रतिपत्तिः किञ्चिद्विलोक्यते काव्यविमर्शकेषु ।

* प्राचीनमतानां निरूपणं प्रभेदानां चोदाहरणनिर्देशनम्

तत्र प्रकाशकारादयः निरूढा फलवती चेति प्रथमं द्विधा विभज्य ततः फलवत्यां शुद्धात्वगौणीत्वाभ्यां [१]द्वैविध्यमामनन्ति । ततश्च शुद्धाख्ये प्रभेदे उपादानलक्षणा लक्षणलक्षणा सारोपा साध्यवसाना चेति चातुर्विध्यम् गौणाख्ये तु सारोपा साध्यवसाना चेति द्वैविध्यमुररीकृतम् । तदित्थं लक्षणा सप्तविधेति तेषां समयः ।


जगन्नाथादीनामपि एष एव [२]समयः किन्तु निरूढायामपि शुद्धा गौणी चेति प्रकारद्वयमिति विशेषः । यद्यपि एतत्तेन कण्ठतो नोक्तम् तथापि अनुकूलप्रतिकूलादिकं नीलादिकं चेति द्विविधस्योदाहरणस्य निर्देशात्, प्रभेदाङ्गीकारे बाधकस्यानुपन्यासात्, पर्यन्ते आद्यवर्गे सादृश्यसम्बन्धेन द्वितीयवर्गे च तदितरसम्बन्धेनेत्यादिना स्वाभिप्रेततया विवरणाच्च तत्सम्मतत्वेन सम्भावितम् । विभागश्चायं स्फुटतरप्रतिपत्त्यर्थम् इत्थं निदर्श्यते –

---

२८. कस्तूरिकातिलकमालि! विधाय सायं स्मेरानना सपदि शीलय सौधमौलिम् ।
प्रौढिं भजन्तु कुमुदानि मुदामुदारामुल्लासयन्तु परितो हरितो दिशानि ॥

१. का.प्र. द्वि.उ. लक्षणानिरूपणम् । २. रस. द्वि.आ. लक्षणानिरूपणम् ।

मम्मटादिसम्मतो विभागः



क्रमेणैतेषामुदाहरणानि प्रदर्श्यन्ते –

तत्रादौ निरूढा शुद्धा यथा – नीलो घटः ।

अत्र नीलशब्दस्य नैल्यं मुख्यार्थः । तस्य च निपातातिरिक्तनामपदार्थयोः अभेदातिरिक्तः सम्बन्धोऽव्युत्पन्न इति नियमात् घटेऽभेदेनैवान्वयः स्वीकार्यः परं तु तन्न सम्भवति, धर्मधर्मिभावात् । तस्मात् मुख्यार्थस्य बाध इति नीलशब्दस्य नीलवति प्रवृत्तिः । मुख्यार्थस्य च नैल्यस्य तद्वता घटेन [3]समवायः सम्बन्ध इति लक्षणेयं शुद्धा वृद्धव्यवहारप्रयोज्यत्वाच्च निरूढा। एवं द्विरेफादावपि बोध्यम् ।

सैव गौणी यथा – धर्मस्यायमनुकूलः ।

अत्र हि अनुकूलशब्दस्य तीरानुगत इति मुख्यार्थः । तस्य च प्रवाहादौ अन्वये सम्भवत्यपि न पुरुषादाविति मुख्यार्थस्य बाधात् अनुकूलशब्दस्य पोषके प्रवृत्तिः । मुख्यार्थस्य च तीरानुगतस्य पोषकार्थेन एकमात्रप्रवणत्वप्रयुक्तं [4]सादृश्यं सम्बन्ध इति लक्षणेयं गौणी पूर्वोक्ताच्च हेतोर्निरूढा । एवं प्रतिकूल–

---

३. अवयवावयविनोः जातिव्यक्त्योः गुणगुणिनोः क्रियाक्रियावतोः नित्यद्रव्यविशेषयोश्च यः सम्बन्धः स समवायः ।

४. तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वं सादृश्यमिति नैयायिकाः । तत्र भूयः इति पदमधिकमिति प्रतिभाति, एकस्यापि धर्मस्य सद्भावेऽपि सादृश्यस्य सम्भवात्, यथा – सुन्दरं मुखं चन्द्र इत्यादौ । मीमांसकास्तु साधारणधर्मप्रयोज्यं पदार्थान्तरं तदिति वदन्ति ।

लावण्यादावपि बोध्यम्। तत्र सादृश्ये सम्बन्धे सति लक्षणा गौणी ततोऽतिरिक्ते तु शुद्धेति विवेकः।

फलवती शुद्धोपादानलक्षणा यथा – कुन्ताः प्रविशन्ति।

अत्र कुन्तशब्दस्य कुन्ताभिधानायुधविशेषा इति मुख्यार्थः। तेषां चाचेतनत्वात् प्रवेशनक्रियायां कर्तृत्वेनान्वयो न सम्भवतीति मुख्यार्थबाधात् तच्छब्दस्य तद्धरेषु प्रवृत्तिः। मुख्यार्थस्य च कुन्तानां तद्धरैः संयोगः सम्बन्ध इति लक्षणेयं शुद्धा, कुन्तधराणां प्रवेशनक्रियायामन्वये सम्पन्ने मुख्यार्थस्य कुन्तानामप्यन्वयो भवतीति [५]सोपादाना, कुन्तधरेषु तैक्ष्ण्यादिधर्मस्य प्रत्ययाच्च फलवती। मुख्यार्थस्योपादानं नाम लक्ष्यार्थस्य समभिव्याहृतपदार्थेन अन्वये सिद्धे मुख्यार्थस्यापि तत्सिद्धिः।

सैव लक्षणलक्षणा यथा – गङ्गायां घोषः।

अत्र गङ्गाभिधानः प्रवाहः मुख्यार्थः। तस्य च घोषं प्रति आधारत्वं न सम्भवतीति तच्छब्दस्य तत्तीरे प्रवृत्तिः। मुख्यार्थस्य च तादृशप्रवाहस्य तीरेण संयोगः सम्बन्ध इति लक्षणेयं शुद्धा, गङ्गातीरस्याधेयतासम्बन्धेन घोषेणान्वये सम्पन्नेऽपि न मुख्यार्थस्य तादृशप्रवाहस्येति [६]सलक्षणा, तीरे शीतत्वपावनत्वादिधर्मस्य प्रत्ययाच्च फलवती। [७]लक्षणं नाम ज्ञापनम्। तस्य चात्र ज्ञापके मुख्यार्थे वर्तमानस्य तद्धाने पर्यवसानम्, ज्ञापकस्य ज्ञाप्यगामित्वेनाप्रधानत्वात्। तस्मात् मुख्यार्थस्य लक्षणं नाम लक्ष्यार्थस्य समभिव्याहृतपदार्थेन अन्वये सिद्धे मुख्यार्थस्य तदसिद्धिः।

सैव सारोपा यथा – आयुर्घृतम्।

अत्र आयुर्घृतयोः न्यायसिद्धस्याभेदान्वयस्य बाधितत्वात् आयुश्शब्दस्य घृते प्रवृत्तिः। शक्यतावच्छेदकविशिष्टतया लक्ष्यस्य स्वीकारात् लक्ष्यतावच्छेदकम् इहायुष्ट्वम्। उद्देशविधेययोः [८]ऐक्येऽपि तदवच्छेदकयोः

---

५. मुख्यार्थपरिग्रहसहिता। ६. मुख्यार्थत्यागसहिता।

७. लक्ष दर्शनाङ्कनयोरिति धातोः हलश्च [३.१.१२१] इति भावे ल्युट्।

८. उद्देश्यविधेयभावः अर्थयोः भेदे सत्येव सम्भवति, यथा – मुखं चन्द्र इत्यादौ। इह तु आयुर्घृतमित्यत्र उभाभ्यामपि शब्दाभ्यामेकस्यैवार्थस्य प्रतिपादनात् यद्यपि उद्देश्यविधेयभावो नोपपद्यते तथापि आयुष्ट्वमुद्देश्यतावच्छेदकं विधेयतावच्छेदकं च घृतत्वमिति तयोः भेदात् तत्रापि भेद इति तस्योपपत्तिः।

भेदात् भेद इति घृतम् आयुष्ट्वविशिष्टघृताभिन्नमिति बोधः। मुख्यार्थस्य चायुषः घृतेन कार्यकारणभावः सम्बन्ध इति लक्षणेयं शुद्धा, आयुष्ट्व-विशिष्टघृतस्य समभिव्याहृतेन घृतेनार्थेन अनुपात्तपिबत्यर्थेन वा अन्वये सिद्धेऽपि मुख्यार्थस्य नायुष इति सलक्षणा, स्ववाचकशब्देनोपात्ते घृते आयुषोऽभेदस्य प्रतीत्या [९]सारोपा, अन्यवैलक्षण्येन आयुर्जनकत्वस्य प्रयोजनस्य च प्रत्ययात् फलवती।

सैव साध्यवसाना यथा – आयुः पिबति।

अत्र आयुषः पानकर्मत्वासम्भवात् आयुश्शब्दस्य घृते प्रवृत्तिः। मुख्यार्थस्यायुषः घृतेन पूर्ववत् कार्यकारणभाव इति लक्षणेयं शुद्धा, विषयस्य घृतस्यानिर्देशात् साध्यवसाना, अव्यभिचारेण आयुर्जनकत्वस्य प्रयोजनस्य च प्रत्ययात् फलवती। यद्यप्यत्र प्रकाशकारेण आयुरेवेदम् इति उदाहरणं निर्दिष्टम् किन्तु तत्र इदंशब्देन विषयस्य घृतस्य निर्देशात् साध्यवसानत्वं न सम्भवतीति अन्यदिदमुदाहरणं निर्दिष्टम्। ननु इदमिति आयुषो विशेषणम् न तु विषयसमर्पकमिति स्वीकारे नास्ति बाधकमिति चेत् – न, व्यावर्तनस्यानपेक्षितत्वेन तथा कल्पनस्यानुचितत्वात्, श्रुते च वाक्ये झटिति तच्छब्देन घृतस्यैवोपस्थितेश्च।

सैव गौणी सारोपा यथा – गौर्वाहीकः।

अत्र [१०]वाहीके न्यायप्राप्तस्य गवाभेदस्य बाधितत्वात् गोशब्दस्य वाहीके प्रवृत्तिः। लक्ष्यतावच्छेदकं चात्र गोत्वं पूर्ववत्। उद्देश्यविधेययोरैक्येऽपि अवच्छेदकभेदात् दोषाभावः। वाहीको गोत्वविशिष्टवाहीकाभिन्न इति बोधः। मुख्यार्थस्य गोः लक्ष्येण वाहीकेन सादृश्यं सम्बन्ध इति लक्षणेयं गौणी, स्ववाचकशब्देनोपात्ते वाहीके गवाभेदस्य प्रतीत्या सारोपा, तादूप्यप्रतीतेः प्रयोजनस्य च प्रत्ययात् फलवती। तादूप्यप्रतीतिश्च विषये वाहीकादौ

९. विषयविषयिणोः पृथङ् निर्दिष्टयोरभेद आरोपः, तेन सहिता सारोपा। अपृथक् निर्दिष्टे विषये विषय्यभेदोऽध्यवसानम्, तेन सहिता साध्यवसाना। रस. द्वि.आ. लक्षणानिरूपणम्।

१०. वाहिको वाहीकदेशे भवः, यद्वा, शास्त्रविहिताचारबहिर्भूतः। गुणः साधारणधर्मः। तत आगतेत्यर्थः। यत्र सादृश्यसम्बन्धेन शब्दस्यार्थान्तरे प्रवृत्तिः तत्र गौणी। यत्र पुनः तदितरसम्बन्धेन शब्दस्य प्रवृत्तिः तत्र शुद्धेति विवेकः।


विषयितावच्छेदकसमनियतस्य जाड्यमान्द्यादेः प्रत्ययः ।

सैव साध्यवसाना यथा – गौर्जल्पति ।

अत्र गोः जल्पनक्रिययान्वयो न सम्भवतीति तच्छब्दस्य वाहीके प्रवृत्तिः। पूर्ववत् सादृश्यं सम्बन्ध इति लक्षणेयं गौणी, स्ववाचकशब्देनानुपात्ते विषये गोरभेदस्य प्रतीत्या साध्यवसाना, अत्यन्ताभेदस्य प्रयोजनस्य प्रत्ययाच्च फलवती। प्रकाशकारेण यद्यप्यत्र पूर्ववत् गौरयमिति विलक्षणं किञ्चिदुदाहरणं निर्दिष्टम् तत्तु पूर्वोक्तरीत्या न सङ्गतमिति विभाव्य अन्यदिदमुदाहरणमुपात्तम्।

[11]चूडामणिदीक्षितस्तु जगन्नाथोक्तं विशेषांशं परिगृह्णन्नपि मनाग् अन्यथैव लक्षणाया विभागे प्रवर्तते । तन्मतेन फलवती लक्षणा प्रथममेव उपादानेन लक्षणेन आरोपेण अध्यवसानेन लक्षणोपादानाभ्यां च पञ्चविधा। ततस्तेषु सारोपासाध्यवसानाख्यौ यौ प्रभेदौ तौ प्रत्येकं शुद्धात्वगौणीत्वाभ्यां च द्विविधौ । तदेवं लक्षणा नवविधा । किन्तु सर्वमेतत् तद्ग्रन्थस्थ-कारिकानुरोधेन। वृत्त्यनुरोधेन तु साध्यवसानगौण्यामपि जहल्लक्षणा अजहल्लक्षणा चेति प्रभेदद्वयमिति विशेषः । ततश्च तदनुसारेण लक्षणान्ततो दशविधा । तदेवं निर्देशे स्फुटीभविष्यति –

चूडामणिदीक्षितसम्मतो विभागः



११. का.द. द्वि.उ. लक्षणानिरूपणम् ।

यथाक्रमम् एतेषां सोदाहरणं निरूपणं क्रियते –

* तत्रादौ निरूढा शुद्धा यथा –

पुष्पं धनुर्ज्या द्विरेफः स्मरस्तदपि दिग्जयी ।

अत्र द्वौ रेफौ यस्येति व्युत्पत्त्या द्विरेफशब्दो भ्रमरशब्दे वर्तते । तस्य चात्र बाधितत्वात् तदर्थे लक्षणा । वृद्धव्यवहारपरम्पराप्रयोज्यत्वात् लक्षणेयं निरूढा, स्ववाच्यवाच्यतासम्बन्धमूलकत्वाच्च शुद्धा ।

* सैव गौणी यथा –

लावण्यनिधिरेषैव प्रवीणा युववञ्चने ।

अत्र लवणस्य भाव इति व्युत्पत्त्या [१२]लावण्यशब्दो लवणत्वे वर्तते । तदर्थस्य बाधितत्वात् सुषमाविशेषे लक्षणा । मुख्यार्थस्य च लवणत्वस्य लक्ष्यार्थेन सुषमाविशेषेण हृदयङ्गमत्वधर्मप्रयोज्यं सादृश्यं सम्बन्ध इति लक्षणैषा गौणी, पूर्वोक्ताच्च हेतोर्निरूढा ।

* फलवती जहत्स्वार्था यथा –

साक्षी मुकुन्दकेलीनां यमुनायामयं व्रजः ।

अत्र व्रजाधिकरणत्वासम्भवात् यमुनाशब्दस्य तत्तीरे लक्षणा । यमुनातीरस्य व्रजेन आधेयतासम्बन्धेन अन्वये सिद्धेऽपि मुख्यार्थस्य यमुनाया न तत्सिद्धिरिति लक्षणैषा [१३]जहत्स्वार्था, यमुनागतशीतत्वादिधर्मस्य तत्तीरे प्रयोजनत्वेन प्रत्ययाच्च फलवती ।

* सैव अजहत्स्वार्था यथा –

[१४]वीक्ष्यानुद्रवतः कुन्तान् द्रवन्ति छत्रिणो रणात् ।

अत्र कुन्तानामनुद्रवणक्रियायां कर्मत्वासम्भवात् कुन्तशब्देन कुन्तधरा लक्ष्यन्ते । कुन्तधराणाम् अनुद्रवणक्रिययान्वये सिद्धे कुन्तानामपि तत्सिद्धिरिति लक्षणेयम् अजहत्स्वार्था, कुन्तधरेषु तैक्ष्ण्यादिधर्मस्य प्रत्ययाच्च फलवती ।

---

१२. मुक्ताफलेषु छायायास्तरलत्वमिवान्तरा ।
प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते ॥

१३. या मुख्यार्थं जहाति सा जहल्लक्षणा, जहत्स्वार्थेति नामान्तरम् । या तु न तथा सा अजहल्लक्षणा, अजहत्स्वार्थेति नामान्तरम् । या पुनः एकदेशेन जहाति एकदेशान्तरेण पुनः न जहाति सा जहदजहल्लक्षणा, जहदजहत्स्वार्थेति नामान्तरमिति विशेषः ।

१४. अनुद्रवणम् अनुसरणम् ।

न चात्र कुन्तधरेषु अनुद्रवत्सु कथमचेतनानां कुन्तानामनुद्रवणमिति वाच्यम्, कुन्तसहितानामेव अनुद्रवणात् ।

* सैव जहदजहत्स्वार्था यथा –

पुष्पितं वनमालोक्य पथिकाः पुङ्खिताधयः ।

अत्र वनस्य सामग्र्येण पुष्पितत्वाभावेऽपि वने पुष्पितत्वकथनात् एकदेशेन मुख्यार्थस्योपादानम् एकदेशान्तरेण तु हानमिति लक्षणैषा मुख्यार्थं जहती अजहती च वर्तत इति जहदजहत्स्वार्था, पुष्पभूयस्त्वस्य प्रयोजनस्य प्रत्ययाच्च फलवती ।

* सैव सारोपा शुद्धा गौणी च यथा –

मुखेन्दुर्नयनानन्दः तन्व्या विजयतेतराम् ।

अत्र मुखेन्दुनयनानन्दयोः कार्यकारणभाव इति अभेदान्वयस्यानुपपत्त्या नयनानन्दशब्देन मुखेन्दुः लक्ष्यते । सादृश्येतरसम्बन्धमूलकत्वात् लक्षणेयं शुद्धा, स्ववाचकशब्दोपात्ते मुखेन्दौ नयनानन्दस्य विषयिणोऽभेदो भासत इति सारोपा, नियमेनानन्दजनकत्वस्य प्रयोजनस्य प्रत्ययाच्च फलवती । एवं मुखेन्दुरिति रूपके मुखमेवेन्दुः इत्यभेदान्वयस्य बाधितत्वात् इन्दुशब्देन मुखं लक्ष्यते । मुखम् इन्दुत्वविशिष्टमुखाभिन्नमिति बोधः । सादृश्यसम्बन्ध-मूलकत्वात् लक्षणैषा गौणी, स्वशब्दोपात्ते मुखे विषयिण इन्दोरभेदो भासत इति सारोपा, ताद्रूप्यप्रतीतेः प्रयोजनस्येहापि प्रत्ययाच्च फलवती ।

* सैव साध्यवसाना शुद्धा गौणी च यथा –

सरोजकाहलीरम्भासैकताकाशभूधरैः ।
शङ्खेन्दुतिमरैः सृष्टा वल्ली कामिजनोत्सवः ॥


अत्र [१५]सरोजकाहल्यादिभिः शब्दैः वल्ल्या निर्माणस्यासम्भवात् सरोजादिभिः शब्दैः पादादिकं लक्ष्यते । स्ववाचकशब्देनानुपात्ते पादादौ विषयिणः सरोजादेरभेदो भासत इति लक्षणैषा साध्यवसाना, सादृश्यसम्बन्ध-मूलकत्वात् गौणी, सौन्दर्यादेः प्रयोजनस्य प्रत्ययाच्च फलवती । एवं

१५. काहली वाद्यविशेषः ।

वल्लीत्यत्रापि स्ववाचकशब्देनानुपात्तायां तन्व्यां वल्ल्याः विषयिण्या अभेदस्य भासनात् लक्षणेयं साध्यवसानेति पूर्ववत् बोध्यम् । वल्ली कामिजनोत्सव इत्यत्र तु वल्ल्याः कामिजनोत्सवेन कार्यकारणभावः सम्बन्ध इति लक्षणैषा शुद्धा, स्वशब्दानुपात्तायां तन्व्यां कामिजनोत्सवस्य विषयिणोऽभेदो भासत इति साध्यवसाना, अव्यभिचारेण कार्यकारित्वस्य प्रत्ययाच्च फलवतीति संक्षेपः ॥

[16]दर्पणकारः पुनः अन्यथैव विभागं विधत्ते । तन्मतेन फललक्षणायां यावन्तः प्रभेदाः ते सर्वेऽपि निरूढायामपि सम्भवन्ति । तन्मतेन लक्षणा प्रथमं निरूढा फलवती चेति द्विविधा । ततस्तयोः प्रत्येकं विधापि लक्षणोपादानाभ्यां विभक्ता पुनः आरोपाध्यवसानाभ्यां द्वैविध्यमृच्छन्ती पुनश्च शुद्धात्वगौणीत्वाभ्यां द्विविधतामुपयाति । सोऽयं विभागः स्पष्टप्रतिपत्तये पुनरेवं निदर्श्यते –

दर्पणकारसम्मतो विभागः



---

१६. सा.द. द्वि.प. लक्षणानिरूपणम् ।

क्रमेणैतेषामुदाहरणानि यथा –

१. श्वेतोऽश्वो धावति	२. एतानि तैलानि हेमन्ते सुखानि
३. श्वेतो धावति	४. तैलानि हेमन्ते सुखानि
५. कलिङ्गः पुरुषः साहसिकः	६. राजा गौडेन्द्रं कण्टकं शोधयति
७. पुरुषः साहसिकः	८. गौडेन्द्रं कण्टकं शोधयति
९. कुन्ता एते प्रविशन्ति	१०. राजकुमारा एते गच्छन्ति/छत्रिण एते यान्ति
११. कुन्ताः प्रविशन्ति	१२. राजकुमारा गच्छन्ति/छत्रिणो यान्ति
१३. आयुर्घृतं पिबति/गङ्गायां तीरे घोषः	१४. गौर्वाहीको जल्पति
१५. आयुः पिबति/गङ्गायां घोषः	१६. गौर्जल्पति

श्वेतोऽश्वो धावतीत्यत्र श्वेतवर्णस्याश्वेन अभेदेनान्वयस्य बाधात् श्वेतशब्दस्य श्वेतवति प्रवृत्तिः । वृद्धव्यवहारमूलत्वात् निरूढेयं लक्षणा, श्वेतवतोऽश्वस्य धावनेनान्वये मुख्यार्थस्य श्वेतवर्णस्यापि तेनान्वय इति सोपादाना, विषयस्य अश्वस्य शब्देन निर्देशात्सारोपा, श्वेतवर्णस्य लक्ष्येण श्वेतवता समवायः सम्बन्ध इति सादृश्येतरसम्बन्धमूलकत्वाच्च शुद्धा । अत्र विषयस्याश्वस्य निरासे एषैव साध्यवसाना ।

एतानि तैलानि हेमन्ते सुखानीत्यत्र तिलस्नेहरूपतैलशब्दार्थस्य एतच्छब्द-बोध्येन सर्षपादिस्नेहविशेषेण अभेदेनान्वयस्य बाधात् तैलशब्दस्य स्नेहसामान्ये प्रवृत्तिः । पूर्वोक्तादेव हेतोः निरूढेयं लक्षणा स्नेहसामान्यस्य सुखकरत्वेनान्वये मुख्यार्थस्य तिलस्नेहस्यापि तेनान्वय इति सोपादाना, विषयस्य तिलस्नेहस्य शब्देन निर्देशात् सारोपा, तिलस्नेहस्य सर्षपादिस्नेह-विशेषेण सादृश्यस्य सद्भावाच्च गौणी । अत्र सर्वनामशब्दस्य निरासे साध्यवसाना ।

कलिङ्गः पुरुषः साहसिक इत्यत्र कलिङ्गाख्यजनपदविशेषस्य पुरुषेण अभेदेनान्वयस्य बाधात् कलिङ्गशब्दस्य तन्निवासिनि प्रवृत्तिः । पूर्वोक्तादेव हेतोः निरूढेयं लक्षणा कलिङ्गनिवासिनोऽर्थस्य पुरुषेण साहसिकेन वा अन्वये सिद्धेऽपि न मुख्यार्थस्य कलिङ्गाख्यजनपदविशेषस्य तत्सिद्धिरिति सलक्षणा, विषयस्य पुरुषस्य शब्देन निर्देशात् सारोपा, पुरुषकलिङ्गजनपदयोः

आधाराधेयभावसम्बन्धस्य सद्भावाच्च शुद्धा । अत्र पुरुष इत्यस्य निरासे साध्यवसाना ।

राजा गौडेन्द्रं कण्टकं शोधयतीत्यत्र कण्टकशब्दार्थस्य गौडराजेन अभेदेन अन्वयस्य बाधात् कण्टकशब्दस्य गौडराजे प्रवृत्तिः। यद्यप्यत्र गौडराजस्य द्विः प्रतिपादनात् पौनरुक्त्यम् तथापि पूर्वोक्तरीत्यावच्छदकभेदान्न दोषः। पूर्वोक्तादेव हेतोः निरूढेयं लक्षणा गौडराजस्योन्मूलनेनान्वये सिद्धेऽपि न मुख्यार्थस्य कण्टकस्य तत्सिद्धिरिति सलक्षणा, विषयस्य गौडराजस्य शब्देन निर्देशात्सारोपा, कण्टकगौडराजयोः सादृश्यस्य सद्भावाच्च गौणी। अत्र कण्टकपदस्य निरास एषैव साध्यवसाना ।

राजकुमारा एते गच्छन्तीत्यत्र राजकुमाराणां तद्भिन्नैः सौन्दर्यादिधर्मेण सदृशैः अभेदेनान्वयस्य बाधात् राजकुमारशब्दस्य तत्सदृशपुरुषेषु प्रवृत्तिः। यद्यप्यत्र पूर्ववदर्थयोरैक्यात् पौनरुक्त्यम् तथापि अवच्छेदकभेदात् भेद इति न दोषः । पुरुषेषु सौन्दर्याद्यतिशयस्य प्रत्ययात् प्रयोजनवतीयं लक्षणा सदृशपुरुषाणां गमनक्रिययान्वये सिद्धेऽपि न मुख्यार्थस्य राजकुमाराणां तत्सिद्धिरिति सलक्षणा, विषयभूतानां पुरुषाणां सर्वनाम्ना निर्देशात्सारोपा, पुरुषाणां राजकुमारैः सादृश्यस्य सद्भावाच्च गौणी । अत्र सर्वनाम्नो निरास एषैव साध्यवसाना ।


अत्रायं विशेषः – राजकुमारा गच्छन्तीति प्रयोगः राजकुमारेषु गच्छत्सु यथा सम्भवति तथा राजकुमारतद्भिन्नेषु तद्भिन्नमात्रेष्वपि गच्छत्सु। तत्राद्ये लक्षणा न सम्भवति स्वत एवोपपन्नत्वात् । द्वितीये तृतीये तु सावश्यं सम्भवति, मुख्यार्थस्य अभेदेनान्वयस्य बाधात् । तत्र पुनः द्वितीये सम्बन्धः समूहसमूहिभावः तृतीये तु सादृश्यम् । इह पुनः गौणी प्रकृतेति तृतीयमेव वाक्यं ग्राह्यम् । छत्रिणो यान्तीति प्रयोगस्तु छत्रिषु गच्छत्सु यथा सम्भवति तथा छत्रितद्भिन्नेषु किन्तु न कदापि अछत्रिषु गच्छत्सु, सादृश्यस्यासम्भवात्। एतेन राजकुमारा गच्छन्तीति त्रिषु प्रसङ्गेषु प्रयुज्यते छत्रिणो यान्तीति वाक्यं तु द्वयोरेव प्रसङ्गयोरिति स्पष्टं भवति ।

आयुर्घृतं पिबतीत्यत्र आयुषो घृतेनाभेदेन पानेन वा भेदेनान्वस्य बाधात्

आयुश्शब्दस्य घृते प्रवृत्तिः । पूर्वोक्तदिशावच्छेदकभेदात् न पौनरुक्त्यम्। अव्यभिचारेणायुर्जनकत्वस्य प्रत्ययात् प्रयोजनवती लक्षणेयं घृतस्य पानक्रियायामन्वये सिद्धेऽपि न मुख्यार्थस्यायुषः तत्सिद्धिरिति सलक्षणा, विषयस्य घृतस्य शब्देन निर्देशात् सारोपा, गोवाहीकयोः सादृश्यस्य सद्भावाच्च गौणी । अत्र वाहीकशब्दस्य निरास एषैव साध्यवसानेति दिक् ॥

वृत्तिवार्तिककारेण तु प्रथमं प्राचीनमतानुसारेणैव लक्षणाविभागं सोदाहरणं प्रदर्श्य पश्चात् कतिपयेषु प्रभेदेषु विप्रतिपन्नम् । प्रथमं तत्प्रदर्शितः प्राचीनसम्मतो विभागः प्रदर्श्यते – प्राचीनमतेन हि लक्षणा शुद्धा गौणी चेति द्विविधा । ते द्वे अपि विधे निरूढात्वफलवतीत्वाभ्यां प्रत्येकं द्विविधे । तेषु च चतुर्षु प्रभेदेषु शुद्धफलवती जहल्लक्षणा अजहल्लक्षणा जहदजहल्लक्षणा सारोपा साध्यवसाना चेति पञ्चप्रभेदा । गौणफलवती तु आरोपाध्यवसानाभ्यां द्विप्रभेदेति साकल्येन नवविधा । सेयमित्थं प्रदर्श्यते –

दीक्षितप्रदर्शितः प्राचीनसम्मतो विभागः



यद्यप्यत्र प्राचीनाः लक्षणां प्रथमं निरूढात्वफलवतीत्वाभ्यां विभिद्य ततः प्रत्येकं शुद्धात्वगौणीत्वाभ्यां विभिन्दन्ति जहदजहल्लक्षणां च नाभ्युपयन्तीति विशेषः किन्तु विभाजकोपाध्योः पौर्वापर्यविपर्यये सत्यपि फलकृतविशेषस्य अभावात् नवीनप्रभेदकल्पनेऽपि बाधकाभावात् नास्ति दोष इति मन्तव्यम्। दीक्षितैस्तु मीमांसायामपि कृतश्रमैः पुष्पितं वनमित्युदाहरणे मूख्यार्थस्य

एकदेशेनोपादानम् एकदेशान्तरेण तु हानमिति विशेषस्य सद्भावेन पार्थक्यं प्राचीनानां सम्मतमेव भविष्यतीति विचिन्त्यैवमुक्तमिति भाति।

सम्प्रति एषां प्रभेदानां तन्निर्दिष्टं संक्षेपदृष्ट्या क्वचित् तत्तुल्यं लघुभूतं वा अन्यत्किञ्चित् उदाहरणं प्रदर्श्य पश्चात् क्वचित् तस्य विप्रतिपात्तिरपि निरूप्यते – तत्र शुद्धाया निरूढाया द्विरेफादयः शब्दा उदाहरणानि गौण्यास्तु लावण्यादयः। गङ्गायां घोष इति फलवत्या जहल्लक्षणाया उदाहरणम्, कुन्ताः प्रविशन्तीति अजहल्लक्षणायाः, 'ग्रामो दग्धः' 'पुष्पितं वनम्' इत्यादिकं तु जहदजहल्लक्षणायाः। सारोपाया गौण्या मुखं चन्द्र इत्युदाहरणम् शुद्धायास्तु तन्व्या मुखं नयनानन्द इति यत्र कार्यकरणभावः सम्बन्धः। साध्यवसानाया गौण्या मुखविषये चन्द्रं पश्येति, शुद्धायास्तु देवदत्तादावागच्छति प्रयुक्तम् आनन्द आयातीति वाक्यम्।

* शुद्धसाध्यवसानाया जहल्लक्षणायामेवान्तर्भावः

दीक्षिताः तावत् सर्वानप्येतान् प्रभेदान् नाङ्गीकुर्वन्ति। तेषां कुत्रचित् प्रभेदे विप्रतिवादो वर्तते, यथा – अत्र हि यावन्तः प्रभेदाः प्राचीनैरङ्गीकृताः सन्ति तेषु शुद्धसाध्यवसानेति प्रभेदस्य जहल्लक्षणातो यद्भेदेन परिगणनं तदसाम्प्रतम्, तथाहि – आनन्द आयातीति तदुदाहरणे आनन्दस्यागमनेनान्वयो न सम्भवतीति तद्वाचकशब्दस्य तज्जनके देवदत्तादौ प्रवृत्तिः। लक्ष्यार्थस्य देवदत्तादेरागमनेनान्वये सिद्धेऽपि न मुख्यार्थस्य सिद्धिः। प्रयोजनम् अव्यभिचारेणानन्दजनकत्वम्। गङ्गायां घोष इति जहल्लक्षणायामपि गङ्गाया घोषेणाधिकरणत्वेनान्वयो न सम्भवतीति तद्वाचकशब्दस्य तत्तीरे प्रवृत्तिः। लक्ष्यार्थस्य घोषेणान्वये सिद्धेऽपि न मुख्यार्थस्य सिद्धिः। प्रयोजनं तीरे गङ्गागतशीतत्वादिधर्मवत्त्वम्। स्यान्नाम उभयत्रापि सम्बन्धभेदात् प्रयोजनयोः भेदः तथापि द्वयोः समानत्वस्यैव दर्शनात् कथं तयोः पृथक् पृथक् स्वीकारः? न च कार्यकारणभावे सम्बन्धे शुद्धसाध्यवसाना लक्षणा तदतिरिक्ते तु जहल्लक्षणेति स्वीकारे नास्ति दोष इति वाच्यम्, तत्सम्बन्धमात्रस्य पृथक् करणे बीजाभावात्। किञ्चैवमभ्युपगमे सम्बन्धान्तरमादाय प्रकारान्तरस्यापि

सुवचत्वेन फललक्षणायाः सप्तप्रभेदात्मकत्वमिति कृतपूर्वस्य निर्णयस्य असाधुत्वापत्तिः ।

ननु भोः! एवमपि आनन्द आयातीत्यत्र आनन्ददेवदत्तयोरभेदस्य प्रतीतिः गङ्गायां घोष इत्यत्र तु न सेति वैषम्यं जागर्ति – विषमोऽयमुपन्यासः, प्रकाशकारादिभिः सर्वैः गङ्गायां घोष इति जहल्लक्षणायामपि अभेदप्रतीतेः उररीकरणात्, यदुक्तं प्रकाशकारेण – तटादीनां गङ्गादिशब्दैः प्रतिपादने तत्त्वप्रतिपत्तौ हि प्रतिपिपादयिषितप्रयोजनसम्प्रत्ययः ॥ तस्मात् जहल्लक्षणातो व्यतिरेकेण परिगणनं नितरामयुक्तम् । आनन्दो देवदत्त आयातीति यद्वाक्यम्, यत्र शुद्धसारोपलक्षणा सम्भवति तस्यास्तु न कथञ्चिदपि जहल्लक्षणायाम् अन्तर्भावः, देवदत्तादेः विषयवाचकपदस्य उपादानेन दृढतरस्य वैषम्यस्य जागरूकत्वात् ॥

* मुखं चन्द्र इत्यत्र लक्षणा नास्तीति प्रतिपादनम्

दीक्षितानामन्यत्रापि प्रभेदे विप्रतिवादो वर्तते, तथाहि – मुखं चन्द्र इत्यत्र गौणसारोपलक्षणेति यदुक्तम् – तदपि न, निर्विषयत्वात् । ननु चोक्तम्, मुखं चन्द्र इत्यादिर्विषय इति – सत्यम्, किन्तु तत्र लक्षणाया अङ्गीकारे बाधकमस्ति, तथाहि – अत्र लक्ष्यत्वेन कोऽर्थो निर्णीयते, किं मुखं किंवा चन्द्रसदृशम्? आद्यपक्षे तन्मुखं किं मुखत्वेन प्रतीयते उतस्वित् चन्द्रत्वेनेति पुनर्विकल्पः । नाद्यः, उभाभ्यामपि शब्दाभ्यां समानस्यैवार्थस्य प्रतिपादनमिति पौनरुक्त्यात् । नान्त्यः, लक्ष्यार्थप्रतीतिकाले तत्प्रयोजनीभूतार्थप्रतीतेः अभ्युपगमेन अतितरामनौचित्यात् । ताद्रूप्यप्रतीतिर्हि लक्षणायाः प्रयोजनमिति प्राचीनानां सिद्धान्तः । सा च मुखादौ चन्द्रत्वादेः प्रतीतिः । एतेन असाधारण-धर्मपुरस्कारेण लक्ष्यस्य प्रतीतिरिति निरस्तम् ।

ननु ताद्रूप्यप्रतीतिर्नाम विषये मुखादौ विषयिचन्द्रवृत्तिचन्द्रत्वसमनियतस्य सौन्दर्यादेः धर्मस्य प्रतीतिः । ततश्च तद्धर्मेणैव तस्य प्रतीतिरिति चेत् – मैवम्, स सौन्दर्यादिः किं मुखगतः किं वा चन्द्रगत इति पुनरपि विकल्पावतारात् । न तावदाद्यः, परगतधर्मपुरस्कारेण मुखस्य प्रतिपादने

चन्द्रपदस्य सामर्थ्याभावात् । नापि द्वितीयः, स्वगतधर्मपुरस्कारेण तच्छब्दस्य कथमर्थान्तरे प्रवृत्तिरिति पर्यनुयोगात् । अथ सङ्कटाद् दूरीबुभूषया मुखचन्द्रोभयगत इति तृतीयः पक्षः समाश्रीयते – तर्हि परिहृतो दोषः, किन्तु न सर्वथा सङ्कटान्मुक्तिः । सुन्दरं मुखं चन्द्र इति साधारणधर्मस्योपादाने सौन्दर्यस्य द्विः प्रतिपादनात् पौनरुक्त्यात्, साधु खल्विदमुच्यते – पञ्जरान्मुक्तस्य कपोतस्य बिडालमुखे पतनम् ॥

न चैतादृशे साधारणधर्मोपादानस्थले सर्वत्रापि उपात्तातिरिक्तधर्म-पुरस्कारेणैव शब्दस्य प्रवृत्तिरिति वाच्यम्,

[१७]हाराभिराम! परिणाहि लसत्सिताभ्रं
तापिच्छमेचकमुरःशरदन्तरिक्षम् ।
प्राप्यैव देव! तव कौस्तुभपूर्णचन्द्रः
पूर्णां बिभर्ति पुरुषोत्तम! कान्तिरेखाम् ॥

इत्यादौ उपात्तमेचकत्वाद्यतिरिक्तधर्मस्य सर्वथैव स्फुरणाभावात् लक्षणाया अनाविर्भावप्रसङ्गात् । एवं [१८]सुपर्वालङ्कृतं भाति भारतं नाकमण्डलमित्यादौ व्यासेऽपि बोध्यम् । नन्वाद्ये उरः शरदन्तरिक्षमिवेति उपमित-समासायत्तोपमालङ्कारस्य स्वीकारात् अन्त्ये तु भारतनाकमण्डलयोः वस्तुत्वरूपसाधारणधर्मस्य सत्त्वात् नास्ति बाधकमिति चेत् – नैतत्, मेचकत्वस्य साधारणधर्मस्य उपादानेन उपमितसमासस्य दुरभिधानत्वात् । तत्समासो हि [१९]उपमितं व्याघ्रादिभिः सामान्याप्रयोगे इति साधारण-धर्मस्याप्रयोग एव विधीयते न तु तत्प्रयोगे । भाष्याब्धिः क्वातिगम्भीरः क्वाहं मन्दमतिस्तथेति प्रदीपारम्भे कैयटस्तु रूपकप्रयोजकविशेषण-समासस्यैव विवक्षितत्वेन स्वीकारात् नासङ्गतः । भारतं नाकमण्डलमिति

---

१७. अयमर्थः–हे पुरुषोत्तम! तव वक्षःस्थलं साक्षात् गगनम् । तत्र धवला मेघाः सन्ति इह पुनः मुक्तामणयः । उभयमपि तमालवृक्षवन्नीलम् । एतादृशे वक्षःस्थले तवायं कौस्तुभमणिः परिपूर्णां शोभां धारयन् चन्द्रवद्विराजते ।

१८. सुपर्वभिः देवैरलङ्कृतम्, सुपर्वभिः शोभनैः आदिसभाविराटादिभिः पर्वभिरलङ्कृतम् इत्यर्थः ।

१९. अष्ट. २.१.५६.

व्यासे तु वस्तुत्वरूपधर्मस्य साधारणत्वेऽपि न तस्य रूपकालङ्कारनिष्पादकत्वम्, अचमत्कारित्वात् । एतेन साधारणधर्मापुरस्कारेण लक्ष्यस्य प्रतीतिरित्यपि निरस्तम् । एवं प्रथमपक्षो गलितः ।

नापि चन्द्रसदृशमिति द्वितीयः पक्षः, तथा सति सादृश्यस्य शब्दोपात्तत्वात् उपमालङ्कारापत्तिः । सादृश्यस्य लक्ष्यत्वात् न भवतीति न वक्तुं शक्यम्, कमलसुहृन्मुखमित्यादौ व्यभिचारात् । पृथक्पदेन सादृश्यस्य प्रतीतौ सत्यामेव उपमालङ्कार इति वादोऽपि कमलनयनेत्यादौ दोषोदयान्न ग्राह्यतामुपयाति ।

किञ्च रूपके लक्षणाश्रयणे प्राचीनैरेव कृतस्य व्यवस्थान्तरस्य असाधुत्वापत्तिः । तैः हि पादपङ्कजमिति शब्दे श्रुते 'पादः पङ्कजमिव' इति 'पाद एव पङ्कजम्' इति चोभयथा विग्रहस्य सम्भवादनवधारणे प्राप्ते [२०]'दूरीकरोतु दुरितं मातस्ते पादपङ्कजम्' इत्यादौ पादमात्रान्वयिनो विशेषणस्योपादानसामर्थ्यात् पूर्वपदार्थस्य प्राधान्यं वक्तव्यमिति उपमितसमासः तदधीनश्च उपमालङ्कारः, 'उत्तंसीक्रियते देवैः मातस्ते पादपङ्कजम्' इत्यादौ तु पङ्कजमात्रान्वयिविशेषणोपादानसामर्थ्यात् उत्तरपदार्थस्य प्राधान्यं वक्तव्यमिति [२१]विशेषणसमासः तदायत्तं च रूपकमिति व्यवस्था कृता वर्तते । सा च व्यवस्था उपमानवाचकपदस्य सदृशार्थे लक्षणेति पक्षे नोपपद्यते । लक्षणया हि चन्द्रसदृशो बोधिते तस्य च व्यावर्तकत्वात् विशेषणत्वमिति उभयत्रापि पङ्कजसदृशः पाद इत्येव बोधः सम्पद्यते ।

एतेन दूरीकरोतु दुरितमित्यत्र पङ्कजसदृशः पाद इति बोधे सति विशेष्यत्वात् प्रधाने तत्पादे दुरित-दूरीकारकत्वस्यान्वयात् तत्कृतव्यवस्थाया उपपत्तावपि उत्तंसीक्रियते देवैरित्यत्र तादृश एव पादे देवोत्तंसीकृतत्वस्यानन्वयात् अनुपपत्तिः दुष्परिहरैव । किञ्चैवमङ्गीकारे सर्वत्रापि पूर्वपदार्थस्य प्राधान्यमिति विशेषणसमासस्थले उत्तरपदार्थप्राधान्यमिति कथायाः सर्वसम्मतायाः तिलञ्जलिदानप्रसङ्गः ।

अन्यच्च, उत्तंसीक्रियते देवैरित्यत्र दूरीकरोतु दुरितमित्यत्र च पादपङ्कजम् इत्यस्य समानत्वेऽपि एकत्र प्रयोजनवती लक्षणा अन्यत्र निरूढेति यद्वैषम्यं तन्न प्रज्ञावतां भाषितम्, युक्तेः दुर्वचत्वात् । किञ्च सदृशार्थे लक्षणायां

२०. सौकर्यदृष्ट्या लघुभूतमिदमुदाहरणं कल्पितम् ।
२१. विशेषणं विशेष्येण बहुलम् [अष्ट. २.१.५७.]

'सिंहेन सदृशो नायं किन्तु सिंहो नराधिपः' इत्यत्र सिंहो नराधिप इत्यतः सिंहसदृश इति बोधे यस्मिन् सिंहसादृश्यं निषिद्धं तस्मिन्नेव तस्य पुनर्विधानात् असङ्गतिः वज्रलेपायते ।

अन्यच्च, 'विद्वन्मानसहंसोऽसि विजयस्व नृणां पते!' इति वाक्ये विद्वन्मानसहंसेत्यत्र सदृशलक्षणामूलस्य रूपकस्य निष्पत्तौ सत्यां तत्कुक्षिप्रविष्टं सादृश्यं किंरूपमिति जिज्ञासायां मानसपदे तदुपपादकस्य श्लेषस्य निष्पत्तिः । सत्यां च तन्निष्पत्तौ मानसाख्यसरोवराभिन्नचित्तवासित्व-धर्मेण सादृश्यस्य ज्ञानमिति तद्विशिष्टार्थविषयिका या लक्षणा तन्मूलस्य रूपकस्य निष्पत्तिरिति श्लेषरूपकयोः परस्परापेक्षितत्वात् इतरेतराश्रयत्वम् ।

तस्मात् मुखं चन्द्र इत्यत्र चन्द्राभिन्नं मुखमिति लक्षणां विनैव बोधः स्वीकार्यः । एवं कृते सर्वमुपपद्यते । न च लोक एतदर्थस्यासत्त्वात् तद्बोधक-वाक्यस्यासाधुत्वम्, 'अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हि' इति हरेर्वचनात् । अत एव शशशृङ्गं पश्येति वाक्यस्य साधुत्वम्, अन्यथा बाधितार्थबोधकत्वात् तस्यासङ्गतिरेव स्यात् । न चैवं सति वह्निना सिञ्चतीत्यादेः वाक्यस्य साधुत्वम्, [२२]योग्यताविरहात् । ननु मुखं चन्द्र इत्यत्रापि सा नास्तीति वाच्यम्, वास्तविक्या अभावेऽपि [२३]आहार्यायाः सद्भावात् । वह्निना सिञ्चतीत्यत्र तु चमत्कारस्यैवाभावेन नाहार्ययोग्यतायाः सम्भवः । एतेन चमत्कार आहार्ययोग्यतायाः प्रयोजक इत्युक्तं भवति ।

ननु मुखं चन्द्राद्भिन्नमेवेति तदभाववत्तानिश्चयरूपप्रतिबन्धकस्य सत्त्वात् कथं चन्द्राभिन्नं मुखमिति तद्वत्ताबुद्धिरिति चेत् – उच्यते, [२४]तद्वत्ताबुद्धिकुक्षौ हि अशाब्देति विशेषणं दीयते । एतेनात्र तद्वत्ताबुद्धेरस्याः शाब्दीत्वेन न तदभाववत्तानिश्चयेन प्रतिबन्ध इति मन्तव्यम् । यद्वा, मुखं चन्द्राभिन्नमिति बोध एवाहार्यः स्वीक्रियते । न च तदभाववत्तानिश्चयेन प्रतिबन्धः, तद्वत्ताबुद्धि-कुक्षौ अशाब्दत्वस्येव अनाहार्यत्वस्यापि विशेषणत्वेन निवेशनात् । न

---

२२. पदार्थानां परस्परसम्बन्धे बाधाभावो योग्यता, यदुक्तम्– पदार्थे तत्र तद्वत्ता योग्यता परिकीर्तिता । कारि शब्द. खं. का–८३.

२३. आहार्या प्रतिबन्धकसमकालिकेच्छाजन्या ।

२४. तदभाववत्तानिश्चयः दोषविशेषाजन्यायां अनाहार्यायाम् अप्रामाण्यनिश्चयानालिङ्गितायाम् अशाब्द्यां च तद्वत्ताबुद्धौ प्रतिबन्धकः ।

चानाहार्यत्वेन विशेषणे तेनैवानिष्टवारणात् अशाब्दत्वेन विशेषणं व्यर्थमिति वाच्यम्, शशशृङ्गं पश्येत्यादौ बोधस्योपपादनाय तस्यावश्यकत्वात् । तस्मात् मुखं चन्द्र इत्यादौ रूपके लक्षणा नास्तीत्येव रमणीयम् ।

ननु भोः! रूपके लक्षणाया अनभ्युपगमे कथं तादूप्यप्रत्ययरूपप्रयोजनस्य उपपादनम्? कथं च तादूप्यप्रत्यये सति रूपकम्, अभेदप्रत्यये तु अतिशयोक्तिरिति प्राचीनकृतविभागस्य समर्थनम्? – मैवम्, रूपके तादूप्य-प्रत्ययस्याप्रामाणिकत्वात् तद्विनापि तस्य स्वीकारात्, तथाहि –

[२५]ऊर्ध्वं विरिञ्चिभवनात्तव नाभिपद्माद्रोमावलीपदजुषः तमसः परस्तात् ।
मुक्तौघमण्डितमुरःस्थलमुन्मयूखं पश्यामि देव! परमं पदमेव साक्षात् ॥

इति पद्ये तवोरःस्थलं साक्षात् परमं पदमेवेति रूपके साक्षाद्–एवशब्दाभ्यां साक्षादभेदस्यैव प्रतिपादनात् । नहि साक्षादभेदे सिद्धे तदधीनसिद्धिकया तादूप्यप्रतीत्या कोऽपि पुरुषार्थः । तदभेदस्तु क्वचिच्छब्देन सिध्यति क्वचित्संसर्गमर्यादयेति तु विषयान्तरम् । एवम् अतिशयोक्तौ अभेदप्रत्ययस्यापि अप्रामाणिकत्वम्, तथाहि –

[२६]हृत्पङ्कजानि भजतां प्रतिबोधयन्ती संसारसागरमपि प्रविशोषयन्ती ।
ज्योत्स्ना त्वदङ्घ्रिनखचन्द्रसमुद्धतेयमन्यादृशीमभयद! प्रकृतिं बिभर्ति ॥

इत्यादौ जोत्स्नाया नखकान्तिरूपविषयस्य निगरणात् अतिशयोक्तौ स्थितायामपि ज्योत्स्नागतस्य हृपङ्कजविकासकत्वादिविलक्षणकार्यकारित्वस्य तदभिन्नत्वेनाध्यवसितायां नखकान्तावपि प्रतीतिरिति तादूप्यस्यैव प्रतीतेः । नह्यत्राभेदः सेद्धुं शक्नोति, विलक्षणकार्यकारित्वस्य वर्णनात् । तदेवम् उभयतो [२७]व्यभिचार इति विभागोऽयं नादर्तव्यः किन्तु विषयविषयिणोः सामानाधिकरण्ये रूपकम् विषयमात्रनिर्देशेऽतिशयोक्तिरिति ।

---

२५. हे विष्णो! तव नाभिप्रदेशे समुत्पन्नं पद्ममेव ब्रह्मणो लोकः । तत ऊर्ध्वं रोमावलीरूपं तमो दृश्यते । ततः परं मुक्तानिकरैः उन्मुखकिरणं यत्तव वक्षस्थलमस्ति तदेव साक्षात् परमं पदमित्यहं भावयामि ।

२६. अयमर्थः – हे भक्तरक्षक! त्वत्पादनखकान्तिः ज्योत्स्नात्वेनाध्यवसिता विलक्षणमेव स्वभावं बिभर्ति यस्मादियं त्वदुपासकानां हृदयरूपाणि कमलानि विकासयति,संसाररूपं सागरं शोषयति ।


२७. विनाभावः ।

इत्थं मुखं चन्द्र इत्यादौ नास्ति लक्षणाया गन्धोऽपीति गौणसारोपलक्षणाया निर्विषयत्वं स्थितमेवेति तत्प्रभेदस्य स्वीकारः सुतरां न युज्यते ।

एतावदभिधाय पर्यन्ते – 'तस्मादेतादृशस्थले समभिव्याहारादभेद-प्रतीत्युपगमे न कश्चिद् दोष इति व्यर्थो लक्षणोपपादनप्रयासः । न चैवं सर्वत्र विषयविषयिसामानाधिकरण्यस्थले समभिव्याहारात् अभेदप्रतीतेर्वक्तुं शक्यत्वात् क्वचिदपि सारोपा लक्षणा न स्यादिति वाच्यम् – इष्टापत्तेः' इति तैरभिहितम् ॥

यद्यप्यत्र मुखं चन्द्र इत्यादौ गौणसारोपलक्षणाया निराकरणं प्रक्रान्तमिति हेतोः अत्र स्थितेन सारोपलक्षणापदेन तत्प्रभेदमात्रस्य ग्रहणमुचितमिति भाति तथापि तदीयवाक्ये सर्वत्रेति क्वचिदपीति च शब्दस्य प्रयोगस्वारस्यात्, विषयविषयिसामानाधिकरण्यबलेन अभेदप्रतीत्युपपादनस्य शक्यत्वेन कथनाच्च कृत्स्नायाः सारोपलक्षणाया ग्रहणमेव तेषामभिमतमिति विज्ञायते । एवञ्चैतन्मतेन शुद्धसाध्यवसानायाः सारोपायाश्च विगलनेऽयं विभागस्तावत् सिध्यति –

दीक्षितसम्मतो विभागः



उदाहरणं च सर्वथा विशदीकृतचरमिति न पुनः विशदीक्रियते ।

* मुखं चन्द्र इत्यत्र जगन्नाथस्याक्षेपः तथा तत्समाधानम्

[२८]जगन्नाथस्तु अत्र विप्रतिपद्यते, तथाहि – मुखं चन्द्र इत्यादौ वाच्ययोरेव

२८. रस. द्वि.आ. लक्षणाप्रकरणम् ।

द्वयोरर्थयोः अन्वयबोध इति यदि लक्षणा नाभ्युपेयते तर्हि सर्वेषामर्थानां सर्वैरप्यर्थैः आहार्याभेदबोधसम्भवात् सर्वत्रापि रूपकालङ्कारः प्रसज्येत। न चेष्टापत्तिरिति शक्यं वक्तुम्, सुपर्वालङ्कृतमिति सादृश्यसमर्पकपदस्य श्रवणे हि भारतं नाकमण्डलमित्यत्र रूपकम् अन्यथा तु नैवेत्यनुभवबलात् रूपककुक्षौ सादृश्यस्य अपरिहार्यत्वमित्यवगम्यते। मुखं चन्द्र इत्यादौ तु सौन्दर्यादेः धर्मस्य प्रसिद्धत्वात् तद्वाचकपदस्याप्रयोगेऽपि रूपकस्य निष्पत्तिः भवति। नह्येतावता सादृश्यमन्तरेणापि रूपकस्य निष्पत्तिर्भवतीति मन्तव्यम्। यत्रापि प्रयोगः तत्र रूपके धर्मान्तरकृतसादृश्यस्य वारणायैव तत्प्रयोगः न तु साधारणधर्मसमर्पणायेति नासङ्गतिः। एवं यथाकथञ्चित् साधारणधर्मस्य तत्प्रयोज्यसादृश्यस्य वा ज्ञाने सत्येव रूपकस्य सिद्धिरिति तज्ज्ञानार्थं सदृशार्थे लक्षणाकल्पनम् अवश्यमेष्टव्यम्।

न च सदृशार्थे लक्षणाकल्पने 'उत्तंसीक्रियते देवैर्मातस्ते पादपङ्कजम्' इत्यत्र रूपके प्राचीनकृतव्यवस्थायाः अनुपपत्तिः, पङ्कजशब्दलक्षितस्य पङ्कज-सदृशस्य व्यञ्जनया पङ्कजत्ववत्त्वेन अवगम्यमानस्य उत्तरपदार्थत्वात् प्राधान्यमिति पादाभिन्नः पङ्कजत्ववान् पङ्कजसदृश इति बोधस्य समुन्मेषात्। नहि पङ्कजसदृशे पङ्कजत्ववत्त्वेन गम्यमाने देवैरुत्तंसीकृतत्वस्य असङ्गतिः सम्भवति।

यत्पुनः 'सिंहेन सदृशो नायं किन्तु सिंहो नराधिप' इत्यत्र निषिद्धस्य सिंहसादृश्यस्यैव पुनर्विधानादसङ्गतिरित्युक्तम् – तदपि न, भेदघटितस्य सादृश्यस्य निषेधात् अभेदघटितस्य च विधानात्। भेदकरम्बितं हि सादृश्यम् उपमाजीवातुभूतम् अभेदकरम्बितं तु रूपकस्येति तावत् प्राचीनानां सिद्धान्तः।

यत्खल्वपि विद्वन्मानसहंसोऽसीत्यत्र निष्पत्तौ श्लेषरूपकयोः परस्परम् अपेक्षितत्वात् इतरेतराश्रयत्वम् इत्याशङ्कितम् – तदपि विचारवतां न ग्राह्यम्, सर्वेषामर्थानां कल्पितत्वात् कल्पितेषु चार्थेषु पौर्वापर्यरूपक्रमस्यासद्भावात्। अत एव पश्चान्निर्मेयस्य गोपुरादेः पूर्वमेव कल्पनं पूर्वं निर्मेयस्य भूमिकादेः पश्चात् कल्पनं शिल्पिभिः क्वचित् क्रियमाणं सङ्गच्छते। तस्मात् सदृशार्थे लक्षणेति कल्पनं निरवद्यम्॥

नागेशोऽपि वाच्ययोरेवार्थयोः अभेदान्वय इति लक्षणा नावश्यकीति दीक्षितानां मतं समर्थयमान आचष्टे – [२९]मास्तु लक्षणा, नामार्थयोश्चाभेदान्वय एवास्तु । न च बाधज्ञानं प्रतिबन्धकम्, सादृश्यज्ञानरूपदोषस्य उत्तेजकत्वात्। एतज्ज्ञानं च प्रसिद्धसादृश्यकस्थले साधारणधर्मानुपादाने एकसम्बन्धिज्ञानात् अपरसम्बन्धिस्मरणन्यायेन । साधारणधर्मस्मृतौ दोषविशेषसहकारेण शब्दादभेदप्रत्ययः । शङ्खे पीतत्वाभावनिश्चये [३०]काचकामलादिदोषेण तत्पीतत्वप्रत्यक्षवत् । रूपके आहार्यबुद्धिरिति प्राचीनव्यवहारे बाधबुद्धि-कालिकत्वमात्रे आहार्यपदं लाक्षणिकम् । इवशब्दसमभिव्याहारे तु तेन भेदगर्भसादृश्यस्यैव उपस्थापनात् नाभेदप्रतीतिरिति मम प्रतिभाति ॥

अस्यार्थस्तावदेवं विशदीक्रियते – मुखं चन्द्र इत्यत्र मुखं चन्द्राभेदाभाववत् इति तदभाववत्तानिश्चयरूपे प्रतिबन्धकज्ञाने सति कथं तस्मात् वाक्यात् मुखं चन्द्राभेदवदिति अभेदविषयको बोधः सम्भवतीति प्रश्ने सादृश्यज्ञान-रूपोत्तेजकवशात् इत्युत्तरम् । ततश्च तादृशनिश्चयरूपे प्रतिबन्धके सत्यपि सादृश्यरूपस्य उत्तेजकस्य सन्निधानात् मुखं चन्द्राभेदवदिति बोध इति न काप्यसङ्गतिरिति तदाशयः । एवञ्चात्र कारणं वाक्यम्, अभेदविषयकबोधः कार्यम्, तदभावविषयकनिश्चयः प्रतिबन्धकः, सादृश्यज्ञानं [३१]चोत्तेजकमिति तदाकूतम् । तत्र पुनः सादृश्यज्ञानमिति यदस्त्युत्तेजकं तद्दोषरूपम्, मिथ्याज्ञान-जनकत्वादिति विशेषः । अत एव लोके गुणत्वेन परिगणितस्यापि चाकचिक्यस्य शुक्तौ रजतज्ञानजनकत्वात् दोषत्वमुच्यमानं सङ्गच्छते ।

न चात्र मुखं चन्द्र इति वाक्ये साधारणधर्मवाचकपदाभावात् सादृश्य-ज्ञानस्यैवाभाव इति कथं तादृशो बोध इति वाच्यम्, वाचकपदाभावेऽपि एकसम्बन्धिज्ञानम् अपरसम्बन्धिस्मारकमिति न्यायात् मुखचन्द्ररूपैक-सम्बन्धिज्ञाने सति सादृश्यरूपापरसम्बन्धिनो ज्ञानस्य सम्भवाद्दोषाभावात्। ततश्च शङ्खः पीतत्वाभाववान् इति प्रतिबन्धकज्ञाने सत्यपि काचकामलादि-दोषवशात् यथा शङ्खः पीतत्ववान् इति प्रात्यक्षिकं ज्ञानम् एवमिहापि मुखं

२९. मर्मप्र. लक्षणानिरूपणम् । ३०. काचकामलः पैत्तिको रोगः ।
३१. प्रतिबन्धकसमकाले कार्यजनकम् उत्तेजकम् ।

चन्द्राभेदाभाववदिति तादृशज्ञाने सत्यपि सादृश्यज्ञानरूपदोषवशात् मुखं चन्द्राभेदवदिति शाब्दं ज्ञानमिति तदभिप्रायः। नन्वेवं तादृशदोषवशादेव एतादृशाभेदज्ञानस्य साधने तस्यानाहार्यत्वात् रूपकेऽभेदबुद्धिः आहार्येति प्राचीनानां प्रवादस्य का गतिरिति चेत् – आहार्यपदस्य प्रतिबन्धक-समकालिकार्थे लाक्षणिकत्वमिति गृह्यताम् । न चैवं सत्यपि प्रतिबन्धके सादृश्यज्ञानरूपदोषवशादेव यदि अभेदबोधः तर्हि मुखं चन्द्र इवेत्यतो वाक्यादपि तादृशाभेदबोधो जायेतेति वाच्यम्, सादृश्यस्य भेदगर्भत्वात् दोषाभावादिति ॥

वस्तुतस्तु सादृश्यज्ञाने दोषत्वोत्तेजकत्वयोः अन्यतरस्य कल्पनेनैव अभीष्टसिद्धौ कुतः तद्द्वयस्यापि कल्पनमिति चिन्त्यमेतत्, तथाहि – यदि सादृश्यज्ञानस्य दोषत्वं कल्प्यते तर्हि मुखं चन्द्र इति वाक्यात् तादृश-प्रतिबन्धकज्ञाने सत्यपि मुखं चन्द्राभेदवदिति तद्वत्ताबुद्धिः सम्भवति, कथम्? तस्या दोषविशेषाजन्यत्वेन विशेषितत्वात् । अथ उत्तेजकत्वं कल्प्यते तदापि तस्माद्वाक्यात् तादृशो बोधः सम्भतति । कथम्? उत्तेजकस्य सत्त्वात् । अन्यत्खल्वपि, एकसम्बन्धिज्ञानमपरेति न्यायस्यान्वयोऽपि अत्र न भवति, सम्बन्धिशब्देन तुल्यस्यैव ग्रहणमिति सादृश्यस्य गृहीतुमशक्यत्वात् । तस्मादुभयोरपि कल्पनम् अश्रद्धेयम् ।

तत्र पुनः सूक्ष्मतया विचारे क्रियमाणे मुखं चन्द्राभिन्नमिति बुद्धिः कवेः सादृश्यज्ञानात् सहृदयानां तु तादृशकविप्रयुक्तवाक्यादिति विशेषो विज्ञायते। स्थिते चैवम्, अभेदज्ञानस्य आहार्यात्मकत्वेनैव सिद्धौ का कथा सादृश्यज्ञाने दोषत्वकल्पनस्य का च कथा पुनः उत्तेजकत्वकल्पनस्य? तदसङ्गतमेवेदं सर्वमिति बोध्यम् ।

एतेन रसगङ्गाधरव्याख्याने [३२]चन्द्रिकायां सादृश्यज्ञानस्य दोषता न क्वापि प्रसिद्धा । किञ्च अभेदज्ञाने सादृश्यज्ञानस्योत्तेजकत्वमपि असमञ्जसमिव प्रतीयते, भेदगर्भत्वे सादृश्यस्य अभेदविरोधित्वात् । तदगर्भत्वे पुनः तेनैव कृतार्थतायां अभेदबोधस्य मुधात्वापत्तेः सदृशलक्षणाकल्पनापेक्षया

३२. रस. द्विआ. लक्षणानिरूपणम् ।

सादृश्यस्योत्तेजकत्वकल्पने लाघवमपि नास्त्येवेति यदुक्तम् – तदेतत्सर्वं तदुक्तमनाकलय्यैव निबद्धम्, सादृश्यज्ञाने दोषत्वस्योपपादनात्, संसर्गमर्यादया भासमानस्याभेदस्य तदभाववत्तानिश्चयेन प्रतिबन्धे सति तादृशाभेदस्य प्रतीतिः सादृश्यज्ञानादेवेति उत्तेजकत्वलक्षणस्य सङ्गमयितुं शक्यत्वात्, सादृश्यस्य अभेदगर्भत्वादेव तद्विषयकबोधस्य उपपादनीयत्वात्, अविद्यमानेऽर्थे लक्षणा-कल्पनापेक्षया विद्यमान एवार्थे उत्तेजकत्वकल्पने लाघवाच्चेति बोध्यम्।

तदेवं मुखं चन्द्राभेदाभाववदिति तदभाववत्तानिश्चयेन प्रतिबन्धे प्रसक्ते आहार्यात्मकत्वाङ्गीकारद्वारा तस्या उपपादनं कर्तव्यमिति दीक्षिताः, तादृशनिश्चयेन प्रतिबन्धे जाते सादृश्यज्ञानरूपदोषस्य उत्तेजकत्वाङ्गीकारद्वारा तस्या उपपादनमिति नागेश इत्यनयोरुभयोः मतयोः वैलक्षण्यम् ।

एवमत्र विभागविषये नैकविधं मतम् ।

* किं मतं तावदत्र ग्राह्यम्?

अत्र विचार्यते – तत्र तावत् यदुक्तं प्रकाशकारेण, फलवत्यां शुद्धायाम् उपादानलक्षणा लक्षणलक्षणा सारोपा साध्यवसाना चेति प्रभेदचतुष्टयमिति – तन्न चतुरस्रम्, प्रभेदेषु असङ्कीर्णत्वस्यानुपलम्भात्, तथाहि – उपादानलक्षणायाः कुन्ताः प्रविशन्तीतिवत् कुन्ताः पुरुषाः प्रविशन्तीति, लक्षणलक्षणाया गङ्गायां घोष इतिवत् गङ्गायां तीरे घोष इति निर्दिष्टविषयमपि उदाहरणं दृश्यते यत्र स्वतन्त्रत्वेन परिगणितावपि सारोपासाध्यवसानाख्यौ प्रभेदौ सम्भवतः । एवं गौण्यां सारोपा साध्यवसाना चेति प्रभेदद्वयमुररीकृत्य गौर्वाहीको जल्पति, गौर्जल्पतीति वाक्यद्वयं यदुदाहृतम् तत्र यथा वाहीकस्य जल्पनेनान्वये गोरूपार्थस्य तेनान्वयाभावात् मुख्यार्थस्य हानमिति लक्षणलक्षणा सम्भवति तथा राजकुमारेषु तद्भिन्नेषु च गच्छत्सु प्रयुक्ते राजकुमारा एते गच्छन्तीति वाक्ये राजकुमारशब्दात् लक्षणयोपस्थितानां तत्सदृशानां गमनेनान्वये राजकुमाराणामपि तेनान्वयात् मुख्यार्थस्योपादानमिति उपादानलक्षणापि सम्भवति । तस्मादेतेषां चतुर्णां न स्वतन्त्रत्वेन परिगणनं किन्तु आद्याभ्यामन्त्ययोः व्याप्यतया । एवमत्र व्याप्यव्यापकभावस्य सद्भावेऽपि तमविमृश्य स्वातन्त्र्येण परिगणनमेव महान् दोषः ।

यत्पुनः जगन्नाथेन विभजनं कृतम् – तदपि पूर्वोक्तदोषेणाक्रान्तत्वात् न श्रद्धेयतामर्हति । अन्यत्खल्वपि, निरूढायां विशेषतः शुद्धा गौणी चेति यत्प्रभेदद्वयमङ्गीकृतम् – तदयुक्तमिति न ब्रूमः किन्तु श्वेतो धावतीत्यादौ लक्ष्यार्थस्य श्वेतवदादेः समभिव्याहृतधावनादिपदार्थेनान्वये मुख्यार्थस्य श्वेतादेरप्यन्वयो भवतीति यथा मुख्यार्थस्योपादानं सम्भवति तथा धर्मस्य अयमनुकूल इत्यादौ लक्ष्यार्थस्य पोषकादेः समभिव्याहृतार्थेनान्वये न मुख्यार्थस्य कूलानुगतादेरिति मुख्यार्थस्य हानमपि सम्भवतीति हानोपादानाभ्यां निरूढाया भेदनमवश्यं कर्तव्यं कुतो न क्रियत इति पृच्छ्यते केवलम् । यद्यप्यकरणे न कस्यापि आक्षेपः तथापि तत्तुल्येऽन्यस्मिन् तत् कृत्वा अन्यस्मिन्नकरणेन अवश्यमाक्षेपो भवितुमर्हतीत्ययं प्रश्नः । एवं श्वेतो धावतीतिवत् श्वेतोऽश्वो धावतीति, धर्मस्यायमनुकूल इतिवत् धर्मस्यायमनुकूलः पुरुष इति विषयस्योपादानानुपादाने अपि सम्भवत इति हानोपादानाभ्यां कृतभेदाया लक्षणायाः पुनः आरोपाध्यवसानाभ्यामपि भेदनं कर्तव्यम् । अकरणं तु दोषाय ।

यदपि पुनः चूडामणिदीक्षितेन कृतम् – तत्र प्राक् कृताः सर्वेऽपि आक्षेपाः प्रायेण सम्भवन्ति । अन्यच्चेदम्, पूर्वं जहत्स्वार्था अजहत्स्वार्था चेति द्वौ प्रभेदौ स्वतन्त्रत्वेनाङ्गीकृत्य पश्चात् तत्समकक्ष्यायां साध्यवसानायां पुनः तयोरेव यदङ्गीकारः, यदपि साध्यवसानगौण्यां सम्भवतो भेदनस्य तत्तुल्ययां साध्यवसानशुद्धायामनङ्गीकारः तदुभयमपि विभागस्याव्यवस्थिततत्वम् आवेदयति । एतावता वृत्तिवार्तिककारसम्मतो विभागः प्रायेण प्रत्याख्यात इति न पुनः प्रत्याख्यातव्यतामर्हति । तदेवं प्राचीनमतानां परिशीलने कृते सति तत्सम्मतत्वेन यो विभागः सिध्यति स दर्पणकारकृतात् विभागात् विभिन्नरूपतां न याति ।

उदाहरणानि तान्येवेति न पुनर्विवरणे प्रवृत्यते ।

* कस्तावदत्र सिद्धान्तो भवितुमर्हति?

अन्यच्चेदम्, मुखं चन्द्र इत्यत्र विचारं कुर्वता वृत्तिवार्तिककारेण लक्षणायां सारोपेति प्रभेद एव न सम्भवतीति यदुपसंहृतं तत्साम्प्रतमित्यस्माकं प्रतिभाति ।

न च तज्जगन्नाथेन निराकृतमिति वाच्यम्, निराकरणस्यासङ्गतत्वात्, दोषान्तरस्य अनिराकरणात्, आक्षेपान्तरस्य सम्भवाच्च, तथाहि – उत्तंसीक्रियते देवैः मातस्ते पादपङ्कजमित्यत्र पङ्कजशब्देन लक्ष्यमाणस्य पङ्कजसदृशस्य उत्तरपदार्थप्राधान्यसिद्धान्ते जाग्रत्यपि व्यावर्तकत्वात् विशेषणत्वमिति पङ्कजत्ववान् यः पङ्कजसदृशः तदभिन्नः पाद इत्येव बोधेन भवितव्यम् न तु पादाभिन्नः पङ्कजत्ववत्पङ्कजसदृश इति तदुक्ताकारकेण। नहि शूरो बालक इति वाक्यात् कथञ्चिदपि बालकाभिन्नः शूर इति बोधः सम्भवति। किञ्च राजनारायणं लक्ष्मीस्त्वामालिङ्गति निर्भरमित्यत्र भवदुक्ते वाक्ये राजाभिन्नो नारायणत्ववान् नारायणसदृश इति बोधे त्वामिति युष्मदर्थस्य राजनारायणे विशेष्यत्वेन विवक्षितस्यान्यस्मिन्नेव राजनारायणसदृशे तत्त्वापत्तिरिति अस्वारस्यम्।

यच्च पङ्कजसदृशस्य पङ्कजत्वेनैव प्रत्ययात् देवोत्तंसीकृतत्वस्य सङ्गतिः इत्यभिप्रेतम् – तदपि न युक्तम्, पङ्कजत्वस्य पश्चात् व्यञ्जनया प्रतीतिरिति पूर्वं लाक्षणिकार्थबोधकाले कथं सामञ्जस्यमिति प्रश्नोदयात्। नहि पङ्कजत्वं पश्चाद्भावीति देवाः तत्पङ्कजसदृशं पूर्वमेवोत्तंसयितुं त्वरन्ते। एवं राजनारायणम् इत्यत्रापि पश्चात् नारायणत्वं भविष्यतीति पूर्वमेव साध्वीधुरीणा लक्ष्मीः नारावणसदृशं यं कञ्चित् पुमांसम् आलिङ्गितुमुत्सहत इत्यस्वारस्यं बोध्यम्।

अन्यच्च, व्यामिश्रं भोः! भवतो वचनम्। कथम्? श्रूयताम्, तादूप्यप्रतीतिः प्रयोजनमिति वदता भवता तादूप्यपदेन किं विवक्ष्यते किं शक्यतावच्छेदकं पङ्कजत्वम् किंवा साधारणधर्मभूतं सुन्दरत्वादिकम्? नाद्यः, लक्षणा-निरूपणावसरे प्रयोजनस्योपपादनाय लक्ष्यमाणस्य शक्यतावच्छेदकविशिष्टतया प्रतीतिरिति स्वयमेवाभ्युपगमात्। नहि लक्ष्यसमकाले प्रत्येयोऽर्थः लक्षणायाः प्रयोजनं भवितुं शक्नोति, व्याहतत्वात्। नापि द्वितीयः, सदृशलक्षणावादिभिः प्राचीनैः तादूप्यप्रतीतिरित्यस्य विषयतावच्छेदकस्य प्रतीतिरिति निर्वचनेन तत्सिद्धान्तविरोधप्रसङ्गात्, सुन्दरं मुखं चन्द्र इत्यादौ प्रयोजनस्य सौन्दर्यादेः धर्मस्य लक्षणातः प्रागेव प्रत्ययाच्च। नहि प्रवृत्तेः प्रागेव प्रयोजनं सिध्यति। न च यत्र साधारणधर्मस्योपादानं तादृशस्थले उपात्तातिरिक्तधर्मस्यैव ग्रहणमिति

वाच्यम्, तथा सङ्कोचे मानाभावात्, सुपर्वालङ्कृतं भाति भारतं नाकमण्डलम् इत्यादौ धर्मान्तरस्य सर्वथैवास्फुरणाच्च ।

अन्यत्खल्वपि, मुखं चन्द्रः, आयुर्घृतमित्यादौ लक्षणा लक्षणेत्येककण्ठं घुष्यते, तत्र लक्ष्यार्थः कः? – यद्यप्यत्र उत्तरत्वेन प्राचीनानां त्रीणि मतानि जागरति । प्रथमं तद्विशदीक्रियते विस्तरेण, तथाहि– मुखं चन्द्र इत्यादौ उपमान–वाचकपदस्य तत्सदृशे लक्षणा । तादृप्यप्रतीतिः प्रयोजनम् । सा चोपमेये मुखादौ चन्द्रत्वादेः उपमानातावच्छेदकस्य प्रत्ययः । स च व्यञ्जनानिघ्नः । न च सदृशार्थे लक्षणायां मुखं चन्द्रसदृशमित्यतो वैलक्षण्याभावात् तत्रेव अत्रापि रूपकापत्तिः अत्रेव वा तत्रापि उपमापत्तिरिति वाच्यम्, बोधयोः वैलक्षण्याभावेऽपि लक्षणाफलीभूततादृप्यप्रतीतेः सत्त्वासत्त्वाभ्यां वैलक्षण्यस्य जागरूकत्वादिति केचित् ।

एवञ्चैतन्मतेन मुखं चन्द्रसदृशमिति प्रथमं बोधः । ततो व्यञ्जनया चन्द्रसदृशे चन्द्रत्वस्य बोधः । ततश्च चन्द्रत्वविशिष्टं यच्चन्द्रसदृशं तदभिन्नं मुखमिति मानसिको बोधः योऽयं समुदितार्थविषयकः ।

अन्ये तु मुखं चन्द्र इत्यादौ उपमानवाचकचन्द्रादिपदात् चन्द्रसदृशत्वेन मुखादेरुपस्थितिः । अन्वयबोधस्तु चन्द्रत्वेन । कुत एतत्? उच्यते, तथा सत्येव तत्समनियतसौन्दर्यादिधर्मस्य प्रयोजनत्वेनोपपादनं सुकरं भविष्यति, अन्यथा चन्द्रसदृशत्वेन उपस्थितिरिति अभिमतस्यैतत्प्रयोजनस्यासिद्धिप्रसङ्गः। न चैवं यादृशी उपस्थितिः तादृशो बोध इति तयोः समानाकारकत्वनियमस्य भङ्गप्रसङ्ग इति वाच्यम्, लाक्षणिकातिरिक्तस्थल एव तत्स्वीकारात् । यद्यपि मुखरूपार्थस्य द्विः प्रतिपादनं तथापि अवच्छेदकभेदाद्भेद इति न पौनरुक्त्यम् ।

एवञ्चैतन्मतेन चन्द्रत्वविशिष्टं यन्मुखं तदभिन्नं मुखमिति प्रथमं बोधः । ततो व्यञ्जनया लक्ष्ये मुखे चन्द्रत्वसमनियतसौन्दर्यादिधर्मस्य बोधः । ततश्च तादृशधर्मविशिष्टं यन्मुखं तदभिन्नं मुखमिति मानसिको बोधः योऽयं पूर्ववत् समुदितार्थविषयकः ।

अपरे पुनः मुखं चन्द्र इत्यादौ उपमानवाचकचन्द्रादिपदस्य तत्सदृशे लक्षणेत्यादिकं समस्तं प्रथममतवत् किन्तु सदृशार्थैकदेशः सादृश्यमुपमायां

भेदप्रधानं रूपके तु अभेदप्रधानम् इत्येतावानेव विशेष इत्यभिप्रयन्ति ।

एवञ्चैतन्मतेन अभेदप्रधानं यच्चन्द्रसादृश्यं तद्वदभिन्नं मुखमिति प्रथमं बोधः । ततो व्यञ्जनया तस्मिन् चन्द्रत्वस्य बोधः । ततश्च अभेदप्रधानं यच्चन्द्रसादृश्यं तद्वच्च यत् चन्द्रत्वविशिष्टं तदभिन्नं मुखमिति मानसिको बोधः योऽपि पूर्ववदेव समुदितार्थविषयक इत्येतानि प्राचीनानां मतानि ॥

यद्यत्र विचार क्रियते त्रयाणामपि मतानां युक्तिसहत्वं नास्तीत्येव प्रतिभाति, तथाहि – यत्तावदुक्तं कैश्चित्, उपमानवाचकचन्द्रादिपदस्य चन्द्रादिसदृशे लक्षणेति – तत्तुच्छम्, उत्तंसीक्रियते देवैरित्यादौ सदृशार्थस्य विशेषणत्वमिति पङ्कजसदृशाभिन्नः पाद इति बोधात् देवोत्तंसीकृतत्वस्य अनन्वयापत्तेः, उपमेये उपमानाभेद इति रूपकलक्षणस्य सङ्गमयितुम् अशक्यत्वापत्तेश्च । नहि उपमेये उपमानसदृशाभेदो रूपकमिति व्याहर्तुं शक्यते । न च वाच्यकक्ष्यायां मुखे चन्द्राभेदस्य प्रतीतिरिरिति नानुपपत्तिरिति वाच्यम्, मुख्यार्थस्य बाधितत्वेन हेयत्वमिति तदर्थमवलम्ब्य लक्षणसमन्वयस्य नितरामनुचितत्वात् । तस्मात् सदृशार्थे लक्षणेति प्रथमं तृतीयं च मतमश्रद्धेयम् । यत्पुनः तृतीयैरुक्तम्, भेदप्रधानं सादृश्यमुपमाया जीवातुभूतम् अभेदप्रधानं तु रूपकस्येत्याख्यातम् – तन्न साधु, यतो रूपके सादृश्यस्याभेदप्रधानत्वेऽपि उपमायां तु भेदाभेदाप्रधानत्वमेव स्वीक्रियते । भेदप्रधानत्वं तु दीपकादाविति सर्वसम्मतः समयः वस्तुस्थितिश्च ।

यत्पुनः द्वितीयैरभिहितम्, मुखं चन्द्र इत्यादौ उपमानवाचकचन्द्रादिपदात् चन्द्रादिसदृशत्वेनोपस्थितौ सत्यामपि अन्वयबोधस्तु चन्द्रत्वादिनेति – तदपि तथा, उपस्थितिशाब्दबोधयोः विभिन्नाकारकत्वस्य अभ्युपगमेनास्वारस्यात् । कः खलु विवेकी श्रुताच्छब्दात् यत्किञ्चिद्धर्मेणोपस्थितिः अन्वयबोधस्तु अपरयत्किञ्चिद्धर्मेणेति वैषम्यमभ्युपगच्छति? नहि तन्तवः परस्परं सम्बद्धाः तन्तुत्वं विहाय शलाकात्वमञ्चन्ति । किञ्च लक्ष्यार्थस्य स्वरूपेण बाधितत्वमिति लक्षणापरिग्रहस्यैव नैरर्थक्यप्रसङ्गः । ननु अन्वये यदि बाधितत्वं तर्हि लक्षणायाः परिग्रहः तत्परिग्रहेऽपि यदि स्वरूपादिना बाधितत्वं नायं लक्षणायां दोष इति चेत् – बत बत ! पश्यन्त्वेतेषां वादकौशलम्, यदेते दिव्यदृष्ट्या प्रथममर्थ

पश्यन्ति ततो लोकानुग्रहार्थं व्याहरन्ति, यदि च व्याहृतं न सङ्गच्छते तर्हि तन्नैतेषां दोषः किन्त्वर्थस्य। हन्त! धन्याः स्मः भवतामाशयस्य विज्ञानेन। तत्सम्प्रति आशयान्तरस्य विज्ञापनेन धन्यतरीकुर्वन्तु अस्मान् – यदत्र चन्द्रत्वविशिष्टमुखमिति लक्ष्यं तत्र बाधितत्वव्यपोहाय किं कर्तव्यम् किं पुनरत्र वृत्त्यन्तरस्य परिग्रहः अथवा वाक्यस्य निरर्थकत्वात् हेयत्वेन निर्णयः? उच्यताम्, किमर्थं तूष्णीकैः स्थीयते? तज्ज्ञायताम् – असमीक्ष्य भाषितं न जयति। तस्मादेवमादौ स्थले लक्षणायाः परिग्रहेऽपि यदि बाधितत्वं तर्हि अर्थान्तरे एवाबाधिते लक्षणा स्वीकार्येति वा तादृशे स्थले लक्षणा सर्वथा नास्तीति वा निर्णयो ज्यायान्।

किञ्च सदृशार्थे लक्षणायां साधारणधर्मोपादानस्थले लक्ष्यतावच्छेदकं किं सामान्यरूपेण भासते आहो विशेषरूपेणेति विकल्प्य पक्षद्वयमपि दूषितं दीक्षितैः, उत्तंसीक्रियते देवैरिति दूरीकरोतु दुरितमित्यत्र च पादपङ्कजशब्दस्य समानत्वेऽपि एकत्र प्रयोजनवती लक्षणा अन्यत्र निरूढेति वैषम्यादस्वारस्यं चोद्भावितम् -- तदुभयमपि न समाहितम्। तज्जगन्नाथोक्तं चिन्त्यम्। तस्मात् वाच्यार्थयोरेवाभेदान्वयः अङ्गीकर्तव्यः।

ननु मुखं चन्द्र इत्यादौ लक्षणाया अनभ्युपगमे बाधितार्थस्य बोधकत्वात् कथं तावत् वाक्यस्य ग्राह्यत्वम्। न च प्रयोजनीभूतार्थप्रतिपादकत्वेन तद्भवतीति वाच्यम्, लक्षणाया अभावेन प्रयोजनकथाया एवासम्भवात्। नहि छिन्नमूला वल्लरी पुष्पफलादीनि दर्शयति। न चार्थस्य कल्पितत्वात् यः चमत्कारः तदेवास्य प्रयोजनमिति ग्राह्यत्वमबाधितमिति शक्यमभिधातुम्, वृत्तिवेद्यस्यार्थस्य विरहेण प्रश्नस्य तादवस्थ्यात् वाक्यस्याविश्रान्तत्वाच्च। तस्माद्ग्राह्यत्वोपपादनाय यथाकथञ्चित् प्रयोजनीभूतः कश्चिदर्थोऽङ्गीकर्तव्यः।

स्यान्नाम तत्रार्थे शतमुखा विप्रतिपत्तिः किन्तु स एव नास्तीति वादो न कथञ्चिदपि कोविदानां युज्यते। अथ पुनः तदभावेऽपि वाक्यस्य ग्राह्यत्वं तर्हि गजो गगने डयते, वह्निना सिञ्चति इत्यादेरपि प्रमत्तप्रलपितस्य तदापत्तिरिति चेत् – भोः! सम्यग् गृहीतम्, इदमुच्यते, इह हि काव्यप्रपञ्चे सर्वमपि वाक्यं कल्पितार्थकत्वात् बाधितार्थकं भवति। तस्य च यावदबाधिते

कुत्रचिदर्थे पर्यवसानं न भवति तावत् वह्निना सिञ्चतीत्यादिवाक्यवत् ग्राह्यत्व न सिध्यति ।

तस्मात् प्रयोजनत्वेन कश्चिदर्थोऽत्रावश्यं वक्तव्यः । स एवमुच्यते – वक्ता किं प्रतिपादयितुमिच्छन् मुखं चन्द्र इति वाक्यं प्रयुङ्क्ते इत्येतत् विचारणीयम्। कृते च विचारे चन्द्रो नयनानन्दजननादिकं यद्यत् कार्यं करोति तत्सर्वं मुखं करोतीति प्रतिपादनेच्छयेति विज्ञायते । स्थिते चैवम्, तत् चन्द्रकार्य-कारित्वमेवास्य प्रयोजनमिति निर्णीयते । तस्य च प्रतीतिः वाक्यवैशिष्ट्य-समुत्थितया व्यञ्जनया । तद्वैशिष्ट्यं चात्र भिन्नार्थप्रतिपादकयोः शब्दयोः सामानाधिकरण्येन प्रयोगः । एवमत्र वाच्यो व्यङ्ग्यश्चेति द्वावेवार्थौ । तत्र चन्द्रकार्यकारित्वादिकं यद्वाक्यप्रयोगस्य प्रयोजनं तदादायैव वाक्यस्य ग्राह्यत्वम् । न त्वत्र लक्षणा, अनावश्यकत्वात् । किं बहुना? या लक्षणेति पदवृत्तिः प्रयोजनवती सर्वैरपि शास्त्रकारैः अबाधितस्य कस्यचिदर्थस्य बोधायाभ्युपेयते सा काव्यप्रपञ्च एव नावश्यकी, व्यञ्जनयैवाभीष्टलाभात्, तथाहि – आयुर्घृतमित्यादौ घृतं नियमेनायुर्जनकमिति विवक्षितोऽर्थ इति स एवास्य प्रयोजनम् । तस्मात् स एवार्थः व्यङ्ग्यत्वेनावधार्यते । आयुः पिबतीत्यत्र तु अभेदस्य सिद्धत्वेन प्रत्ययात् स एव दार्ढ्येनेति विशेषः । गङ्गायां तीरे घोष इत्यादौ गङ्गातीरयोः अभेदस्य साध्यत्वेन प्रत्ययात् गङ्गातीरं शीतत्व-पावनत्वादिविशिष्टमिति विवक्षितोऽर्थ इति तदेवास्य प्रयोजनम् । तच्च व्यङ्ग्यत्वेनावधार्यते । गङ्गायां घोष इत्यत्र तु तदेव दार्ढ्येनेति सर्वत्रापि लक्षणामन्तरेणैव विवक्षितमुपपादनीयम् ।

यथा यथा चात्र विषयविषयिणोः सम्बन्धभेदः तथा तथा व्यङ्ग्यभेदः, तथाहि – मुखं चन्द्र इत्यत्र सादृश्यं सम्बन्ध इति मुखे चन्द्रकार्यकारित्वं व्यङ्ग्यम् । अत एव जलकेलितरलकरतलेत्यादौ तत्कार्यकारित्वोपन्यासद्वारा रूपकस्य व्यञ्जनं क्रियमाणं सङ्गच्छते । एवम् आयुर्घृतमित्यत्र कार्यकारणभाव इति घृते नियमेनायुर्जनकत्वं व्यङ्ग्यम्, गङ्गायां तीरे घोष इत्यत्र संयोग इति तीरे शीतत्वपावन्त्वादिकम्, कुन्ताः प्रविशन्तित्यत्रापि संयोग इति पुरुषेषु तीक्ष्णत्वादिकम्, अमी इन्द्रा इत्यत्र तादर्थ्यमिति यूपेऽत्यन्तपूजनीयत्वन्,

मञ्चाः क्रोशन्तीत्यत्र पुरुषेषु [३३]साकल्यम्, देवदत्तोऽयं बृहस्पतिरित्यत्र वैपरीत्यमिति देवदत्तेऽत्यन्तानभिज्ञत्वम्, उपकृतं बहु तत्रेति वाक्येऽपि स एव सम्बन्ध इति अत्यन्तापकृतत्वादिकमिति तत्र तत्र यथासम्भवं स्वयमूह्यम्। अत्रैव विषयवाचकपदस्यानुपादाने पुनः अभेदस्य सिद्धत्वेन प्रत्ययात् पूर्वोक्तस्य तत्तद्व्यङ्ग्यस्य दार्ढ्येन सिद्धिरिति विशेषः ।

ननु मुखं चन्द्र इत्यादौ सादृश्यसम्बन्धस्थले किं कारणं चन्द्रकार्यकारित्वमेव व्यङ्ग्यमित्यङ्गीक्रियते न कुतः श्वेतत्ववर्तुलत्वादिकम्? एवं गङ्गायां तीरे घोष इत्यत्र किं कारणं शीतत्वपावनत्वादिकमेव व्यङ्ग्यमित्यङ्गीक्रियते न कुतः शिलावत्त्वादिकम्? एवमन्यत्रापीति चेत् – व्यापाररूपाया लक्षणाया वक्त्रिच्छामूलकत्वात् तस्याश्च प्रकृतपदार्थोत्कर्षरूपफलस्य सद्भावे सत्येव सम्भवात् तदप्रयोजकधर्माणां प्रतिपाद्यतया प्रसक्तेरभावात् । एवञ्चात्र इच्छाया नियामकत्वात् नातिप्रसङ्ग इति बोध्यम् । अमी इन्द्रा इत्यत्र यद्यपि बहुवचनेनैव पूजनीयत्वं गम्यते तथापि तस्मिन् अत्यन्तत्वस्य व्यञ्जनायैवं प्रयोग इति विशेषः ।

एवं यथा यथा विचार्यते तथा तथा प्रयोजनवती लक्षणा सूर्याभिमुखी हिमानीव कृशानुचुम्बिता च लाक्षेव पश्यतामेवास्माकं विलीयत इति स्फुटम् ।

निरूढापि न साकल्येन परिग्रहमर्हति, तथाहि – श्वेतो धावतीत्यत्र श्वेतोऽस्यास्तीति विवक्षायां मतुपि [३४]गुणवचनेभ्यो मतुपो लुगिष्ट इति इत्यनुशासनाल्लुकि निष्पन्नः शब्दः स्वत एव श्वेतवति वर्तत इति लक्षणाङ्गीकारः कुतः? अत एवामरकोशे [३५]गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति इत्युभयत्रापि शक्तिरेव निरणायि । राजा गौडेन्द्रं कण्टकं शोधयतीति दर्पणकारोक्तं यद्गौणसारोपलक्षणाया उदाहरणं तत्रापि असह्यपीडाजनकत्वमिति व्यङ्ग्यस्य प्रयोजनत्वेन प्रत्ययात् कुतो निरूढात्वमभ्युपगम्यत इति न ज्ञायते । न च तदस्माकं न ज्ञायत इति वाच्यम्, देवदत्तोऽयं कण्टक इति रूपकस्य विधेयत्वेन उपन्यासे मुखं चन्द्र इत्यत्रेव स्फुटत्वात् । लावण्यम्, द्विरेफः, अनुकूल-

३३. तेन मञ्चाश्रितेषु बहुषु पुरुषेषु कतिपय एव यदि क्रोशन्ति तर्हि नायं प्रयोग इति बोध्यम् ।
३४. तदस्यास्मिन्नस्तीति मतुप् इति सूत्रे वर्तते ।
३५. प्रवीणे निपुणाभिज्ञविज्ञनिष्णातसिक्षिताः । अ.को. तृ.कां. विशेष्यनिघ्नवर्गः ।

प्रतिकूलादयः, प्रवीणकुशलादयश्च ये शब्दाः तेषां सुषमादिविशेषे तत्तदर्थे शक्तिरेवेत्यभ्युपगमो ज्यायानिति प्रतिभाति, व्युत्पत्तिलभ्यार्थे प्रयोगविरहात्। न च व्युत्पत्तिलभ्य एवार्थो मुख्यः प्रवृत्तिलभ्यं तु लक्ष्यमिति वाच्यम्, मुख्यार्थवाधस्य अननुभवात्, गौः शेते इत्यादौ गच्छतीत्याद्यर्थे [३६]व्युत्पादितस्य गवादेः शब्दस्य सास्नादिमदाद्यर्थे लक्षणाकल्पनप्रसङ्गाच्च। न च तदर्थस्य तत्र सम्भव इति प्रदर्शनमात्रम् न तु तस्य मुख्यार्थत्वमिति चेत् – भो महात्मन्! सैव दृष्टिरिहापि पात्यताम् । किं बहुना! देवदत्तोऽयं प्रवीणः, देवदत्तोऽयं कुशल इत्यादौ प्रयोगे सति कस्मिन् कर्मणीति अत्र लावण्यमस्तीति प्रयोगे कुत्रेति, अत्र तैलमस्तीत्यादौ च प्रयोगे किमिति चानुपदमेव प्रश्नस्य करणात्, प्रवीणोऽयं देवदत्तो वीणावानिति कुशाधाने कुशलोऽयं देवदत्त इति विवक्षितार्थे शब्दान्तरस्यैव प्रयोगात् तस्य प्रतीतिरेव न भवतीति स्फुटम्। एवं सति दूरस्थितमेव तस्य प्रतिपादनम् । अत एव कोशकारैः प्रवीणादीनां शब्दानां दक्षादिपर्यायत्वेनोपसंख्यानम् । अत एव च भट्टकुमारिलैः 'निरूढा लक्षणाः काश्चित् सामर्थ्यादभिधानवत्' इत्यभिधातुल्यत्वेन परिगणनम् ।

अन्यच्चेदं चिन्त्यताम् – प्रयोजनाभावे मूर्खोऽपि न चेष्टत इति स्थिते किं कारणं कश्चिदवाचकस्य शब्दस्य प्रयोगे प्रवर्तते? ननु पूर्वजैः तथा प्रयोगे प्रवृत्तमिति चेत् – तैरपि तथा प्रयोगे किं कारणमिति पुनः प्रश्नस्योदयः। तस्मात् यत्र यच्छब्दः प्रयोक्तव्यः तत्रान्यस्य प्रयोगे लाघवालस्यादिकृतः संक्षेपः प्रयोजनमविवेको वा कारणम् । तत्र यदि संक्षेपः कारणम्, यथा – देवदत्तं दत्तेत्याह, वेदव्यासं व्यास इत्याहेत्यादौ, तत्र तत्तदर्थे एकदेशीव तदेकदेशोऽपि वाचकः शब्द इत्यभिधैव लब्धावकाशा । यद्वा, एकदेशः एकदेशिनः स्मारकमिति मतम् तदापि स्मारितस्य तच्छब्दस्य तदर्थे सैव वृत्तिः । यदि पुनः प्रयोजनम् तर्हि पूर्वोक्तप्रकारेण व्यञ्जना लब्धावकाशा। अथाविवेकः उपदेशः तस्यौषधमिति नात्र चर्चा प्रसज्यते । तस्मात् यथा यथा विचार्यते तथा तथा प्रज्ञाभवने बाढं निरूढा निरूढापि परीक्ष्यमाणा गगनावस्थिता नीलिमेव, जगद्गता च सत्यतेव मन्दं मन्दं निवर्तते ।

३६. गमेर्डोः इति सूत्रेण कर्तरि औणादिके डोप्रत्यये गोशब्दः ।

अथवा निरूढा यत्र युक्तिसिद्धा तत्रैव तत्स्वीकारोऽस्तु गतानुगतिकन्यायेन लोचने निमील्य सर्वत्रापि स्वीकारो न युज्यत इत्यस्माकं मतमिति गृह्यताम्। इदं पुनरस्तु – यैः व्यञ्जनेति वृत्तिः नाङ्गीक्रियते, शास्त्रे तद्विषयस्य विलक्षणार्थस्याभावात्, क्वचित्सद्भावे वा क्षुद्रत्वात् क्लृप्तवृत्त्यैव कथञ्चिन्निर्वाहस्य सम्भवात् तेषां तु विवक्षितस्यार्थस्योपपादनाय लक्षणेति वृत्तिरस्तु । यैः पुनरङ्गीक्रियते तेषां तु लक्षणेति वृत्तिर्मास्तु, व्यञ्जनयैव सर्वस्याप्यभीष्टस्य लाभात् । निर्णये सूक्ष्मदृशो विद्वांसः प्रमाणम् ॥

यत्तु – रूपकातिशयोक्त्योर्विभागं दर्शयता वृत्तिकारेणाभिहितम्, विषयविषयिणोः सामानाधिकरण्ये रूपकम्, विषयिमात्रनिर्देशेऽतिशयोक्तिरिति – तन्मन्दम्, 'चन्द्रता वदने भाति यौवनस्योदये त्वयि' इति व्यधिकरणरूपके व्यभिचारात् । तस्मात् विषयविषयिणोरुभयोरपि निर्देशे रूपकम् विषयिमात्रनिर्देशेऽतिशयोक्तिरिति विभाग एव समुचितः । यद्येवं तर्हि –

[३७]रूपजला चलनयना नाभ्यावर्ता कचावलीभुजगा ।
मज्जन्ति यत्र सन्तः सेयं तरुणीतरङ्गिणी विषमा ॥

इत्येकदेशविवर्तिरूपके, जलकेलितरलकरतलेत्यादौ व्यङ्ग्यरूपके च विषयवाचकपदस्य अनुपादानात् व्यभिचारः स्थित एवेति चेत् – सत्यम्, एवं तर्हि उपमेये उपमानस्य साध्योऽभेदः रूपकम्, सिद्धस्तु अतिशयोक्तिः इत्यस्तु । न च 'कमलनयना वक्ति मन्दमन्दमधोमुखी' इत्यत्रोद्देश्यरूपके व्यभिचारः, सिद्धतया भासमानस्यापि विषयस्योपादानेन साध्यत्वस्यानपायात् । ततश्चात्र साध्याभेदसम्बन्धिपदार्थद्वयवान् समासार्थ उद्देश्यत्वात् सिद्धः सन् भासते न तु तदुदरवृत्तिरभेदः ।

एवमाक्षेपसमाधानाभ्यां प्रश्नप्रतिवचनाभ्यां तथाविधेन चान्येन वादतन्त्रेण दुरवगाहे प्रकरणकान्तारेऽस्मिन् शनैः शनैः क्रममाणा बुधाः कौशलेन तदुत्तीर्य सिद्धान्तसदनमवाप्नुवन्तु मा भवन्तु मूढाः सन्तो मार्गाद् भ्रष्टा इति सादरं निवेदयन् विरमामि ॥

❖❖❖

३७. रस. द्वि.आ. रूपकप्रकरणम् ।

व्यञ्जनानिरूपणम्

व्यञ्जनेत्ययं शब्दो व्युपसृष्टात् व्यक्तिम्रक्षणकान्तिगत्यर्थकात् अञ्जूधातोः णिजन्तात् [१]ण्यासश्रन्थो युच् इति भावे युचि ततस्टापि निष्पन्नो व्यापारे वर्तते । सम्बन्धवृत्तित्वपक्षे तु करण इति विवेकः । व्यापारश्चायं शब्दस्य तृतीयः अर्थादीनां तु प्रथमः । गतोऽस्तमर्क इत्यादौ वक्त्रादिवैशिष्ट्ये सत्येवार्थान्तरस्य ज्ञानं नो चेन्नैवेत्यनुभवात् व्यापारस्यास्य लक्षणावत् अनित्यत्वमिति निर्णयः ।

* प्राचीनमतनिरूपणं तथा तत्परीक्षणम्

यद्यपि ध्वनिकारादिभिः प्राचीनैः साहित्यमीमांसकैः व्यञ्जनायामतीव पराक्रान्तम् तथापि तस्याः स्वरूपनिर्णायके लक्षणे न कोऽप्युद्यमः कृत इति चित्रम् । केवलं विश्वनाथो नागेशो विद्यानाथश्चेति कतिपय एवस्यां दिशि कृतविचारा दृश्यन्ते । विदुषां विनोदाय तत्कृतानि लक्षणान्यत्र प्रस्तूयन्ते । तत्र विश्वनाथकृतं यथा –

[२]विरतास्वभिधाद्यासु ययार्थो बोध्यते परः ।
सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च ॥

अभिधादिषु स्वं स्वमर्थं बोधयित्वा विश्रान्तासु ययार्थान्तरस्य प्रतीतिः सा व्यञ्जना । इयं शब्दे तदेकदेशप्रकृतिप्रत्ययादौ अर्थे वाक्ये प्रबन्धे ध्वनिवर्णचेष्टासु च वर्तत इति कारिकार्थः । नागेशोक्तं यथा –

[३]मुख्यार्थबाधग्रहनिरपेक्षबोधजनको मुख्यार्थसम्बद्धासम्बद्धसाधारणः प्रसिद्धाप्रसिद्धार्थविषयको वक्त्रादिवैशिष्ट्यज्ञानप्रतिभाद्युद्बुद्धः संस्कारविशेषो व्यञ्जना ॥

विद्यानाथोक्तं यथा –

[४]अन्वितेषु पदार्थेषु वाक्यार्थोपस्कारार्थमर्थान्तरविषयकः शब्दव्यापारो व्यञ्जनावृत्तिः ॥

---

१. अष्ट. ३.३.१०७.
२. सा.द. द्वि.प. का–१२,१३.
३. वै.सि.मं. वृत्तिनिरूपणम् ।
४. प्रताप. द्वि.प्र. व्यञ्जनानिरूपणम् ।

पदार्थान्वयात्परमङ्गीकार्यो वाक्यार्थपरिपोषकार्थप्रतिपादकः शब्दनिष्ठो व्यापारो व्यञ्जनेत्यर्थः ।

अत्र विचार्यते – तत्र यत्तावत् प्रथमं लक्षणम्, तस्य 'पुत्रस्ते जातः' इति वाक्यश्रवणजन्यो यो मुखविकासादिरर्थः तद्गते हर्षाद्यनुमापकत्वरूपे व्यापारे सञ्चारादतिव्याप्तिः । नन्वर्थशब्देन वृत्तिवेद्यस्यैवार्थस्य ग्रहणात् प्रकृते च मुखविकासादेः अतथाभूतत्वान्नास्ति दोष इति चेत् – अस्तु परिहृतो दोषः, तथापि व्यञ्जनायाः परिशिष्टार्थविषयकत्वेन अभ्युपगमात् अर्थेष्वियत्ताया अनवधारणम्, नियामकनामनुल्लेखात् यत्किञ्चिदर्थस्य व्यङ्ग्यत्वेनापादानप्रसङ्गश्च दोषो वज्रलेपायते । अन्यच्च, अभिधाद्यासु इति बहुवचनमसङ्गतम्, स्वयमेव तात्पर्यवृत्तेः [५]परमतसिद्धतया निरूपणात् । अथ स्वाभिमततया निरूपणमिति मतं तदापि अर्थप्रतिपत्त्यनुकूलव्यापाररूपस्य सामान्यलक्षणस्यासङ्गमनात् वृत्तित्वमेव तावत् तस्याः कथमिति प्रश्नः । न च पदार्थसंसर्गस्य अर्थत्वं युज्यते, तद्गत्वात् । नहि कोऽपि पुमान् तद्गतं तत्त्वेनाभिधत्ते । एवं तर्हि संसर्गस्य कथं भानम्? [६]संसर्गमर्यादयेति गृह्यताम् । न च संसर्गस्य वृत्त्यवेद्यत्वे कथं शाब्दबोधे विषयत्वमिति वाच्यम्, अर्थेष्वेव तन्नियमस्याभ्युपगमात् । अथवास्तु नाम तात्पर्यस्य वृत्तित्वम्, किन्तु वैजात्यस्य दर्शनात् अभिधादिसमस्कन्धत्वेन परिगणनं न कथञ्चिदपि युज्यत इति तामादाय बहुवचनस्य समर्थनं न जातु घटते ।

यदपि द्वितीयं लक्षणम्, तस्यापि मुख्यार्थसम्बद्धसम्बद्धादिसाधारण-धर्मघटितत्वात् अव्यावर्तकत्वम् । नहि साधारणा अंशा लक्षणकुक्षिं प्रविष्टाः पदार्थस्य स्वरूपज्ञानमाधातुं प्रभवन्ति । अथ प्रभवन्तीत्युच्यते तर्हि 'चतुष्पात् द्विशृङ्गः कृष्णवर्णो दीर्घलाङ्गूलश्च प्राणिविशेषो गौः' इत्युक्ते गोरेव प्रतीतिः स्यान्न महिषादेः । अन्यच्च, मुख्यार्थसम्बद्धासम्बद्धेति विशेषणमयुक्तम्, व्यङ्ग्यार्थस्य वाक्यार्थरूपत्वमिति मुख्यार्थेन कस्यापि सम्बन्धस्यासम्भवात् । मुख्यार्थो हि पदार्थः व्यङ्ग्यार्थस्तु वाक्यार्थः, यथा – गतोऽस्तमर्क इत्यत्र

५. तात्पर्याख्यां वृत्तिमाहुः पदार्थान्वयबोधने ।
तात्पर्यार्थं तदर्थं च वाक्यं तद्बोधकं परे ॥ सा.द. द्वि.प. का–२०.

६. भिन्नपदोपस्थाप्ययोरर्थयोः संसर्गः संसर्गमर्यादया भासते इति निर्णयः ।

अर्कादयः पदार्थाः अभिसरणं कुरु इत्यादिः व्यङ्ग्यार्थः । नहि शिलापाशयोरनुकूलः प्रतिकूलो वा कश्चित्सम्बन्धः सम्भवति । ननु मुख्यार्थ-शब्देन तद्घटितो वाक्यार्थो ग्राह्य इति चेत् – अस्तु, ग्रहीष्यते, तथापि असम्बद्धेत्यस्य का सङ्गतिः? सदा सम्बद्धत्वात् । नहि असम्बद्धः कश्चिदर्थः वृत्त्या बोद्धुं शक्यते । अथ शक्यत इति मतम् तर्हि यत्किञ्चिदर्थात् यस्य कस्याप्यर्थस्य ग्रहणं प्रसज्येत । सम्बन्धश्च कार्यकारणभावादिः वर्तते तदभावे तु अन्ततः प्रकृताप्रकृतभावो वा यो व्यापकः । मुख्यार्थबाधग्रहनिरपेक्षबोधजनक इति विशेषणमपि तथा, अन्यस्मिन्नर्थे अन्यशब्दप्रयोगस्य मुख्यार्थबाध-पर्यवसितस्य लक्षणामूलव्यञ्जनायाम् अपेक्षितत्वेन तत्र लक्षणस्याव्यापनात् ।

अथ मन्यसे, अन्यस्मिन्नर्थेऽन्यशब्दस्य प्रयोगे सति यो मुख्यार्थबाधः स लक्षणायां निमित्तम् न तु व्यञ्जनायामिति – अस्तु, एवमपि [७]संस्कार-विशेषत्वस्याभावेनैव लक्षणायामतिव्याप्तौ वारितायां तद्वारणफलकस्य एतद्विशेषणोपादानस्य नैरर्थक्यात् । किञ्च वृत्तेः व्यापाररूपत्वात् तद्भेदस्य व्यञ्जनायाः कथं संस्काररूपत्वम्? । एतत्खल्वपि, वक्त्रादिवैशिष्ट्यज्ञान-प्रतिभाद्युद्बुद्धत्वाभावात् अभिधामूलव्यञ्जनायाम् अव्याप्तिः । न च वक्त्रादीत्यादिपदेन तत्कारणस्यापि सङ्ग्रहो भविष्यतीति वाच्यम्, [८]क्रमवाचिना तेन बोद्धव्यादीनामेव ग्रहणात् । यथाकथञ्चित् सङ्ग्रहेऽपि वैशिष्ट्यं प्रति विशेषणत्वात् यदाकारेण कारणत्वं विवक्षितं न तदाकारेण तस्य तत्सिद्धिरिति नेष्टनिष्पत्तिः । अत्र हि नानार्थकशब्दबोध्ये एकस्मिन्नर्थे अप्राकरणिकत्वं तज्ज्ञानं वा कारणं किन्त्विदानीं तद्वैशिष्ट्यस्य प्रसक्तम् । नहि विशिष्टं सूर्यमण्डलमिति प्रयोगः सम्भवति, सजातीयस्यान्यस्य अभावात् । विजातीयाभिप्रायेण सम्भवन्नपि स नात्रोपयुज्यते ।

नापि प्रतिभादीत्यादिपदेन, नवनवोन्मेषशालिन्याः तस्याः कविगतत्वेन

७. पदार्थज्ञानजन्यः स्मृतिकारणीभूतो धर्मः संस्कारः । स चात्मनो गुण इति नैयायिकाः । तस्य निर्गुणत्वात् चित्तस्येति वेदान्तिनः ।

८. अयमादिशब्दः क्वचित् व्यवस्थायां वर्तते, यथा – इन्द्रादयो दिक्पालका उपस्थिताः सन्ति । इन्द्रादयः क्रमेणोपस्थिता इति गम्यते । क्वचित्तु प्रकारे वर्तते, यथा – अस्मिन् ग्रामे देवदत्तदय आढ्याः सन्ति । देवदत्तसदृशा इति गम्यते । इह तु व्यवस्थावाचिनो निर्देशः ।

व्यङ्ग्यार्थप्रतीतौ कारणत्वाभावात् । अथ [९]भावयित्रीं प्रतिभामवलम्ब्य कारणत्वमुपपाद्यते तदापि तस्य कारणसामान्यत्वं न तु तद्विशेषत्वमिति अनुल्लेखनीयत्वमेव । नहि विशेषे जिज्ञासायां तेन सह सामान्यस्यापि निर्देशः सामञ्जस्याय कल्पते । एवं प्रतिभायाः विशेषकारणत्वे गलिते तदुत्तरवृत्त्यादिपदेन तादृशस्यैव कस्यचित् सामान्यकारणस्य ग्रहणं भवेत् न त्वभिमतस्य ।

यत्पुनः तृतीयं लक्षणम् – तदपि न विवेकिनामुपादेयम्, ध्वनिशब्दव्यपदेश्ये अश्लीलादौ च व्यङ्ग्ये या व्यञ्जना तस्यामव्यापनात्, निमित्तस्यानुल्लेख इति हेतोः इयत्त्वेनानिश्चेयत्वाच्च । अन्यच्च, लक्षणस्य गतोऽस्तमर्क इत्यादौ आर्थव्यञ्जनायामव्याप्तिः, शब्दव्यापारत्वाभावात् ।

तस्मात् लक्षणत्रयमपि केवलं [१०]स्वरूपपरिचायकम् न तु तन्निर्णायकमिति बोध्यम् ।

* किं तावदस्या लक्षणम्?

एवं तर्हि किमस्या लक्षणम्? – उच्यते, व्यञ्जनेयम् आश्रयविषयभेदादिना अभिधालक्षणाभ्याम् अत्यन्तविलक्षणस्वभावेति यद्यपि लक्षणमस्या दुरभिधानम् अस्मादृशानां मन्दमतीनाम् तथापि प्राचीनकृतलक्षणानां यत्प्रत्याख्यानं तद्रूपस्यापराधस्य परिमार्जनार्थं किञ्चिदत्र प्रयतनीयम् नो चेत् दोषोद्घाटनमात्रेण प्राज्ञम्मन्येषु वयमपि परिगणिताः स्यामेति मन्दं मन्दमत्र प्रवृत्यते । यदि अत्रापि दोषो विभाति विशारदानां तर्हि निरस्यतामेतत् निर्दाक्षिण्यं प्रवृत्यतां वा तन्निर्दोषीकरणे । व्यञ्जनेयमादौ द्विधा – अर्थसापेक्षा तन्निरपेक्षा च । तत्राद्याया लक्षणं तावदिदम् –

वक्तृवैशिष्ट्यादिनिमित्तकं शब्दार्थादिगतमर्थप्रतिपादकत्वं व्यञ्जना ॥

अर्थप्रतिपादकत्वमित्यत्र अर्थश्च [११]वाक्यार्थो ग्राह्यः न तु पदार्थः,

९. प्रतिभा कारयित्री भावयित्री चेति द्विधा । नवनवार्थकल्पनशालिनी बुद्धिः कारयत्री प्रतिभा । इयं कविषु भवति । तं च कल्पितमर्थं या सम्यक् भावयति सा भावयित्री । इयं च सहृदये भवति ।

१०. काकवद्देवदत्तस्य गृहम् इत्यत्र देवदत्तगृहस्य काकवत्त्वमिव इति भावः ।

११. वाक्यार्थश्चेह सम्बद्धोऽर्थः न तु उपस्थितेषु पदार्थेषु सम्बन्धः, प्रथमं पदार्थानामुपस्थितिः ततः सम्बन्ध इति क्रमस्याभावात् ।

गतोऽस्तमर्कः, गङ्गायां घोष इत्यादौ 'अभिसरणं कुरु' 'गङ्गातीरं शीतत्वपावनत्वादिविशिष्टम्' इत्यादिरूपेण वाक्यार्थस्यैवानुभवात् । व्यञ्जनायाः पदतदेकदेशादिगतत्वं तत्र तत्र निर्णीतं प्राधान्याभिप्रायेण । एतेन

विच्छित्तिशोभिनैकेन भूषणेनेव कामिनी ।
पदद्योत्येन सुकवेर्ध्वनिना भाति भारती ॥

सुप्तिङ्वचनसम्बन्धैस्तथा कारकशक्तिभिः ।
कृत्तद्धितसमासैश्च द्योत्योऽलक्ष्यक्रमः क्वचित् ॥

इत्यादिकं सर्वं व्याख्यातमिति वेदितव्यम् ।


तत्राभिधामूलायां व्यञ्जनायां निमित्तं नानार्थकशब्दबोधितयोरर्थयोः एकस्मिन्नर्थेऽप्राकरणिकत्वज्ञानम्, लक्षणामूलायां रूढिव्यतिरिक्तेन हेतुना अन्यस्मिन्नर्थे अन्यशब्दप्रयोगः, आर्थ्यां तु वक्त्रादिवैशिष्ट्यम् । इह लक्षणे प्रथमेनादिशब्देनानुक्तयोः अन्ययोर्द्वयोः सजातीयस्य बोद्धव्यादिवैशिष्ट्यस्य च ग्रहणम् । द्वितीयेनादिशब्देन तु शब्दैकदेशप्रकृत्यादेः वाक्यस्य प्रबन्धस्य च ग्रहणम् । अर्थनिरपेक्षायाः पुनरिदम् –

अर्थनिरपेक्षं वर्णादिगतमर्थप्रतिपादकत्वं व्यञ्जना ॥

इहादिशब्देन नादस्य चेष्टायाश्च ग्रहणम् । इदं तु उभयसाधारणं लक्षणम् –

वक्तृवैशिष्ट्यादिनिमित्तकं शब्दार्थादिगतमर्थनिरपेक्षं च वर्णादिगतम् अर्थप्रतिपादकत्वं व्यञ्जना ॥

इह विशेषणस्यानेकत्वेऽपि विशेष्यस्यैकत्वात् नाननुगतत्वम् । तदिदं स्फुटप्रतिपत्तय इत्थं निदर्श्यते –



तत्र वर्णनादगताया व्यञ्जनाया न स्वातन्त्र्येणार्थप्रतिपादकत्वम् किन्तु विभावाद्यभिव्यक्ते रसेऽनुकूलत्वेनावस्थानम् इति विशेषः । एवमत्र अर्थप्रतिपादकत्वं सङ्केतनिमित्तकम् अभिधा, मुख्यार्थबाधादिनिमित्तकं लक्षणा, वक्तृवैशिष्ट्यादिनिमित्तकं व्यञ्जना चेति वृत्तित्रयं बोध्यम् ।

❖❖❖

व्यञ्जनाप्रभेदनिरूपणम्

व्यञ्जना चेयमर्थसापेक्षा शाब्दी आर्थी चेति द्वेधा । तत्र व्यञ्जना शाब्दी भवति, शब्दानां परिवृत्त्यसहत्वात् । आर्थी भवति, तद्वैपरीत्यात् । तयोः आद्या अभिधामूला लक्षणामूला चेति द्विविधा । अन्त्या तु वक्त्रादिवैशिष्ट्यादिभेदात् अनेकविधा । अधुना क्रमेणैतेषां निरूपणं क्रियते –

१. अभिधामूला व्यञ्जना तत्र मतभेदश्च

अस्या लक्षणे बहुधा विप्रतिवादो वर्तते । इयं च नानार्थकशब्दप्रयोगस्थले सम्भवतीत्यत्र जगन्नाथं विना अन्यस्य न कस्यापि विमतिः तथापि अप्राकरणिकार्थप्रतीतिः कथं भवतीत्यत्र वर्तत एव सा । तत्रेमानि मतानि तावत् क्रमेण निरूप्यन्ते –

* मम्मटमतम् – प्रकाशकृता तावत् लक्षणमिदं [१]निगदितम् –

अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते ।
संयोगाद्यैरवाच्यार्थधीकृद् व्यापृतिरञ्जनम् ॥

नानार्थकस्य शब्दस्य अनेकस्मिन्नर्थे वर्तमानाया अभिधायाः संयोगाद्यैः कस्मिंश्चिदर्थे नियन्त्रणे जाते तस्यैव बोधो भवति नान्यस्य । तस्यां स्थितौ तत्र यद्यर्थान्तरम् अस्माकमनुभवसिद्धं तर्हि तस्य प्रतीतिः व्यञ्जनामन्तरेण नान्यया कयाचिद्वृत्त्या भवितुं शक्नोति । सैव अभिधामूलेति कारिकार्थः ।

यद्यप्यत्र नानार्थकात् शब्दात् प्रकृतस्याभिधया बोधः अप्रकृतस्य तु व्यञ्जनयेति एतावन्मात्रमभिहितं न पुनः औपम्यादिकं कया वृत्त्येति तथापि उपायान्तरस्याप्यभावात् व्यञ्जनयैवेति तन्मतं बोध्यम् । एतेन पञ्चमोल्लासे

१. का.प्र. पं.उ. का–१९.

'शब्दशक्तिमूले तु अभिधाया नियन्त्रणेनानभिधेयस्यार्थान्तरस्स्य तेन सहोपमालङ्कारस्य च निर्विवादं व्यङ्ग्यत्वम्' इति तदुक्तं सङ्गच्छते ।

ननु संयोगाद्यैः एकत्रार्थेऽभिधया नियन्त्रणे व्यञ्जनयापि कथमर्थान्तरस्य बोधः, नियामकस्यानपगमादिति चेत् – अनुभवसिद्धस्यार्थान्तरस्य बोधनार्थं तस्या उररीकार इति तां प्रति एतेषामनियामकत्वस्यैव विज्ञानात् । एतेन [२]'दृप्तारिविजये राजन्! साधनं सुमहत्तव' इत्यादौ अर्थान्तरस्यासभ्यस्य प्रतीतिरिति अश्लीलाख्यो दोषो निर्णीयमानः सङ्गच्छते । तस्मादर्थान्तरे तदवयवकौपमादौ च व्यञ्जनेत्येव शोभनम् । विश्वनाथप्रभृतीनां सर्वेषामपि प्राचीनविमर्शकानां प्रायेणायमेव निर्णयः ।

* ध्वनिकारमतम् – ध्वनिकारस्तु यद्यप्यर्थान्तरे का वृत्तिरिति नाचष्ट तथापि [३]वत्से! मा गा विषादमित्यादौ

[४]शब्दार्थशक्त्याक्षिप्तोऽपि व्यङ्ग्यार्थः कविना पुनः ।
यत्राविष्क्रियते स्वोक्त्या सान्यैवालङ्कृतिः ध्वनेः ॥

इति कारिकायामर्थान्तरस्य व्यङ्ग्यपदेन व्यवहारात् तस्य तत्त्वमेव अभिप्रेतमिति निश्चीयते । एतेन

[५]उन्नतः प्रोल्लसद्धारः कालागुरुमलीमसः ।
पयोधरभरस्तन्व्याः कं न चक्रेऽभिलाषिणम् ॥

इति शब्दशक्त्युद्भवोदाहरणत्वेन तन्निर्दिष्टे पद्ये 'पयोधरभरः पयोधरभर इव' इति औपम्यस्येव अप्राकरणिकमेघरूपार्थस्यापि व्यङ्ग्यत्वमेवेति बोध्यम् । ततश्च ईदृशे स्थल एको वाच्यो द्वौ व्यङ्ग्याविति सिद्धं भवति । न चैवमर्थान्तरस्य व्यङ्ग्यत्वे तस्य वस्तुरूपत्वेन शब्दशक्त्युद्भवध्वनेः अलङ्काररूपत्वमिव वस्तुरूपत्वमपि स्वीकार्यं स्यादिति वाच्यम्, तस्यानुपदं व्यङ्क्ष्यति उपमाद्यलङ्कारे उपमानादिरूपेण घटकत्वमित्यप्राधान्यात् । नह्यप्रधानो

२. सा.द. स.प. अर्थदोषप्रकरणम् ।

३. वत्से! मा गा विषादं श्वसनमुरुजवं सन्त्यजोर्ध्वप्रयुक्तं
कम्पः को वा गुरुस्ते किमिह बलभिदा जृम्भितेनात्र याहि ।
प्रत्याख्यानं सुराणामिति भयशमनच्छद्मना कारयित्वा
यस्मै लक्ष्मीमदाद्वः स दहतु दुरितं मन्थमुग्धः पयोधिः ॥

४. ध्वनि. द्वि.उ. का–२३.

५. ध्वनि. द्वि.उ. शब्दशक्तिमूलध्वनिप्रकरणम् ।

व्यङ्ग्यो ध्वनिरिति कथ्यते । तदेवं वस्तुव्यञ्जनस्थले सर्वत्रालङ्कारस्यैव प्राधान्यात्

[६]आक्षिप्त एवालङ्कारः शब्दशक्त्या प्रकाशते ।
यस्मिन्ननुक्तः शब्देन शब्दशक्त्युद्भवो हि सः ॥

इति शब्दशक्तिमूलध्वनेः अलङ्कारमात्ररूपत्वं तेन निर्णीतम् ।

वस्तुतस्तु शब्दशक्तुमूलध्वनेः अलङ्कारमात्ररूपत्वमिति यन्निर्णीतम् – तच्चिन्त्यम्,

[७]भुक्तिमुक्तिकृदेकान्तसमादेशनतत्परः ।
कस्य नानन्दनिस्यन्दं विदधाति सदागमः ॥

इति प्रच्छन्नकामिन्याः कस्याश्चित् जारोद्देश्यके वाक्ये सच्छास्त्रार्थ-विषयकस्य वाक्यार्थस्य प्रतीतौ सत्यां प्रतीयमानस्य सत्पुरुषस्यागमनम् इत्यार्थान्तरस्य वस्तुरूपत्वात् प्राधान्याच्च वस्तुध्वनेरवश्यं स्वीकार्यत्वात् । न च तत्र सदागमः सदगम इवेति औपम्यं व्यङ्ग्यमिति वाच्यम्, गोप्यत्वभङ्गप्रसङ्गात् ॥

* **लोचनकारमतम्** – लोचनकारस्यापि अर्थान्तरे व्यञ्जनेति ध्वनिकारस्यैव मतमभीप्सितमिति प्रतिभाति यतोऽस्मिन्नेव प्रसङ्गे व्याख्यानावसरे [८]''यत्रापि अभिधाया नियमनहेतुः प्रकरणादिः विद्यते तेन द्वितीयस्मिन्नर्थे नाभिधा सङ्क्रामति, तत्र द्वितीयोऽर्थोऽसावाक्षिप्त इत्युच्यते' इत्यभिदधता तेनार्थान्तरस्य आक्षिप्तत्वं स्वीकृतम् । यत्र पुनः कविनार्थान्तरं स्वोक्त्याविष्क्रियते तत्रास्य विभिन्नं मतम्, प्रकरणादिना सकृत् प्रतिबद्धाया अपि अभिधाया आविष्कारोक्ति-बलेन प्रतिप्रसवस्याभ्यनुज्ञानात्, यदुक्तम् – 'तत्रापि यदि तादृशो शब्दो विद्यते येनासौ नियामकः प्रकरणादिरपहृतशक्तिकः सम्पद्यते । अत एव साभिधाशक्तिर्बाधितापि सती प्रतिप्रसूतेव । तत्रापि न ध्वनेर्विषय इति तात्पर्यम् । चशब्दोऽपिशब्दार्थे भिन्नक्रमः । आक्षिप्तोऽपि आक्षिप्ततया झटिति सम्भावयितुमारब्धोऽपीत्यर्थः । नत्वसावाक्षिप्तः किन्तु शब्दान्तरेणान्येनाभिधायाः

६. ध्वनि. द्वि.उ. का–२१.
७. सा.द. च.प. शब्दशक्तिमूलध्वनिप्रकरणम् । ८. लोचन. ध्वनि. द्वि.उ. का–२१.

प्रतिप्रसवनात् अभिहितस्वरूपः सम्पन्नः ॥

एवमर्थान्तरे व्यञ्जनेति ध्वनिकारलोचनकारयोर्मतं स्थितम्। [९]स्वोक्त्याविष्कारस्थले तु लोचनकारस्य मतेनाभिधैव न व्यञ्जनेति विशेषः।

* अप्पयदीक्षितमतम् – [१०]अप्पयदीक्षितास्तु अत्र प्रत्यवतिष्ठन्ते । तन्मतेन अर्थान्तरेऽभिधा न तु व्यञ्जना । [११]असावुदयमारूढ इत्यादौ नानार्थकशब्द-प्रयोगस्थले प्रकरणेन राज–कर–मण्डलादिशब्दानां चन्द्र–किरण–बिम्बादिषु अर्थेष्विव नृपति–तद्ग्राह्यधन–राष्ट्ररूपेषु अर्थान्तरेष्वपि अभिधाया नियमनं भवति । नियामकस्तु शब्दान्तरसन्निधिरिति विशेषः । स च नानार्थकपदैकार्थ-मात्रसंसर्गि यदर्थान्तरं तद्वाचकपदस्य समभिव्याहारः, यथा – नागो दानेन राजते इत्यादौ । अत्र गजार्थमात्रसंसर्गि यन्मदजलं तद्वाचकस्य दानशब्दस्य समभिव्याहारेण सर्पगजोभयवाचकनागशब्दस्य मदगजे, मदजलार्थमात्रसंसर्गी च यो गजः तद्वाचकस्य नागशब्दस्य समभिव्याहारेण मदजलवितरणोभय-वाचकनागशब्दस्य मदजलेऽभिधाया नियमनम् । एवं प्रकृतेऽपि ।

ननु नृपति–तद्ग्राह्यधनादिषु अर्थान्तरेषु यदि शब्दान्तरसन्निधिः अभिधाया नियामक इत्युच्यते तर्हि चन्द्रकिरणादिष्वप्यर्थेषु सोऽपि वक्तुं शक्य इति स च प्रकरणं चेति नियामकाधिक्यम् । ततश्च कार्यसिद्धेः प्रकर्षायत्तत्वात् चन्द्रादिष्वेवार्थेषु अभिधाया नियमनं स्यात् न नृपत्यादिष्विति चेत् – विषमोऽयमुपन्यासः, नियामकाधिक्यात् चन्द्रादिष्वर्थेषु अभिधानियमने जाते नृपत्यादिष्वप्यर्थेषु नियामकस्य सत्त्वात् जायमानं तत् कथङ्कारं वार्यते? नहि अभिधानियमनं नियामकानां भूयस्त्वमपेक्षते किन्तु तत्सद्भावमात्रम् । तत्सद्भावस्त्वत्र स्फुटः । तत्रास्तु नाम नियामकानामाधिक्यात् प्रथमं चन्द्रादिष्वर्थेषु अभिधानियमनं ततो नृपत्यादिष्वर्थेष्विति, न तेन प्रकृते कापि हानिः, यतो यथाकथञ्चिदभिधयैव द्वयोरप्यर्थयोः बोधो भवतीत्यस्माकम्

---

९. सङ्केतकालमनसं विटं ज्ञात्वा विदग्धया ।
हसन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम् ॥ अत्र उत्तरार्धेन व्यज्यमानस्य पूर्वार्धेनाविष्कारः ।

१०. वृत्ति.वा. प्र.प.

११. असावुदयमारूढः कान्तिमान् रक्तमण्डलः
राजा हरति लोकस्य हृदयं मृदुलैः करैः ॥

आकूतम्। एवञ्चात्र अभिधयानेकार्थप्रतिपादनस्य सत्त्वात् सम्भवन् श्लेषालङ्कारो न कथञ्चिदपि वारयितुं शक्य इति सोऽप्यत्र स्वीक्रियते। स च श्लेषालङ्कारो न वर्ण्यविषयकः नाप्यवर्ण्यविषयकः किन्तूभयविषयक इति विशेषः। तत्राद्ये प्रभेदद्वये द्वयोरर्थयोः युगपद्बोध इति श्लेषोऽगूढः अन्त्ये पुनः पौर्वापर्येणेति गूढः। स्यान्नामायं विशेषः तथापि नायं तृतीयं प्रकारं श्लेषात् बहिर्भावयितुं शक्नोति किन्तु तस्यैवावान्तरप्रभेदतां विधातुम्, सामान्यलक्षणाक्रान्तेः समानत्वात्।

न च युगपदनेकार्थप्रतिपादनमेव श्लेषः, स च तृतीये प्रभेदे न सङ्गच्छत इति वाच्यम्, [१२]अयमतिजरठाः प्रकामगुर्वीरित्यादौ प्रकृतवृत्तान्तोत्तर-प्रतीयमानाप्रकृतवृत्तान्तरूपायाः समासोक्तेः श्लेषमूलकत्वेन वृद्धैः निर्णीतस्य दुर्घटत्वप्रसङ्गात्।

एवमर्थान्तरस्याभिधयैव बोधने सम्भवति तत्र व्यञ्जनेति यद्वचनं तन्नोपादेयमिति बोध्यम्। ननु

करोति कंसादिमहीभृतां वधाज्जनोमृगाणामिव यत्तव स्तवम्।
हरे! हिरण्याक्षपुरस्सरासुरद्विपद्विषः प्रत्युत सा तिरस्क्रिया॥

इत्यत्र हिरण्याक्षप्रभृत्यसुरेषु द्विपसादृश्यस्य प्रतिपादनेन हरिशब्दात् विष्णोरिव सिंहस्याप्यर्थस्य प्रत्ययो भवतीति निर्विवादम्। स चाभिधया कथमुपपद्यते? न तत्रार्थे प्रकरणम्, विवक्षितत्वाभावात्। नापि शब्दान्तरसन्निधिः, अवरतो द्वयोः नानार्थकशब्दयोः सत्त्व एव तदुत्थानात्। ततश्च प्रतीतिसिद्धस्य तदर्थस्योपपादनं व्यञ्जनामन्तरेण दुश्शकम् – मैवम्, विरोधेनाभिधाया नियमनात्। स च पुनः द्विपार्थेन हरिशब्दार्थस्येति स्फुटम्।

यत्र तु यस्याननं योनिरुदारवाचामित्यत्र कारणरूपार्थप्रतीतेः उत्तरम् अश्लीलार्थे नास्ति अभिधाया नियामकं तत्रापि बुभुत्सितार्थे संसक्तस्य मनसः क्वचित्तमतिक्रम्य दुर्गन्धादाविव प्राकरणिकार्थे संसक्तस्य तस्य तथैव कुत्सितार्थे प्रवृत्तिरिति नानुपपत्तिः।

१२ अयमतिजरठाः प्रकामगुर्वीरलघुविलम्बिपयोधरोपरुद्धाः।
सततमसुमतामगम्यरूपाः परिणतदिक्करिकास्तटीः बिभर्ति॥ उल्लेखः, कुव–श्लेषः।

अन्यच्चेदमवगन्तव्यम् – नानार्थकशब्दस्थलेऽर्थान्तरस्य प्रतीतेः व्यञ्जनयैव इत्याग्रहे संयोगादीनां नियामकत्वकल्पनस्य वैयर्थ्यापत्तिः, यतः तस्यार्थान्तर–वारणेनैव साफल्यम् । ततश्च अभिमतानभिमतक्षेत्रसाधारणात् जलाशयात् अभिमतक्षेत्रगामिनीं कुल्यामेकां निर्माय पश्चात् अनभिमतक्षेत्रगामितया कुल्यान्तरस्य निर्माणे कृतपूर्वस्य कुल्यानिर्माणस्येव अत्रापि नैरर्थक्यं संजायते ।

किञ्च अर्थान्तरस्याभिधया बोधो न भवतीति किं कारणमाग्रहः? अभिधा हि न्यायविन्नयेन सङ्केतः । स चार्थान्तरेऽपि वर्तते । अथ सङ्केतो नाभिधा किन्तु तद्ग्रहमपेक्ष्य प्रतिपादकत्वमित्युच्यते तदापि अर्थान्तरे तस्य वर्तनं नापलाप्यम् । ननु तद्ग्रहमपेक्ष्य प्रतिपादकत्वमिति लक्षणस्य लक्षणायाम् अतिव्याप्तिः? – मैवम्, प्रतिपादकत्वस्य साक्षात्त्वेन विशेषणात् । नन्वथापि येन [१३]ध्वस्तमनोभवेनेत्यादौ अवयवप्रसिद्ध्या प्रथमं निहतमन्मथरूपार्थस्य प्रतीतिरिति तेन व्यवधाने साक्षात्त्वाभावेन शकटासुरभञ्जनरूपार्थस्य व्यङ्ग्यत्वापत्तिरिति श्लेषस्योच्छेदप्रसङ्गः, असावुदयारूढ इति पद्ये तु सङ्केतस्य प्रसिद्धिरिति राजशब्दात् प्रथमं नृपस्य प्रतीतिः तद्वैपरीत्यात् पश्चात् चन्द्रस्येति प्रकृताप्रकृतार्थप्रतीत्योः लोकप्रसिद्धपौर्वापर्यस्य विपर्ययप्रसङ्गश्चेति चेत् – सत्यम्, एवं तर्हि मास्तु तल्लक्षणम्, सङ्केतितार्थप्रतिपादकत्वमिति अपेक्षाशब्दशून्यम् अन्यल्लक्षणं करिष्यते । एवमपि अर्थान्तरेऽभिधाया वर्तनं निर्विवादमिति सर्वत्रापि नानार्थकशब्दस्थले अर्थद्वयस्य अभिधेयत्वम् अनायाससिद्धम् । न चैवमभ्युपगमे शब्दशक्तिमूलवस्तुध्वनेः निरवकाशत्वम्, [१४]शनिरशनिश्चेत्यादौ अर्थद्वयप्रतीत्युत्तरं प्रतिभासमाने 'विरुद्धावपि द्वौ त्वदनुवर्तनार्थमेकं कार्यं कुरुतः' इत्यादौ वस्तुनि व्यङ्ग्ये सावकाशत्वात् ।

स्थिते चैवम्, इहाप्रस्तुतार्थस्य व्यङ्ग्यत्वमिति प्रकाशकारप्रभृतिभिः यन्निर्णीतं तत्तु तादृशार्थद्वयप्रतीतेरुत्तरं भासमानस्य वस्त्वलङ्कारयोरन्यतरस्य

१३. येन ध्वस्तमनोभवेन बलिजित्कायः पुरास्त्रीकृतः
यस्योद्ध्वृत्तभुजङ्गहरवलयो[ऽ]गङ्गां च योऽधारयत् ।
यस्याहुः शशिमच्छिरोहर इति स्तुत्यं च नामामराः
पायाद्वः स स्वयमन्धकक्षयकरः त्वां सर्वदो माधवः ॥

१४. शनिरशनिश्च तमुच्चैर्निहन्ति यस्मै कुप्यसि नरेन्द्र! त्वम् ।
यत्र प्रसीदसि पुनः स भात्युदारोऽनुदारश्च ॥

व्यङ्ग्यत्वमभिप्रेत्य न तु अप्रकृतार्थस्येति नासङ्गतिः । एवं [१५]'भ्रमिमरतिमल-सहृदयतामित्यत्र विषपदे गरलं व्यङ्ग्यं वाच्यस्य 'जलद एव भुजगः' इति रूपकस्य सिद्धिकृत्' इत्यादिवाक्येऽपि विभावनीयम् ।

* प्राचीनमतनिराकरणपूर्वकं जगन्नाथस्य मतम्

जगन्नाथस्तु अप्राकरणिकार्थेऽभिधेति दीक्षितानां मतमभ्युपयन्नपि प्रकारान्तरेण तत्समर्थयते । तदिदानीं तत्कृतप्राचीनमतनिरूपणं निराकरणसहितं समासेन निगद्यते । तत्रादौ प्राचीनमतनिरूपणं यथा –

अभिधामूलव्यञ्जनायां प्रकाशकारादीनामयं तावत्सिद्धान्तः –

अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते ।
संयोगाद्यैरवाच्यार्थधीकृद् व्यापृतिरञ्जनम् ॥

नानार्थकशब्दस्थलीयशाब्दबोधे तात्पर्यज्ञानस्य कारणत्वमुररीकुर्वतामेकम् अन्यच्च तदनुररीकुर्वतामिति अस्याः कारिकाया द्वेधा व्याख्यानं सम्भवति । तयोराद्यं यथा –

सशङ्खचक्रो हरिरित्यादेः नानार्थकशब्दघटितवाक्यस्य श्रवणे सति सङ्केतस्य समानत्वात् विष्णुकपिसिंहादीनां सर्वेषामर्थानामुपस्थितौ कस्मिन्नर्थे वक्तुः तात्पर्यमिति सन्देहो भवति श्रोतुः । तदनु संयोगादिपर्यालोचनेन विष्णुरूपार्थे तात्पर्यमिति निर्णयो भवति । तस्मिंश्च सति यत्रार्थे तात्पर्यं गृहीतं तादृशे विष्णावर्थे शक्तेर्नियमनम् । ततः तदर्थमात्रविषयकोपस्थितिः । ततश्च तदर्थे अर्थान्तरेणान्वयस्य बोध इति क्रमः । नन्वत्र सर्वार्थविषयिकया प्रथमोपस्थित्यैव वाञ्छितस्य सिद्धेः तात्पर्यविषयीभूतार्थमात्रविषयिका द्वितीयोपस्थितिः व्यर्थेति चेत् – न, उपस्थितिशाब्दबोधयोः समानाकारकत्वमिति नियमस्य संरक्षणार्थं तस्या आवश्यकत्वात् । नन्वेवमपि यदा विवक्षितार्थविषयिकोपस्थितिः तदैव शक्तिग्रहस्य पदज्ञानस्य च कारणस्य सत्त्वेन अप्राकरणिकार्थविषयिकापि उपस्थितिः जायेत – नैष दोषः, तस्यां तात्पर्यज्ञानस्य प्रतिबन्धकत्वकल्पनात् ।

---

१५. भ्रमिमरतिमलसहृदयतां प्रलयं मूर्च्छां शरीरसादम् ।
मरणं च जलदभुजगजं प्रसह्य कुरुते वियोगिनीनाम् ॥

अत एव सशङ्खचक्रो हरिः इत्यादौ वाक्ये श्रुते विष्णोरेवार्थस्य प्रतीतिः न तु कप्यादेरिति समेषामनुभवोऽपि उपपद्यते नो चेदन्यस्याप्यर्थस्य बोधप्रसङ्गः।

स्थिते चैवम्, यत्र पुनः अर्थान्तरमप्यनुभवसिद्धं तत्र व्यञ्जनयैव तद्बोध उपपादनीयः, यथा – [१६]'गामाक्रम्य विभूतिभूषिततनू राजत्युमावल्लभः' इत्यादौ। अत्र हि ऐश्वर्यालङ्कृतशरीरस्य स्वायत्तीकृतभूमण्डलस्य भानुदेवनृपतेः प्रतीतौ सत्यां पश्चात् व्यञ्जनया भस्मालङ्कृशरीरस्य वृषभारूढस्य शङ्करस्य प्रतीतिः। एवमुल्लास्य [१७]कालकरवालेति प्रकाशोदाहृते पद्ये 'सुरभि मांसं भक्षयति' इत्यादौ वाक्ये च बोध्यम्।

इत्थमभ्युपगमे हरिकारिकायाः साधीयः सङ्गतिः भवति। तत्र हि संयोगादीनां विशेषस्मृतिहेतुत्वमुच्यते। सा च विशेषविषयिका स्मृतिः एकार्थ-विषयिकोपस्थितिरेव नान्या कापि। सा चाङ्गीकृतैवेति मतस्यास्य स्फुटमेव हरिसम्मतत्वम्। संयोगाद्यैः वाचकत्वस्य नियन्त्रणमिति कारिकोक्तस्यापि पूर्ववत् साधीयः सङ्गतिः, तात्पर्यनिर्णयद्वारा कुत्रचिदर्थे शक्तेर्नियमनस्य अभ्युपगमादिति॥

एवं चैतन्मतानुसारेण नानार्थकशब्दैः यत्र प्राकरणिकार्थमात्रस्य अनुभवसिद्धत्वं तत्र प्रथमे क्षणे नानार्थकपदज्ञानम्, द्वितीये सर्वेषामर्थानाम् उपस्थितिः, तृतीये तात्पर्यसन्देहः, चतुर्थे तद्दूरीकारकस्य प्रकरणादेः पर्यालोचनम्, पञ्चमे तात्पर्यनिर्णयः, षष्ठे तद्विषयीभूतार्थमात्रविषयिका उपस्थितिः, सप्तमे तदर्थस्यान्वयबोध इति सप्त क्षणाः। अथ अप्राकरणिकार्थस्यापि अनुभवसिद्धत्वं तदाष्टमे क्षणे तदर्थस्योपस्थितिः, नवमे तदर्थस्यान्वयबोध इत्यन्यावपि द्वौ क्षणौ। अथ प्रकृताप्रकृतयोरर्थयोः औपम्यादेः यद्यनुभवसिद्धत्वं तर्हि अन्योऽपि एकः क्षण इति नानार्थकशब्द-जन्यपार्यन्तिकबोधे दश क्षणा अपेक्षिता भवन्ति।

१६. दुर्गालङ्घितविग्रहो मनसिजं सम्मीलयंस्तेजसा
प्रोद्यद्राजकलो गृहीतगरिमा विष्वग्वृतो भोगिभिः।
नक्षत्रेशकृतेक्षणो गिरिगुरौ गाढां रुचिं धारयन्
गामाक्रम्य विभूतिभूषिततनू राजत्युमावल्लभः॥

१७. उल्लास्य कालकरवालमहाम्बुवाहं देवेन येन जरठोर्जितगर्जितेन।
निर्वापितः सकल एव रणे रिपूणां धाराजलैस्त्रिजगति ज्वलितः प्रतापः।

द्वितीयं मतं यथा – नानार्थकशब्दस्य श्रवणे सति सर्वेषामर्थानामुपस्थितिः, ततः तात्पर्यसन्देहः, ततः तदपाकरणहेतोः प्रकरणादेः ज्ञानम्, ततः तात्पर्य-निर्णयः इत्येतैरंशैः प्रथममतेन साम्ये सत्यपि नानार्थस्थलीयशाब्दबोधं प्रति तात्पर्यज्ञानस्य कारणताकल्पनमित्येतदंशेन तावत् स्फुटमेव ततोऽत्र वैलक्षण्यम् । ततश्च कारणान्तरस्य पदज्ञानस्य सन्निधाने सत्यपि यावन्न तात्पर्यनिर्णयः तावन्न शाब्दबोध इति नात्र एकार्थमात्रविषयकोपस्थितिः नापि प्रकरणादिज्ञानस्य तज्जन्यतात्पर्यज्ञानस्य वा अर्थान्तरोपस्थितौ प्रतिबन्धकताकल्पनम् । एवं चात्र लाघवं स्फुटम् ।

न चैकार्थमात्रविषयकोपस्थितेरनपेक्षितत्वे उपस्थितिशाब्दबोधयोः [१८]समानाकारकत्वमिति नियमस्य कथं संरक्षणमिति वाच्यम्, तस्य प्रायिकत्वेन अभ्युपगमात् । हरिग्रन्थस्तु विशेषः तात्पर्यम्, तस्य स्मृतिर्निर्णय इति विशेषस्मृतिपदं तात्पर्यनिर्णयपरत्वेन व्याख्याय सङ्गतिं नीयत इति दोषाभावः। किञ्च प्रतिबन्धकत्वकल्पनमपि अप्रामाणिकम्, अप्राकरणिकार्थे तात्पर्यस्य अभावेन तज्ज्ञानरूपकारणस्याभाव इति तदर्थस्य स्वयमेवानुत्थानात्। न चात्र संयोगाद्यैः वाचकताया नियन्त्रणमिति मूलग्रन्थस्यानुपपत्तिः स्थितैवेति वाच्यम्, एकार्थविषयकतात्पर्यनिर्णयजननद्वारा शाब्दबोध आनुकूल्याचरणम् इत्यभिप्रायेणाभिधानात् ।

इत्थं गामाक्रम्येत्यादौ प्रकरणादिज्ञानजन्यतात्पर्यनिर्णयेन भानुदेवनृपति-विषयकवाक्यार्थस्य बोधे पश्चाज्जायमानः शिवविषयकवाक्यार्थबोधः व्यञ्जना-मात्रेण समर्थनीय इत्येतत्सर्वं प्रागवत् ।

तत्कृतं निराकरणं यथा – तदेतदुभयमपि व्याख्यानमयुक्तम्, तथाहि – यत्तावदुक्तं प्रथमव्याख्याकारैः विवक्षितार्थे शाब्दबोधे साधनीय एकार्थ-विषयिकोपस्थितिः अपेक्षणीया भवति, अप्राकरणिकार्थप्रतीतिवारणाय च प्रकरणादिज्ञानस्य तदधीनतात्पर्यनिर्णयस्य वा प्रतिबन्धकता कल्पनीयेति – तद् द्वयमपि तुच्छम्, द्वितीयव्याख्याकारोक्तरीत्या नानार्थस्थलीयशाब्दबोधं

१८. यत्प्रकारकयद्विशेष्यिका उपस्थितिः तत्प्रकारकतद्विशेष्यकः शाब्दबोध इति समानप्रकारकत्वेन समानविशेष्यकत्वेन च समानाकारकत्वम् ।

प्रति तात्पर्यज्ञानस्य हेतुताकल्पन एव लाघवात् ।

प्रतिबन्धकत्वकल्पनमपि यदुक्तम् – तदप्यनुभवविरुद्धम्, प्रकरणादि-ज्ञानवतामपि प्राकरणिकस्येव अप्राकरणिकस्यापि अर्थस्य प्रतिभानात्, तथाहि – क्षीरं स्वीक्रियताम् इत्याशयेन पयो रमणीयमिति वाक्यं प्रयुज्यते गृहपतिना सुखासीनानतिथीनुद्दिश्य । श्रुतवाक्यास्ते वक्तुस्तात्पर्यं जानन्तोऽपि तदानीं सन्निहितान् पांसुरपादान् गृहपतिवाक्यश्रवणात् प्राप्तसंशयान् अन्यान् कांश्चित पुरुषान् सम्बोध्य विवरणं कुर्वन्ति – 'भोः! नूनमस्य दुग्धे तात्पर्यं न तु जले' ॥ यदि प्रकरणादिज्ञानम् अर्थान्तरोपस्थितौ प्रतिबन्धकं तर्हि 'न तु जले' इति निषेधगर्भं विवरणं तत्कृतं कथं सङ्गच्छते । न च व्यञ्जनया तस्य बोध इति वाच्यम्, समुल्लासे निमित्ताभावात् । तदयुक्तमेव प्रतिबन्धकत्व-कल्पनम् । एवं सशङ्खचक्रो हरिः इत्यादिवाक्यश्रवणोत्तरं वक्तुराशयमजानन्तं बालादिं प्रति हरिशब्दस्यात्र विष्णुरित्यर्थः न तु सूर्यादिः इति केनचित् क्रियमाणे विवरणेऽपि तन्मतस्यासङ्गतत्वं बोध्यम् ।

यत्पुनः उभयैरप्युक्तम्, अप्राकरणिकार्थे व्यञ्जनेति – तत्र प्रष्टव्यम्, किं नानार्थस्थले सर्वत्रापि व्यञ्जनोल्लासः आहोस्वित् क्वचिदेव? न तावदाद्यः, सर्वत्र व्यञ्जनोल्लासे प्रथमैः कल्पितस्य संयोगादीनां नियामकत्वस्य द्वितीयैश्च तात्पर्यज्ञानकारणत्वस्य वैयर्थ्यापत्तिः यस्मात् तयोरुभयोरपि अप्राकरणिकार्थ-प्रतीतिवारणेनैव सार्थक्यम् ।

ननु भोः! नास्ति वैयर्थ्यापत्तिः, तयोरुभयोः कल्पने सत्येवाप्राकरणिकार्थे व्यञ्जनेति सिध्यति । एतेन प्राकरणिकस्य प्रथमं प्रतीतिः ततोऽप्राकरणिकस्येति तत्प्रतीत्योः सर्वजनसिद्धं पौर्वापर्यमपि सुतरां घटते । अथ न क्रियते तत्कल्पनं तर्हि अप्राकरणिकार्थेऽभिधेति श्लेष इव प्राकरणिकाप्राकरणिकयोः अर्थयोः युगपदेव प्रतीतिः जायेत – अये! जायतां कामम्, को दोषः? नह्येतावता स्वर्गः च्यवते भूमिश्च कम्पते । यद्वर्ण्यश्लेषे यच्चावर्ण्यश्लेषे तदत्रापि भविष्यति ।

यदुक्तं पुनः प्राकरणिकाप्राकरणिकार्थप्रतीत्योः पौर्वापर्यं सर्वजनसिद्धं सुतरां घटत इति – तत्तु तात्पर्यविषयत्वाविषयत्वाभ्यां भान्त्या, युगपदित्येव

परमार्थः । एतेन द्वयोरर्थयोः प्रकरणिकत्व एकः, अप्राकरणिकत्वेऽपरः, उभयरूपत्वेऽन्य इति श्लेषः त्रिप्रकार इत्युक्तं भवति । न च शब्दशक्त्युद्भध्वनेः निर्विषयत्वम्, उभयोरर्थयोः प्रतीतौ सत्यां प्रतीयमाने सादृश्यादौ तस्य सावकाशत्वात् । एतदभिहितं भवति – प्रकरणादिज्ञानजन्यतात्पर्यनिर्णयस्य शाब्दबोधं प्रति कारणत्वं नास्ति । तस्य केवलं बहुष्वर्थेषु उपस्थितेषु तात्पर्यसन्देहात् प्रवृत्तौ निवृत्तौ वा स्थगितायां तज्जननमात्रेणैवोपयोगः । ततश्च बोधे न कोऽप्युपयोगः उपयोगस्तु केवलं तदुत्तरकाल इति ।

नापि द्वितीयः, क्वचित्कत्वे हेतोरभावात् । न चार्थान्तरे कवितात्पर्यं यद्यस्ति तर्हि व्यञ्जनोन्मेषः अन्यथा नैवेति हेतुः सुवच इति वाच्यम्, तात्पर्यज्ञानस्य बोधात् परमेव प्रसक्तिरिति अनुपदमेवाभिधानात् । अतः अर्थान्तरस्य शक्तिवेद्यत्वमेव न तु व्यक्तिवेद्यत्वम् ।

एवमत्र जगन्नाथेन द्वितीयमाश्रित्य प्रथमं मतं निराकृतम् ततो युक्तिमाश्रित्य द्वितीयमपि मतमिति विशेषो विभावनीयः ।

तदित्थमर्थान्तरेऽभिधेत्यत्र समानकण्ठावपि दीक्षितजगन्नाथौ तदुपपादन-विषये विप्रतिपन्नाविति स्पष्टम् । तत्र दीक्षिताः संयोगादीनामभिधा-नियामकत्वमभ्युपयन्त एव नियामकान्तरस्वीकारद्वारा अर्थान्तरेऽभिधां व्यवस्थापयन्ति । जगन्नाथस्तु तेषामभिधानियामकत्वं प्रत्याचक्षाणः तात्पर्य-निर्णायकत्वमात्रम् अनुमत्य सङ्केतबलेनैव अर्थान्तरप्रतीतिमुपपादयति । तन्मतेन तात्पर्यनिर्णयस्य प्रवृत्तिनिवृत्तिविधायकत्वात् न बोधे उपयोगः किन्तु ततो जायमाने प्रवृत्त्यादिनिर्णये । दीक्षितानां प्राकरणिकत्वेऽप्राकरणिकत्वे च प्रतीत्योः यौगपद्यमिष्टम् प्राकरणिकाप्रकरणिकत्वे तु पौर्वापर्यम् । जगन्नाथस्य तु सर्वत्रापि यौगपद्यम् ।

दीक्षितानां नानार्थकस्थले शक्त्यनेकत्वं सम्मतम् । जगन्नाथस्य तु कोऽभिप्राय इति स्फुटं न ज्ञायत इति मतद्वये मिथो वैलक्षण्यम् ।

*** कस्तावदत्र निर्णयः?**

अस्माकमिदं भाति – यदेतन्मतचतुष्टयमुपन्यस्तम् तेषु किं मतं ज्याय इति पर्यनुयोगेऽन्तिमं मतद्वयम्, तत्रापि सूक्ष्मेक्षिकायां जगन्नाथस्य मतमित्येव

उत्तरं साधु, शब्दार्थसम्बन्धस्य नित्यत्वात् नित्यस्य प्रयत्नशतेनापि प्रतिबन्धुम् अशक्यत्वात् नानार्थकशब्दाकर्णने सङ्केतविषयाणां सर्वेषामर्थानाम् उपस्थितेः अवश्यम्भावात् ।

ननु सम्बन्धस्य नित्यत्वेन प्रतिबन्धुमशक्यत्वेऽपि तत्प्रयुक्तप्रतिपादकत्वस्य शब्दव्यापारस्य प्रतिबन्धस्तावत् सुकरः, यथा – वह्न्यौष्ण्ययोः सम्बन्धस्य नित्यत्वेऽपि तत्प्रयुक्तदहनस्य वह्निव्यापारस्य मणिमन्त्रादिना प्रतिबन्धः, यथा वा – जलद्रवत्वयोः सम्बन्धस्य नित्यत्वेऽपि तत्प्रयुक्तक्लेदनस्य जलव्यापारस्य कम्बलाद्याच्छादनेनेति चेत् – सत्यम्, सर्वमेतदन्यत्रैव न पुनः स्मृतौ । स्मृतिर्हि संस्कारोद्बोधकयोः सत्त्वे ब्रह्मणापि प्रतिबन्धुं न शक्यते, तदुक्तं जगन्नाथेन – [१९]संस्कारोद्बोधकयोः सत्त्वे स्मृतेः प्रतिबन्धस्य क्वाप्यदर्शनात्॥ तत्र उद्बोधकं पदज्ञानमिति बोध्यम् । तत्र शक्तिशब्देन सङ्केतस्यैव ग्रहणम्, अभिधाया ग्रहणे तु व्यापाररूपायां तस्यां संस्कारं प्रति विषयत्वस्यासम्भवात् । किञ्च शब्दव्यापारस्य प्रतिबन्धुं शक्यत्वे पयो रमणीयमित्यादौ सर्वजनसिद्धस्य अर्थान्तरबोधस्य दुरुपपादत्वप्रसङ्गः । न च व्यञ्जनया तदर्थस्य बोध इति वाच्यम्, निमित्ताभावेन तस्या अनाविर्भावात् कथञ्चिदाविर्भावेऽपि अर्थस्यानन्वितत्वेन तद्बोध्यत्वनिर्णयस्यानुचितत्वाच्च । नहि अनन्वितोऽर्थः व्यञ्जनाया विषयो भवति ।

यस्याननं योनिरुदारवाचाम् इत्यादौ अश्लीलाख्यो दोषोऽर्थान्तरस्य अभिधयोपपादनेऽपि सङ्गच्छत इति न काप्यनुपपत्तिः, प्रत्युतानुपपत्तिः व्यञ्जनया तदुपपादने, तदुल्लासे निमित्तस्य वक्तुमशक्यत्वात् । न च श्लिष्टशब्दप्रयोगो निमित्तम्, सचङ्खचक्रो हरिरित्यादावपि तदुल्लासप्रसङ्गात् । न चेष्टापत्तिः, अर्थान्तरप्रतीतेः सार्वत्रिकत्वे प्राचीनैः कल्पितस्य संयोगादीनां नियामकत्वस्य तात्पर्यज्ञानकारणत्वस्य वा नैरर्थक्यापत्तिरिति प्रागेवाभिधानात् । अस्माकं तु मते तात्पर्यविषयत्वाभावेऽपि तदर्थोपस्थितेः सम्भवतामात्रेण दोषस्य उपपत्तिरिति दोषाभावः ।

ननु अर्थान्तरस्य यद्यभिधया प्रतीतिः तर्हि

१९. रस. द्वि.आ. शब्दशक्तिमूलध्वनिप्रकरणम् ।

भुक्तिमुक्तिकृदेकान्तसमादेशनतत्परः ।
कस्य नानन्दनिस्यन्दं विदधाति सदागमः ॥

इत्यादौ सदागमशब्देन सच्छास्त्रस्य बोधे तेनैव बोधितस्य जारागमन–पर्यवसितस्य सज्जनागमनस्य गोपनीयत्वं कथं समर्थ्यते? अभिधाबोध्यार्थे सर्वप्रकाशत्वस्य स्वतः सिद्धत्वादिति चेत् – उच्यते, वाक्यादस्मात् युगपदेवार्थद्वयस्य प्रतीतिरिति निर्विवादम् । किन्तु वक्त्री साध्वी आहोस्वित् जारिणीति निर्णयाभावात् अर्थान्तरे विवक्षिततत्वस्यानिर्णय इति गोप्यत्वेन व्यवहारः । यदि कथञ्चित् प्रकरणादिना वक्त्री जारिणीति ज्ञानं भवति तदा सन्देहविषयीभूतप्रकरणादिनावगतस्य तज्जारिणीत्वस्य न निश्चयात्मकज्ञान–विषयत्वमिति गोप्यत्वेन व्यवहारो निर्बाधः । अथ पुनः कयाचित् प्रबलया युक्त्या प्रकरणादेरपि निश्चयज्ञाने विषयत्वं तदाप्यर्थान्तरस्य तादृशयुक्ति–ज्ञानवतामेव प्रकाशत्वं न तु सर्वेषामिति गोप्यत्वं सुस्थम् । नन्वथापि तादृशयुक्तिज्ञानवताम् तदर्थान्तरं प्रकाशमेवेति चेत् – मैवम्, तेषामपि युक्त्यन्वेषणे किञ्चित्काल आवश्यक इति विवक्षिततत्वस्य मान्थर्येण निर्णये सत्यायातमेव गोप्यत्वम् इत्यार्थान्तरस्य अभिधाबोध्यत्वेऽपि न काप्यनुपपत्तिः ।

एवं तर्हि व्यङ्ग्यस्यात्राभावात् पद्यमिदं ध्वनेरुदाहरणं न स्यात् – मैवम्, रमणार्थं सपद्येव मन्निकटमागच्छेति व्यङ्ग्यस्य वस्तुरूपस्य जागरूकत्वात् । तत्र पुनः परिवृत्तिमसहमानानां शब्दानां सद्भावात् यथा शब्देषु शक्तिः तथा वक्तृवैशिष्ट्यज्ञानस्य अपेक्षिततत्वात् अर्थेष्वपि शक्तिरिति विशेषो विभावनीयः । एवम् [२०]अत्ता एत्थ णिमज्जइ इत्यादावपि ऊह्यम् । एवमभिधामूलव्यञ्जनया आर्थव्यञ्जनया च सम्भूय यत्रैकस्यार्थस्य प्रतिपादनं तत्रैव उभयशक्त्युद्भव–ध्वनिरिति व्यवस्थापयितुं शक्ये [२१]अतन्द्रचन्द्राभरणेति पद्ये मम्मटेन,

२०. अत्ता एत्थ णिमज्जइ एत्थ अहं दिअसअं पलोएहि ।
मा पहिअ! रत्तिअन्धिअ! सेज्जाए मह णिमज्जइसि ॥
[श्वश्रूरत्र निमज्जति अत्राहं दिवसकं प्रलोकय ।
मा पथिक! रात्र्यन्धक! शय्यायां मम निमङ्क्ष्यसि ॥ छाया ।

२१. अतन्द्रचन्द्राभरणा समुद्दीपितमन्मथा ।
तारकातरला श्यामा सानन्दं न करोति कम् ॥ का.प्र. च.उ. उभयशक्त्युद्भवध्वनिप्रकरणम् ।

[२२]हिममुक्तचन्द्ररुचिरेति पद्ये विश्वनाथेन, [२३]रम्यहासा रसोल्लासेति पद्ये जगन्नाथेन च योऽयं ध्वनिर्निर्णीयते तदन्त्यन्तमशोभनम्, अर्थशक्तेरभावात्। न च परिवृत्तिमसहमानानामिव सहमानानामपि प्रयोगात् सा नूनमस्तीति वाच्यम्, एवं हि शब्दशक्त्युद्भवध्वनेः निर्विषयत्वापत्तेः। तस्मादस्मदुक्तरीत्यैव विभागो युक्तः ॥

यत्पुनः अप्राकरणिकार्थेऽभिधेति व्यवस्थाप्य

योगरूढस्य शब्दस्य योगे रूढ्या नियन्त्रिते ।
धियं योगस्पृशोऽर्थस्य या सूते व्यञ्जनैव सा ॥

इत्यभिधाय जगन्नाथेन

अबलानां श्रियं हृत्वा वारिवाहैः सहानिशम् ।
तिष्ठन्ति चपला यत्र स कालः समुपस्थितः ॥

इति पद्ये अबला–वारिवाह–चपलारूपयोगरूढशब्दप्रयोगबलात् योगरूढिशक्त्या 'यत्र काले विद्युतो विरहिणीनां शोभामपहृत्य मेघैः सह लसन्ति तादृशो वर्षाकालः समुपस्थितः' इति रूढ्यर्थघटितवाक्यार्थस्य प्रतितौ सत्यां 'यत्र काले दुर्बलानां धनमपहृत्य पुंश्चल्यो जलवाहकपुरुषैः सह रमन्ते तादृशो ग्रीष्मकालः समुपस्थितः' इति वाक्यार्थान्तरस्य प्रतीतिः भवति। अयं च वाक्यार्थः अबलादिभिः शब्दैः यथाक्रमं दुर्बलजलवाहक–पुंश्चलीशु अर्थेषु उपस्थितेषु सत्स्वेव सम्भवति किन्तु एतेऽर्था योगरूढशब्द–गतया योगशक्त्या न प्रतीयन्ते, समानाधिकरणया रूढिशक्त्या नियन्त्रणात्। तस्मात् व्यञ्जनयैव एतेषामर्थानां प्रतीतिरुपपादनीया इत्यभिप्रेतम् – तन्न विचारवतां हृदयं स्पृशति, 'संस्कारतदुद्बोधकयोः सत्त्वे स्मृतेः प्रतिबन्धस्य क्वाप्यदर्शनात्' इति नियामकत्वकथाया स्वयमेव दूरीकरणात्, अन्वितार्थ–प्रतिपादकत्वस्य तत्स्वभावस्य भङ्गप्रसङ्गाच्च। ततश्च परिशेषात् योगशक्त्यैव तत्प्रतीतिरिरिति ज्ञेयम् ।

२२. हिममुक्तचन्द्ररुचिरः सपद्मको मदयन् द्विजाञ्जनितमीनकेतनः ।
अभवत्प्रसादितसुरो महोत्सवः प्रमदाजनस्य स चिराय माधवः ॥
२३. रम्यहासा रसोल्लासा रसिकालिनिषेविता ।
सर्वाङ्गशोभासम्भारा कामिनी कस्य न प्रिया ॥ रस. द्वि.आ. उभयशक्त्युद्भवध्वनिप्रकरणम् ।

न च योगशक्तेः रूढ्यर्थान्वितार्थप्रतिपादकत्वनियमात् कथं केवलावयवार्थ-प्रतिपादकत्वमिति वाच्यम्, तन्नियमे प्रमाणाभावात् । योगाद्रूढिः बलीयसीति वाक्यं तु योगार्थे रूढ्यर्थस्य विशेष्यत्वात् प्राधान्यमिति तद्बोधकशक्तेरपि प्राधान्यमित्यभिप्रायेण प्रवृत्तं न तु योगनियामकत्वाभिप्रायेण। एवं रूढिर्योगापहारिणीत्यत्रापि बोध्यम् । अत एव 'जलजानि विराजन्ते रमणीये सरोवरे' इत्यादौ योगार्थस्य रूढ्यर्थे विशेषणतया प्रतीतिः । क्वचित्तु योगरूढिबोधितयोः द्वयोरर्थयोः केनापि हेतुनान्यतरार्थमात्रस्य विवक्षितत्वात् अन्यस्य असत्कल्पत्वमिति नास्ति गुणप्रधानभाव इति तु विषयान्तरम्, तच्च यथा – [२४]नाभ्युद्गताम्बुरुहकुड्मलपङ्क्तिशोभाम् इत्यादौ । अत्र पद्मस्य नाभ्युद्गतत्वेन विशेषणादन्वयाभाव इति अम्बुजनिकर्तृरूपयोगार्थस्य अविवक्षितत्वम् । एवं स्थलपङ्कजमित्यत्रापि बोध्यम् । पङ्कजाक्षीत्यादौ पङ्कजनिकर्तृपद्मसदृशनयनवती इत्यर्थवर्णने पङ्कजनिकर्तृताप्रयुक्तस्य कुत्सितत्वस्य प्रतीतिः साक्षात् पद्मे ततस्तु तत्सदृशे नयनद्वय इत्यपकर्षः तथापि पद्मस्य उपमानतया निर्देशात् तस्य चाधिकगुणवत्त्वनियमात् प्रकर्षस्यैव उपपादनीयत्वात् अपकर्षप्रयोजकीभूतस्य योगार्थस्य सतोऽप्यत्राविवक्षितत्वम् । [२५]कह्लारकैरवमुखेष्वपि पङ्कजेष्वपि इत्यादौ तु कह्लारादीनां पङ्कजत्वेन विशेषणात् पद्मरूपरूढ्यर्थस्य अन्वयाभावादविवक्षितत्वमिति पूर्वस्माद्विशेषः।

एवञ्च प्रागुक्तस्थलेऽबलादिभिः शब्दैः योगशक्त्या दुर्बलादीनाम् अर्थानामुपस्थितिः, रूढिशक्त्या वनिताद्यर्थानाम् । तत्र योगार्थानां रूढ्यर्थैः यथान्वययोग्यता तथा स्वेषु स्वेष्वेव परस्परमपीति विशेषः । तत्र परस्परमन्वये ग्रीष्मकालधर्मिको वाक्यार्थः, रूढ्यर्थेनान्वये तु वर्षाकालधर्मिक इति सर्वस्यापि निर्वाहे व्यञ्जना नावश्यकीत्येव प्रतिभाति ।

अथवास्तु रूढेः योगं प्रति नियामकत्वम् किन्तु तन्नियामकत्वं सर्वत्र आहोस्वित् क्वचिदेव? नाद्यः, तथा सति न कथञ्चिदपि योगार्थस्य प्रतीतिरिति

२४. उलासयत्युदरबन्धनिबद्धदिव्यशोणाश्मरश्मिकलितकलिकावलिरच्युतैषा । वृत्तिवा.द्वि.प.
आगाम्यनेकशतकल्पविधातृगर्भनाभ्युद्गताम्बुरुहकुड्मलपङ्क्तिशोभाम् ॥

२५. कह्लारकैरवमुखेष्वपि पङ्कजेषु लोकेश! यत्कमलमेव तथा प्रसिद्धम् ।
मन्येऽभिजातभवदास्यतुलास्य नेति मर्मप्रकाशनमिदं विधिनैव क्लृप्तम् ॥ वृत्तिवा.द्वि.प.

पङ्कजादिशब्दानां योगरूढत्वेन परिगणनस्य असङ्गतत्वापत्तिः, [२६]तव प्रसादात्कुसुमायुधोऽपीत्यत्र योगार्थप्रतीत्या दुर्बलायुधत्वरूपव्यङ्ग्यार्थस्य अप्रतीतिप्रसङ्गश्च । नापि द्वितीयः, हेतोरभावात् । अन्यच्च, पक्षद्वयेऽपि व्यञ्जनोल्लासे निमित्तस्य वक्तुमशक्यत्वम् ।

एवं नियामकत्वकल्पने शिथिलीभूते या वृत्तिः यावदर्थं क्रामति तावति ततो न्यूने वा अर्थे सैव वृत्तिरिति निर्णयो युक्तः । तत्र विशिष्टार्थस्य अर्थान्तरेणान्वययोग्यत्वे तस्य समग्रस्य उपादेयत्वम्, भागमात्रस्य तथात्वे तावत एव तत् शिष्टस्य तु प्रतिभातस्यापि अविवक्षितत्वमिति विवेकः । अत एव वेदान्तपरिभाषायाम् आगमपरिच्छेदे लक्षणावृत्तिनिरूपणवेलायां विशिष्टवाचकपदानामेकदेशपरत्वे न लक्षणेति निर्णीतम्, तथाहि – वयं तु ब्रूमः – सोऽयं देवदत्तः, तत्त्वमसि इत्यादौ विशिष्टवाचकपदानामेकदेश-परत्वेऽपि न लक्षणा, शक्त्युपस्थितयोः विशिष्टयोरभेदान्वयानुपपत्तौ विशेष्ययोः शक्त्युपस्थितयोः अभेदान्वयाविरोधात्, यथा – घटोऽनित्य इत्यत्र घटपद-वाच्यैकदेशघटत्वस्यायोग्यत्वेऽपि योग्यघटव्यक्त्या सहानित्यान्वयः ॥ पुनश्च तत्रैवाग्रे – एवमेव तत्त्वमसीत्यादिवाक्येऽपि न लक्षणा, शक्त्या स्वातन्त्र्येण उपस्थितयोः तत्त्वंपदार्थयोः अभेदान्वये बाधकाभावात् । अन्यथा गेहे घटः, घटे रूपम्, घटमानयेत्यादौ घटत्वगेहत्वादेरभिमतान्वबोधायोग्यतया तत्रापि घटादिपदानां विशेष्यमात्रपरत्वं लक्षणयैव स्यात् । तस्मात् तत्त्वमसीत्यादिवाक्येषु आचार्याणां लक्षणोक्तिरभ्युपगमवादेन बोध्येति दिक् ॥

व्यञ्जनेयमभिधामूला, शब्दानामर्थान्तरेऽपि अभिधा वर्तत ज्ञाने सत्येवास्याः समुन्मेषादिति प्राचीनमतेन । अर्थद्वयस्याप्यभिधया ज्ञाने सति तदवयवक-वस्त्वादिरूपार्थे समुन्मेषादिति नवीनमतेनेति वैलक्षण्यम् । अस्या उदाहरणम् –

उच्चरद्भूरिकीलालः शुशुभे वाहिनीपतिः ।

नानार्थकशब्दघटितेऽस्मिन् वाक्ये कीलालावहिनीपतिरूपशब्दद्वयस्य अभिधायां प्रकरणेन क्रमेण रुधिरे सेनापतौ चार्थे नियन्त्रितायां 'स्रवदधिक-

२६. तव प्रसादात्कुसुमायुधोऽपि सहायमेकं मधुमेव लब्ध्वा ।
कुर्यां हरस्यापि पिनाकपाणेः धैर्यच्युतिं के मम धन्विनोऽन्ये ॥ कुमार. स–तृ. श्लो–१०

रुधिरः सेनापतिरशोभत' इति वाक्यार्थस्य सिद्धिः । ततो व्यञ्जनया जलसमुद्रयोरर्थयोः प्रतीतौ 'उत्पतदधिकजलः समुद्रोऽशोभत' इति वाक्यार्थान्तरस्य सिद्धिः । ततः पुनः अप्रस्तुतवाक्यार्थस्य प्रतिपादनं कुत इति वैयर्थ्याशङ्कायां तन्निवारणाय प्रकृतार्थपरिपुष्टिप्रयोजकं 'वाहिनीपतिः वाहिनीपतिरिव' इत्यौपम्यमङ्गीक्रियत इति प्राचीनाः । ततश्च तेषां मतेन एको वाच्यः द्वौ च व्यङ्ग्याविति ज्ञेयम् ।

[२७]जगन्नाथस्तु अभिधानियमनस्याप्रामाणिकत्वात् समुद्रविषयक-वाक्यार्थस्यापि अभिधयैव प्रतीतिरिति वदन् समानशब्दोपात्तत्वादभेदस्यैव प्रतीतिरिति 'वाहिनीपतिः वाहिनीपतिरिव' इति रूपकमभ्युपैति । ततश्च एतेषां मतेन द्वौ वाच्यौ एकश्च व्यङ्ग्य इति विशेषः । पुनश्च श्लेषालङ्कारनिरूपणावसरे अभिप्रेतम् – 'रागावृतो वल्गुकराभिमृष्टं श्यामामुखं चुम्बति चारु चन्द्रः' इत्यत्र अप्रकृतधर्मिणो नृपस्य शब्देनानुपादानात् समासोक्तिः भवति । तत्रैव राजेति प्रयोगे नृपस्य शब्देनोपादानात् शब्दशक्तिमूलध्वनिरित्येतत्सर्वं निर्विवादम् । किन्तु अत्रोभयत्रापि अप्रस्तुतवृत्तान्तेन प्रस्तुतधर्मिण उपस्करणं समानमिति अन्यत्र तस्य प्राधान्यम् अन्यत्र चाप्राधान्यमिति कथं निश्चेतुं शक्यते? न च राजेति विशेष्यवाचकपदस्य श्लिष्टत्वात् तद्घटितवाक्ये प्राधान्ये नास्ति बाधकमिति वाच्यम्, तथा निश्चयस्य दुष्करत्वात् । नहि विशेष्यवाचक-पदश्लिष्टतामात्रेण अप्रस्तुतवृत्तान्तस्य प्राधान्यमिति मूर्खोऽपि व्याहर्तुं शक्नोति, किं पुनरन्यः? स्यान्नाम द्वितीये वाक्ये अप्रकृतधर्मिणो नृपस्य अभिधामूल-व्यञ्जनात् प्रतीतिः प्रथमे तु आर्थव्यञ्जनादिति विशेषः तथापि तस्याकिञ्चित्करत्वमेव, साधनापेक्षया साध्यस्यैव प्राबल्यात् ।

नन्वत्राप्रकृतवृत्तान्तस्य वाच्यत्वमिति न तस्य शब्दशक्तिमूलध्वनित्वेन परिगणनम् किन्तु तदौपम्यस्येति वाच्यम्, अनेकार्थस्य शब्दस्येति कारिका-परिशीलनेन अप्रकृतवृत्तान्तस्यैव व्यङ्ग्यत्वेनाभ्युपगमः तस्यैव च शब्दशक्ति-मूलध्वनिशब्देन परिगणनं चेत्यवगमात् । यदि पुनः सन्तमपि अप्रकृत-वृत्तान्तमुपेक्ष्य तत्प्रतियोगिकस्य औपम्यस्य प्रतीयमानस्य ध्वनित्वम्

२७. जगन्नाथादयः । रस. द्वि.आ. शब्दशक्तिमूलध्वनिप्रकरणम् ।

इत्यभिप्रेयते तर्हि समासोक्तावपि सन्तमपि अप्रकृतवृत्तान्तमुपेक्ष्य तत्प्रतियोगिकस्य औपम्यस्य समासोक्तिरित्युच्यताम्, को दोषः? तदेवमुभयत्रापि सर्वथा समानत्वमिति अन्यत्र अप्रकृतवृत्तान्तस्य प्राधान्यम् अन्यत्र चाप्राधान्यमिति निर्णयः, ततः तत्प्रयुक्तो व्यपदेशभेदश्च प्राचीनानां सर्वथा न घटते। तस्मादैकरूप्यसम्पादनाय उभयत्रापि ध्वनिरित्युच्यताम् उभयत्रापि वा समासोक्तिरिति गुणीभूतव्यङ्ग्यप्रभेदः। एवं कृते साधु भवतीति॥

वस्तुतस्तु समानशब्दोपात्तत्वात् द्वयोरर्थयोः अभेदस्येव सादृश्यास्यापि प्रतीतिः, यथा –

[२८]महीभृतां खलु गणे रत्नसानुरिव स्थितः।
त्वं काव्ये वसुधाधीश! वृषपर्वेव शोभसे॥

अत्र राजनि मन्दराद्रिसादृश्यस्योत्तरत्र प्रतिपादनात् 'महीभृतामिव महीभृताम्' इत्यत्र वृषपर्वसादृश्यस्य च प्रतिपादनात् 'काव्य इव काव्ये' इत्यत्र चौपम्यं प्रतीयते इति स्पष्टम्। ततश्चाभेद इव सादृश्यमपि सुनिर्णयमिति उपमारूपकयोः [२९]सङ्कर इत्येव न्याय्यम्। स च पुनः विनिगमनाविरहात् सन्दिह्यमानयोः द्वयोः अलङ्कारयोरिति निर्णयः स्थाने। एवमत्र सन्देहसङ्कर समुचित इति भाति। साधारणधर्मस्तु पक्षद्वयेऽपि उच्चरद्भूरिकीलालत्वहेतुकं शोभनम्। यद्यपि सेनापतौ स्रवदधिकरुधिरत्वं समुद्रे तु उत्पतदधिक-जलत्वमिति उच्चरद्भूरिकीलालत्वं भिद्यते तथापि समानशब्दोपात्तत्वात् तयोरभेदे विशिष्टधर्मस्योल्लास इति न किञ्चिदपि बाधकम्। ननु समानशब्दोपात्तत्वात् अत्रापि द्वयोर्धर्मयोः अभेदस्येव सादृश्यस्यापि सुवचतया साधारणधर्माभावप्रसङ्ग इति चेत् – मैवम्, अभेदाङ्गीकार एव साधारणधर्मार्थं कृतस्य यत्नस्य साफल्यमिति तत्रैव तात्पर्यस्याध्यवसायात्।

यत्पुनः रागावृतो वल्गुकराभिमृष्टमिति चन्द्रशब्दघटिते राजशब्दघटिते च वाक्ये अन्यदभिहितम् तद्युक्तमिति प्रतिभाति, समानत्वस्यैव दर्शनात्।

२८. रस. द्वि.आ. उपमालङ्कारप्रकरणम्।
२९. द्वयोः पदार्थयोः तिलतण्डुलन्यायेन समावेशः संसृष्टिः, यत्र पृथक् स्वरूपावभासो वर्तत इति पश्चात् पृथक् करणं सुशकम्। यत्र तु नीरक्षीरन्यायेन सङ्करः, यत्र तु स्वरूपावभासः तथा नास्तीति पश्चात् पृथक् करणं दुश्शकम्।

ननु समासोक्तौ अप्रकृतवृत्तान्तो व्यङ्ग्यः शब्दशक्तिमूलध्वनौ तु वाच्य इति वैषम्यमस्तीति चेत् – सत्यम्, समासोक्तौ धर्मिणो व्यङ्ग्यत्वात् समग्रस्य अप्रस्तुतव्यङ्ग्यस्य व्यङ्ग्यत्वेन व्यवहारः ध्वनौ तु वाच्यत्वात् वाच्य इति व्यवहारः तथापि अभेदद्वारा प्रकृतोपस्कारकत्वस्य सर्वथा निराकर्तुमशक्यत्वात् कथं जगन्नथोक्तमसमञ्जसं भवति? यद्येवं तर्हि शब्दशक्तिमूलो ध्वनिः निरवकाश इति चेत् – अथवा एवं विचार्यते, यानीमानि ध्वनिप्रभेदानाम् उदाहरणानि सन्ति तत्र सर्वत्रापि तादृशो वृत्तान्तो नास्त्येव यस्तावदन्ततो वा प्रकृतं नोपस्करोति। सर्वोऽप्यर्थो हि मतिमता पुरुषेण प्रकृतस्य पोषणायैव निबध्यते, न दूषणाय नापि ताटस्थ्येनावस्थापनाय। स्थिते चैवम्, प्रकृतोपस्कारकत्वे सति सर्वत्र यदि गुणीभूतत्वमाशङ्क्यते तर्हि ध्वनिरित्यस्य विषयो नामावशेषः सम्पद्येत। तस्मादयं तावत् विषयविभागः करणीयः – पर्यन्ते प्रकृतोपस्कारकत्वे सत्यपि अपाततो विचारे यदि व्यङ्ग्यस्य गुणीभावो नास्ति तर्हि ध्वनिरिति स्वीकारः। अथ वाच्योपपादकत्वादिना वर्तते तर्हि गुणीभूतव्यङ्ग्यमिति। एवं विषयविभागे सिद्धे न पूर्वोक्तस्य आक्षेपस्योदयः नापि च शब्दशक्तिमूलध्वनेः निरवकाशत्वप्रसङ्गः इति सर्वमवदातम्॥

अस्माकं मते तु प्राधान्येन प्रतीयताम् अप्राधान्येन वा वस्त्वलङ्काररूप-व्यङ्ग्यस्य सकलस्यापि मध्यमकाव्यत्वेन परिग्रहात् नास्याक्षेपस्यावतार इति विषयान्तरम्॥

* नानार्थकशब्दस्थलो युगपदेवार्थद्वयस्य प्रतीतिः

इदमत्र विज्ञेयम् – उच्चरद्भूरिकीलालेति वाक्यात् प्रकृताप्रकृतभावे सत्यपि द्वयोरर्थयोः युगपदेव बोधः न पर्यायेण। न च सकृदुच्चरितः शब्दः सकृदेवार्थं गमयतीति न्यायस्य विरोध इति वाच्यम्, तस्य सकृदुच्चरितात् शब्दात् सकृदेवार्थस्य प्रतिपादनम् इत्येतावन्मात्रार्थकत्वात्। सकृत् प्रतिपादनम् एकस्येव अनेकस्यापि अर्थस्य सम्भवतीति कथमत्र दोषः? किञ्च एकवारार्थकस्य सकृच्छब्दस्य एकार्थकत्वमेव तावत् कथम्? नह्यन्यार्थकस्य शब्दस्य लक्षणामन्तरेण अन्यार्थकत्वं कल्पनीयम्। एवञ्चात्र उभयार्थविषयकम् एकमेव ज्ञानमिति नासङ्गतिः। किञ्च न्यायोऽयं 'शब्दबुद्धिकर्मणां विरम्य

व्यापाराभावः’ इति वाक्यविन्न्यायस्यैकदेशमनुवदतीति तत्र योऽर्थः स एवात्रापि कल्पनीयः । तत्र च शब्दः अर्थं बोधयित्वा यदि विश्राम्यति तर्हि न तस्य पुनरुत्थानमित्यर्थ इति तस्यैवात्रापि कल्पने यौगपद्यं पारमार्थ्येन सिध्यति ।

अथवास्तु एकस्यैवार्थस्य प्रतिपादनमिति पर्यायः किन्तु कस्यार्थस्य तावत् प्रथमं प्रतिपादनमित्याख्यायताम्? न च प्रकृतस्येति आख्यायेत, उपस्थितौ सत्यां पश्चात् प्रकरणादिना तत्त्वविज्ञानात् । ततश्च वर्ण्यादिश्लेष इवात्रापि यौगपद्यमेव सिद्धं भवति । ननु यौगपद्यमित्येतत् नोपपद्यते, अन्धकक्षयकर इत्यादौ क्षयादिशब्दस्य नाशादावर्थे सङ्केतस्य प्रसिद्धिः निवासादौ चाप्रसिद्धिरिति न्यूनाधिकबलस्य प्रत्ययात् । नहि न्यूनाधिकबलयोः यौगपद्यं सम्भवति । किं तर्हि? पर्यायः । तस्मात् स एव स्वीकार्य इति चेत् – सत्यम्, किन्त्वेतत् पदार्थविचारावसरे न पुनः वाक्यार्थविचारावसरे । कुतः? द्वौ हि वाक्यार्थौ तत्तत्सम्बन्धिनौ शब्देषु श्रूयमाणेषु क्रमेण निष्पद्यमानशरीरौ पूर्णताप्राप्तयेऽन्वययोग्यान् सर्वानर्थान् अपेक्षेते । एतेन सङ्केतस्याप्रसिद्ध्या दुर्बलत्वेन भासमानस्यापि निवासाद्यर्थस्य यावन्नोपादानं तावन्न तद्घटितवाक्यार्थस्यानिष्पत्तिरिति तस्य बलादाकषणे वाक्यार्थान्तर-समानबलत्वमेव सिध्यति ॥

* व्यङ्ग्यस्य न प्रमाणान्तरेण सिद्धिरित्युपपादनम्

नन्वत्र यावदौपम्यस्य रूपकस्य वा नाभ्युपगमः तावत् तात्पर्यं नोपपद्यत इति तदनुपपत्तिजन्यलक्षणयैव तद्बोधे कुतो व्यञ्जनायाः स्वीकारः? – मैवम्, वाक्ये लक्षणाया अनभ्युपगमात् । किञ्च रूढिप्रयोजनाभावात् कथमत्र लक्षणा? न च प्रकृतार्थपरिपुष्टिः प्रयोजनम्, लक्ष्यगतत्वेनाप्रतिभासनात् । नहि यत्र कुत्रापि सिध्यत्प्रयोजनं लक्षणायाः प्रयोजनमिति कथ्यते । न लक्ष्यादन्यत्रापि सिध्यत्प्रयोजनं तत्प्रयोजनं भवितुमर्हति, अव्यवस्थाप्रसङ्गात् ।

नापि [३०]अर्थापत्त्या तद्बोधः, शब्दोपात्तस्य कस्यचिदर्थस्य अनुपपत्तौ

३०. आपद्यतेऽर्थान्तरमनयेति करणे क्तिनि आपत्तिशब्दः । ततोऽर्थस्यापत्तिरिति षष्ठीतत्पुरुषः । अर्थान्तरसिद्धिसाधनीभूतोऽर्थ इति यावत् । ‘पीनो देवदत्तो दिवा न भुङ्क्ते’ इत्युदाहरणे दिवा भोजनस्याकरणम् अर्थापत्तिशब्दवाच्यम्, रात्रिभोजनास्यार्थस्य सिद्धौ साधनीभूतत्वात् ।

सत्यामेव तदुल्लासात्, तथाहि – अनुपपत्तिस्तावत् द्विविधा, शब्दोपात्तस्य अर्थस्य व्याहतत्वेन वाक्यार्थस्यापूर्णत्वेन च । तयोराद्या यथा – पीनो देवदत्तो दिवा न भुङ्क्ते । अत्र दिनेऽभुञ्जाने देवदत्ते पीनत्वं व्याहतं स्वोपपादनाय रात्रिभोजनं गमयति । अन्त्या यथा – द्वारं द्वारम् । अत्र वाक्यार्थस्य अपूर्णत्वं स्वोपपादनाय प्रकरणसहकारेण पिधेहीत्यर्थं गमयति । नह्यत्राप्रस्तुते वाक्यार्थे तादृशी काचिदनुपपत्तिः येन सा खलु अर्थापत्तिः शङ्क्येत । अस्ति पुनः तन्निबन्धने किन्तु तस्य पूर्वोक्तकारणजन्यत्वाभावात् बाह्यत्वम् । अथ बाह्यायामनुपपत्तौ सत्यामपि अर्थापत्तिरिति मतं तर्हि गङ्गायां घोष इत्यत्रापि तीरस्य प्रतीतिः तयैवेति निर्णीयताम् । ननु शब्दादेवायमर्थः प्रतिपन्न इति व्यवहारस्य सत्त्वात् तत्र शब्दस्यैव काचित् वृत्तिरिति चेत् – एवं तर्हि सैव दृष्टिरत्रापि पात्यतामिति सादरं निवेदनम् । अन्यच्च, 'पीनो देवदत्तो दिवा न भुङ्क्ते' इति तदीयप्रसिद्धोदाहरणात् इह अतितरां वैलक्षण्यं स्पष्टमेव प्रतिभाति ।

नाप्यनुमानेन, हेतोरभावात् । उच्येत, सेनापतौ समुद्रौपम्यस्य साधने द्व्यर्थकैः शब्दैः प्रतिपादनं हेतुरिति – नैतद्युज्यते, अगोद्धारको नागोद्धारक इत्यादौ विरोधस्य व्यङ्ग्यत्वमिति व्यभिचारात्, सर्वदो माधवः पायादिति वर्ण्यश्लेषेऽपि औपम्यध्विप्रसङ्गाच्च । न च प्रकृताप्रकृतभावे सत्येव एतदिति वाच्यम्, [31]पहिअ ण एत्थ सत्थरमत्थि इत्यत्र पयोधरशब्दबोधितयोः द्वयोरर्थयोरपि तत्प्रतीतिसम्भव इति अर्थान्तरे गोप्यताभङ्गप्रसङ्गात् । किञ्च वाक्ये श्रुते सति यावतामर्थानां प्रतीतिः तत्र कञ्चन अर्थं हेतूकृत्य कुत्रचित् कस्यचिदर्थस्य साधने सम्भवत्यपि शब्दानुपात्तं यं कञ्चनार्थं हेतूकृत्यार्थस्य साधनं न सम्भवति ।

नापि मनसा, तथा सति तीरादेरपि तेनैव बोधसम्भव इति गङ्गायां घोष इत्यादौ कुतो लक्षणाकल्पनम्? किं बहुना? घटमानय इत्यादावपि एवं वक्तुं शक्यत्वात् शब्दप्रमाणस्यैव उच्छेदप्रसङ्गः । किञ्चानुमानमपि कुतः? धूमं

३१. पहिअ! ण एत्थ सत्थरमत्थि मणं पत्थरत्थले गामे ।
उण्णअं पओहरं पेक्खिऊण जइ वससि ता वससु ॥
[पथिक! नात्र स्रस्तरमस्ति मनाक् प्रस्तरस्थले ग्रामे ।
उन्नतं पयोधरं प्रेक्ष्य यदि वससि तद्वस ॥] छाया ।

दृष्टवतः पुरुषस्य मनसैव वह्नेः बोधसम्भवात् । तस्मात् तृतीयार्थप्रतीत्यर्थं व्यञ्जनास्वीकार आवश्यकः ।

अत्रेदमवगन्तव्यम् – द्वयोरर्थयोः प्रकृताप्रकृताभावे सत्येव औपम्यादेः व्यङ्ग्यस्य स्वीकारः, न तु केवलप्रकृतभावे केवलाप्रकृताभावे च। ततश्च सशङ्खचक्रो हरिरित्यत्र नोपमा, विष्णुभिन्नार्थस्य अविवक्षितत्वेन अप्रस्तुतत्वाभावात्। विवक्षितं हि अप्रस्तुतं विवक्षिततरं तु प्रस्तुतम् । विवक्षितत्वं च उपमानत्व-सामान्यत्व-विशेषत्व-विरोधित्वादिना सम्भवति यच्चात्र न दृश्यते । सुरभिमांसं भक्षयति इत्यत्रापि न सा, परिहासस्योपपादनाय अर्थान्तरस्य विवक्षितत्वेऽपि अर्थयोः व्याप्यव्यापकभावेन साधारणधर्मस्य दुरभिधानत्वात्। भुक्तिमुक्तिकृदित्यत्र साधारणधर्मे सत्यपि नोपमा, वक्त्र्याः प्रतिवेशिपुरुषं प्रत्येव अर्थान्तरं विवक्षितमिति सर्वजनोद्देश्यकविवक्षितत्वाभावेन अप्रस्तुतत्वाभावात् । एतेन सर्वजनोद्देश्यकप्रतिपादने सत्येव विवक्षितत्वमित्युक्तं भवति । एवं च प्रथमे तृतीये च वाक्ये अप्रस्तुतत्वाभावात् नोपमा, मध्यमे तु साधारणधर्मस्य दुरभिधानत्वादिति वैलक्षण्यं बोध्यम् । ननु भुक्तिमुक्तिकृदित्यत्र सच्छास्त्रार्थ-विषयको वाक्यार्थः अत्यन्तविवक्षितः जारपर्यवसायिसत्पुरुषागमनं तु विवक्षितमात्रमिति यदभिप्रेतम् तन्न, वक्त्र्याः प्रतिवेशिपुरुषं प्रति अर्थान्तरस्य प्रतिपादनार्थमेव तद्वाक्यस्य प्रयोगादिति चेत् – सत्यं भोः! किन्त्वेतत् पारमार्थिकदृष्ट्या, व्यावहारिकदृष्ट्या तु प्रकाशताभयात् अकामेनापि सच्छास्त्रार्थविषयकवाक्यार्थ एव तस्या विवक्षितत्वस्य निर्णेयत्वात् ।

एवं सर्वदो माधवः पायादित्यत्र सत्यपि साधारणधर्मे नोपमा, केवलप्रकृतत्वात् । ननु केवलप्रकृतत्वात् मा भूत् उपमा, द्वयोरपि प्रकृतत्वात् [३२]खमिव जलं जलमिव खमित्यादाविव माधव उमाधव इव उमाधवश्च माधव इवेत्युपमेयोपमा स्वीक्रियताम्, उपमावाचकस्याभावाच्च व्यङ्ग्येति चेत् – न, खजलादिषु परस्परौपम्ये यथा अवयविनि शरत्काले निरुपमत्व-सिद्ध्या प्रकर्षः न तथात्रेति वैलक्षण्यात् । नह्यत्र अवयविभूतः कश्चिदर्थो

३२. खमिव जलं जलमिव खं हंस इव चन्द्रश्चन्द्र इव हंसः ।
कुमुदाकारास्ताराः ताराकाराणि कुमुदानि ॥ कुव. उपमेयोपमाप्रकरणम् ।

वर्तते येन तत्रेवात्रापि सा निर्विवादं निर्णीयेत ॥

२. लक्षणामूला व्यञ्जना

लक्षणया कस्मिंश्चिदर्थे ज्ञाते सत्येव इयमाविर्भवतीति व्यञ्जनेयं लक्षणामूलेति निगद्यते । अस्याश्च लक्षणमुक्तं प्रकाशकारेण –

[३३]यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते ।
फले शब्दैकगम्येऽत्र व्यञ्जना नापरा क्रिया ॥

यस्य प्रतिपिपादयिषया मुख्यार्थसम्बद्धेऽर्थे लक्षणा स्वीक्रियते शब्देन प्रत्येये तादृशे प्रयोजने व्यञ्जनैव व्यापारो नान्य इति कारिकार्थः । इदमुदाहरणम् –

रविसङ्क्रान्तसौभाग्यस्तुषारावृतमण्डलः ।
निःश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते ॥

अत्र आदर्शोऽन्धशब्दस्यार्थो बाधित इति लक्षणया मलिनरूपार्थस्य बोधे तत्र निष्प्रभत्व–विषयग्रहणासमर्थत्वादिधर्मसमूहस्य अनयैव व्यञ्जनया प्रतीतिः । एवं चात्र निश्वासमलिन आदर्श इवेति लक्ष्यार्थविषयको बोधः । मलिनश्च प्रागुक्तधर्मवानिति व्यङ्ग्यार्थः । ततो निष्प्रभत्वादिविशिष्टो यो निःश्वासमलिनः तदभिन्न आदर्श इति मानसिको बोधः । मलिनादर्शयोः अभेदात् आदर्शः तादृशधर्मविशिष्ट इति वर्णनमपि न दोषाय । इदम् उदाहरणान्तरम् –

गङ्गायां घोषः ।

अत्र घोषाधिकरणत्वासम्भवात् गङ्गारूपार्थस्य बाधे लक्षणया च तत्तीरे बोधिते तत्र शीतत्वपावनत्वादिधर्मस्यानयैव व्यञ्जनया प्रतीतिः । एवमत्र गङ्गातीरे घोष इति लक्ष्यार्थविषयको बोधः । तीरं च शीतत्वपावनत्वादि–धर्मविशिष्टमिति व्यङ्ग्यार्थः । ततः शीतत्वादिधर्मविशिष्टं यत्तीरं तस्मिन् घोष इति मानसिको बोधः । न चात्र नवीनस्य कस्यचिदर्थस्य बोधो जायते किन्तु प्रतिपादितपूर्वसर्वार्थविषयकः ।

नन्वस्या लक्षणामूलव्यञ्जनायाः कथं शाब्दत्वम्? परिवृत्त्यसहशब्दगतत्वे

३३. का.प्र. द्वि.उ. का–१४.

सत्येव तस्य स्वीकारात् । इह तु भागीरथ्यादिशब्दोपादानेऽपि प्रयोजनांशस्य निष्प्रत्यूहं प्रत्ययादिति चेत् – मैवम्, गङ्गाभागीरथ्यादिशब्दानां लक्षकत्वेन प्रविवृत्त्यसहत्वात्, तथाहि – गङ्गातीरे प्रतिपादनीये यथा गङ्गातीरभागीरथी-तीरादयः शब्दाः प्रयोक्तुं शक्यन्ते तथा गङ्गाभागीरथ्यादयोऽपि शब्दाः । तत्र यदि पूर्वेषां शब्दानां प्रयोगः तदा प्रयोजनस्याप्रत्यय इति नास्ति व्यञ्जनायाः प्रसक्तिः । यदा तु गङ्गाभागीरथ्यादीनां प्रयोगः तदास्त्येव तत्प्रसक्तिः । एवमन्वयव्यतिरेकाभ्यां गङ्गाभागीरथ्यादिशब्दानां लक्षकतया सद्भाव एव व्यञ्जनायाः समुन्मेष इति व्यञ्जनाप्रभेदस्यास्य शाब्दत्वम् । यद्वा, शब्दमात्रगतवृत्तिमूलत्वात् शाब्दीत्वमिति गृह्यताम् ।

* व्यङ्ग्येऽस्मिन् प्रमाणान्तरसिद्धत्वस्य निराकरणम्

न चात्र प्रयोजनविशिष्टस्यैव तीरादेः लक्षणया बोध इति व्यञ्जना नावश्यकीति वाच्यम्, तीरे प्रतीते प्रयोजनस्य प्रतीतिरिति तयोः पौर्वापर्यस्य नियतत्वेन यौगपद्येन प्रतीत्यसम्भवात् । अत एव घट इति ज्ञाने सति तत्फलस्य [३४]ज्ञाततायाः पश्चात् प्रतीतिरिति वाक्यविदः । अनुव्यवसायः तत्फलमिति वदन्तो न्यायविदोऽपि पश्चादेव तस्य प्रतीतिरित्यत्र न विप्रतिपन्नाः । किञ्चैवं स्वीकारे तल्लक्षणाया सप्रयोजनत्वात् प्रयोजनान्तरस्य वक्तव्यतापत्तिः, तत्र या लक्षणा सापि प्रयोजनवतीति प्रयोजनान्तरस्य वक्तव्यतापत्तिः । एवं विचारे नूनमनवस्था पदं करोति ।

नाप्यनुमानेन तद्बोधः, तथा सति तीरं शीतत्वपावनत्वादिधर्मवत्, तद्वाचकश्ब्देन प्रतिपादनात् इति पक्षहेत्वादिकं वक्तव्यम्, यो यद्वाचकश्ब्देन प्रतिपाद्यते स तद्वाच्यनिष्ठधर्मवान् इति व्याप्तिश्च, तत्तु न युक्तम्, 'काकेभ्यो दधि रक्ष्यताम्' इत्यादौ निरूढालक्षणास्थलेऽपि लक्ष्ये वाच्यधर्मावभास-प्रसङ्गात्। न च निरूढाव्यतिरिक्तस्थल एवेयं व्याप्तिरिति वाच्यम्, तथा वक्तुमशक्यत्वात्, पदार्थयोः वह्निधूमयोरिव वाक्यार्थयोः व्याप्तेः दुर्वचत्वाच्च।

३४. मीमांसकाः प्रकटतापरपर्याया ज्ञातता ज्ञानस्य फलमिति मन्यन्ते । ज्ञातता ज्ञेयानां घट-पटादीनां धर्मः । नैयायिकास्तु घटादिज्ञाने सति घटज्ञानवानहम् इत्याकारा संवित्तिः फलमिति मन्यन्ते । इयं संवित्तिः अनुव्यवसाय इत्युच्यते । अयं च ज्ञातुर्धर्मः ।

किञ्चैवमपि मूर्खे विषये 'अयं बृहस्पतिः' इति प्रयोगे दोषो दुर्वारः । मनसा बोध इत्यपि न युक्तम्, प्रागुक्तादेव हेतोः ।

ननु [३५]उअ णिच्चलणिप्पंदेति पद्ये निश्चलनिस्पन्दत्वेन विश्वस्तत्वम्, तेन तत्प्रदेशस्य निर्जनत्वम्, तेन चैतदावयोः सङ्केतस्थानमिति या व्यङ्ग्य-परम्परा वर्तते तत्र विश्वस्तत्वात् निर्जनत्वे ज्ञाते सति तदेतदावायोः सङ्केतस्थानमिति व्यङ्ग्यस्य प्रतीतिरिति व्यञ्जनेयम् अभिधादिमूलेव व्यञ्जनामूलापि सम्भवतीति सोऽपि कश्चित् प्रभेदो निर्णेतव्यः – मैवम्, तस्यां शाब्दत्वानुपपत्तेः । अथ पुनः निश्चलनिस्पन्देति व्यञ्जकत्वविशिष्टे शब्दे सत्येव विश्वस्तत्वम्, तेन च निर्जनत्वं व्यङ्ग्यम् अन्यथा नैवेति अन्वयव्यतिरेकभावात् अस्यापि प्रभेदस्यापि तत्त्वं सम्भवतीति चिन्त्यते तदापि निश्चलनिस्पन्देति वाच्यार्थस्यैवात्र व्यञ्जकत्वं न तत्प्रतिपादकस्य शब्दस्येति कृतपूर्वाक्षेपस्य तादवस्थ्यम् । किञ्च व्यञ्जनाया आविर्भावे किञ्चिन्निमित्तं वक्तव्यम् यच्चात्र वक्तुं न शक्यत इति क्लेशः । न चान्यसन्निधिवैशिष्ट्यमेव तदिति वाच्यम्, [३६]रतिकाले विलोक्य श्रीरित्यादौ व्यभिचारात् । तद् व्यञ्जनामूलेति प्रभेदो गगनकुसुमायते ॥

३. आर्थव्यञ्जना

यत्र शब्दाः परिवृत्तिं सहन्ते तत्र व्यञ्जनार्थमवलम्ब्य व्यवतिष्ठत इति आर्थीति व्यपदेशः । इयं वक्त्रादिवैशिष्ट्यादनेकविधा, तदुक्तं [३७]प्रकाशकृता–

वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसन्निधेः ।
प्रस्तावदेशकालादेः वैशिष्ट्यात्प्रतिभाजुषाम् ।
योऽर्थस्यान्यार्थधीहेतुर्व्यापारो व्यक्तिरेव वा ।

तत्र वक्तृवैशिष्ट्यात् यथा –

३५. उअ णिच्चलणिप्पंदा भिसिणीपत्तम्मि रेहइ बलाआ ।
णिम्मलमरगयभाअणपरिट्ठिआ संखसुत्ति व्व ॥
[पश्य निश्चलनिस्पन्दा भिसिनीपत्रे राजते बलाका ।
निर्मलमरगतभाजनपरिस्थिता शङ्खशुक्तिरिव ॥] छाया ।

३६. रतिकाले विलोक्य श्रीर्नाभिपद्मो पितामहम् ।
रसाकुलाच्छादयते दक्षिणं नयनं हरेः ॥

३७. का.प्र. द्वि.उ. का–२१,२२.

[३८]अत्ता एत्थ णिमज्जइ एत्थ अहं दिअसअं पलोएहि ।
मा पहिअ! रत्तिअन्धिअ! सेज्जाए मह णिमज्जइसि ॥

अत्र वक्त्र्या वैशिष्टे ज्ञाते सति रात्रौ मम शय्यामागच्छेति व्यङ्ग्यं प्रतीयते । बोद्धव्यवैशिष्ट्यात् यथा –

निश्शेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोदरो
नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः ।
मिथ्यावादिनि! दूति! बान्धवजनस्याज्ञातपीडागमे
वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम् ॥

अत्र बोद्धव्याया दूत्या वैशिष्ट्ये ज्ञाते सति तदन्तिकमेव रन्तुं गतासीति व्यङ्ग्यं प्रतीयते । काकुवैशिष्ट्यात् यथा –

[३९]'मथ्नामि कौरवशतं समरे न कोपात्
दुश्शासनस्य रुधिरं न पिबाम्युरस्तः ।
सञ्चूर्णयामि गदया न सुयोधनोरू
सन्धिं करोतु भवतां नृपतिः पणेन ॥

अत्र काकुवैशिष्ट्यात् कौरवशतं मथ्नाम्येवेति व्यङ्ग्यं प्रतीयते । वाक्यवैशिष्ट्यात् यथा – मुखं चन्द्र इत्यादौ । अत्र विभिन्नार्थप्रतिपादक-शब्दद्वयस्य सामानाधिकरण्यात् वाक्यवैशिष्ट्यात् मुखं चन्द्रकार्यकारीति प्रतीयते । वाच्यवैशिष्ट्यात् यथा –

[४०]एकः कृती शकुन्तेषु योऽन्यं शक्रान्न याचते ।

अत्र सादृश्यघटितत्वरूपात् वाच्यवैशिष्ट्यात् 'अयं मानधनो याचकः गुणवतः तद्धनिकादन्यस्मिन् याचनाभाववान्' इति प्रतीयते । उअ णिच्चलणिप्पंदेत्यत्र प्रियकररूपव्यक्त्यन्तरस्य सन्निधानात् एतदावयोः

३८. श्वश्रूरत्र निमज्जति अत्राहं दिवसकं प्रलोकय ।
मा पथिक! रात्र्यन्ध! शय्यायां मम निमङ्क्ष्यसि ॥
३९. वेणी. प्र.अ. श्लो–१५.
४०. कुव. अप्रस्तुतप्रशंसाप्रकरणम् ।

सङ्केतस्थानमिति प्रतीयते । एवं प्रस्तावकालदेशादीनामुदाहरणानि आकरेभ्यः स्वयं ज्ञातव्यानि ।

न च गतोऽस्तमर्क इत्यादौ सन्ध्यावन्दनं कुरु इत्यादेरर्थस्य अभिधाबोध्यत्वम्, सङ्केतग्रहाभावात् । नापि तात्पर्यानुपपत्तिमूलया लक्षणया, वाक्येऽनङ्गीकारात्, रूढिप्रयोजनयोरन्यतरस्याभावात्, कुमारस्ते नराधीश! श्रियं समधिगच्छतु' इत्यादौ सर्वथा तात्पर्यविरहात् 'त्वं म्रियस्व' इत्यर्थान्तरस्य दुरुपपादत्व-प्रसङ्गात्, 'यत्रासौ वेतसः पान्थ! तत्रेयं सुतरा सरित्' इत्यादौ 'तत्र स्वच्छन्द-रमणं सुकरम्' इत्यर्थान्तरे गोप्यताभङ्गापत्तेश्च । नाप्यनुमानेन, हेतोरभावात् । नन्वत्र हेतोरभावेऽपि 'गच्छ गच्छसि चेत्कान्त! तत्रैव स्याज्जनिर्मम' इत्यादौ नायिका प्रियकरगमनोत्तरकालिकमरणवती, तद्गन्तव्यदेशे स्वजननस्य प्रतिपादनात् इत्यस्त्येव हेतुरिति न सर्वमपि व्यञ्जनाया लक्ष्यमिति चेत् – मैवम्, प्रियकरगन्तव्यदेश एव जननमित्यत्र प्रमाणाभावेन हेतोः स्वरूपेण असिद्धत्वात् । किञ्च नायिकाया वाक्यमिदं कथं प्रमाणम्, वारणोद्देशेन मिथ्याभिधानस्य सम्भवात् । न चेदं तत्काले प्रमाणत्वेनैव विवक्ष्यत इति वाच्यम्, एवं हि पर्वतो वह्निमान् धूमात् इति केनचित् प्रयुक्तादपि वाक्यात् वह्न्यनुमितिप्रसङ्ग इत्यलं विस्तरेण ।

❖❖❖

व्यञ्जनाविसंवादः

अस्यां व्यञ्जनायां विवदन्ते भट्टलोल्लटः, भट्टमुकुलः, महिमभट्टः, धनिकः, नैयायिकाः, मीमांसकाश्च । अधुना तेषां मतं सनिराकरणं समासेन निवेद्यते –

१. भट्टलोल्लटस्य मतम्

जात्या मीमांसकोऽयं ऋषिप्रोक्तत्वात् रससूत्रस्य व्याख्याने प्रवृत्तः 'यत्परः स शब्दार्थः' इति स्वशास्त्रोक्तस्य न्यायस्य 'शब्दो यदर्थबोधनेच्छया प्रयुक्तः स तच्छब्दार्थः' इत्यर्थं मनसिकृत्य 'सोऽयमिषोरिव दीर्घदीर्घतरोऽभिधाव्यापारः'

इति व्याहरन् व्यञ्जनां निराचष्टे, तस्येदमाकूतम् – यथा शक्तिमता धनुर्धरेण प्रयुक्तः कश्चिद्बाणो वेगाख्येन व्यापारेण कवचभेद–उरोविदारण–प्राणहरणप्रभृतीनि नाना कार्याणि निर्वर्तयति तथा प्रतिभाशालिना कविना प्रयुक्तः कश्चिच्छब्दोऽभिधाख्येन व्यापारेण गङ्गायां घोष इत्यादौ वाच्यलक्ष्य–व्यङ्ग्यतयाभिमतान् सर्वानप्यर्थान् प्रतिपादयतीति व्यञ्जना नावश्यकी । तत्र पूर्वपूर्वार्थस्य निमित्तत्वम् उत्तरोत्तरस्य च नैमित्तिकत्वमिति नानभिमतार्थ–प्रतीत्यापादनप्रसङ्गः ॥

एतच्चिन्त्यम्, तथाहि – यत्परः स शब्दार्थ इत्यस्य तद्विवृतोऽर्थो नार्थः किन्तु वाक्यान्तर्वर्तिपदेभ्यः अर्थेषूपस्थितेषु यावदर्थस्य प्रमाणान्तराप्राप्तत्वं तस्य विधेयत्वं तत्रैव च तद्वाक्यस्य च तात्पर्यमिति । तत्र पुनः क्वचिदेकार्थस्य विधेयत्वं क्वचिद् द्वयोः क्वचित्तु त्र्यादीनाम् । एवञ्च 'देवदत्त! आगच्छ' इति वाक्ये आगमनमात्रस्य विधेयत्वम् । ग्रामं गच्छेति वाक्ये ग्रामस्य प्रमाणान्तरसिद्धत्व आगमनमात्रस्य विधेयत्वम् अन्यथा द्वयोः । एवं रक्तं पटं वयेत्यादौ यथाप्रकरणम् एकस्य द्वयोः त्रयाणां वा अर्थानां विधेयत्वं स्वयं निश्चेयम् ।

न च विधेयत्वं [1]प्रवर्तनाविषयत्वम् । तच्च साध्यत्वात् क्रियाया एवेति कथं सिद्धानां ग्रामादीनां विधेयत्वमिति वाच्यम्, 'भूतभव्यसमुच्चारणे भूतं भव्यायोपदिश्यते' इत्युक्तदिशा द्रव्याणां साध्यत्वाभावेऽपि प्रधानक्रियानिर्वर्तक–स्वक्रियाद्वारा साध्यायमानातायां बाधकाभावात् । ततश्च गामानयेत्यादौ आनयनरूपप्रधानक्रियानिर्वर्तिका या स्वनिष्ठा चलनादिक्रिया तद्द्वारा गवादेरपि साध्यायमानत्वेन प्रतीतिरिति विधेयत्वमुपपन्नम् । यद्वा, उद्देश्यत्वं ज्ञातत्वम् विधेयत्वं तु ज्ञाप्यत्वम् । तच्च साध्यस्येव सिद्धस्यापि सम्भवति यथा – मुखं चन्द्र इत्यादौ । अत्र सिद्धस्य चन्द्रस्य विधेयत्वं प्रतिभाति । विधेयत्वं चैतत् शब्दोपात्त एवार्थे न तु यथाकथञ्चित् प्रतीतेऽपि, तथा सति पूर्वो धावतीत्यत्र पूर्वपदार्थस्य परपदार्थेन साकाङ्क्षत्वात् तस्मिन्नर्थे प्रतीते तस्य विधेयत्वमिति वाक्यस्य परो धावतीत्यर्थे तात्पर्याभ्युपगमप्रसङ्गः । 'विषं

१. प्रवर्तना विधिः ।

भुङ्क्ष्व मा चास्य गृहे भुङ्थाः' इत्यत्र तु विषभक्षणादपि शत्रुगृहभोजनं निकृष्टमिति शब्दानुपात्तेऽर्थे विधेयत्वमिति भाति तथापि तन्निमित्तके शब्दोपात्ते शत्रुगृहभोजननिषेध एव तदिति नासङ्गतिः ।

किञ्च दृष्टान्ते बाणस्य नानाकार्यनिर्वर्तने न सहकार्यपेक्षा दार्ष्टान्तिके तु गङ्गायां घोष इत्यादौ मुख्यार्थस्य बोधने सङ्केतः, तत्सम्बद्धार्थस्य मुख्यार्थबाधादिकम्, प्रयोजनस्य चान्यस्मिन्नर्थे अन्यशब्दस्य प्रयोग इति नानासहकार्यपेक्षेति वैषम्यस्य सत्त्वात् दृष्टान्तसिद्धस्य न दार्ष्टान्तिक आपादनमुचितम् । अन्यच्च, एकः कृती शकुन्तेषु योऽन्यं शक्रान्न याचते, गङ्गायां घोष इत्यादौ प्रतीतपूर्वस्य पश्चात् प्रत्येयेऽर्थे निमित्तत्वाभावात् कथमभिमतार्थप्रतीतेः उपपादनम्? किञ्च 'कुमारस्ते नराधीश! श्रियं समधिगच्छतु' इत्यादौ अर्थान्तरस्याविवक्षिततत्वमिति शब्दस्यार्थस्य वा तत्परत्वाभावात् अभिधया तस्याबोधे कथं तस्मिन् [2]प्रकाशितविरुद्धत्वस्य दोषस्य सर्वानुमतस्य समर्थनम्? अन्यदपि, अभिधाविषयार्थस्य सर्वप्रकाशत्व-नियमात् [3]'पन्थिअ ण एत्थ इत्यादौ अर्थान्तरस्य गोप्यताभङ्गप्रसङ्गः । अन्यत्खल्वपि, गतोऽस्तमर्क इत्यादौ अन्वयव्यतिरेकाभ्यामर्थस्यैव व्यञ्जकत्वम् शब्दः सन्नपि न व्यञ्जक इत्येतन्निर्विवादम् । एतन्मतेन तु विचारे दीर्घ-दीर्घतराभिधामात्रेण सर्वेषामर्थानामुपपादने तस्या नियमेन शब्दगतत्वात् सर्वत्रापि शब्दस्यैव व्यञ्जकत्वप्रसङ्गः न क्वाप्यर्थस्य । तस्मादेतत् श्रवणसुभगमात्रं न विचारसहम् ॥

२. भट्टमुकुलस्य मतम्

अयमपि जन्मतो मीमांसकः सर्वमप्यर्थमभिधालभ्यं मन्यमानो व्यञ्जनां नाभ्युपैति । तन्मतेन शब्दस्य सान्तरः निरन्तरश्चेति द्वावर्थौ । तयोरेव यथाक्रमं मुख्यो लक्ष्यमाणश्चेति नामान्तरम्, तदुक्तं तेन –

[4]शब्दव्यापारतो यस्य प्रतीतिस्तस्य मुख्यता ।
अर्थावसेयस्य पुनः लक्ष्यमाणत्वमिष्यते ॥

---

२. राज्ञोऽभ्युदयमिच्छतः पुरुषस्य त्वं म्रियस्वेत्यर्थो विरुद्धः ।
३. पहिअ ण एत्थ सत्थरमत्थि मणं पत्थरत्थले गामे ।
उण्णअं पओअरं पेक्खिऊण जइ वससि ता वससु ॥
४. अभि. वृत्ति. मा. का–१.

मुख्यार्थेऽभिधा लक्ष्यमाणार्थे तु लक्षणेति सर्वाभिममतं सिद्धान्तमयं स्वीकुर्वन्नपि लक्षणाया अभिधातो व्यतिरेकं नाभ्युपैतीति विशेषः । ततश्च मुख्यलक्ष्यमाणयोः उभयोरप्यर्थयोः अभिधैव व्यापारः, लक्ष्यमाणार्थ-विषयिकायास्तु अभिधायाः लक्षणेति नामान्तरमिति विशेषः । तस्याश्च लक्षणाया निमित्तं तु मुख्यार्थबाधः, तत्सम्बन्धः, प्रयोजनं चेति त्रिमात्रम् । रूढिर्न निमित्तं किन्तु तस्या अनुवर्तनं निमित्तं यच्च प्रयोजन एवान्तर्भवति । एवञ्च गौरनुबन्ध्य इत्यत्र जातौ अभिधा व्यक्तौ तु लक्षणा । सा पुनः शुद्धा उपचारमिश्रा चेति द्विविधा । तयोः प्रत्येकं प्रभेदोऽपि उपादानलक्षणा लक्षणलक्षणा चेति द्विविधः । गौरनुबन्ध्यः, पीनो देवदत्तो दिवा न भुङ्क्ते इत्यादीनि उपादानलक्षणाया उदाहरणानि । आयुर्घृतमित्यादीनि तु लक्षणलक्षणायाः । दृष्टिं [5]हे प्रतिवेशिनि! इत्यादौ अन्यैर्व्यङ्ग्यत्वेन निर्णीतेऽर्थे वक्तृविशेषनिबन्धना लक्षणैवेति अभिधातिरिक्तो व्यापारः सर्वथा नास्ति ॥

नैतत् क्षोदक्षमम्, तथाहि – गङ्गायां घोष इत्यत्र गङ्गाशब्दात् कुतो गङ्गारूपस्यैवार्थस्य प्रतीतिरिति प्रश्ने सङ्केतात् इत्युत्तरम् । ततः तीरस्य प्रतीतिः कुत इति प्रश्ने मुख्यार्थबाधादिकात् इत्युत्तरम् । एवं निमित्तभेदात् व्यापारभेदस्यैव सिद्धिरिति अभिधालक्षणे भिन्नावेव व्यापारौ न कथञ्चिदपि एकः । किञ्च गङ्गायां घोष इत्यत्र गङ्गातीरे घोष इति प्रतीतौ सत्यां प्रयोजनस्य शीतत्वपावनत्वादेः प्रत्ययः कया वृत्त्या? नाभिधया, मुख्यत्वाभावात् । नापि लक्षणया, तीरबोधनोत्तरं विश्रामात् । प्रयोजनविशिष्टस्यैव तीरस्य बोध इति तु न युक्तम्, विषयप्रयोजनभावेन पौर्वापर्ययात् । नहि कापि वृत्तिः पौर्वापर्य-विशिष्टावर्थौ बोधयितुं शक्नोति, अचेतनत्वात् ।

यदप्युक्तं पीनो देवदत्तेत्यत्र लक्षणेति – तन्न, वाक्ये लक्षणाया अनभ्युपगमात्। यदप्युक्तं दृष्टिं हे प्रतिवेशिनीत्यत्र व्यङ्ग्यतया निर्णीतेऽर्थे वक्तृविशेषनिबन्धना लक्षणेति – अये! साधु खलु ब्रवीषि किन्तु अयं न

५. दृष्टिं हे प्रतिवेशिनि! क्षणमिहाप्यस्मद्गृहे दास्यसि
प्रायेणास्य शिशोः पिता न विरसाः कौपीरपः पास्यति ।
एकाकिन्यपि यामि सत्वरमितः स्रोतस्तमालाकुलं
नीरन्ध्रास्तनुमालिखन्तु जरठच्छेदा नलग्रन्थयः ॥

युक्त्यनुपाती, यतो लक्ष्यस्य सर्वजनसंवेद्यत्वनियमेन अर्थान्तरस्येह गोप्यता–भङ्गप्रसङ्गः, प्रयोजनस्य चाभावात् लक्षणाया अनुन्मेषप्रसङ्गश्च। रूढ्यनुवर्तनं हि न प्रयोजनं भवितुं शक्नोति, सुखजनकत्वाभावात् । नहि कोऽपि वेदाध्ययनस्य किं प्रयोजनमिति पृष्टः सम्प्रदायपालनमेव प्रयोजनमिति वक्तुमुत्सहते । अन्यच्च, वाक्यस्यैतस्य साध्व्या प्रयोगेऽपि अर्थान्तरप्रतीति–प्रसङ्गः। ननु तदा मुख्यार्थबाधो नास्तीति चेत् – एवं तर्हि जारिण्या प्रयोगे कथं मुख्यार्थबाधः? स्रोतोगमनेनापि मुख्यार्थस्य सङ्गमनात्॥

३. धनिकस्य मतम्

सर्वोऽप्यर्थोऽभिधयैव बोध्य इति नास्ति वृत्त्यन्तरस्य प्रसक्तिरिति एतस्याभिप्रायः, तथाहि – कस्यचिदर्थस्य प्रतिपिपादयिषया पुंसा वाक्यं प्रयुज्यते । तदर्थमेव वाक्यस्य प्रयोग इति स एवार्थः तद्वाक्यस्य मुख्यार्थः, 'यत्परः स शब्दार्थः' इति न्यायात् । अयमेवार्थः कार्यरूप इत्युच्यते । अयं चार्थः पौरुषेयेषु अपौरुषेयेषु च सर्वविधेषु वाक्येषु । यद्ययमर्थो नास्ति वाक्यानां तर्हि उन्मत्तवाक्यवत् अनुपादेयताप्रसङ्गः । तात्पर्यविषयीभूतत्वात् कार्यरूपोऽयमर्थः वाक्यार्थ इत्युच्यते । स च वाक्ये क्वचिदुपात्तो भवति, यथा – गामानयेत्यादौ । अत्र आनयनार्थं वाक्यस्य प्रयोग इति स एव वाक्यार्थः । क्वचिदनुपातो भवति, यथा – द्वारं द्वारमित्यादौ । अत्र पिधानार्थं वाक्यस्य प्रयोग इति स एव वाक्यार्थः । एवं काव्यवाक्येष्वपि बोद्धव्यम् । तत्र पुनः तात्पर्यविषयीभूतोऽर्थः परमानन्दसन्दोहजनकत्वेन रस एव नान्य इति विशेषः । ततश्च स एव कार्यरूपः स एव च वाक्यार्थः । तत्र [६]प्रीत्यै नवोढा प्रियेत्यादौ वाक्यार्थीभूतो यो रत्यादिरूपः शृङ्गारः स साक्षात् प्रीतिशब्देन प्रतिपाद्यते । शून्यं वासगृहमित्यादौ तु विभावाद्यविनाभावादिति विशेषः । न चात्र शब्देनानुपात्तस्यार्थस्य कथं वाक्यार्थत्वमिति वाच्यम्,

६. दृष्टा दृष्टिमधो ददाति कुरुते नालापमाभाषिता
शय्यायां परिवृत्य तिष्ठति बलादालिङ्गिता वेपते ।
निर्यान्तीषु सखीषु वासभवनान्निर्गन्तुमेवेहते
जाता वामतयैव सम्प्रति मम प्रीत्यै नवोढा प्रिया ॥

वाक्यार्थशब्देन कार्यभूतार्थस्यैव ग्रहणमिति शब्दोपात्तत्वनियमस्य अनपेक्षणात्। अयं च वाक्यार्थः अभिधया बोध्यो न वृत्त्यन्तरेण, 'यत्परः स शब्दार्थ' इति न्यायात्। शब्दो यदर्थबोधनेच्छया प्रयुक्तः स तस्य मुख्योऽर्थः। तात्पर्यवृत्तिरिति व्यवहारस्तु तस्या एव शब्दानुपात्तकार्यरूपार्थविषयकत्वेन। एतेन विषयभूतकार्यरूपार्थस्य शब्दोपात्तत्वे व्यापारस्याभिधेति व्यवहारः अतथाभूतत्वे तु तात्पर्यमित्यभिहितं भवति।

ननु गामानयेत्यादौ गवानयनादावर्थे सङ्केतस्य ग्रहणात् तदर्थस्य भवतु अभिधया बोधनम्, यत्र पुनः तस्याग्रहणमेव, यथा – गतोऽस्तमर्क इत्यत्र सन्ध्यावन्दनविध्यादौ, शून्यं वासगृहमित्यत्र च रत्यादौ, तत्र कथङ्कारं तया बोधनम्? – उच्यते, सूर्यास्तङ्गमनादौ विभावादौ च निमित्तेऽर्थे सङ्केतस्य ग्रहणमस्तीति नैमित्तिके ग्रहणाभावेऽपि दोषाभावात्। नह्यर्थेषु निमित्त-निमित्तिभावे सति निमित्तिन्यपि सङ्केतग्रहणं निर्बद्धव्यम्, निमित्ते प्रवृत्ताया वृत्तेः तात्पर्यविषयीभूतनैमित्तिकार्थपर्यन्तमपि सञ्चारसम्भवात् इष्टसिद्धेः। लोके यथा कुलालादिः दण्डचक्रादौ प्रवृत्तः घटरूपनैमित्तिकार्थपर्यन्तमपि प्रवृत्तिमान् भवति तथात्रापि।

एवञ्चास्य मतेन मुखं चन्द्र इवेत्यत्र योऽर्थः सङ्केतितः स एव वाक्यार्थ इति तन्मात्रस्य अभिधया बोधः। गतोऽस्तमर्कः, निश्वासान्ध इवादर्श इत्यादौ अर्थान्तरं वाक्यार्थ इति तस्यापि तयैव बोधः। 'विषं भुङ्क्ष्व मा चास्य गृहे भुङ्क्था' इत्यत्र शब्दोपात्तस्य शत्रुगृहभोजननिषेधस्य वाक्यार्थत्वेऽपि विषभक्षणादपि शत्रुगृहभोजनं निकृष्टमित्यार्थान्तरस्य आन्तरालिकस्य शब्देनानुपादानेऽपि तत्समर्थकत्वेन विवक्षणात् तयैव बोधः। तस्मात् रसकाव्ययोः घटप्रदीपयोरिव न व्यङ्ग्यव्यञ्जकभावः सम्बन्धः, नापि गङ्गाशब्दतीरयोरिव लक्ष्यलक्षकभावः किन्तु मीमांसकमतेन यजेत स्वर्गकाम इत्यादाविव भाव्यभावकभावः। तत्र यथा यागः स्वर्गं भावयति तद्वदत्र काव्यं रसम्। ततश्च काव्यं भावकं भाव्यश्च रसः।

नन्वेवमभिधया तात्पर्यविषयीभूतार्थस्य बोधे निर्णीते रसादेरपि वाच्यत्वमेवेति व्याहृतचरोऽयं सम्बन्धो वाच्यवाचकभावात् न व्यतिरिच्यत

इति चेत् – सत्यम्, तथाप्यर्थे शब्दोपात्ते वाच्यवाचकभावः तदनुपात्ते तु अयमिति वैलक्षण्यस्य जागरूकत्वात् नानुपपत्तिः । यद्यपि प्रीत्यै नवोढा प्रिया इत्यादौ रत्यादिः साक्षात् प्रीतिशब्देनैव प्रतिपाद्यते इति रसस्य भाव्यत्वं नास्तीति प्रतिभाति तथापि तद्रत्यादिमात्रस्य रसत्वानङ्गीकारात् तथाङ्गीकृतस्य अनुसन्धीयमानताविशिष्टरत्यादेश्च शब्दोपात्तत्वाभावात् न दोषः । तदेवं तात्पर्यसमाकृष्टाभिधयैव निर्वाहे व्यञ्जनेति नवीनव्यापारकल्पनं न सर्वथा साम्प्रतम् । तदेतत्सर्वमभिसन्धाय धनिकेनोच्यते –

[७]तात्पर्याव्यतिरेकाच्च व्यञ्जकत्वस्य न ध्वनिः ।
यावत्कार्यप्रसायत्वात् तात्पर्यं न तुलाधृतम् ॥

यावन्तः कार्यरूपा अर्थाः सन्ति तेषु सर्वेष्वपि प्रवर्तनात् अभिधाव्यापारः सङ्केतितप्राथमिकार्थमात्रे नियन्त्रितो न भवति किन्तु तात्पर्यविषयीभूतार्थ-पर्यन्तमपि व्याप्नोतीति ध्वन्यपरपर्यायो व्यञ्जनाव्यापारो नास्तीत्यर्थः ॥

वस्तुतस्तु लोल्लटमतनिराकरणेनैव मतमिदं निराकृतं भवतीति न पुनरेतस्य निराकरणे प्रयतनीयम् । अन्यच्चेदम्, तात्पर्यवृत्तिरिति नाम्नः पर्यालोचने वृत्तेः विवक्षितार्थप्रतिपादकत्वं विज्ञायते । एतेन विवक्षितत्वे सति तात्पर्यवृत्त्या प्रतिपादनम्, तया प्रतिपादने सति विवक्षितत्वस्यावबोध इत्यन्योन्याश्रयः । न च नैमित्तिकत्वेन विवक्षितत्वावबोध इति वाच्यम्, गङ्गायां घोषः, एकः कृती शकुन्तेष्वित्यादावर्थे नैमित्तिकत्वस्य विरहात् ।

ननु धनिकस्य मतेन अभिधातात्पर्यवृत्त्योरभेद इति कथं ज्ञायते? तदीयादेव वाक्यात्, तच्च यथा – अतो वाक्यस्याभिधानशक्तिः तेन तेन रसेनाकृष्यमाणा तत्तत्स्वार्थापेक्षितावान्तरविभावदिप्रतिपादनद्वारा रसपर्यवसायितामानीयते ॥ यथा च – ईदृशि च वाक्यार्थनिरूपणे परिकल्पिताभिधादिशक्तिवशेनैव समस्तवाक्यार्थावगतेः शक्त्यन्तरपरिकल्पनं प्रयासः ॥ तन्मतं विवृण्वता लोचनकृताप्युक्तम् – ननु तात्पर्यशक्तिरपर्यवसिता विवक्षया दृप्तधार्मिकतदादि-पदार्थानन्वयरूपमुख्यार्थबाधबलेन विरोधनिमित्तया विपरीतलक्षणया च

७. द.रू. च. प. का–५७ वृत्तौ.

वाक्यार्थभूतनिषेधप्रतीतिम् अभिहितान्वयदृशा करोतीति शब्दशक्तिमूल एव सोऽर्थः । एवमनेनोक्तमिति व्यवहार इति ॥ अत्र हि तात्पर्यशक्तिशब्देन अभिधाया ग्रहणे सत्येव पश्चात् कृतस्य विपरीतलक्षणा–शब्दशक्तिमूलादेः उल्लेखस्य सङ्गतिः अन्यथा स्फुटैवासङ्गतिः । किन्तु धनिकेन तात्पर्यातिरिक्त--वृत्तेः अनभ्युपगमात् तन्मतविवरणावसरे विपरीतलक्षणाया उल्लेखो लोचनकारकृतो न सामञ्जस्यं स्पृशतीति तु विषयान्तरम् ।

४. भाट्टमीमांसकमतम्

मीमांसकेषु भाट्टाः कण्ठरवेण न कुत्रापि व्यञ्जनाया निरासं विदधते । तात्पर्यवृत्तिरिति काचित् वृत्तिः यद्यप्यङ्गीकृता तथापि सान्वयांश एव प्रवर्तत न तया व्यञ्जनाया बाधः । एवमपि वायुर्वै क्षेपिष्ठा देवतेत्यर्थवादे विधिशेषे वायुदेवतायाः क्षिप्रप्रसादत्वेन तद्देवताकविधेः प्रशंसनीयत्वमित्यर्थस्य 'विषं भुङ्क्ष्व मा चास्य गृहे भुङ्क्थाः' इत्यत्र 'विषभक्षणादपि शत्रुगृहभोजनं निकृष्टम्' इत्यर्थान्तरस्य आन्तरालिकस्य वाक्यलक्षणयैव उपपादनात् व्यञ्जना न तेषां सम्मतेति विज्ञायते ।

चिन्त्यमिदम् – वस्तुतस्तु परमपावनीं श्रुतिं मीमांसयितुं प्रवृत्तैः तत्रभवद्भिः कल्पनाप्रपञ्चेऽनारतं विहरताम् आरोढव्यशास्त्रवर्त्मनाम् अस्माकं वाद एव न युज्यते तथापि वाचस्पतिप्रोक्तमपि युक्तिविरुद्धं चेत् आक्षेप्यमेवेति मत्वा किञ्चिदत्र पृच्छयते – कथं वाक्ये लक्षणा?

उच्येत, गभीरायां गङ्गायां घोष इत्यत्र गभीराभिन्ना या नदी तत्तीरवृत्तिर्घोष इति बोधः । तच्च पदलक्षणया दुरुपपादम्, न तावत्तीरं गभीरपदात् प्रतीयते, तीराभिन्ना नदीति अभेदसम्बन्धस्य बाधात् गभीरपदार्थस्य अप्रत्ययाच्च । नापि नदीपदात्, गभीराभिन्नतीरेति बोधस्य कदर्थितत्वात्, तीरस्याप्रत्ययाच्च । नापि नदीपदस्य तत्तीरे लक्षणा गभिरपदार्थस्य च तदेकदेशे नद्यामन्वयः, 'पदार्थः पदार्थेनान्वेति न तदेकदेशेन' इति न्यायस्य विरोधात् । नापि च नदीपदस्य गभीरनदीतीरे लक्षणा गभीरपदं तु तात्पर्यग्राहकमिति सुवचम्, विनिगमनाविरहेण गभीरपदस्यापि तथा वक्तुं शक्यत्वात् । पदद्वयस्य पृथक्

पृथगेव लक्षणेति न युक्तम्, गभीरनदीतीररूपस्य विशिष्टार्थस्यासिद्धेः । तस्मात् गत्यन्तरं नास्तीति पदद्वयसमुदायस्य अनुपदोक्तार्थे एकैव लक्षणेति अभ्युपेयम् । अभ्युपेते तु तस्मिन् लक्षणाया वाक्यवृत्तित्वं सिद्धमिति – नैतद्विचारसहम्, नदीगभीरपदयोः हि कस्य लक्षणेति सन्देहे 'प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्ययः' इति नियमात् विशेष्यत्वप्रयुक्तप्राधान्यात् नदीपदस्यैव सेति सुतरां सिध्यति । एतेन विनिगमनाविरह इत्येतत् प्रत्युक्तम् । किञ्च पदार्थः पदार्थेनान्वेति न तदेकदेशेनेति प्रायवचनं न नियमः, नो चेत् चैत्रस्य गुरुकुलम्, देवदत्तस्य नप्ता इत्यादौ सर्वत्रापि लक्षणास्वीकारप्रसङ्गः। न चेष्टापत्तिः, मुख्यार्थबाधस्येहाननुभवात्, लक्ष्यपदव्यवहार्यस्य अर्थस्य विरहाच्च । किञ्च लक्षणाया वाक्यगतत्वे पर्वतो वह्निमानित्यादौ अनुमेयस्यापि वह्निमत्त्वादेः शाब्दत्वप्रसङ्गः। अथवास्तु सर्वत्र लक्षणा, रूढिप्रयोजनयोः अन्यतरन्निमित्तम् अभिधीयताम् ।

अर्थवादादौ प्रतीतिसिद्धार्थस्य प्रतीतिस्तु वाच्यवैशिष्ट्यसमुत्थितया व्यञ्जनया । अत एव तदर्थस्य प्रतीतपूर्वानन्विततया पृथगेव प्रतीतिः । नन्वबाधितार्थप्रतिपादके शास्त्रे व्यञ्जनायाः कोऽवसरः? सत्यम्, तथापि चमत्कारजननद्वारा प्रवृत्तानां नैरस्यदूरीकरणाय प्रवर्तयितव्यानाम् आभिमुख्य-विधानाय वा शास्त्रेऽपि तत्र तत्र बाधितार्थस्य विन्यासात्, यथा– अग्निर्हिमस्य भेषजम्, द्वा सुपर्णा सयुजा सखाया इत्यादौ । काव्यत्वस्पृगेव वाक्यं रमणीयं रमणीवपुरिव चेतोहरं भवति । यत्र तु सर्वथा शास्त्रत्वं न तत्र कल्पना सम्भवति, यथा – ज्योतिष्टोमेन स्वर्गकामो यजेत, तत्त्वमसि इत्यादौ ।

५. प्राभाकरमतम्

प्राभाकराः कार्यान्वित एवार्थे पदानां शक्तिरिति वदन्तो गौरनुबन्ध्य इत्यादौ गवादिपदानां गोत्वादिजातौ स्मारकत्वरूपा शक्तिः, कार्यरूपेऽर्थान्तर आनुभाविकी शक्तिरिति शक्तेः द्विप्रभेदत्वमुररीकुर्वन्ति । तेषां मतेन वैदिकं लौकिकं च सर्वमपि वाक्यं कार्यपरम् । अतत्परत्वे वाक्यस्योन्मत्तवाक्यवत् अनुपादेयताप्रसङ्गः । तच्च कार्यं क्वचित् शब्दोपात्तं भवति, यथा – देवदत्त! गामानयेत्यादौ । अत्र गवानयनं कार्यम्, तदर्थं वाक्यस्य प्रयोगात् ।

क्वचिदनुपात्तम्, यथा – चैत्र! पुत्रस्ते जात इत्यादौ । अत्र तं पश्येति कार्यभूतोऽर्थः । तदन्वित एव तत्रत्यपदानां शक्तिरिति तयैव तस्य बोधः । चैत्रो मृत इत्यादौ तं पश्येत्यर्थो न युज्यत इति जानीहीति यथोचितमर्थः कल्पनीय इति विशेषः । यद्यप्येतैः न साक्षात् व्यञ्जनायाः प्रत्याख्यानं कृतं तथापि व्यङ्ग्यतयाभिमतस्यार्थस्य कार्यत्वकल्पनसम्भवात् प्रत्याख्यानम् अवश्यम्भावीति व्यञ्जनाद्विट्सु परिगणनम् ।

वस्तुतस्तु मतमेषां चिन्त्यम्, 'चैत्र! पुत्रस्ते जात' इत्यादौ अध्याहारेणैव विवक्षितार्थस्य लाभात् । अध्याहारो नाम शब्दप्रयोगाभावेऽपि विवक्षितस्यार्थस्य तत्प्रतिपादकशब्दस्य वा प्रकरणादिना कल्पनम् । अन्यच्च, व्यङ्ग्यस्य कार्यभूतार्थात् वैलक्षण्यम्, यत् कार्यं भवति तदेव व्यङ्ग्यं यच्च व्यङ्ग्यं तदेव कार्यमिति अविनाभावस्य विरहात्, यथा – 'उच्चरद्भूरिकीलालः शुशुभे वाहिनीपतिः' इत्यत्र तं पश्येति कार्यम्, औपम्यं तु व्यङ्ग्यम् । 'कुमारस्ते नराधीश! श्रियं समधिगच्छतु' त्वं म्रियस्वेति व्यङ्ग्यम् 'पुत्रः श्रियं समधिगच्छतु' इति शब्दोपात्तं तु कार्यम् । एवं मुखं चन्द्रः' इत्यत्र तत् पश्येति कार्यम् 'मुखं चन्द्रकार्यकारी' इति तु व्यङ्ग्यम् । तस्मात् कार्यभूतार्थविषयिकयाभिधया न व्यञ्जनाया गतार्थत्वम् ।

६. महिमभट्टमतम्

वाक्ये श्रुते यावानर्थो व्यङ्ग्यतया निश्चीयते स सर्वोऽपि अनुमानेनैव बोध्यत इति व्यञ्जना नावश्यकी, तथाहि –

[८]भम धम्मिअ! वीसत्थो सो सुणओ मारिओ देण ।
गोलाणईकच्छकुडंगवासिणा दरिअसीहेण ॥

अत्र भ्रमणनिषेधरूपं वस्तु व्यज्यत इति यदुच्यते तत् गोदावरीतीरं श्वभीरुभ्रमणायोग्यं सिंहवत्त्वादिति हेतुना साधयितुं शक्यते । यश्चालङ्काररूपो व्यङ्ग्यः सोऽप्यनुमानेनैवावगम्यः, यथा –

---

८. भ्रम धार्मिक! विस्रब्धः स शुनकोऽद्य मारितस्तेन ।
गोदानदीकच्छकुञ्जवासिना दृप्तसिंहेन ॥ छाया ।

जलकेलितरलकरतलमुक्तपुनःपिहितराधिकावदनः ।
जगदवतु कोकयूनोः विघटनसंघटनकौतुकी कृष्णः ॥

अत्र राधिकावदनं चन्द्र इति रूपकं व्यङ्ग्यमिति यदुच्यते तदपि राधिकावदनं चन्द्रः, आत्मदर्शनादर्शनाभ्यां चक्रवाकयूनोः विघटनसंघटनकारित्वादिति हेतुनैव सुसाधम् । एवं शून्यं वासगृहं विलोक्येत्यत्र यः शृङ्गारो व्यङ्ग्यः सोऽपि इयं नायिका नायकविषयकरतिमती, सुचिरनिर्वर्णनमुखचुम्बनादिमत्त्वादिति अनुमेय एव विभासते । एवं वस्त्वलङ्काररसरूपः त्रिविधोऽपि व्यङ्ग्यः अनुमेयतां नातिवर्तते ॥

नैतत् हृदयङ्गमम्, यत्तावदुक्तम्, सिंहवत्त्वात् हेतोः गोदावरीतीरे श्वभीरोः भ्रमणाभावोऽनुमातुं शक्य इति – तन्न, प्रियानुरागेण निधिलाभेन गुरुराजाद्याज्ञया वा श्वभीरोरपि धार्मिकस्य भ्रमणसम्भवात् हेतोर्व्यभिचरितत्वात्। किञ्च अशौचदृष्ट्या शुनकाद्बिभ्यतोऽपि धार्मिकस्य सिंहाद्भयं भवत्येवेत्यत्र प्रमाणाभावः । यत्पुनरुक्तम् – जलकेलितरलकरतलेति पद्ये रूपकमनुमेयमिति – तदपि न, आत्मदर्शनादर्शनाभ्यामिति हेतोः [१]उत्त्रासकादौ अनैकान्तिकत्वात् । यदप्युक्तम् – शून्यं वासगृहमित्यत्र नायिकायां रत्यादिरूपः शृङ्गारोऽनुमीयत इति तच्चापि न, नायिकादौ अनुमीयमानस्य रत्यादेः रसत्वाभावात् । रसश्च सहृदयेऽभिव्यक्तो रत्यादिः । ततश्च यो रसः तस्य हेतुर्नास्ति । यस्य च हेतुः अस्ति न तस्य रसत्वमिति इति स्फुटमेव तावद्रसस्य अनुमेयत्वात् विभिन्नत्वम् ।

किञ्चानुमितिपक्षे विभावादित्रितयस्य हेतुत्वमुच्यमानमपि न घटते, आलम्बनविभावस्य पक्षरूपत्वात् उद्दीपनविभावस्य च पोषकत्वात् । अन्यच्च, कस्मिंश्चित् हेतौ सति, तस्य साध्येन व्याप्तत्वे सति, तादृशस्य च पक्षधर्मत्वे सति कस्यचिदर्थस्य अनुमितिः सम्भवति । किन्त्वत्र क्वचित् हेतुर्नास्ति, यथा– गतोऽस्तमर्क इत्यादौ । अत्र हि सन्ध्यावन्दनविधानादौ न कोऽपि हेतुर्वर्तते । क्वचित् साध्येन व्याप्तत्वं नास्ति, यथा – भ्रम धार्मिक इत्यत्र जलकेलितरलकरतलेत्यत्र च । अत्राद्ये प्रियानुरागादिनापि भ्रमणं सम्भवतीति

१. उत्त्रासकः पक्षिणां भयजनकः पुरुषः । आदिशब्देन व्याधचञ्चादेः ग्रहणम् ।

द्वितीये उत्त्रासकादावपि वर्तत इति हेतुः व्यभिचरितः। क्वचित् पक्षधर्मत्वं नास्ति, यथा – शून्यं वासगृहमित्यादौ। अत्र हि कटक्षविक्षेपादिः हेतुः सम्भवन्नपि स न सहृदयरूपे पक्षे वर्तते। तस्मात् अनुमेयत्ववचनमश्रद्धेयम्।

७. नैयायिकमतम्

[१०]नैयायिकाः पुनः शक्तिः लक्षणा चेति पदवृत्तिरित्याचक्षाणा व्यञ्जनां नानुमन्यन्ते। ते हि व्यङ्ग्यत्वेन निर्णीतमर्थं क्वचिल्लक्षणया, क्वचिदनुमानेन क्वचिच्च मनसा समर्थयन्ते।

एतच्चिन्त्यम्, प्रागुक्तदोषाणां यथासम्भवं सम्भवात्। अथ शक्तिः लक्षणा चेति पदवृत्तिरिति वदतामस्माकं पदमात्रवृत्तेः अभिधाने तात्पर्यम् न पुनः व्यञ्जनायाः वाक्यसाधारणायाः, यदि तु सापि युक्तिसिद्धा तर्हि तदङ्गीकारे नास्ति बाधकमित्यभिप्रेयते तर्हि तेऽपि युक्ताभिधायिनः।

❖❖❖

व्यञ्जनाया विलक्षणत्वम्

व्यञ्जनेयम् अभिधालक्षणाभ्यां विलक्षणस्वभावेति विचारे कृते स्पष्टम्। वैलक्षण्यं च पदतदेकदेशवाक्यार्थादिगतत्वेन, युगपदनेकार्थविषयकत्वेन, पौनःपुनिकत्वेन, गोप्यार्थविषयकत्वेन, ध्वनिवर्णचेष्टागतत्वेन च। तत्र पदादिगतत्वं यथा –

न्यक्कारोऽयमेव मे यदरयः तत्राप्यसौ तापसः
सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः।
धिग्धिक्छक्रजितं प्रबोधितवता किं कुम्भकरणेन वा
स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः॥

निर्विण्णस्य रावणस्य वचनेऽस्मिन् 'मे' इत्यनेन त्रैलोक्यविजयित्वादि-धर्मशतं व्यज्यते, हन्तीत्यनेन पराक्रमकथाशून्यत्वम्, कुलमित्यनेन शत्रौ पराक्रमाधिक्यं वक्तरि अत्यान्ताशक्तत्वं वा इति पदान्यत्र बहूनि व्यञ्जकानि। एतेन पदगतत्वं स्पष्टम्। अरय इति बहुवचनेन वक्तरि तेजोविहीनत्वम्,

१०. न्या.सि. मु. शब्दखण्डः। व्युत्पत्ति. प्र.प. शक्तिनिरूपणम्।

तापस इति मतुबर्थिकेन अण्प्रत्ययेन तस्मिन् पौरुषकथाविहीनत्वं व्यज्यत इति प्रत्ययगतत्वमपि स्पष्टम् । एवं प्रकृत्यादिगतत्वमपि स्वयमूह्यम् । वाक्यगतत्वं च उच्चरद्भूरिकीलालेत्यादौ । एवं प्रबन्धगतत्वं स्वयमूह्यम् ।

युगपदनेकार्थविषयकत्वं च गतोऽस्तमर्क इत्यादौ सुव्यक्तम् । अत्र हि गोपालकादितत्तत्प्रतिपाद्यभेदेन अनन्ता अर्थाः स्फुरन्ति । यद्यप्येतत् श्लेषस्थलेऽभिधायामपि साधारणम् तथापि तत्र नियतानेकविषयकत्वम् इह तु अनियतानेकविषयत्वमिति भेदो वर्तते । एवं

[११]कस्स व ण होइ रोसो दट्ठूण पियाएं सव्वणं अहरं ।
सब्भमरपउमग्घाइणि वारिअवामे सहसु एह्निं ॥

इत्यादावपि बोध्यम् । पौनःपुनिकत्वं यथा –

पश्यात्र नलिनीदले बलाका दृश्यतेऽबला ।
रम्ये मारकते पात्रे शुक्तिकेव सुनिर्मला ॥
रतिकाले विलोक्य श्रीर्नाभिपद्मे पितामहम् ।
रसाकुलाच्छादयते दक्षिणं नयनं हरेः ॥

अत्राद्ये श्लोके दक्षिणनयनाच्छादनरूपादर्थात् तन्नयनस्य सूर्यात्मकत्वात् अस्तङ्गतिः, तेन पद्मसङ्कोचः, तेन पितामहस्थगनम्, तेन च निधुवनविलास-स्वाच्छन्द्यमित्यादयोऽर्थाः क्रमेण प्रतिभान्ति । अन्त्ये तु अचलात्वरूपादर्थात् आश्वस्तत्वम्, तेनैतत्प्रदेशस्य निर्जनत्वम्, तेनैतदावयोः सङ्केतस्थानम् इत्यादयोऽर्थाः । एतेन व्यञ्जनायाः पौनःपुनिकत्वं सिध्यति । न चैते आनुमानिका इति वाच्यम्, हेतोरनुपादानात् व्याप्त्यादेः वक्तुमशक्यत्वाच्च। गोप्यार्थविषयकत्वं यथा –

[१२]अत्ता एत्थ णिमज्जइ एत्थ अहं दिअसअं पलोएहि ।
मा पहिअ रत्तिअन्धिअ सेज्जाए मह णिमज्जहिसि ॥

अत्र रात्रौ मम शय्यामागच्छेत्यर्थो गोप्यतया प्रतिपाद्यते ।

ध्वनिवर्णगतत्वं प्रसिद्धमेव सहृदयानाम्, नाटकाद्यभिनयकाले हि यदि

११. कस्य वा न भवति रोषो दृष्ट्वा प्रियायाः सव्रणमधरम् ।
सभ्रमरपद्माघ्रायिणि! वारितवामे! सहस्वेदानीम् ॥ [छाया]

१२. श्वश्रूरत्र निमज्जति अत्राहं दिवसकं प्रलोकय ।
मा पथिक! रात्र्यन्धक! शय्यायां मम निमङ्क्ष्यसि ॥ [छाया]

तादृशो वाद्यादिनादः तर्ह्येव करुणादेः रसस्याभिव्यक्तिः, यदि च तादृशाः कर्कशा वर्णाः तर्ह्येव रौद्रादेः रसस्याभिव्यक्तिः इत्यनुभवात् । चेष्टागतत्वं च सुप्रसिद्धम्, कटाक्षादेः अनुरागाद्यभिव्यञ्जकत्वस्य लोकत एवावगमनात् ।

दर्पणकारस्तु वाच्यव्यङ्ग्ययोः वैलक्षण्यप्रतिपादनद्वारा तद्विषयकवृत्त्योः वैलक्षण्यं प्रत्यपीपदत्, यथा –

[१३]बोद्धृस्वरूपसंख्यानिमित्तकार्यप्रतीतिकालानाम् ।
आश्रयविषयादीनां भेदाद्भिन्नोऽभिधेयतो व्यङ्ग्यः ॥

तदेवं व्यञ्जनेति अभिधालक्षणाभ्यां विलक्षणः कश्चिद् व्यापारः सर्वथानपलपनीय इति ज्ञेयम् ।

* व्यञ्जनाया अङ्गीकार्यत्वेन समर्थनम्

अत्रेदमवधेयम् – काव्यं शास्त्रं चेति वाक्यस्य यौ द्वौ प्रभेदौ तयोः काव्यं कल्पितार्थप्रधानं सांसारिकव्यवहारजातप्रतिपादनप्रवणं च । शास्त्रं तु वास्तविकार्थप्रधानं प्रायेण च तादृशार्थप्रतिपादनविमुखम् । अत एव तत्र ऋजुमार्गेणैव अर्थबोधनमिति अर्थस्य अभिधालक्षणाभ्यामेव निर्वाहः । अत एव शास्त्रचिन्तकैः स्वशास्त्रे तयोरेव निरूपणं क्रियते नान्यस्या वृत्तेः । नह्येतावता व्यञ्जना तेषां न सम्मतेति मन्तव्यम् किन्तु अनावश्यकत्वात् तन्निरूपणं न कृतमित्येतावदेव । स्थिते चैवम्, तदनुयायिनः केचित् वस्तुस्थितिमेतामजानन्तः स्वशास्त्रानुक्तत्वमात्रेण व्यञ्जनाया निराकरणे प्रवृत्ताः सन्ति । तदेतत् केवलं काव्यप्रपञ्चस्य अनवलोकनात् न तु बुद्धिदोषात् । यदि पुनः तेऽपि स्वस्थानात् मनागवतीर्य काव्यप्रपञ्चस्य पन्थानं समाश्रयन्ति, समाश्रिताश्च नानाविधम्, अनन्तम्, लौकिकनियमान् अतिवर्तमानम्, क्षणे क्षणे च नवतामुपयान्तम्, [१४]नवरुचिरत्वात् विलक्षणं चेममर्थराशिं पश्यन्ति तदा तेषामप्यस्य व्यापारस्यावश्यकता अवश्यं प्रतिभासते । अत एव

१३. सा.द. पं. प. का–२.
१४. नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम् ।
नवरसरुचिरां निर्मितिमादधती कवेर्भारती जयति ॥ का. प्र. का–१.

न्यायमीमांसादिशास्त्रधुरन्धराणां दीक्षितजगन्नाथप्रभृतीनां काव्यप्रपञ्चस्य प्रवेशने सति अभिधालक्षणयोरिव व्यञ्जनाया निरूपणेऽपि महानादरः प्रतिभाति, यदुक्तं वृत्तिवार्तिके दीक्षितैः –

[१५]विश्वं प्रकाशयन्ती व्यापारैः लक्षणाभिधाध्वननैः ।
नयनैरिव हरमूर्तिर्विबुधोपास्या सरस्वती जयति ॥

वृत्तयः काव्यसरणावलङ्कारावबन्धुभिः ।
अभिधा लक्षणा व्यक्तिरिति तिस्रो निरूपिताः ॥

अत एव वेदान्तकल्पलतिकायां मधुसूदनसरस्वत्यः व्यञ्जनाख्यापरा वृत्तिरित्यालङ्कारिका इत्यादिना व्यञ्जनावादिनामाकूतं प्रकाश्य अर्थापत्तौ तदन्तर्भावं महिम्ना प्रदर्शितत्वात् इत्यादिना च व्यतिरेकं निराकृत्य पर्यन्ते 'यदि च नार्थापत्तावन्तर्भवति तर्ह्यस्तु सापि शब्दवृत्तिरिति न काप्यस्माकं क्षतिः' इत्युपसंहारं व्यदधुः ।

एवञ्च काव्यं शास्त्रादत्यन्तविलक्षणं यतोऽस्मिन् प्रपञ्चे सौधशिखराणि चन्द्रमण्डलं स्पृशन्ति, लाक्षारसलेपनाभावेऽपि चरणद्वयं रक्तं भवति, करकल्पतरोः यशःपयोराशिः समुत्पद्यते, कमले कमलस्योत्पत्तिर्भवति, नीलोत्पलयुगलात् शिताः शराः निस्सरन्ति, सुकुमारसुभगायां कनकलतिकायां कमलं भवति तत्र च कुवलये, ललनायाः पादाघातात् अशोको विकसति, तस्या एव च आस्यमद्येन बकुलः, चकोराः चन्द्रिकां पिबन्ति, वर्षाकाले मराला मानसं यान्ति, लोके वर्णरहिता अपि कोपादयः अत्र सवर्णा भवन्ति, कालदेशादिना नियता अपि पदार्था अत्रानियता भवन्ति अनियताश्च नियताः तथाविधाश्चान्ये सहस्राधिका वैचित्र्यावहा अर्थाः ।

एतादृशैः अतिविचित्रैर्वाच्यैः तादृशैरेव प्रतीयमानैश्चार्थैः समुपबृंहिते काव्यप्रपञ्चे ये येऽर्था अनुभवसिद्धाः तेषां सर्वेषां नाभिधालक्षणाभ्यामेव समर्थनं दुश्शकमिति व्यञ्जनेयमभिनवा काचिद्वृत्तिः समेषामपि अभ्युपेयतां व्रजति । तत्र पुनः यत्र शास्त्रादौ अबाधिता एवार्था भवन्ति तत्राभिधा, यत्र बाधिता एव तत्र व्यञ्जनेति वृत्तिद्वयं पर्याप्तम् । लक्षणा तु अप्ररूढा व्यञ्जनैव ।

१५. वृत्ति.वा. प्र. प. का–१, २.

शास्त्रे तु प्ररूढव्यञ्जना नावश्यकीति भवतु नाम तस्या लक्षणेत्येव व्यपदेशः। नह्येतावता व्यञ्जनाया तिरस्कारो भवति । वस्तुतस्तु व्यञ्जनाम् अङ्गीकुर्वतामस्माकं लक्षणापि नावश्यकी, लक्ष्यतया निर्णीतस्यार्थस्य अनङ्गीकारात्, तथाहि – गङ्गातीरे घोष इत्यत्राभिधयैवार्थस्य प्रतीतिः भवतीति न कोऽपि विशेषः। गङ्गायां घोष इत्युक्तौ तु गङ्गातीरस्य गङ्गाशब्देन प्रतिपादनात् विवक्षितेऽर्थे तद्गतधर्मस्य प्रतीतिरिति शीतत्वपावनत्वादिविशिष्टे गङ्गातीरे घोष इति वाक्यार्थस्य व्यञ्जनया प्रतीतिः। न चात्र विषयप्रयोजनभावमापन्नयोः तीरशीतत्वादिधर्मयोः कथं युगपदेव प्रतीतिरिति वाच्यम्, तद्भावस्यैव अनभ्युपगमात्। लोके हि मूर्खः गङ्गातीरे घोषः तत्र च शीतत्वपावनत्वादयो धर्मा सन्तीति वाक्यद्वयं प्रयुङ्क्ते, प्रतिभाशाली कविस्तु तत्रैवार्थे गङ्गायां घोष इति विलक्षणं वाक्यं प्रयुञ्जानो विवक्षितं सर्वमप्यर्थं प्रतिपादयति इति विशेषः । एवम् आयुर्घृतमित्यादावपि बोध्यम्। ततश्च व्यञ्जनेति व्यतिरिक्तां वृत्तिमनङ्गीकुर्वतां शास्त्रचिन्तकानाम् अभिधया साकमप्ररूढव्यञ्जनारूपया लक्षणयैव विवक्षितार्थस्य निर्वाहः । तां व्यतिरिक्तामङ्गीकुर्वतां रसिकानां तु नवीनयानयैव सर्वार्थसिद्धिसम्भवे कुतः पुनः सा बाल्यावस्थागता वृत्तिरिति लक्षणा नावश्यकी। तदेवं सूक्ष्मतया विचारे अभिधा व्यञ्जना चेति वृत्तिद्वयमात्रं पारमार्थिकम् इत्यस्माकं मतं स्थितमिति सर्वमवदातम् ।

❖❖❖

संयोगादीनां निरूपणम्

ननु शब्दार्थस्यानवच्छेदे संयोगादयो विशेषस्मृतिहेतव इत्युक्तम् । तत्र विशेषस्मृतिहेतुत्वं प्राचीनमतरीत्या अभिधानियामकत्वं नवीनमतरीत्या तात्पर्यनिर्णायकत्वं वा इति विशेषोऽस्तु । किन्तु विशेषस्मृत्यर्थं तज्ज्ञानम् आवश्यकम्। तदुच्यतां प्रथमं के ते संयोगादयः? किं स्वरूपं च तेषाम्? – उच्यते,

संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ॥

सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥

क्रमेणैते निरूप्यन्ते अनतिविस्तरेण –

१. संयोगः – नानार्थकशब्दस्यार्थान्तरेण प्रसिद्धः शब्दानुपात्तश्च सम्बन्धः । विशेषस्मृतिहेतोरस्य संयोगशब्देन व्यपदेशात् तत्सम्बन्धमात्रस्योपस्थितौ अङ्गीक्रियमाणायां सलक्ष्मणो रामः, साञ्जनेयो राम इत्यादौ अव्याप्तिः । तस्मात् संयोगपदेन सम्बन्धसामान्यं स्वीकृतम् । तत्सम्बन्धस्य प्रसिद्धत्वेन विशेषणात् सचक्रचक्रो हरिरित्यत्र न वरुणादौ तात्पर्यस्य निर्णयः, कदाचिद्धारणसम्भवेन संयोगस्य सत्त्वेऽपि प्रसिद्धत्वाभावात् । शब्दोपात्तत्वेन विशेषणात् रामलक्ष्मणौ इत्यादिसाहचर्योदाहरणे नातिव्याप्तिः । शब्देनोपादानं च क्वचित् सहादिशब्देन, क्वचिच्च मतुबादिप्रत्ययेन । सम्बन्धश्च संयोगः, एकोदरप्रभवत्वम्, स्वमिभृत्यभावः, स्वस्वामिभावः, विरोध इत्यादिना नानाविधः । सशङ्खचक्रो हरिः, शङ्खचक्रवान् हरिः शङ्खचक्रसहितो हरिः, धृतशङ्खचक्रो हरिः, हरौ शङ्खचक्रे स्त इत्यादिकमुदाहरणम् । अत्र सर्वत्रापि संयोगवशात् विष्णौ तात्पर्यस्य निर्णयः । सलक्ष्मणो रामः, साञ्जनेयो रामः, सरावणो राम इत्यादौ तु एकोदरप्रभवत्वादिसम्बन्धवशात् दाशरथौ ।

न च धृतशङ्खचक्रो हरिरित्यत्र कथं शङ्खचक्रसंयोगस्य शब्देनोपादानम्, वाचकशब्दस्य अदर्शनात् – उच्यते, संयोगमन्तरेण यन्न सम्भवति तादृशस्य धारणस्य शब्देन प्रतिपादनात् । एतेन साक्षात् प्रतिपादने तदविनाभूतस्य वा अर्थस्य प्रतिपादने सम्बन्धस्य शब्दोपात्तत्वमित्युक्तं भवति ।

२. विप्रयोगः – पूर्वोक्तस्य संयोगस्य ध्वंसः । अशङ्खचक्रो हरिः, शङ्खचक्राभाववान् हरिः, शङ्खचक्ररहितो हरिः, अधृतशङ्खचक्रो हरिः, हरौ शङ्खचक्रे न स्त इत्यादिकमुदाहरणम् । अत्र सर्वत्रापि शङ्खचक्रसंयोगध्वंसात् विष्णावेव तात्पर्यस्य निर्णयः ।

३. साहचर्यम् – नानार्थकशब्दस्य शब्दानुपात्तोऽनुकूलश्च सम्बन्धः । सम्बन्धेऽनुकूलत्वं च साहचर्यपदार्थपर्यालोचनेन लभ्यम् । अत एव रामरावणौ, कर्णार्जुनौ इत्यादौ नास्य सञ्चारः । सम्बन्धश्च पूर्ववत् एकोदरप्रभवत्व-

स्वस्वामिभावादिः । रामलक्षणौ, रामायोध्ये, रामहनूमन्तौ, सीतारामौ इत्यादिकमुदाहरणम् ।

वस्तुतस्तु सम्बन्धस्यानुकूलत्वप्रतिकूलत्वाभ्यां यथा साहचर्यं विरोधिता चेति तात्पर्यनिर्णायकद्वयं तथा सलक्ष्मणो रामः, सरावणो राम इत्यादिसंयोगस्थलेऽपि तयैव रीत्या तद्द्वयं समुचितम् । अथवा तत्रेवात्रापि समानं तात्पर्यनिर्णायकम् । समानत्वपक्षे नामान्तरं तु किञ्चित् कल्पनीयमिति तु विषयान्तरम् ॥

[१६]प्रकाशकारेण रामार्जुनगतिस्तयोरिति उभयमपि नानार्थकं यत्र तादृशं वाक्यमुदाहरणत्वेन उपन्यस्तम् । तत्र द्वयोरित्यनेन प्रकरणादिवशात् कयोश्चित् द्वयोः विरोधिनोः प्रतीतौ तद्विरोधबलात् रामशब्दस्य भार्गवेऽभिधानियमनम् अर्जुनशब्दस्य च कार्तवीर्य इति तदभिपायः ।

[१७]**वृत्तिवार्तिककारस्तु** अत्र विप्रतिपद्यते – यत्रोभयमपि नानार्थकं तादृशं वाक्यं विरोधिताया उदाहरणं न भवति, रामपदस्य भार्गवेऽभिधानियमने सति तद्विरोधपर्यालोचनेन अर्जुनपदस्य कार्तवीर्येऽभिधानियमनम् । सति च तस्मिन् तद्विरोधपर्यालोचनेन रामशब्दस्य भार्गव इत्यन्योन्याश्रयदोषात् । तस्मादन्यतरत् पदं व्यवस्थितार्थकं यत्र तादृशमेवोदाहरणमुचितमिति राम-रावणयोरिवेत्युदाहरणं भवितुमर्हति । रामार्जुनगतिस्तयोरित्यत्र यद्यभिधानियमनं प्रतीतिसिद्धं तर्हि शब्दान्तरसन्निधिं नियामकान्तरमवलम्ब्यैव तदुपपादनीयमिति।

[१८]**पण्डितराजस्तु** वृत्तिकारोक्तं न सहते– अन्यतरत् पदं व्यवस्थितार्थकं यत्र तादृशमेवोदाहरणम् उचितमिति यदभिप्रेतम् – तत्तुच्छम्, रामलक्ष्मणयोरिव इत्यत्र यथा तथात्रापि साहचर्यस्यैव नियामकत्वात् । न च रामस्य लक्ष्मणेनेव रावणेनापि साहचर्यं वर्तते येनेदं घटेतेति वाच्यम्, रामहनूमन्तौ, सीतारामौ इत्यादेः लक्ष्यस्य सङ्ग्रहाय तस्य सम्बन्धसामान्यपरत्वाङ्गीकारात् वध्यघातकभावस्यापि तत्रैवान्तर्भावात् । न चैवमपि सहचरितत्वप्रयोज्यस्यैव सम्बन्धस्य साहचर्यशब्देन ग्रहणमिति वाच्यम्, 'रघुरामौ' इत्यत्र भिन्नकालिकत्वेन

१६. का.प्र. द्वि उ. संयोगादिनिरूपणम् । १७. वृत्तिवा. प्र. प. संयोगादिनिरूपणम् ।
१८. रस. द्वि. आ. संयोगादिनिरूपणम् ।

'रामायोध्ये' इत्यत्र चेतनाचेतनत्वेन च सहचरितत्वाभावात् अनुदाहरणत्वापत्तेः। तस्मात् सहचरितत्वेन प्रयोज्योऽप्रयोज्यो वा सर्वविधोऽपि सम्बन्धः साहचर्यमिति स्थिते वध्यघातकभावस्यापि तेन सङ्ग्रहात् रामरावणयोरिवेत्यत्र साहचर्यमेव स्यान्न तु विरोधिता।

अथ तेन सङ्ग्रहेऽपि वध्यघातकभावं पृथक्कृत्य विरोधितानियामकस्य स्वीकार इत्युच्यते तर्हि पोष्यपोषकादिभावमपि पृथक्कृत्य 'रामसुग्रीवौ' इत्यादावपि भिन्नत्वादेः नियामकान्तरं स्वीक्रियतामिति पर्यनुयोगापत्तिः। तस्मात् प्राचीनोक्तमिव भवदुक्तमप्युदाहरणमशुद्धम् ।

अन्यतरपदस्य व्यवस्थितार्थकत्वे सत्येव विरोधस्य नियामकत्वमित्यपि असङ्गतम्, हरिनागमित्यत्र उभयोरव्यवस्थितार्थकत्वे सत्यपि [१९]'येषां च विरोधः शाश्वतिकः' इति सूत्रेण विहितादेकवद्भावात् अभिव्यक्तेन विरोधेन क्रमेण सिंहगजयोः अभिधानियमनस्य सम्भवात् ।

यदपि रामार्जुनगतिस्तयोरिति शब्दान्तरसन्निधेरुदाहरणमित्यभिप्रेतम् – तदपि तुच्छम्, निषधं पश्य भूभृतम्, नागो दानेन राजत इति भवदुक्तोदाहरणात् अत्रातितरां वैलक्षण्यात् । तत्र हि द्वयोः शब्दयोः नियतार्थौ विहाय अर्थान्तरपरिग्रहेऽन्वयो न सम्भवति प्रकृते तु शौर्यादिवर्णनरूपप्रकरणान्तर-कल्पने राघवकौन्तेयादीनामर्थान्तराणां परिग्रहेऽप्यन्वयः सम्भवति।

अस्माकं तु एतद्भाति – जगन्नाथोक्तं सर्वमपि न समञ्जसम्, तथाहि – सम्बन्धसामान्यस्य साहचर्यत्वेऽपि रामरावणयोरिवेत्यत्र न साहचर्यं नियामकम्, तच्छब्दार्थपर्यालोचनेन अनुकूलस्यैव सम्बन्धस्य तदर्थत्वेन निर्णेयत्वमिति प्रागेव निवेदनात् । यदीदमानादृत्य एतादृशस्थले सर्वत्रापि साहचर्यमेवाशङ्क्यते तर्हि आक्षेप्तुर्भवतो मतेन किमुदाहरणं स्याद्विरोधितायाः? कश्चाशयो हरेः साहचर्यात् पृथगेव अभिधानियामकम् अभ्युपगच्छतः? नहि अनवस्थितसिद्धान्तस्य वादिन आक्षेपमात्रेण महत्त्वं भवति । न च हरिनागमिति पदमुदाहरणम्, सम्बन्धसामान्यात्मकस्य साहचर्यस्य कुक्षौ विरोधस्यापि निपतनात् । कः खलु विचारवान् स्थलद्वयेऽपि सम्बन्धस्य

१९. अष्ट. २.४.९.

समानत्वे नियामकभेदमभ्युपैति? विरोधाभिव्यञ्जकैकवद्भावेन वैलक्षण्यं तु नियामकभेदनिर्णये दुर्बलो हेतुः । तस्मात् रामरावणयोरिवेत्यत्र विरोधस्य अभिधानियामकत्वमिति यदुक्तं वृत्तिकारेण तत्साम्प्रतमेव ।

यदपि प्राचीनोक्तमिव भवदुक्तमुदाहरणमपि अशुद्धमेवेत्युक्तम् – तस्य क आशय इत्येव न ज्ञायते, पर्यन्ते 'एवमपि काव्यप्रकाशगतस्य रामार्जुन-गतिस्तयोरिति विरोधितोदाहरणस्यासङ्गतिः स्थितैवेति चेन्न, तयोः कयोश्चित् प्रसिद्धविरोधयोः रामार्जुनगती रामार्जुनसदृशी गतिराचरणमिति तदर्थवर्णने विरोधेन प्रस्तावशात् प्रतीतेन युगपद्भार्गवकार्तवीर्ययोः रामार्जुनशब्दाभिधाया नियमनस्योपपत्तेः' इति सन्दर्भेण प्राचीनोदाहरणस्य स्वयमेव समर्थनात् । ननु प्राचीनोदाहरणे गतिस्तयोरित्यस्ति प्रकृते तु तन्नास्तीति चेत् – न, रामरावणयोरिवेति षष्ठ्यन्तघटितस्यावाक्यत्वेन गतिस्तयोरिति योजने ततो वैषम्याभावात् ।

यत्पुनः निषधं पश्य भूभृतमित्यतो वैलक्षण्यस्य सत्त्वात् रामार्जुनगतिस्तयोः इत्येतत् शब्दान्तरसन्निधेरुदाहरणं न भवतीत्यभिप्रेतम्, यच्चापि अन्यतरपदस्य व्यवस्थितार्थकत्वे सत्येव विरोधस्य अभिधानियामकत्वमित्याख्यातम् – तदुभयं बाढं स्वीक्रियते, सङ्गतत्वात् । तदेवं जगन्नाथकृतं प्रत्याख्यानमंशेन सङ्गतम् अंशान्तरेणासङ्गतमिति दिक् ।

४. **विरोधिता** – वध्यघातकभावः सहानवस्थानं च । कर्णार्जुनौ, छायातपौ इति क्रमेणोदाहरणम् । आद्ये वध्यघातकभावरूपात् विरोधात् कर्णशब्दस्य राधेये अर्जुनशब्दस्य च पार्थे तात्पर्यं निर्णीयते । अन्त्ये तु सहानवस्थानरूपात् तस्मात् छायाशब्दस्य आतपाभावे ।

५. **अर्थः** – प्रयोजनम् । हरिं मोक्षाय भजतेत्युदाहरणम् । अत्र मोक्षरूपप्रयोजनेन हरिशब्दस्य विष्णौ तात्पर्यं निर्णीयते । एवं स्थाणुं वन्दे भवच्छेद इत्यादावपि बोध्यम् ।

६. **प्रकरणम्** – वक्तृबुद्धिस्थत्वम् । विवेश रामो दुर्धर्षस्तापसाश्रम-मण्डलम् इत्युदाहरणम् । अत्र वक्तुः वाल्मीकेः बुद्धौ सत्त्वात् रामशब्दस्य दाशरथौ तात्पर्यं निर्णीयते । एवं सर्वं जानाति देव इत्यादावपि बोध्यम् ।

जगन्नाथस्तु वक्तृश्रोतृबुद्धिस्थत्वमिति लक्षणमाचष्टे – तन्न, विवक्षितार्थ-प्रतिपादनाय वक्त्रा वाक्यस्य प्रयोग इति स्थिते तन्मात्रबुद्धिस्थत्वस्य ग्राह्यत्वात् श्रोतृबुद्धिस्थत्वस्य अनपेक्षितत्वाच्च ।

७. लिङ्गम् – नानार्थकशब्दबोध्यैकार्थमात्रगतो धर्मः । कुपितो भूभृत् इत्युदाहरणम् । अत्र कोपरूपधर्मस्य राजमात्रे वृत्तिः न पुनः पर्वत इति राजनि तात्पर्यं निर्णीयते ।

८. शब्दान्तरसन्निधिः – नानार्थकपदैकार्थमात्रसंसर्ग्यर्थान्तरवाचकपद-समभिव्याहारः । निषधं पश्य भूभृतम् इत्युदाहरणम् । अत्र निषधशब्दस्य पर्वतविशेषः जनपदविशेषश्चार्थः । भूभृच्छब्दस्य राजा पर्वतश्च । द्वयोः शब्दयोः समानविभक्त्यन्तत्वेन प्रयोगादभेदेनान्वय इति स्थिते पर्वतविशेषस्य पर्वतसामान्येनैव सम्बन्धो घटते न तु अन्यस्यान्येन । अतोऽत्र पर्वतसामान्य-मात्रेऽन्वयिनो निषधाख्यपर्वतविशेषस्य वाचको यः निषधशब्दः तत्समभिव्याहारात् भूभृच्छब्दस्य पर्वते, निषधाख्यपर्वतविशेषमात्रेऽन्वयिनः पर्वतसामान्यस्य वाचकः यो भूभृच्छब्दः तत्समभिव्याहारात् निषधशब्दस्य च पर्वतविशेषे तात्पर्यं निर्णीयते ।

ननु भूभृच्छब्दस्य पर्वतेऽभिधानियमने सति तच्छब्दसमभिव्याहारबलात् निषधशब्दस्य तद्विशेषेऽभिधानियमनम्, सति च तस्मिन् तच्छब्द-समभिव्याहारबलात् भूभृच्छब्दस्य पर्वत इत्यभिधानियमनयोः परस्परापेक्षित्वात् अन्योन्याश्रय इति चेत् – अत्र हि अन्यस्मिन्नर्थेऽभिधानियमने अभिधा-नियमनान्तरं नापेक्ष्यते किन्तु अन्यार्थप्रतिपादकशब्दस्य सन्निधानम् । शब्दयोश्च वाक्योच्चारणकाल एव सिद्धत्वात् नान्योन्याश्रय इति वृत्तिवार्तिककारः ।

जगन्नाथः पुनः अर्थान्तरस्यार्थान्तरेण अन्वयस्यासम्भवात् युगपत्तयोरेव अर्थयोः अभिधानियमनमिति नान्योन्याश्रय इति रमणीयमाचष्टे ।

नन्वेतत्सर्वमस्तु, किन्तु सशङ्खचक्रो हरिरित्यादावपि सशङ्खचक्रशब्द-सन्निधानादेव हरिशब्दस्य विष्णौ अभिधानियमनसम्भवे संयोगरूप-नियामकान्तरस्य स्वीकारः कुत इति चेत् – संयोगस्थले शङ्खचक्रादिरूपेणार्थेन योऽन्तरङ्गः सम्बन्धः तद्बलात् हर्यादिशब्दस्य कुत्रचिदर्थेऽभिधानियमनम्,

प्रकृते तु निषधाद्यर्थप्रतिपादकेन शब्देन यो बहिरङ्गः सम्बन्धः तद्बलात् भूभृदादिशब्दस्य कुत्रचिदर्थेऽभिधानियमनमिति वैलक्षण्यादिति वृत्तिवार्तिककारः।

वस्तुतस्तु यत्रार्थस्यार्थेन सम्बन्धः तत्र शब्देनापि सम्बन्धो वर्तते यत्र पुनः शब्देन तत्रार्थेनापि सम्बन्ध इति समाधानमिदं न युक्तम्। तस्मात् एकत्र एकार्थकेन शब्देन सम्बन्धः अन्यत्र नानार्थकेनेत्येव वैलक्षण्यं वक्तव्यमिति मामकीना मतिः।

प्रकाशकारस्तु नियतार्थकशब्दसामानाधिकरण्यं शब्दान्तरसन्निधिः। देवस्य त्रिपुरारातेरित्युदाहरणम्। अत्र त्रिपुरारातिशब्दसामानाधिकरण्यात् नानार्थकस्य देवशब्दस्य भगवति शिवेऽभिधानियमनम् इत्यभिप्रैति – तदसत्, समभिव्याहृतशब्दस्य नियतार्थकत्वे लिङ्गेनैव अभिधानियमनसम्भव इति पृथक् नियामकस्वीकारस्य असङ्गतत्वात्, कुपितो भूभृदित्यादौ लिङ्गोदाहरणे अतिव्याप्तेश्च। न च सामानाधिकरण्ये शब्दान्तरसन्निधिः वैयधिकरण्ये लिङ्गमिति वाच्यम्, कुपितो भूभृदित्यादौ अतिव्याप्तेः तादवस्थ्यात्, भूभृतः कोप इति मनाक् परिवर्तिते वाक्ये शब्दान्तरसन्निधानस्वीकारप्रसङ्गाच्च। अन्यच्च, नियामकभेदनिर्णये सामानाधिकरण्यवैयधिकरण्ययोः अप्रयोजकत्वम्, अत एव सशङ्खचक्रो हरिरित्यतो हरौ सशङ्खचक्रत्वमित्यत्र संयोगादतिरिक्तस्य अभिधानियामकस्य कल्पनं वारितं भवति, निषधं पश्य भूभृतमित्यतो नागो दानेन राजत इत्यत्र तस्यैवाभिधानियामकस्य निर्णयश्च सङ्गतो भवति। न चानयोरुभयोः वाक्ययोः शब्दान्तरसन्निधेः लक्षणस्य सङ्गतिः, आद्ये नियतार्थकत्वाभावात्, अन्त्ये सामानाधिकरण्यस्याप्यभावात्। अतो देवस्य त्रिपुरारातेरित्यत्र लिङ्गमित्येव युक्तम्।

एतेन अस्मिन् प्रसङ्गे [२०]चूडामणिदीक्षितेन यदुक्तम् – असाधारणधर्मस्य गुणक्रियारूपत्वे लिङ्गम्, यथा – कुपितो भूभृदित्यादौ। अन्यरूपत्वे शब्दान्तर-सन्निधिः, यथा – देवस्य त्रिपुरारातेरिति। यच्चापि पुनः – नागो दानेन राजत इत्यत्रान्योन्याश्रयान्न अभिधानियमनमिति – तन्नादर्तव्यमिति बोध्यम्।

९. सामर्थ्यम् – कारणत्वम्। मधुना मत्तः पिक इत्युदाहरणम्। अत्र

२०. का.द. द्वि उ. संयोगादिनिरूपणम्।

कोकिलमादनकारणत्वरूपेण सामर्थ्येन मधुशब्दस्य वसन्ते तात्पर्यं निर्णीयते।
१०. औचिती – योग्यता। भजत हरिं भवतापहरम् इत्युदाहरणम्। अत्र भवतापहरणयोग्यतया हरिशब्दस्य विष्णौ तात्पर्यं निर्णीयते।

ननु अर्थसामर्थ्यौचितीषु मिथः किं वैलक्षण्यम्, त्रिष्वपि कार्यकारणभावस्य समानत्वात् – अत्र वृत्तिवार्तिककारोऽभिप्रैति, अर्थोदाहरणे चतुर्थ्या कार्यस्य निर्देशः। सामर्थ्योदाहरणे तृतीयया निर्देशः। औचित्योदाहरणे तदुभयाभावेऽपि योग्यतामात्रेण समभिव्याहारवशात् कार्यकारणभावस्य अवगमः॥

११. देशः – नगरादिः स्थलविशेषः। क्षीरसागरे हरिः शेत इत्युदाहरणम्। अत्र क्षीरसागररूपदेशेन हरिशब्दस्य विष्णौ पूर्ववत्।

१२. कालः – सूर्यादेः सञ्चारः, तदनुमेयः पदार्थविशेषो वा। स च दिवसादिः। निशि चित्रभानुर्विभातीत्युदाहरणम्। अत्र निशाकालेन चित्रभानु-शब्दस्य अग्नौ तात्पर्यं निर्णीयते।

१३. व्यक्तिः – शब्दगतं लिङ्गम्। मित्रो भाति, मित्रं भातित्युदाहरणम्। अत्र मित्रशब्दात् पुंनपुंसकलिङ्गाभ्यां क्रमेण सूर्ये सुहृदि च तात्पर्यं निर्णीयते।

१४. स्वरः – ताल्वादिस्थानेषु ऊर्ध्वादिभागनिष्पन्नत्वम् उदात्तादिकम्। तिस्र एव साह्नस्योपसदो द्वादशाहीनस्येति श्रुतिरुदाहरणम्। अत्राहीनशब्दस्य मध्योदात्तस्वरेण अहर्गणसाध्यसुत्याके द्वादशाहाख्ये क्रतुविशेषे तात्पर्यं निर्णीयते। यदि पुनः आद्युदात्तस्वरः तर्हि हीनो नेति तत्पुरुषात् उत्तमे तात्पर्यस्य निर्णयो भवति। एवम् इन्द्रशत्रुर्वर्धस्व इत्यादिकम् उदाहरणमूह्यम्। आदिशब्देन अभिनयापदेशादीनां परिग्रहः।

१५. अभिनयः – विवक्षितार्थप्रकाशको हस्तादिव्यापारः। चेष्टेति यावत्, यथा –

[२१]एद्दहमेत्तथणिआ एद्दहमेत्तेहिं अच्छिवत्तेहिं।
एद्दहमेत्तावत्था एद्दहमेत्तेहिं दिअएहिं॥

---

२१. एतावन्मात्रस्तनिका एतावन्मात्राभ्यामक्षिपत्राभ्याम्।
एतावन्मात्रावस्था एतावन्मात्रैर्दिवसैः॥ छाया।

अत्र हस्ताद्यभिनयेन एतावच्छब्दस्य कमलकोरकादिपरिमाणविशेषे तात्पर्यं निर्णीयते ।

१६. अपदेशः – विवक्षितार्थस्य शृङ्गग्राहिकया निर्देशः, यथा –

[२२]इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम् ।
विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम् ॥

अत्र अङ्गुल्या स्वस्य निर्देशेन इत इत्यस्य वक्तरि तात्पर्यं निर्णीयते । तदेवं वृत्तं तात्पर्यनिर्णायकविवेचनम् ।

एषु पर्यन्ते जगन्नाथस्य तावदिदं मतम् – [२३]वस्तुतस्तु संयोगादीनाम् असाधारणत्वे नानार्थकशब्दस्यार्थविशेषे सङ्कोच एव न सम्भवति, नियामकानामसङ्कुचितत्वात् । अथ प्रसिद्धत्वादिना तेषामसाधारणताबुद्धिः यथाकथञ्चित् सम्पाद्यते तदा प्रायशो लिङ्गभेदा एवैते न तु सर्वथैव स्वतन्त्रा इति बोध्यम् ॥ साधु खल्विदमभिधानं जगन्नाथस्येति दिक् ॥

सत्यभामावेङ्कटसुब्रह्मण्यभट्टयोस्सुतस्य लक्ष्मीनारायणभट्टस्य कृतौ
साहित्यवल्लर्यां वृत्तिनिरूपणो नाम
पञ्चमः स्तबकः ॥

२२. कुमार. द्वि. स. श्लो–५५.

२३. रस. द्वि. आ. संयोगादिनिरूपणम् ।

॥श्रीरस्तु॥

षष्ठः स्तबकः

काव्यप्रभेदनिरूपणम्

वाणीं नमामि सितवस्त्रविभूषिताङ्गीं
मायूरपिच्छसदृशं कचमुद्वहन्तीम् ।
वीणारवेण मुखरीकृतभृङ्गपङ्क्तिं
हंसांश्च हंसकरवेण मृदु नर्तयन्तीम् ॥

काव्यप्रभेदे विमर्शकानां मतभेदो वर्तते । तत्र प्रायेण सर्वेऽपि आलङ्कारिका काव्ये त्रैविध्यमभ्युपयन्ति । विश्वनाथो द्वैविध्यम् । जगन्नाथस्तु चातुर्विध्यम्। सर्वमेतत् यथाक्रमं निरूप्यते । तत्र प्रथमं ध्वनिरिति प्रभेदे विमतिः प्रदर्श्यते –

१. उत्तमकाव्यम्

व्यञ्जनाविषयोऽर्थो व्यङ्ग्यः । स च वस्तुरूपोऽलङ्काररूपो रसरूपश्चेति त्रिविधः । तत्र व्यङ्ग्यस्य वस्त्वलङ्कारात्मकत्वे मध्यमं काव्यम् । रसात्मकत्वे पुनरुत्तममिति प्रागेव निवेदितम् ।

* प्राचीनानां मतम्

प्राचीनास्तु त्रिविधस्यापि व्यङ्ग्यस्य वाच्यादप्रधानत्वे गुणीभूतव्यङ्ग्यमिति मध्यमं काव्यम् प्रधानत्वे तु ध्वनिर्नाम उत्तममित्यामनन्ति, यदाहानन्दवर्धनः –

[१]यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः ॥

अत्र विकल्पार्थस्य वाकारस्य प्रयोगात् अन्यतरस्य ग्रहणे 'व्यङ्क्तः' इति 'उपसर्जनीकृतस्वार्थौ' इति च द्विवचनान्तस्य विशेषणद्वयस्यानन्वय इति

१. ध्वनि. प्र.उ. का–१३.

तद्दूरीकरणाय तदुभयपरामर्शिन 'उभौ' इत्यस्याध्याहारः । एवमपि तस्य विकल्प्यतयैव प्रतीतिरिति पक्षान्तरे शब्देऽर्थे च विशेषणस्यानन्वयः तदवस्थः तथापि विभिन्नवचनकानां विशेष्याणां समभिव्याहारे यत्परं तदानुगुण्येनैव विशेषणस्य योजनमिति दोषाभावः । अत एव 'रामो वा कृष्णो वा उभौ वा यानमारूढौ त्वरितं ग्रामं गच्छताम्' इति द्विवचनान्तत्वेनैव प्रयोगः न तु एकवचनान्तत्वेन । एतेन रामे कृष्णे च गमनकर्तृत्वमिव पक्षान्तरे शब्दे अर्थे च विशेषणस्यान्वय आर्थ इत्युक्तं भवति । अर्थः शब्दो वेति पृथक् ग्रहणं तु एकैकस्यापि व्यञ्जकत्वं ख्यापयितुम् । एतेन [२]दिशि मन्दायते तेज इत्यादौ अर्थमात्रे, 'उच्चरद्भूकीलालः शुशुभे वाहिनीपतिः' इत्यादौ च शब्दमात्रे व्यञ्जकत्वदर्शनेऽपि नासङ्गतिरिति बोध्यम् । तथा च कारिकाया अयमर्थः –

यत्रार्थो गुणीकृतात्मा, शब्दो वा गूणीकृतार्थः, उभौ वा गुणीकृतस्वार्थौ तं प्रतीयमानमर्थमभिव्यङ्क्तः स काव्यविशेषो ध्वनिरिति रसिकैराख्यातम् ॥

ध्वनिरित्ययं शब्दः शब्दनार्थकात् ध्वनतेः औणादिक [३]इप्रत्यये सति निष्पद्यते । निष्पन्नस्य तस्य व्युत्पत्तिभेदात् अनेकस्मिन्नर्थेऽवस्थानम्, यथा –

- ध्वनतीति प्रत्ययस्य कर्त्रर्थकत्वे ध्वनिर्व्यञ्जकः शब्दः तादृश एव चार्थः ।
- ध्वन्यत इति कर्मार्थकत्वे ध्वनिः प्रतीयमानोऽर्थः ।
- ध्वननमिति भावार्थकत्वे ध्वनिः व्यञ्जनाव्यापारः ।
- ध्वन्यतेऽत्र इत्यधिकरणार्थकत्वे ध्वनिः काव्यविशेषः ।

सर्वेषामेतेषां ध्वनिशब्देन व्यवहारे वैयाकरणानां दर्शनं मूलम् । ते हि वर्णाभिव्यङ्ग्यस्य स्फोटस्य वाचकत्वमिच्छन्ति । न च वर्णानामेव वाचकत्वम्, आशुविनाशित्वेन समुदायस्य असम्भवात् । नापि प्रत्येकं वर्णस्य, द्वितीयादीनां नैरर्थक्यप्रसङ्गात् । नापि पूर्वपूर्ववर्णानुभवसञ्जातसंस्कारजन्यस्मृत्युपारूढैः वर्णैः सहितस्य चरमवर्णस्य, अनुभवक्रमेणैव स्मृतिरित्यत्र मानाभावेन रसशब्दं शृण्वतां सर इति बोधापत्तेः । तस्मात् घट इत्यत्र घकारादिषु वर्णेषु क्रमेण

---

२. दिशि मन्दायते तेजो दक्षिणस्यां रवेरपि ।
तस्यामेव रघोः पाण्ड्याः प्रतापं न विषेहिरे ॥ उल्लेखः, सा.द. च.प.

३. खनिकष्यज्यसिवसिवनिसनिध्वनिग्रन्थिचलिभ्यश्च, उणादि. ५८९.

श्रूयमाणेषु स्फुटस्फुटीभवतः स्फोटस्य विसर्गोच्चारणे सति अत्यन्त-स्फुटत्वेनाभिव्यक्तिः । स्फुटत्यर्थोऽस्मादिति स्फोटयत्यर्थमिति वा स्फोटशब्दस्य व्युत्पत्तिः । यद्यप्ययं स्फोटो विभुः तथापि वर्णरूपोपाधिवशात् परिमितोऽनेकश्च । उपाधिभेदात् उपहितेऽपि भेद इति घटशब्दश्रवणे न पटरूपार्थस्य बोधसम्भवः । शब्दशब्दवाच्यत्वं च परमार्थतोऽस्यैव स्फोटस्य तद्व्यञ्जकवर्णसमुदाये तु भाक्तम् । अयं स्फोटो ब्रह्म यथा जीवो वेदान्तिमतेन । साधुभिरेव शब्दैरस्य साधीयसी अभिव्यक्तिः । तदर्थमेव शब्दानामन्वाख्यानमिति येषां मतं तदनुसारेण स्फोटस्य व्यङ्ग्यत्वं वर्णानां च व्यञ्जकत्वम् । व्यञ्जकानामेतेषां नादापरपर्यायाणां ध्वनन्तीति कृत्वा ध्वनिशब्देन व्यपदेशः, तदुक्तम् –

[४]प्रत्ययैरनुपाख्येयैः ग्रहणानुगुणैस्तथा ।
ध्वनिप्रकाशिते शब्दे स्वरूपमवधार्यते ॥

शब्दश्चात्र स्फोटः । तस्मिन् ध्वनिप्रकाशितत्वं च वर्णाभिव्यक्तत्वम् । ततस्तेषामेव सरणिमनुरुन्धानैः रसिकैः व्यञ्जकत्वसाम्यात् शब्देऽर्थे च ध्वनिशब्देन व्यपदेशः कृतः यश्चाधुनापि अविच्छिन्नः प्रवर्तते । तदेवं शब्दस्यार्थस्य च ध्वनित्वम् ।

व्यङ्ग्यस्य ध्वनिशब्देन व्यवहारेऽपि तेषामेव दर्शनं मूलम् – ते हि शब्दः संयोगजो विभागजः शब्दजश्चेति त्रिविध इत्यभ्युपयन्ति । द्वयोर्वस्तुनोः संयोगे सति यः शब्दः स संयोगजः, यथा – दण्डादिना भेर्यादेः ताडने नाभिरन्ध्रोत्थितमारुतेन च ताल्वादिस्थानस्याहनने सति समुत्पन्नः । वस्तुनः कस्यचित् द्विधाभवने यः शब्दः स वियोगजः, यथा – पटादेः विभेदने शाखादेश्च वृक्षादितः पृथग्भवने सति समुत्पन्नः । शब्दजस्तु सः यः शब्दात् समुत्पन्नः । सरसि पाषाणप्रक्षेपादिना तरङ्गे कस्मिंश्चित् समुत्पन्ने ततोऽन्यः ततोऽन्य इति तरङ्गाणां यथा परम्परा काचित् समुत्पद्यते यस्यामन्तिमश्च तटोपविष्टानामस्माकं पादं स्पृशति तथा प्रागुक्तेन केनचित् कारणेन प्रदेशे कस्मिंश्चित् शब्दे समुत्पन्ने ततोऽन्यः ततोऽन्य इति शब्दानां परम्परा काचित्

४. वाक्य. ब्रह्मकाण्डः, का–८२.

समुत्पद्यते यस्यामन्तिमश्च अस्माकं श्रवणकुहरं प्रविशति। तदिदं वीचीतरङ्ग-न्यायेन शब्दोत्पत्तिरित्युच्यते। अत्र यः प्रथमः शब्दः तस्य स्फोटशब्देन व्यवहारः द्वितीयादीनां तु ध्वनिशब्देन, तदुक्तम् –

[५]यः संयोगविभागाभ्यां करणैरुपजन्यते।
स स्फोटः शब्दजाः शब्दा ध्वनयोऽन्यैरुदाहृताः॥

तत्र प्रथमशब्दात् द्वितीयस्य द्वितीयाच्च तृतीयस्योत्पत्तौ यः क्रमो दृश्यते स एव वाच्यात् व्यङ्ग्यस्य प्रतीतावपि। तत्र पुनः क्रमविशिष्टस्य द्वितीयादेः शब्दस्य ध्वनिशब्देन व्यपदेशे प्रवृत्ते तत्तुल्यस्य व्यङ्ग्यस्यापि तथा व्यपदेशो न दोषायेति सोऽपि ध्वनिशब्देन व्यपदिष्टो रसिकैः। ननु भोः! एवं सति रसादिव्यङ्ग्ये क्रमस्यैवाभावात् कथं ध्वनिशब्देन व्यपदेशः – भ्रान्तोऽसि, तत्रापि हि सूच्यनुवेधे शतपत्रपत्रेष्विव क्रमोऽवश्यं वर्तते किन्तु लघुत्वात् न लक्ष्यत इति विशेषः। तदेवं व्यङ्ग्यस्य ध्वनित्वं स्पष्टम्।

केचित्तु कदम्बमुकुलन्यायेन शब्दोत्पत्तिमिच्छन्ति – यथा कदम्बमुकुलः सर्वास्वपि दिक्षु युगपदेव प्रसरति प्रसृतश्च जलपतिततैलबिन्दुरिव विस्तृतो भवति तथा शब्दोऽपीति तेषां मतिः। एवञ्च तन्मतेन एकस्यैव शब्दस्य सर्वासु दिक्षु व्यापनमिति क्रमस्य दुर्वचत्वम्, ततश्चात्र तन्न्यायस्य अनभिप्रेतत्वमिति बोध्यम्।

व्यापारस्यापि ध्वनिशब्देन व्यपदेशः। वर्णेषु मात्रादिपरिमाणेन नियतेष्वपि द्रुतविलम्बितत्वादिव्यापारवशात् परिमाणान्तरं सम्पन्नमिव भासते, यथा – गाने सामर्षवचने तथाविधे चान्यत्र। तथापि ध्वनिशब्दवाच्यैरेतैः व्यापारैः स्फोटस्तावत् भेदं न प्राप्नोति, तदुक्तम् –

[६]शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदे तु वैकृताः।
ध्वनयः समुपोहन्ते स्फोटात्मा तैर्न भिद्यते॥

तदेवमुच्चारणातिरिक्तस्य द्रुतविलम्बितत्वादेः व्यापारस्य तैः ध्वनिशब्देन व्यपदेशे कृते तत्तुल्यस्य व्यञ्जनानामकस्य व्यापारस्यापि तथा व्यपदेशो

५. वाक्य. ब्रह्मकाण्डः, का–१०१. ६. वाक्य. ब्रह्मकाण्डः. का–७६.

नूनमौचित्यमञ्चति । तदेवं व्यञ्जनाया ध्वनित्वम् । एवं शब्दस्य अर्थस्य व्यङ्ग्यस्य व्यञ्जनायाश्च ध्वनित्वे सिद्धे तत्समुदायरूपस्य काव्यस्यापि तत्सिद्धिरिति न तदर्थं प्रमाणमर्थनीयम् ।

एवञ्चैतस्य मतेन व्यङ्ग्यस्य प्राधान्ये ध्वनिः । प्राधान्यं च चमत्कारकारित्वम्, यदुक्तम् — [७]चारुत्वोत्कर्षनिबन्धना हि वाच्यव्यङ्ग्ययोः प्राधान्यविवक्षा ॥ समासोक्त्यादिषु व्यङ्ग्यस्य सद्भावेऽपि प्राधान्याभावान्न ध्वनित्वम् । क्वचित् अलङ्कारत्वेन परिगणितेऽप्यर्थे प्राधान्यस्य प्रतीतौ ध्वनित्वमेव नालङ्कारत्वम् । तदेवं व्यञ्जकात् व्यङ्ग्यस्य प्राधान्ये ध्वनिरिति मतमस्य स्थितम् ॥

मम्मटस्य मतेन तावदिदं ध्वनेर्लक्षणम् —

[८]इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्यात् ध्वनिः बुधैः कथितः ॥

अत्रातिशयितत्वं प्राधान्यम् । तच्च चमत्कारकारित्वात् न भिद्यते । अत एवासुन्दरव्यङ्ग्यस्य अचमत्कारकारित्वे पर्यवसितस्य गुणीभूतव्यङ्ग्यत्वेन परिगणनं तत्कृतं सङ्गच्छते । तथा च वाच्यात् व्यङ्ग्यस्य प्राधान्ये ध्वनिरिति लक्षणं पर्यवसन्नम् । पूर्वत्र व्यङ्ग्यस्य प्राधान्यं शब्दार्थापेक्षम् इह तु वाच्यमात्रापेक्षमिति सूक्ष्मो विशेषोऽनुसन्धेयः ।

दर्पणकारेण पुनः एतदेव वाक्यान्तरेणाख्यातम् —

[९]वाच्यातिशायिनि व्यङ्ग्ये ध्वनिस्तत्काव्यमुत्तमम् ॥

जगन्नाथेन पुनरिदमुच्यते —

[१०]शब्दार्थौ यत्र गुणीभावितात्मानौ कमप्यर्थमभिव्यङ्क्तः तदाद्यम् ॥

शब्दार्थयोः गुणीभावितत्वोक्त्या व्यङ्ग्यस्य प्राधान्यम्, कमपीत्युक्त्या चमत्कारकारित्वं च विज्ञायते । अत एवास्य मतेन प्राधान्यचमत्कारकारित्वयोः भेदः सिध्यति । अत एव च 'यत्र व्यङ्ग्यमप्रधानमेव सच्चमत्कारकारणं तद् द्वितीयम्' इत्यप्रधानव्यङ्ग्यस्य चमत्कारकारित्वे द्वितीयः प्रभेद इत्यङ्गीकारोऽपि सङ्गच्छते । एवं चास्य मतेन व्यङ्ग्यस्य शब्दार्थापेक्षे प्राधान्ये सति ध्वनिरिति लक्षणं फलितम् ।

७. ध्वनि, तृ.उ. का–३४.   ८. का.प्र. प्र.उ. का–४.
९. सा.द. च.प. का–१.   १०. रस, प्र.आ. काव्यप्रभेदनिरूपणम् ।

अत्र ध्वनिकारस्य जगन्नाथस्य च मतेन व्यङ्ग्यस्य प्राधान्यं शब्दार्थापेक्षम् अन्ययोर्मतेन वाच्यमात्रापेक्षमिति तथा जगन्नाथस्य मतेन प्राधान्यचमत्कार-कारित्वयोः भेद अन्येषां तु मतेनाभेद इति साम्यवैषम्यविवेकः।

* प्राचीनमतानां परिशीलनम्

वस्तुतस्तु सर्वमेतत् अविचारितरमणीयम्, यत्तावदुक्तम् आनन्दवर्धनेन यत्रार्थः शब्दो वा तमर्थम् उपसर्जनीकृतस्वार्थाविति – तन्न, वचनभेदात् विशेषणयोः अन्वय एव न सम्भवतीति वाक्यस्यासाधुत्वात् । न च उभाविति विशेष्यस्याध्याहारे नानुपपत्तिरिति वाच्यम्, अर्थः शब्दो वेति वाकारस्य एकत्रैव प्रयोगात् अध्यहारे मानाभावात् । नहि 'रामेण कृष्णेन वा ग्रामो गन्तव्यः' इत्युक्तौ पक्षान्तरे उभयोरपि गमनं प्रतीयते । यदि पुनः रामेण वा कृष्णेन वा इत्युभयत्रापि प्रयोगः तर्हि कथञ्चित् स्यादपि किन्त्वत्र तथा नास्ति । ननु बाधकाभावात् अनुकूलविशेषणस्य च सत्त्वात् तत्प्रतीयत इति चेत् – मैवम्, अन्यत्रान्यतरस्य ग्रहणार्थं वाकारस्य प्रयोगः अन्यत्र चोभयोरपि ग्रहणार्थमध्याहारे यत्न इति विप्रतिषेधात् । नहि विप्रतिषिद्धावर्थौ जातुचित् सिद्धिमुपगच्छतः ।

किञ्चार्थस्य गुणीभावे सम्भवत्यपि शब्दस्य गुणीभावः कथम्? विजातीयत्वात् । प्रधानाप्रधानभावो हि सजातीययोरेव न पुनः विजातीययोरपि। अत एव हंसात् मयूरः प्रधान इति मयूराद्वा हंस इति बुद्धिः न कस्यापि प्रेक्षावतः सम्भवति । चमत्कारित्वादेव प्राधान्यमित्यभिधानात् तत्सम्भवतीति चेत् – मैवम्, प्राधान्ये विवक्षितत्वादिकं निमित्तम् चमत्कारित्वे गोप्यत्वेनेति निमित्तभेदस्यैव जागरूकत्वात् ।

अन्यच्च व्यङ्ग्यस्य हि वस्त्वलङ्काररसत्वात्मना त्रैविध्यम् । वस्त्वलङ्कारयोश्च रस एव विश्रान्तिरिति तस्मिन् तदद्वयापेक्षं प्राधान्यमनिच्छतापि अङ्गीकर्तव्यम् । तदित्थमवयवभेदेन गुणप्रधानभावे स्थिते समस्तस्यापि तस्य वाच्यापेक्ष-प्राधान्यमात्रेण ध्वनित्वं तत एव चात्मत्वं निश्चीयमानं कथं युज्यते? नह्यात्मत्वेन निर्णीतस्यार्थस्यावयवे अवयवान्तरापेक्षो गुणप्रधानभावः सम्भवति,

सारभूतत्वभङ्गप्रसङ्गात् । अपरं च, काव्यस्यात्मा ध्वनिरिति घोषणमपि न युक्तम्, गुणीभूतव्यङ्ग्यघटितस्य व्यङ्ग्यशून्यस्य वा काव्यस्य अनात्मकत्वापत्तेः। न चेष्टापत्तिः, कविप्रवृत्तेः दर्शनात् । एतेन यद्यल्लक्षणान्तरं तत्सर्वं प्रायेण निराकृतं वेदितव्यम् । अतोऽन्यदेव लक्षणमत्र कर्तव्यमित्यस्माकं मतिः ।

* कस्तावदत्र निर्णयः साम्प्रतम्?

काव्ये रसस्तावत् आत्मभूत इत्यत्र न कस्यापि विप्रतिपत्तिः । पुनश्च वस्त्वलङ्कारयोः वाच्ययोः व्यङ्ग्ययोः वा पर्यन्ते रस एव विश्रान्तिरित्यत्रापि नास्त्येव सो । ततश्च रसस्य गाढत्वेन व्यञ्जकत्वे काव्यस्य प्रकृष्टत्वम् अन्यथा तु नैवेति विभागः सर्वेषामभ्युपेयो युक्तश्च । गाढत्वेन व्यञ्जकत्वं साक्षात् रसस्य व्यञ्जने, प्रकारान्तरेण व्यञ्जकत्वं तु पारम्पर्येण अर्थात् वस्त्वलङ्कारयोः व्यञ्जने । प्रकृष्टाप्रकृष्टतयैवात्र विभागः चिकीर्षितः न पुनः असङ्कीर्णतया समप्राधान्यपर्यवसायिन्या । तस्मादिदं तावत् उत्तमकाव्यस्य लक्षणं सिद्धं भवति –

रसरूपार्थव्यञ्जकौ शब्दार्थौ उत्तमं काव्यम् ॥

इह व्यङ्ग्यस्य प्राधान्येऽत्यन्तप्रकृष्टत्वं ध्वनिशब्देन व्यपदेशश्च । गुणत्वे प्रकृष्टत्वमात्रं गुणीभूतव्यङ्ग्यशब्देन व्यपदेशश्च । यद्यप्ययं विशेषो वर्तते तथापि न तस्यानयोः स्वतन्त्रप्रभेदविधायकत्वम् किन्तु एकस्मिन्नेव अवान्तरप्रभेदताजनकत्वम् । तत्रार्थानां व्यञ्जकत्वं विभावादिरूपत्वेन । शब्दानां तत्त्वं तु समानजातीयवर्णप्राचुर्यवत्त्वेन । सैव रीतिरिति स्थितौ शब्दानां रसव्यञ्जकत्वं रीतिमत्त्वेनेति सिद्धं भवति । वर्णानां रसव्यञ्जकत्वं ध्वनिकारेणाप्युक्तम् –

[११]शषौ सरेफसंयोगो ढकारश्चापि भूयसा ।
विरोधिनः स्युः शृङ्गारे तेन वर्णा रसच्युतः ॥

त एव तु निवेश्यन्ते बीभत्सादौ रसे यथा ।
तदा तं दीपयन्त्येव तेन वर्णा रसच्युतः ॥

११ ध्वनि. तृ.उ. का–३.४.

यद्यप्यत्र वर्णानां व्यञ्जकत्वमुक्तम् तथापि केवलानां तेषामप्रयोगात् तदवयवकेषु शब्देषु विश्राम्यतीति नासङ्गतिः । एतेनात्र शब्दानां स्वरूपेणैव व्यञ्जकत्वमित्युक्तं भवति । एवं चात्र व्यञ्जकत्वं शब्दशक्तिमूलव्यङ्ग्ये अर्थसापेक्षशब्दगतम् अर्थशक्तिमूलव्यङ्ग्ये अर्थगतम् रसे तु अर्थनिरपेक्ष-शब्दगतम् अर्थगतम् चेत्याश्रयभेदात् त्रिविधमिति ज्ञेयम् ।

* रसो नाम कः?

ननु रसो नाम कः यस्मिन् विज्ञाते लक्षणमिदं साधीयो विज्ञातं भविष्यति – उच्यते, रस्यत इति रसः । आस्वादनस्नेहनार्थकात् रसयतेः चौरादिकात् कर्मणि [१२]घप्रत्यये निष्पन्नोऽयं शब्दः आस्वादनीयेऽर्थे वर्तते । आस्वादनीयश्चार्थः चित्तवृत्तिविशेषा भावाः । तदास्वादनं नाम पौनःपुन्येन अनुभवविषयीकरणम् । अमी भावा एकोनपञ्चाशदिति भरतः । भवन्ति चित्ते सन्ततमिति भावाः । यद्वा, ण्यन्ताद्भावयतेः व्याप्त्यर्थकात् कर्तरि अच्प्रत्ययः। भावयन्ति चित्तं व्याप्नुवन्तीति भावाः । अथवा स एव ण्यन्तो निष्पादनार्थकः । भावयन्ति निष्पादयन्ति वागङ्गसत्त्वोपेतान् काव्यार्थान् इति भावाः । इह वागादयः शब्दाः तत्तत्कर्मणि लाक्षणिकाः । काव्येनार्थ्यन्ते गम्यन्ते इति काव्यार्थाश्च रसाः । तथा च वाचिकेन वर्णनादिना, आङ्गिकेन वलनसन्निवेशादिना, स्तम्भादिनान्तरेण बाह्येन तु कटाक्षविक्षेपादिना सात्त्विकेन चोपेतान् रसान् निष्पादयन्तीत्यर्थः, तदुक्तम् –

[१३]नानाभिनयसम्बद्धान् भावयन्ति रसानिमान् ।
यस्मात्तस्मादमी भावा विज्ञेया नाट्ययोक्तृभिः ॥

यद्यप्यत्र व्यभिचारिषु पठितेन निर्वेदेन गृहकलहादिजन्यस्यैव ग्रहणम् तथापि अमङ्गलभूतस्य तस्य स्थायिपाठात् परम् अव्यवधानेन व्यभिचारिषु पाठात् क्वचित्तस्य स्थायित्वं सूचितं भवति । तेन जगदनित्यत्वज्ञानजन्यस्य तस्य स्थायित्वमिति ज्ञायते । एवं रतिशब्देन सामान्यस्यैव प्रतिपादनात् स्त्रीपुरुषनिष्ठायाः परस्परविषयिकाया रतेरिव गुरुदेवादिविषयिकाया अपि ग्रहणं

१२. पुंसि संज्ञायां घः प्रायेण [अष्ट. ३.३.११८] १३. ना.शा. स.अ. का–३.

भवति । तयोराद्यस्य स्थायित्वम् अन्त्यस्य तु व्यभिचारित्वमिति विवेकः । दम्भेर्ष्याप्रभृतीनां सतामपि परिगणितयत्किञ्चिद्भावनान्तरीयकत्वेन प्रतीतिरिति न पार्थक्येन परिगणनम् । एवं भावा एकपञ्चाशदिति प्रकाशकारादीनां मतम् ।

अमीषु एकपञ्चाशति भावेषु रत्यादयो नव स्थायिनः, चिरं चित्तेऽवस्थानात् । स्तम्भादयोऽष्टौ सात्त्विकाः, सत्त्वजन्यत्वात् । निर्वेदादयो देवादिविषयकरतिश्चेति चतुस्त्रिंशत् व्यभिचारिणः, प्रधानाभिमुख्येन सञ्चारात् ।

ननु रत्यादीनामेव स्थायित्वं कुतः? दैन्यावेगादीनामपि चित्तवृत्तित्वाविशेषेण तदस्त्विति चेत्—नैवम्, रत्यादयो हि संसारचक्रे परिभ्रमतां प्राणिनां यावदनुभवगोचरा भवन्ति न तावदन्य इति तद्विषयकसंस्कारस्य दृढत्वम् । ततस्तेषां सामग्री-समवधानमात्रेणैव उद्बोधसम्भवात् चिरं चित्तेऽवस्थानम् । यदि पुनः कस्यचित् जन्मान्तरेषु दैन्यावेगादीनामभीक्ष्णम् अनुभव इति तद्विषयकसंस्कारस्य दृढत्वम् रत्यादीनां तु अदृढत्वमिति विपरीतमात्याशङ्क्यते तदापि सर्वजन-साधारणाभिप्रायेणैव इदमभिधानमिति दोषाभावः । एतेन तस्यासहृदयत्वेन परिगणनमिति बोध्यम् । किञ्च स्थायितया निर्णीतानामपि भावानां विभावादिवैकल्ये सति अस्थायित्वमेव । एतेन स्थायिनां क्वचित् व्यभिचारित्वे सम्भवत्यपि न व्यभिचरिणां कथञ्चित् स्थायित्वमित्युक्तं भवति । विक्रमोर्वशीयादौ उन्मादादेः चिरमवस्थानेऽपि नात्यन्तं तदस्ति, वियोग-कालावच्छिन्नरतेरेव स्थायित्वात् । ततश्च सत्स्वपि बहुषु पोषकेषु यथा सचिवेन नृपस्य पोषणं तथात्र रतेरुन्मादेनेति मन्तव्यम् ।

रत्यादीनां स्थायित्वादेव प्राधान्यम् । अत एव भावान्तरैरस्य पोषणम्, तदुक्तं महर्षिणा — [१४]यथा हि समानलक्षणाः तुल्यपाणिपादोदरशरीराः समानाङ्गप्रत्यङ्गा अपि पुरुषाः शीलविद्याकर्मशिल्पविचक्षणत्वात् राजत्वमाप्नुवन्ति तत्रैव चान्येऽल्पबुद्धयः तेषामेवानुचरा भवन्ति तथा विभावानुभावव्यभिचारिणः स्थायिभावान् उपाश्रिता भवन्ति । बह्वाश्रयत्वात् स्वामिभूताः स्थायिनो भावाः । तद्वत् स्थायिनि पुरुषे गुणभूता अन्ये भावाः तान् गुणतया श्रयन्ते । परिजनभूता व्यभिचारिणो भावाः । अत्राह — को

१४. ना.शा. ष.अ. का–३४.

दृष्टान्त इति, यथा नरेन्द्रो बहुजनपरिवारोऽपि स एव नाम लभते नान्यः सुमहानपि पुरुषः तथा विभावानुभावव्यभिचारिपरिवृतः स्थायी भावो रसनाम लभते । भवति चात्र श्लोकः –

यथा नराणां नृपतिः शिष्याणां च यथा गुरुः ।
एवं हि सर्वभावानां भावः स्थायी सुमहानिह ॥ इति ।

भावान्तराणि सर्वाण्यपि स्थायिनमेव पोषयन्ति, यदुक्तम् –

[१५]सजातीयविजातीयैरतिरस्कृतमूर्तिमान् ।
यावद्रसं वर्तमानः स्थायी भाव उदाहृतः ॥ इति ।

चिरं चित्तेऽवतिष्ठन्ते सम्बध्यन्तेऽनुबन्धिभिः ।
रसत्वं ये प्रपद्यन्ते प्रसिद्धाः स्थायिनोऽत्र ते ॥ इति ।

विरुद्धैरविरुद्धैः भावैर्विच्छिद्यते न यः ।
आत्मभावं नयत्याशु स स्थायी लवणाकरः ॥ इति च ।

के ते रत्यादयः? उच्यन्ते –

[१६]रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।
जुगुप्सा विस्मयश्चेति स्थायिभावाः रसाः स्मृताः ॥

अभिनवगुप्तोऽत्राचष्टे – [१७]स्थायित्वमेतावतामेव । जात एव जन्तुरियतीभिः संविद्भिः परीतो भवति, 'दुःखसंश्लेषविद्वेषी सुखास्वादनतत्परः' इति न्यायेन सर्वो रिरंसया व्याप्तः स्वात्मनि उत्कर्षमानितया परमुपहसन् अभीष्टवियोग-संतप्तः तद्धेतुषु कोपपरवशोऽशक्तौ च ततो भीरुः किञ्चिदार्जिजिषुरपि अनुचितवस्तुविषयवैमुख्यात्मकतयाक्रान्तः किञ्चिदनभिष्टतयाभिमन्यमानः तत्तत्स्वकर्तव्यदर्शनसमुदितविस्मयः किञ्चिच्च जिहासुरेव जायते । नहि एतच्चित्तवृत्तिवासनाशून्यः प्राणी भवति । केवलं कस्यचित् काचिदधिका चित्तवृत्तिः काचिदूनेति ॥

१५. उल्लेखः, रस. प्र.आ. स्थायिनिरूपणम् । १६. का.प्र. च.उ. का – ३५.
१७. अभि.भारती. ना.शा. स.अ.

तद्रूपाश्च रसा यथा –

शृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।
बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः ॥

शान्तश्च नवमो रसः । निर्वेदः तस्य स्थायी, तदुक्तम् –

[१८]निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः ।

अत्र निर्वेदस्थायिभावः शान्तोऽस्ति । स च नवमो रस इत्यन्वयः । निर्वेदादयश्च व्यभिचारिणो यथा –

[१९]निर्वेदग्लानिशङ्काः तथासूयामदश्रमाः ।
आलस्यं चैव दैन्यं च चिन्ता मोहः स्मृतिर्धृतिः ॥
व्रीडा चपलता हर्ष आवेगो जडता तथा ।
गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च ॥
सुप्तं प्रबोधोऽमर्षश्चावहित्थमथोग्रता ।
मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ॥
त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः ।
त्रयस्त्रिंशदमी भावाः समाख्यातास्तु नामतः ॥

रतिर्देवादिविषयेति वचनात् देवादिविषयकरतेरपि व्यभिचारित्वम् । तत्र व्यङ्ग्या रत्यादयस्तावत् शृङ्गारादयो रसाः । तादृशा एव निर्वेदादयः तत्तदभिधाना भावा इति विवेकः । योगार्थसङ्गमनात् अनयोरुभयोरपि रसशब्देन व्यवहारः । तत्र शृङ्गारादेः रसस्य निष्पत्तिः कथमिति जिज्ञासायां महर्षिणाभिहितम् –

[२०]विभावानुभावव्यभिचारिसंयोगात् रसनिष्पत्तिः ॥

सदृष्टान्तं चैतद्विवृतम् – यथा हि नानाव्यञ्जनौषधिद्रव्यसंयोगात् रसनिष्पत्तिः तथा नानाभावोपगमात् रसनिष्पत्तिः । यथा हि गुडादिभिः द्रव्यैः व्यञ्जनैः ओषधिभिश्च षाडवादयो रसा निर्वर्त्यन्ते तथा नानाभावोपगता अपि स्थायिनो भावा रसत्वमाप्नुवन्ति ॥

---

१८. का.प्र. च.उ. का–३५. १९. ना.शा. ष.अ. का–१८,१९,२०,२१. २०. ना.शा. ष.अ. का–३१.

अत्र व्यञ्जनम् उपसेचनद्रव्यं दधिकाञ्जिकाप्रभृति । ओषधिः चिञ्चा-गोधूमदलहरिद्राप्रभृतिः । द्रव्यं गुडप्रभृति । यथा एतेषां संयोगात् मधुराम्लतिक्त-लवणकटुकषायेभ्यो व्यतिरिक्तस्य षाडवादेः रसस्य निष्पत्तिः तथा विभावादिसंयोगात् रसस्य निष्पत्तिरित्यर्थः । तत्र व्यञ्जनं दधिकाञ्जिकादिः विभावस्थानीयः । ओषधिश्चिञ्चादिः अनुभावस्थानीयः । द्रव्यं गुडादि व्यभिचारिस्थानीयम् । जलं स्थायिस्थानीयमिति शृङ्गारादिरसस्य सर्वथा षाडवादिरससाम्यम् । एतादृशस्य रसस्यास्वादनं कथमिति तेन विवृतम् – रस इति कः पदार्थः ? उच्यते, आस्वाद्यत्वात् । कथमास्वाद्यते रसः? यथा हि नानाव्यञ्जनसंस्कृतमन्नं भुञ्जाना रसमास्वादयन्ति सुमनसः पुरुषा हर्षादींश्च अधिगच्छन्ति तथा नानाभावाभिनयव्यञ्जितान् वागङ्गसत्त्वोपेतान् स्थायिभावान् आस्वादयन्ति प्रेक्षका हर्षादींश्च अधिगच्छन्ति ॥

अत्र भावशब्देन विभावानां व्यभिचारिणां च ग्रहणम् । अभिनयशब्देन अनुभावानाम् । कार्यत्वेन प्राधान्यात् एतेषां पार्थक्येन ग्रहणम् । यद्यपि रत्यादिं प्रति लज्जादेरपि कार्यत्वम् तथापि तस्य क्वचित् स्वातन्त्र्येणापि व्यञ्जनमस्तीत्यनुभावेभ्यो भेदेन परिगणनम् । स्तम्भादीनां तु न तथेति अनुभावेष्वेव परिगणनमिति विशेषः ।

यद्यपि सूत्रे रसीभवनयोग्यस्य स्थायिनो नास्त्युपादानम् तथापि ईषत्परिवर्तनेन तस्य स्फुटा प्रतीतिः, यथा –

विभावानुभावव्यभिचारिसंयोगात् स्थायितो रसो निष्पद्यते ॥

अत्र कः खलु पदार्थः रसः सन् निष्पद्यत इति प्रश्नेऽवश्यं स्थायीति प्रथमान्तत्वेनोत्तरम् । कस्य तावत् रसस्य सतो निष्पत्तिरिति प्रश्ने तु षष्ठ्यन्तत्वेनेति विशेषः । तदयमर्थः फलति –

विभावानुभावव्यभिचारिसंयोगात् स्थायिनो रसत्वेन निष्पत्तिः॥

के पुनरत्र विभावादयः? उच्यते, व्युपसृष्टात् भावयतेः करणे [२१]घञि निष्पन्नोऽयं विभावशब्दो विभावनसाधने वर्तते । विभावनं चाविर्भावनम्

२१. अकर्तरि च कारके संज्ञायाम् [अष्ट. ३.३.१९]

आविर्भावितस्य च पोषणम् । तयोराद्ये सति आलम्बनविभावः अन्त्ये पुनः उद्दीपनविभावः । तत्र शकुन्तलादयो दुष्यन्तादौ रत्यादिकम् आविर्भावयन्तीति [२२]आलम्बनविभावाः । चन्द्रोद्यानादय आविर्भावितं तत् वर्धयन्तीति [२३]उद्दीपनविभावाः । महर्षिणा पुनः अविभागेन [२४]एतदुच्यते – विभाव्यन्तेऽनेन वागङ्गसत्त्वाभिनया इत्यतो विभावाः, यथा विभावितं विज्ञातमिनर्थान्तरम् ।

बहवोऽर्था विभाव्यन्ते वागङ्गभिनयाश्रयाः ।
अनेन यस्मात्तेनायं विभाव इति संज्ञितः ॥

वाचिकाङ्गिकादयोऽभिनया येषां तादृशाः स्थायिसञ्चारिणो विशिष्टतया ज्ञायन्ते येन स विभाव इत्यर्थः । एवं महर्षिणा उद्दीपनविभावस्य पार्थक्येनानिरूपणेऽपि पाश्चात्यैः ध्वनिकारप्रभृतिभिः आलम्बनम् उद्दीपनं चेति द्वैविध्यमङ्गीक्रियत इति विशेषः ।

अनुभाव इत्यत्र भावयतिः अनूपसृष्टः । स चानुभावनसाधने वर्तते । अनुभावनं च प्रतीतियोग्यीकरणम् । कटाक्षविक्षेपप्रभृतयः स्वेदरोमाञ्च-प्रभृतयश्च दुष्यन्तादौ शकुन्तलादिभिः आविर्भावितं रत्यादिकं भावं सम्यक् प्रतीतियोग्यं कुर्वन्तीति [२५]अनुभावाः । रत्यादौ समुत्पन्ने समुत्पन्ना भवन्तीति कार्यरूपत्वम् । सात्त्विकभावानां सर्वेषामपि अनुभावेष्वेव अन्तर्भावः । महर्षिणाप्युच्यते – [२६]अथानुभाव इति कस्मात्? उच्यते, अनुभाव्यते रत्यादिरनेन वागङ्गसत्त्वकृतेन अभिनयेनेति ।

वागङ्गभिनयेनेह यतस्त्वर्थोऽनुभाव्यते ।
शाखाङ्गोपाङ्गसंयुक्तः त्वनुभावः ततः स्मृतः ॥

व्यभिचारिण इत्यत्र वि अभीत्येतदुपसर्गद्वयपूर्वकात् चरतिः धातुः । ततः कर्तरि ताच्छीलिके [२७]णिनिप्रत्यये शब्दोऽयं निष्पन्नः । विविधमाभिमुख्येन

२२. आलम्बनं नायकादिः यमालम्ब्य रसोद्गमात् । सा.द. तृ.प. का–९.
२३. उद्दीपनविभावास्ते रसमुद्दीपयन्ति ये । सा.द. तृ.प. का–१३१.
२४. ना.शा. स.अ. का–४.
२५. उद्बुद्धं कारणैः स्वैः स्वैर्बहिर्भावं प्रकाशयन् ।
लोके यः कार्यरूपः सोऽनुभावः काव्यनाट्ययोः ॥ सा.द. तृ.प. का–१४१.
२६. ना.शा. स.अ. का–५.
२७. सुप्यजातौ णिनिस्ताच्छील्ये [अष्ट. ३.२.७८]

चरणशील इत्यर्थः, तदुक्तं महर्षिणा – विविधमाभिमुख्येन चरन्तीति व्यभिचारिणः ॥ आभिमुख्येन चरणादेव अविरुद्धैरिव विरुद्धैरपि एतैः स्थायिन पोषणमेव भवति न तु नाशनम् । ननु विरुद्धैः कथं स्थायिनः पोषणम्? यथा मधुरैरपि सरिज्जलैः समुद्रस्य । नहि समुद्रं प्रविष्टानि सरितां जलानि न तत्प्रकृतिं नाशयन्ति प्रत्युत तामेवोपयान्ति ।

एतेषु विभावादिषु विभावाः सर्वथैव बाह्याः पदार्थाः । स्थायिनो व्यभिचारिणश्च सर्वथैवान्तराः । अनुभावास्तु स्तम्भस्वेदादिरूपाः आन्तराः कटाक्षविक्षेपादिरूपास्तु बाह्या इति विवेकः ।

❖❖❖

रससूत्रव्याख्यानम्

रससूत्रस्य व्याख्याने महान् मतभेदो वर्तते येन तत्स्वरूपावगतौ अतीव क्लेशः सम्पन्नः । तत्रोत्पत्तिवादः अनुमितिवादः भुक्तिवादः भ्रान्तिवादः व्यक्तिवादश्चेति पञ्च वादाः प्रसिद्धाः सन्ति । ते क्रमेणेदानीं निरूप्यन्ते –

१. भट्टलोल्लटस्य मतम्

जात्या मीमांसकोऽयं महर्षिप्रोक्तत्वादेव नाट्यशास्त्रं व्याख्यातुं प्रवृत्तः तदन्तर्गतत्वादस्यापि सूत्रस्य व्याख्यानं व्यधत्त। प्राभाकरत्वादेवायं काव्ये अभिधातिरिक्तं व्यापारं नानुमन्यते, तदुक्तं तेन – 'सोऽयमिषोरिव दीर्घदीर्घतरोऽभिधाव्यापारः' ॥ लोके यः कर्म करोति तस्यैव पुरुषस्य तदनुरूपं पापं पुण्यं वा फलं सम्भवति तत्प्रयोजकाश्च रत्यादय इति सिद्धान्तादनुकार्य एव रत्यादिः सम्भवति। स एव च रसो भवितुं शक्नोति, नानुकर्त्रादेः रत्यादिः, कृतप्रणाशाकृताभ्यागमयोः सम्भवात् । तदेवं रामादिनिष्ठरत्यादेरेव रसत्वम् । तस्य च विभावादित्रयसंयोगात् उपचये सति रसत्वेन निष्पत्तिरिति विवेकः ।

उपचयश्च सीतादिना विभावेन जन्यजनकभावः सम्बन्धः अनुभावेन प्रत्याय्यप्रत्यायकभावः व्यभिचारिणा च पोष्यपोषकभावः । ततश्च यथा यथा विभावादिना सम्बन्धः तथा तथा रामादौ रत्यादेः सम्यगुत्पत्तिः । यथा यथानुभावेन तथा तथा तस्य सम्यक् प्रतीतिः । यथा यथा च व्यभिचारिणा

तथा तथा पुष्टिः । एतादृशस्य रसस्य रामाद्यनुकार्यगतत्वात् यद्यपि न साक्षादनुभवो भवति सहृदयानाम्, कालेन व्यवधानात् तथाप्यनुकार्याभिन्नतया गृहीते नटे तस्य साक्षात्कारस्तावत् नूनं सम्भवति । अत एव कविना तदनुरूपाणामेव विभावादीनामर्थानां निबन्धनं विधीयते । ततश्च यथा यथा तादृशानामर्थानामानुरूप्येण निबन्धनं तथा तथा प्रेक्षकाणां सहृदयानां तन्मयीभवनं तथा तथा च रामादिगतरत्यादेः अवगतिः । एवं च यो रत्यादिः पुरानुकार्ये रामादौ सीतादिनालम्बनविभावेन चन्द्रिकादिनोद्दीपनविभावेन समुत्पन्नः, तत्कार्यरूपैः रोमाञ्चादिभिरनुभावैः प्रतीतः, लज्जादिभिश्च व्यभिचारिभिः परिपुष्टश्चासीत् स एव सम्प्रति तेषामर्थानां प्रतिपादनात् तदभिन्नतया गृहीते नटे प्रतीतो भवतीति चमत्कारः, यथा चित्रफलके हिमालयादेः दर्शनात् प्रेक्षकाणाम् ।

मतेनास्य संयोगशब्दस्य उपचेयोपचायकभावः सम्बन्ध इत्यर्थः । स च विभावेन रत्यादेः कार्यकारणभावः, अनुभावेन प्रत्याय्यप्रत्यायकभावः, व्यभिचारिणा तु पोष्यपोषकभावः । निष्पत्तिशब्दस्य विभावपक्षे उत्पत्तिः, अनुभावपक्षे ज्ञप्तिः, व्यभिचारिपक्षे तु पुष्टिः । मतेऽस्मिन् सूत्रं तावत् इत्थं सङ्गमनीयम् –

सीतादिनालम्बनविभावेन चन्द्रिकादिना चोद्दीपनविभावेन कार्यकारण-भावरूपात्, स्वेदादिनानुभावेन प्रत्याय्यप्रत्यायकभावरूपात्, लज्जादिना व्यभिचारिणा पोष्यपोषकभावरूपाच्च संयोगात् उपचयात् रसस्य रत्यादिरूपस्य वस्तुतोऽनुकार्ये रामादौ वर्तमानस्य तद्रूपत्वेन गृहीते नटे साक्षात् क्रियमाणस्य निष्पत्तिः क्रमेण उत्पत्तिः ज्ञप्तिः पुष्टिश्च ॥

अनुकार्ये रामादौ रत्यादिरूपस्य रसस्य उत्पत्तेरङ्गीकारात् अयमुत्पत्तिवाद इत्युच्यते । विभावादिभिः उपचितो रत्यादी रसः अनुपचितस्तु स्थायीति विशेषः । चिरन्तनानां दण्डिप्रभृतीनामयमेव पक्षः, तदुक्तं दण्डिना –

[१]प्राक् प्रीतिर्दर्शिता सेयं रतिः शृङ्गारतां गता ।
रूपबाहुल्ययोगेन तदिदं रसवद्वचः ॥ इति ।

१. काव्याद. द्वि.प. का–२८१,२८३,२८५,२८७.

अधिरुह्य परां कोटिं कोपो रौद्रात्मतां गतः । इति ।

इत्युत्साहः प्रकृष्टात्मा तिष्ठन् वीररसात्मना । इति ।

इति कारुण्यमुद्रिक्तमलङ्कारतया स्थितम् । इति च ।

इत्येवमादिषु रूपबाहुल्ययोगेन, अधिरुह्य परां कोटिम्, प्रकृष्टात्मा, उद्रिक्तमित्यादीनां शब्दानां प्रयोगात् एतत्सुव्यक्तम् ॥

वस्तुतस्तु निष्पत्तिपदस्य अनेकार्थपरत्वेन व्याख्यानं कुत इत्येव नावधार्यते? उपचितो रत्यादी रस इत्युक्तौ उपचितपदेनैव तदर्थस्य क्रोडीकारात्। न च रससूत्रे तच्छब्दो नास्तीति वाच्यम्, संयोगपदस्य उपचयार्थकत्वेन व्याख्यातुं शक्यत्वात् । नह्येकेन शब्देन विवक्षितेऽर्थे सिद्धे शब्दान्तरेण तदर्थस्योपपादनं साम्प्रतम् । तस्मात् शिखायां ध्वस्तायां शिखी ध्वस्त इतिवत् उपचयस्योत्पत्त्यैव रसेऽप्युत्पत्तेरुपपादयितुं शक्यत्वेन निष्पत्तिपदस्य उपचयार्थकत्वमेव समुचितं न पुनः उत्पत्त्याद्यर्थकत्वम् । किञ्च अनुकार्यनिष्ठो रत्यादी रस इत्यभ्युपगमे यत्रेतिवृत्तस्य कल्पितत्वं तत्रानुकार्यस्यैवाभावात् रत्यादेरधिकरणं किम्? अन्यच्च, यदि रत्यादेरुत्पत्तिरिति मतम् तर्हि कार्यकारणादीनां विभावादिरूपशब्दान्तरैः व्यपदेशः कुतः? स्वतस्सिद्धैरेव शब्दैः व्यपदेशस्यौचित्यात् । अपरं च, रत्यादेः परगतत्वात् सहृदयस्य आस्वाद्यत्वमपि न सम्भवति । अपरं चेदम्, एवं हि रसोऽयं रामादिमात्रगतत्वात् परिमितः, रामादेः लोकसिद्धत्वात् लौकिकः, नाट्यकाव्यदर्शनादिना सविघ्नश्च भवति, तदुक्तं दर्पणकारेण –

पारिमित्याल्लौकिकत्वात्सान्तरयतया तथा ।
अनुकार्यस्य रत्यादेरुद्बोधो न रसो भवेत् ॥

अन्यच्च यत्पुनरत्र वक्तव्यं तत् परस्तात् शङ्कुकेनाभिधास्यते । तत् तत एवावधार्यताम् ।

२. शङ्कुकस्य मतम्

जन्मना नैयायिकोऽयं लोल्लटोक्तमनभ्युपयन् आचष्टे, यत्तावदुच्यते, उपचितो रत्यादी रसः अनुपचितश्च स्थायीति – तन्न युक्तम्, 'उपचितं सस्यं तावत्

वृक्षः' इत्यत्र सस्य इव रत्यादौ उपचयप्रमाणस्य दुर्निर्णयत्वात् । अथ सस्ये पुष्पफलोपेतत्वादिव प्रकृते चमत्कारजनकत्वात् तत्सुनिर्णयमिति ब्रवीषि तर्हि तीव्रे तीव्रतरे तीव्रतमे चोपचये सति रसस्य निष्पत्तेरिव मन्दे मन्दतरे मन्दतमे च सत्यपि तन्निष्पत्तेरङ्गीकारप्रसङ्गः । न चेष्टापत्तिः, प्रभेदानन्त्यप्रसङ्गात्, स्वरूपस्यानैयत्यप्रसक्तेश्च । एवमभिलाषादिषु कामावस्थासु प्रत्यवस्थम् उपचयस्य सुवचत्वेन बहुतरप्रभेदकल्पनाप्रसङ्गो वज्रलेपायते । अत्यन्तोपचितस्यैव रत्यादेः रसत्वमिति वादः तर्हि हास्ये तारतम्यप्रयुक्तस्य महर्षिसम्मतस्य षड्भेदत्वस्य असाधुत्वापत्तिः, अभिलाषादिषु च पूर्वावस्थासु रसशब्द-व्यवहारस्य दुरुपपादत्वापत्तिश्च ।

अन्यच्च, अनुपचितः क्रमेणोपचीयमानो रत्यादिरेव रस इत्यपि न युक्तम्, इष्टजनवियोगादिजन्यस्य शोकादेः क्रमेणापचयस्यैव दर्शनात् । अन्यत्खल्वपि, महर्षिणा रत्यादेः रसस्य चोत्पत्तौ समानमेव कारणमुच्यते, यथा – 'शोको नाम इष्टजनवियोगविभवनाशवधबन्धदुःखानुभवादिभिः विभावैः समुत्पद्यते' इति स्थायिनिरूपणावसरे । 'अथ करुणो नाम शोकस्थायिप्रभवः । स च शापक्लेशविनिपातितेष्टजनविप्रयोगविभवनाशवधबन्धविद्रवोपघातव्यसनसंयोगादिभिः विभावैः समुत्पद्यते' ॥ एवं रसान्तरेऽपि । एतच्च विभावादिभिः उपचितो रत्यादी रस इति पक्षे न सङ्गच्छते, उत्पन्ने उत्पन्नपरिपुष्टे च कारण-भेदस्यावश्यंभावात् ।

तस्मात् स्थायिरसयोः अत्यन्तमभेद इति उपचयापचयाभ्यां भेदस्याभिधानं न साम्प्रतम् किन्तु अनुमितत्वाननुमितत्वाभ्याम्, तथाहि – पुरोवर्तिनं नटं पश्यतां सामाजिकानाम् 'अयं रामः' इत्याकारकं यज्ज्ञानं जायते तत्सर्वथा विलक्षणम् । न तज्ज्ञानं प्रमा, घटादौ दृष्टे जायमानस्य 'अयमेव घटः' 'घट एवायम्' इत्यादेः ज्ञानस्येव वास्तविकत्वाभावात् । न भ्रान्तिः, 'अयं रामः' इति ज्ञानकाले 'रामो न' इति बाधज्ञानप्रसक्तेरभावात् । भ्रान्तिस्थले तु रज्जुसर्पादौ 'अयं सर्पः' इति ज्ञानकाल एव 'नायं सर्पः किन्तु रज्जुः' इत्यवश्यं बाधज्ञानस्य प्रसक्तिर्वर्तते । न तावत् 'रामः स्यान्न वा' इति संशयः, निश्चयात्मकत्वेन जायमानत्वात् । नापि 'रामसदृशोऽयम्' इति

सादृश्यगर्भम्, रामोऽयमिति स्वरूपेणैव सम्भवात् । अतो ज्ञानमिदं सम्यक्-मिथ्या-संशय-सादृश्यज्ञानेभ्यो व्यतिरिक्तं चित्रतुरगज्ञानमिव विलक्षणम् । एतादृशज्ञाने विषयभूतो नटोऽत्र पक्षः । तत्र च काव्यार्थबलात् शिक्षाभ्यासादि-बलाच्च अवगतैः विभावादिभिः गम्यगमकभावरूपात् सम्बन्धात् असन्नपि रत्यादिः तस्मिन्ननुमीयते । वस्तुतोऽनुक्रियमाणत्वादेव रसोऽत्र कृत्रिमः तथापि तद्ग्रहणं वास्तविकत्वेन । रत्यादेरनुक्रियमाणत्वादेव रसपदेन व्यवहारः। इत्थम्भूतस्य च रत्यादेः पौनःपुन्येनास्वादने सति चमत्कारोदयः । न चैवं सति सुरापानादेरनुकरणस्य पयःपानादेरपि चमत्कारजनकत्वं स्यादिति वाच्यम्, वास्तविकत्वेन ग्रहणाभावात् ।

तत्र विभावादयो वस्तुतः कृत्रिमाः तथापि रसास्वादनकाले तन्मयतावशात् तेषामकृत्रिमतया ग्रहणमिति विशेषः । अकृत्रिमतया गृहीतैरपि साध्यस्यानुमितिः भवत्येव यथा धूमत्वेन गृहीतात् तुषारादग्नेः । मतेऽस्मिन् सूत्रं तावदित्थं सङ्गमनीयम् –

विभावानुभावव्यभिचारिभिः कृत्रिमैरप्यकृत्रिमतया गृहीतैः अनुमाप्यानुमापकभाव-रूपात् सम्बन्धात् सम्यङ्-मिथ्या-संशय-सादृश्य-ज्ञानविलक्षणे ज्ञाने चित्रतुरगन्यायेनेव विषयीभूते नटादौ पक्षेऽनुमीयमानस्य अनुकरणीयत्वात् असतोऽपि वस्तुसौन्दर्यबलात् पुनः पुनः आस्वाद्यमानस्य रत्यादेः स्थायिनो निष्पत्तिरनुमितिः ॥ अयं चानुमानस्य प्रयोगः – रामोऽयं सीताविषयकरतिमान्, तद्विषयककटाक्षविक्षेपादिमत्त्वात् ॥

निष्पत्तेः अनुमित्यर्थकत्वात् अयमनुमितिवाद इत्युच्यते ।

एवमनुक्रियमाणस्यैव रत्यादेः रसत्वम् न तु अभिधीयमानस्य, अत एव

विवृद्धात्माप्यगाधोऽपि दुरन्तोऽपि महानपि ।
वाडवेनेव जलधिः शोकः क्रोधेन पीयते ॥

इत्यत्र रौद्रकरुणयोः न रसत्वम्, अभिहितत्वात् । किन्तु

भाति पतितो लिखन्त्याः तस्या बाष्पाम्बुशीकरकणौघः ।
स्वेदोद्गम इव करतलसंस्पर्शादेष मे वपुषि ॥

इत्यत्र कार्यभूतस्य स्वेदादेः निरूपणात् रतिरनुक्रियत इति रसत्वमबाधितम् ॥

वस्तुतस्तु अनुमीयमानो यो रत्यादिः स एव रस इति यदुक्तम् – तन्न, प्रात्यक्षिकस्यैवार्थस्य चमत्कारजनकत्वाभ्युपगमात् । किञ्च विभावादयश्चार्थाः प्रत्येकं रत्यादिना व्यभिचरिता इति तत्समूहस्य हेतुत्वमसम्भवम् । किञ्च परगतत्वेन प्रतीयमानेन रत्यादिना कथं तावत् सहृदयस्याह्लादजननम्? यदपि पुनः अनुक्रियमाणो रत्यादिरित्युक्तम् – तदपि न, रामादेरनुकार्यस्यानुपलब्धत्वेन कल्पितेतिवृत्ते तस्यात्यन्तमसद्भावेन चानुकरणकथाया एवानुदयात् ।

भट्टतौतोऽपि नैतत्सहते, तथाहि – रत्यादेरनुकरणमिति यदुच्यते तत्किं सामाजिकाभिप्रायेण किं वा नटाभिप्रायेण किं वा पुनः व्याख्यात्रभिप्रायेण? नाद्यः, यत्रानुकरणमित्युच्यते तत्र यस्यानुकरणं येन चानुकरणं तदुभयमपि प्रत्यक्षेणोपलब्धं वर्तेत, यथा – एवमसौ सुरां पिबतीति यत्र कश्चित् पयःपानेनानुकरोति तत्र सुरापानं पयःपानं चेत्युभयमपि प्रत्यक्षेणोपलब्धम्। प्रकृते तु यस्यानुकरणं तादृशो रामगतरत्यादिः न प्रत्यक्षेणोपलभ्यते, नापि तद्वान् रामादिः । कल्पितेतिवृत्ते पुनरत्यन्तम् । स्यान्नाम रामानुकारी नटः प्रत्यक्षः तद्गतं प्रतिशीर्षकादि, रोमाञ्चाश्रुपातादि, भ्रूविक्षेपकटाक्षादि च, न तेन रामादिगतरत्यादेरनुकरणं सर्वथा सम्भवम्, भिन्नेन्द्रियग्राह्यत्वात् रत्यादेश्चित्तवृत्तित्वेन अनुकर्तुमशक्यत्वाच्च । नहि राज्ञः प्रतापः शत्रुहननादिना अनुकर्तुं शक्यते । किञ्च नटं रामादित्वेन पश्यतां सामाजिकानाम् अयं साक्षाद्राम इत्येव बुद्धिः न तु तस्यानुकर्तेति भेदबुद्धेरभावात् कथं तन्निबन्धनोऽनुकर्त्रनुकार्यभावः । यदि पुनः नटस्यैव नटीविषयिका या रतिः स एव शृङ्गार इति मतम् तर्हि तस्य वास्तविकत्वात् अनुकरणमित्येतत् शशशृङ्गायितम् ।

अथ नटाभिप्रायेणानुकरणमिति द्वितीयः पक्षः सोऽपि न ग्राह्यतामुपयाति, सदृशकरणरूपस्यानुकरणस्य रामादेरुपलब्धत्वे सत्येव सम्भवात् । यदि अनुकरणं नाम पश्चात् करणमित्युच्यते तदा पूर्वोक्तस्य दोषस्य तादवस्थ्यम्, लक्षणस्य लोकेऽतिप्रसक्तिश्च । किञ्च रामादीनां चरितमेवं स्यात् इति प्रकल्प्याभिनये सम्भवेऽपि न तद्गतरत्यादेरनुकरणं सर्वथा सम्भवमिति

उदितचरस्यैव दोषस्य पुनरुदयः । ततश्चात्मानं रामं मत्वा तद्गतचित्तवृत्तेः प्रकाशनमेवं भवितुमर्हतीति लोकसिद्धानामेवानुभावानां प्रदर्शनं नटेन क्रियते न पुनरनुकरणम् ।

अथ व्याख्यातृभिप्रायेणेति तृतीयः पक्षः सोऽपि पूर्ववत्, अनुकार्यस्य प्रत्यक्षेणानुपलम्भात् प्रमाणं विना तथा व्याख्यातुमशक्यत्वाच्च । न च स्थाय्यनुकरणं रस इति वचनं महर्षेः कुत्रापि श्रूयते । अवस्थानुकरणं नाट्यमिति तु वर्तते तस्यानुभावानुकरणमित्यत्र पर्यवसानं यच्चास्माकं सम्मतमेव । सप्तद्वीपानुकरणं नाट्यमिति तु लोकवृत्तस्य प्रदर्शनमित्यभिप्रायेण न तु स्थाय्यनुकरणमित्यभिप्रायेण । तदेवं सर्वेष्वपि पक्षेषु रत्यादेरनुकरणमिति तु न विचारसहम् ॥

तदिदं सर्वमनुसंधाय दर्पणकारेणाप्युक्तम् –

शिक्षाभ्यासादिमात्रेण राघवादेः स्वरूपताम् ।
दर्शयन्नर्तको नैव रसस्यास्वादको भवेत् ॥ इति ।

तस्मात् शङ्कुकस्य मतं न परिग्राह्यम् ।

३. भट्टनायकस्य मतम्

अयं तावत् सांख्यमतानुयायी । अभिधातिरिक्तं व्यापारमनङ्गीकुर्वन्नपि रसे विषये भावकत्वं भोजकत्वं चेति अन्यद् व्यापारद्वयमङ्गीकरोति । तस्यायमाशयः – रसो न प्रतीयते नोत्पद्यते नाभिव्यज्यते । तत्र न तावत् प्रतीतिः स्वगतत्वेन, करुणे दुःखित्वप्रसक्तेः । सीतादेः अविभावत्वात् तथा प्रतीतिरपि न युज्यते। सीतादेः साधारणत्वेन प्रतीतिरित्यपि न युक्तम्, कारणाभावात्, देवतादौ साधारणत्वासम्भवात्, समुद्रलङ्घनादेः असाधारणत्वाच्च । न च तद्वतो रामस्य स्मृतिः, अनुपलब्धत्वात् । नापि प्रतीतिः परगतत्वेन, ताटस्थ्यप्रसङ्गात् । तस्मात् स्मृत्यनुभवान्यतररूपा प्रतीतिर्न भवतीति सिद्धम् । नाप्युत्पत्तिः, प्रतीत्या समानयोगक्षेमत्वात् । नाप्यभिव्यक्तिः, पूर्वोक्तादेव निमित्तात्, विषयार्जनतारतम्यप्रसङ्गाच्च । तदेवं विज्ञेयम् –

काव्ये प्रयुक्तैः शब्दैः शकुन्तलादयोऽर्थाः प्रथममभिधया शकुन्तलात्वाद्यसाधारण–

धर्मवत्त्वेन उपस्थाप्यन्ते । उपस्थापिताश्चार्थाः यद्यपि दुष्यन्तादिमात्रसम्बन्धित्वात् असाधारणाः तथापि काव्यार्थानुसन्धानपरम्परालक्षणेन द्वितीयेन भावकत्वव्यापारेण ते सर्वेऽप्यर्थाः कान्तात्वादिरूपसाधारणधर्मवत्त्वेन प्रतिभासन्ते । तदेवं शकुन्तलाचन्द्रोद्यानदेशकालादिषु साधारणीभूतेषु पश्चादाविर्भूतेन भोजकत्वव्यापारेण सत्त्वोद्रेकप्रकाशानन्दमयनिज-संविद्विश्रान्तिरूपः तादृशो भोगः सम्भवति यस्मिन् विषयीभूतो रत्यादिः रस इत्यभिधीयते ॥

भोगश्चास्य मतेन चित्तस्य विश्रान्तिः । तत्र विषयीभूतो रत्यादिरित्यस्य तस्य मानसी प्रतीतिरित्यर्थे पर्यवसानम् । ततश्च प्रतीतिरियं न बाह्येन्द्रियजन्या । अत एव घटपटादिप्रतीतो विलक्षणेति भोग इत्यन्येनैव शब्देन व्यपदेशः । अत एवानेन रसो नोत्पद्यते, न प्रतीयते, नाभिव्यज्यते इत्युद्घोषणम् । मतेऽस्मिन् सूत्रं तावदित्थं सङ्गमनीयम् –

विभावादीनां सम्यक् साधारणतया योगात् भावकत्वव्यापारेण भावनात् रसस्य सहृदयनिष्ठरत्यादेः निष्पत्तिः भोगे विषयीभवनम् ॥

निष्पत्तेः भुक्तिगर्भत्वात् अयं भुक्तिवाद इत्युच्यते । भोज्यभोजकभावः सांख्यशास्त्रे प्रसिद्धः । तत्र हि प्रकृतिः भोग्या पुरुषस्तु तद्भोक्तेति [२]निर्णीतम् । इहापि तस्यावावलम्बनादयं सांख्यमतानुयायित्वेन निर्णीयते ॥

वस्तुतस्तु रसविषये भावकत्वं भोजकत्वं चेति यद् व्यापारद्वयस्य कल्पनम् – तदसङ्गतम्, भावकत्वस्य भावनालक्षणस्य सहृदयगतत्वेन शब्दवृत्तित्वासम्भवात् । भोजकत्वमपि तथैव, अर्थेषु साधारणीकृतेषु सचेतसो हृदयपरिपाकवतः चित्तविश्रान्तिलक्षणो भोगः स्वयमेव भवति न तु शब्दैः सम्भवति येन तस्य व्यापारत्वमभ्युपगम्येत । ननु अन्यनिष्ठोऽपि धर्मः परम्परासम्बन्धेन शब्दस्य धर्म इति वृत्तित्वे न बाधकमिति चेत् – मैवम्, घटशब्दात् कलशरूपमर्थं जानामीतिवत् शकुन्तलादिभिः शब्दैः साधारणीभूतस्त्रीरूपमर्थं जानामीति, काव्यशब्दैः चित्तविश्रान्तिलक्षणं भोगमहं

२. प्रकृतिर्हि भोग्यतया भोक्तारं पुरुषमपेक्षते । सर्वदर्शन. सांख्यदर्शनम् ।

जानामीति च तादृशस्वारस्यवाहिप्रतीतेरभावात् ।

४. नवीनानां मतम्

[३]एते तु शकुन्तलादीनामर्थानां साधारणीकरणम् अननुमन्यमानाः प्रकारान्तरेणैव तद्विषयकरत्यादिं सहृदय उपपादयन्ति । तेषामयमभिप्रायः – रसस्य परगतत्वेन प्रतीतौ ताटस्थ्यापत्तिरिति स्वगतत्वेनैव प्रतीतिः समर्थनीया किन्तु सा सेद्धुं न शक्नोति शकुन्तलादीनाम् अनालम्बनत्वात् । ननु भावनया साधारणीकरणे तद्भवतीति चेत् – मैवम्, तया स्वात्मनि दुष्यन्तादीनामभेदप्रतिपत्तिरेव समर्थ्यताम्, लाघवात् । मा भूत् साधारणीकरणम् । साधारणीकरणे हि शकुन्तलादीनां सर्वेषामपि वस्तूनां साधारणत्वेन प्रतीतिः । अभेदस्वीकारे तु स्वात्मनि दुष्यन्तादिनायकाभेदमात्रस्य प्रतीतिः । एतेन लाघवं स्फुटम् । नहि छुरिकया साधनीये कार्ये क्रकचमपेक्षन्ते बुधाः । तदेवमवगन्तव्यम् –

कविना नटेन च विभावादिषु प्रकाशितेषु प्रथमं व्यञ्जनाव्यापारेण दुष्यन्तादौ शकुन्तलादिविषयकरत्यादिः विज्ञायते । तदनु सहृदयताजन्यभावनायाः प्रभावेण सहृदयस्तावत् आत्मानं दुष्यन्तत्वेन विभावयति । अत एव भावनाया लोके गुणत्वेन परिगणिताया अपि मिथ्याभूतदुष्यन्तत्वप्रकारकज्ञानस्य जनकत्वात् दोषत्वम्, यथा – रङ्गे रजतत्वप्रकारकज्ञानस्य जनकत्वात् लोके गुणत्वेन कल्पितस्य चाकचिक्यस्य । तदेवं स्वस्मिन् दुष्यन्तत्वप्रकारके ज्ञाने सिद्धे दुष्यन्तगतरत्यादेः यच्छकुन्तलादिकं विभावादि तदेव तत्त्वेन गृहीतस्य स्वात्मनोऽपि सिध्यति । तदेवं सहृदयं गतो रत्यादिः रसशब्देन व्यवह्रियते ॥

नन्विह मते शकुन्तलादिविषयकरत्यादेः दुष्यन्तादाविव सहृदयेऽपि सुखजनकत्वात् आनन्दमयत्वे सङ्गतेऽपि शोकादेस्तावत् तत्कथम्? अथ पुनः सत्यस्यैव शोकादेः सुखजनकत्वं न तु कल्पितस्येत्युच्यते तदा रज्जुसर्पादिस्थले भयकम्पाद्यनुत्पत्तिप्रसङ्गः प्रत्युत शृङ्गारादौ रत्यादेरपि कल्पितत्वेनानन्दमयत्वस्य असिद्धिप्रसङ्ग इति चेत् – इदमुच्यते, यदि

३. रसगङ्गाधरे मतमिदं निरूपितम् । तत्र नवीनशब्देन विशिष्य के गृहीता इति न ज्ञायते, मतस्यास्य एतावन्तं कालं यावत् कुत्रापि ग्रन्थेऽदर्शनात् ।

शृङ्गारादिप्रधानेभ्यः काव्येभ्य इव करुणादिप्रधानेभ्योऽपि सहृदयानां केवलं सुखमानुभविकम् तर्हि कार्यानुरोधेन कारणस्य कल्पनीयत्वात् रत्यादिविषयक-व्यञ्जनायां सुखजनकत्वमिव दुःखप्रतिबन्धकत्वमपि कल्पनीयम् । अथ दुःखमप्यानुभविकं तदा न प्रतिबन्धकत्वकल्पनम्, स्वस्वकारणात् उभयमपि भविष्यति । न च दुःखजनकत्वे सामाजिकानां वैमुख्यम्, सुखस्याधिक्येन चन्दनलेपादाविव आभिमुख्योपपत्तेः ।

ननु भावनया शकुन्तलादीनां साधारण्यमेवाङ्गीक्रियताम्, किं दोषेण पुनः तया दुष्यन्ताद्यभेदज्ञानस्य उपपादनम्? मैवम्, शकुन्तलादीनां हि सहृदयनिष्ठरत्यादिं प्रति आलम्बनत्वसिद्धये यावदङ्गीकरणीयम् तावत एवाङ्गीकारो ज्यायान् न पुनरधिकस्य । स्थिते चैवम्, शकुन्तलाप्रभृतीनां बहूनां पदार्थानां ज्ञानस्य अयथात्वाङ्गीकारापेक्षया दुष्यन्ताद्यभेदज्ञानमात्रस्य तथाङ्गीकारो लाघवाय इति तदेवाङ्गीकृतम् । नहि कोऽपि विद्वान् उपानद्धारणं विहाय गन्तव्ये वर्त्ममात्रे चर्मणः प्रसारणं युक्तं मन्यते । सहृदयनिष्ठरत्यादेः दुष्यन्तादिनिष्ठरत्यादिना भेदाभेदयोः कल्पने 'रसो निर्वचनीयः' रसोऽनिर्वचनीयः' 'रसो व्यङ्ग्यः' 'रसोऽव्यङ्ग्यः' इत्यादयो विरुद्धा अपि व्यवहारा उपपन्ना भवन्ति । मतेऽस्मिन् सूत्रं तावदित्थं सङ्गमनीयम् –

विभावानुभावव्यभिचारिणां संयोगात् भावनाख्यरूपदोषविशेषात् रसस्य दुष्यन्ताद्यभिन्नत्वेन गृहीते सहृदये वर्तमानस्य रत्यादेर्निष्पत्तिः उत्पत्तिः ॥

ननु निष्पत्तेः उत्पत्त्यर्थकत्वे कार्यं रत्यादिं प्रति अनुभावे कारणत्वस्यानुपपत्तिः रसे च कार्यत्वापत्तिरिति चेत् – मैवम्, दुष्यन्तादिगतरत्यादिं प्रति कार्यभूतेऽपि रसपदव्यवहार्यं सहृदयगतरत्यादिं प्रति कारणत्वस्यैव वर्तमानत्वात् । भावनाया दोषत्वकल्पनं तु साधारणतावादिनामपि अपरिहार्यमेवेति न गौरवम् ।

सहृदये शकुन्तलाविषयकरत्यादेः भ्रान्त्योपपादनात् अयं भ्रान्तिवाद इति वक्तुं शक्यते ।

वस्तुतस्तु चिन्त्यमेतत्, आत्मनि दुष्यन्तादिबुद्धेः भ्रान्तिरूपत्वात् । न कोऽपि मनीषावान् आत्मनो भ्रान्त्यै चेष्टते । किञ्च यद्यात्मनि दुष्यन्तादिभ्रान्तेः अङ्गीकारः तर्हि करुणादौ रसे सहृदयस्यापि दुःखमेव जायेत ततश्च काव्ये

न कोऽपि प्रवर्तेत । भ्रान्तिरिति हेतोः न भवतीति चेत् – तर्हि लोकेऽपि रज्जुसर्पादेः भयाद्यनुत्पत्तिप्रसङ्गः । यदि पुनः अर्थानुसन्धानरूपाया अस्या भावनायाः भ्रान्तिजनकत्वम् तर्हि न कोऽपि मतिमान् देवतादिध्याने समुत्सहेत। यदप्युक्तं साधारणीकरणवादिनां मतेऽपि भ्रान्तिरिति – तन्न, शकुन्तलात्वादिधर्म-विशिष्टस्य स्त्रीत्वादिधर्मविशिष्टतया प्रत्ययस्याङ्गीकारात् । भ्रान्तिर्हि अतस्मिन् तद्बुद्धिः साधारणीकरणे पुनः व्याप्यधर्मविशिष्टे व्यापकधर्मस्य बुद्धिरिति मिथो वैलक्षण्यम् । नहि गजत्वविशिष्टस्य कस्यचित् प्राणित्वेन प्रतीतौ भ्रान्तिः इत्युच्यते। तस्मात् भ्रान्त्या सहृदये रत्यादेरुपपादनम् असङ्गतमेवेति बोध्यम्।

५. अभिनवगुप्तस्य मतम्

काव्ये यावन्तोऽर्था निबध्यन्ते तेषां सर्वेषामपि रत्याद्यर्थेन कारणत्वेन कार्यत्वेन सहकारित्वेन वा सम्बन्धोऽवश्यं भवति अन्यथा तदुपादानस्य वैयर्थ्यापत्तिः । तदिदं कारणत्वादिकं लोकदृष्टीनाम्, काव्यदृष्टीनां तु क्रमेण तेषां विभावादित्वम् । नन्वेतत् कुतः? कारणात्वादिभ्यो विभावत्वादिषु वैलक्षण्यात्, तथाहि – कारणादिपदव्यपदेश्यानाम् अर्थानां लोके सुखदुःखान्यतरात्मककार्यजनकत्वम् एषां तु सुखमात्रात्मकरत्यादिरूपकार्य-जनकत्वम् । किञ्च कारणादीनाम् असाधारणत्वेन प्रतिभासनम् एषां तु साधारणत्वेन । अन्यच्च, लोकदृष्ट्या रत्याद्यर्थं प्रति एतेषां कारणकार्य-सहकारित्वम् काव्यदृष्ट्या पुनरेतेषां कारणत्वमात्रम् । अतः अन्यैरेव शब्दैः एषां व्यपदेशः ।

एतेषां विभावादीनां ज्ञाने सति काव्यार्थानुसन्धानरूपाया भावनायाः प्रभावेण शकुन्तलादयः सर्वेऽपि पदार्थाः साधारणत्वेन प्रतीयन्ते । एवं शकुन्तलादिषु सर्वेष्वपि साधारणीभूतेषु सहृदये तद्विषयो रत्यादिरभिव्यज्यते योऽयं रस इत्यभिधीयते ॥

यत्पुनरुच्यते, रसो न प्रतीयते, नोत्पद्यते, नाभिव्यज्यते किन्तु भोगेन भुज्यत इति – तन्न, प्रतीतिव्यतिरिक्तस्य भोगस्याप्रामाणिकत्वात् । नोत्पद्यते नाभिव्यज्यते इत्यपि न युक्तम्, व्यक्त्युत्पत्तिद्वयानभ्युपगमे रसो नित्योऽसत्यो वा इति कल्पनाप्रसङ्गात् । न च भोगो नाम रसनेति नासङ्गतिरिति वाच्यम्,

तस्या आस्वादनरूपात्वेन प्रतीतितो भेदाभावात् । उपायवैलक्षण्याद्धि प्रतीतेः दर्शनानुमित्युपमित्यादिशब्दैः व्यवहारः । नह्यप्रतीतं वस्त्वस्ति व्यवहारयोग्यम् । किञ्च साधारणीभाव इति यदुच्यते तदभ्युपेमः किन्तु भावकत्वरूपात् शब्दव्यापारात् स इति तु नाभ्युपेमः । साधारणीभावश्च सामाजिके काव्यार्थानुसन्धानजन्यपरिपाकसम्पन्नसहृदयतावशात् भवतीति कुतः तदर्थं शब्दव्यापारस्य कल्पनम्? तद्भट्टनायकोक्तं चिन्त्यम् ।

यत्तावदुच्यते भट्टलोल्लटेन, रसो वस्तुगत्या अनुकार्यगत इति – तदपि न [४]ग्राह्यम्, तत्तन्मात्रगतत्वेन परिमितत्वात्, लौकिकत्वात्, कालदेशादिना व्यवधानात्, परगतत्वेन अनास्वाद्यत्वाच्च । यदप्युच्यते, शङ्कुकेन, रसोऽनुकर्तृगत इति – तदपि [५]तथा, परगतत्वेन अनास्वाद्यत्वात् कृत्रिमत्वाच्च । तद्भट्टनायकोक्तरीत्या सहृदयगतत्वमेव न्याय्यम् ।

रसनिष्पत्तौ विभावादीनां समूहस्यैव कारणत्वं न पुनः विशकलितानाम्, तथा सति व्याघ्रादेर्विभावस्य क्रोधभयादिजनकत्वेन, बाष्पादेरनुभावस्य रतिहासादिजन्यत्वेन, चिन्तादेश्च व्यभिचारिणो भयोत्साहादिसहचरितत्वेन नियतस्य रसस्यानभिव्यक्तिप्रसङ्गः । एतेन यत्र एकस्य द्वयोर्वा उपादानं तत्राक्षेपादिनान्यस्य प्रतीतिरिति नासङ्गतिः । ततश्च

> [६]दीर्घाक्षं शरदिन्दुकान्तिवदनं बाहू नतावंसयोः
> संक्षिप्तं निबिडोन्नतस्तनमुरः पार्श्वे प्रमृष्टे इव ।
> मध्यः पाणिमितो नितम्बि जघनं पादावुदग्राङ्गुली
> छन्दो नर्तयितुर्यथैव मनसः सृष्टं तथास्या वपुः ॥

इत्यादौ पद्ये अग्निमित्रगतरत्यादिं प्रति आलम्बनभूतस्य मालविकामात्रस्य उपादानेऽपि नेत्रवैशाल्यादीनामनुभावानाम्, औत्सुक्यादीनां च व्यभिचारिणाम्

४. परिमित्याल्लौकिकत्वात्सान्तरायतया तथा ।
अनुकार्यस्य रत्यादेरुद्बोधो न रसो भवेत् ॥ सा.द. तृ.प. का–१७.

५. शिक्षाभ्यासादिमात्रेण राघवादेः स्वरूपताम् ।
दर्शयन्नर्तको नैव रसस्यादको भवेत् ॥ सा.द. तृ.प. का–१८.

६. मालविका. द्वि.अ. श्लो–३.

औचित्यादेवाक्षेपः । एवं यत्र उद्दीपनविभावमात्रस्य उपादानम्, यथा –

७गअणं च मत्तमेहं धारालुलिअज्जुणाइं वणाइं ।
णिरहङ्कारमिअङ्का हरंति नीलाओ पि णिसाओ ॥

अत्रापि दयितादेरालम्बनस्य बाष्पादेरनुभावस्य चिन्तादेश्च व्यभिचारिणः पूर्ववदेवाक्षेपः । तथा यत्रानुभावमात्रस्य उपादानम्, यथा –

परिमृदितमृणालीम्लानमङ्गं प्रवृत्तिः
कथमपि परिवारप्रार्थनाभिः क्रियासु ।
कलयति हिमांशोर्निष्कलङ्कस्य लक्ष्मी-
मभिनवकरिदन्तच्छेदकान्तः कपोलः ॥

अत्रापि दयितादेरालम्बनस्य चिन्ताजडतादेश्च व्यभिचारिणः पुर्ववदेवाक्षेपः। तथैव यत्रालम्बनं व्यभिचारी चेति द्वयोरेवोपादानम्, यथा –

दूरादुत्सुकमागते विवलितं सम्भाषिणि स्फारितं
संश्लिष्यत्यरुणं गृहीतवसने कोपाञ्चितभ्रूलतम् ।
मानिन्याश्चरणानतिव्यतिकरे बाष्पाम्बुपूर्णेक्षणं
चक्षुर्जातमहो प्रपञ्चचतुरं जातागसि प्रेयसि ॥

अत्रापि मुखविकासादेरनुभावस्य पूर्ववदेवाक्षेप इति न कुत्रापि रसप्रतीतौ समूहस्य व्यभिचारः ।

वस्तुतस्तु मुक्तकेषु तथात्वेन गृहीतेषु च वाक्येषु अनुपात्तस्याक्षेप इति कल्पनम् न पुनः प्रबन्धेषु साकल्येन इतिवृत्तस्य प्रतिपादकेषु । तस्मात् मुक्तकादिष्वेव अनुपात्तस्याक्षेप इति कल्पनं नान्यत्रेति बोध्यम् ॥

निष्पत्तिश्च यद्यपि रसस्योच्यते किन्तु रत्यादेः संस्कारात्मना चित्ते वर्तमानत्वात् तद्रूपस्य रसस्य सा न सम्भवति तथापि तदर्थकुक्षिगतरसनाया निष्पत्तिमवलम्ब्य तस्मिन्नपि सा उपचर्यते । तथा च मतेऽस्मिन् सूत्रं तावदित्थं सङ्गमनीयम् –

शकुन्तलादेर्विभावस्य स्वेदादेरनुभावस्य लज्जादेश्च व्यभिचारिणः संयोगात् व्यञ्जनात् रसस्य संस्कारात्मना सामाजिके वर्तमानस्य रसनाशालिनो

७. गगनं च मत्तमेघं धारालुलितानि चार्जुनवनानि ।
निरहङ्कारमृगाङ्का हरन्ति नीला अपि निशाः ॥ [छाया] उल्लेखः, ध्वनि. द्वि.उ. का–१.

रत्यादेः निष्पत्तिः विशेषणीभूतरसनाया समुत्पत्त्या उपचरिता समुत्पत्तिः ॥

*** रसे सम्भवतां विघ्नानां निरूपणम्**

रसना चास्वादनम् । सा च निर्विघ्ना प्रतीतिः । विघ्नाश्चात्र सम्भावना-विरहरूपा प्रतिपत्त्ययोग्यता, स्वगतत्वपरगतत्वनियमेन देशकालविशेषावेशः, निजसुखादिविवशीभावः, प्रतिपत्त्युपायवैकल्यरूपः स्फुटत्वाभावः, अप्रधानता, संशययोगश्चेति षट् ।

तत्र हृदयसंवादविरहात् इतिवृत्ते बुद्धेरविश्रान्तिः प्रतिपत्त्ययोग्यता । हृदय-संवादविरहश्च इतिवृत्तेऽसम्भवित्वज्ञाने सति सञ्जायते । विघ्नस्यास्य दूरीकरणाय लोकसामान्यस्यैव वृत्तस्य निबन्धनं कार्यम् तत्र च तदविरुद्धानामेव विषयाणाम् । यदि पुनः अलोकसामान्यं निबध्यते तर्हि मिथ्यात्वबुद्धिः नियमेन भवतीति सहृदयानां वैमुख्यं प्रसज्येत । अथ पुनः निबन्धनीयमेवेत्याग्रहः तर्हि रामाद्यनुरूपनायकाश्रितत्वेन तस्य निबन्धनं कर्तव्यम् येन मिथ्यात्वबुद्धेः अपगमे सहृदयानावश्यमाभिमुख्यं भविष्यति ।

इतिवृत्तज्ञानात् जातयोः सुखदुःखयोः माध्यस्थ्येन प्रतीतिरपेक्ष्यते । यदि स्वगतत्वेन प्रतीतिः तर्हि 'अहं सुखी' अहं दुःखी' इति वा बुद्धिः सम्भवति । अथ परगतत्वेन प्रतीतिः तदापि तत्सुखदुःखाभ्यां स्वस्यापि सुखदुःखे इति पूर्वोक्ताकारैव बुद्धिः । सा च बुद्धिः 'अहं सुखीति दुःखीति वा अस्मिन् देशे' अहं सुखीति दुःखीति वा अस्मिन् काले' इति देशकालसम्बद्धतयैव प्रतीयते । अयमेव देशकालविशेषावेश इत्युच्यते । तत्र सुखस्योत्पत्तौ कथमेतत् चिरं स्थाप्येत? कथमेतत् रक्ष्येत? कथमस्य सदृशं सम्पाद्येत? कथमेतत् प्रकटीक्रियेत? इत्यादिना, दुःखस्योत्पत्तावपि कथमिदं दूरीक्रियेत? कथमिदं गोप्येत इत्यादिना च बुद्ध्यन्तरमवश्यं समुन्मिषति येन रसजीवातुभूतस्य तन्मयीभवनस्य विलयो नियमेन सम्पद्यते । विघ्नस्यास्य अपसारणं तु माध्यथ्येन सुखदुःखयोः प्रतीतौ सत्याम् । सा तु नटैः स्वकीयरूपस्य प्रतिशीर्षकादिना प्रच्छादनेन विलक्षणभाषाद्यवलम्बनेन तथाविधेन चान्येन । सति च तस्मिन् माध्यस्थ्यं सिध्यतीति देशकाल-विशेषस्यानावेशो जायते ।

स्वकीयसांसारिकसुखदुःखचिन्तया इतिवृत्ते बुद्धेरविश्रान्तिः निजसुखादि-विवशीभावः । विघ्नस्यास्य दूरीकरणाय हृदयावर्जकमादौ गानातोद्यादिकं प्रकल्पनीयम् येन सहृदयः विस्मृतनिजसुखदुःखसमवाय इतिवृत्त एव प्रणिधानं भजते ।

स्फुटायाः प्रतीतेः विरहः स्फुटत्वाभावः । प्रत्यक्षापेक्षया शब्दस्य दुर्बल-प्रमाणत्वेन इन्द्रियेभ्यो यथा स्फुटा प्रतीतिः न तथा शब्देभ्यः । तदस्या अस्फुटप्रतीतेः वारणाय शब्दैरिवाभिनयेनापि विवक्षितार्थस्य प्रत्यायनं कर्तव्यं येन उपायाधिक्यात् उपेयस्य स्फुटत्वमिति विघ्नोऽयं स्वयमेव दूरं गतो भविष्यति ।

अप्रधानता प्रधानस्याविवेचनम् । रसे वहवः पदार्थाः सन्ति येषु स्थायी प्रधानो भवति विभावादयस्तु अप्रधानाः । ततश्च तेषां संयोजनं स्थाय्यनुगुणमेव भवेत् येन तस्य सुतरामभिव्यक्तिः भवति । प्रधानाप्रधानभावस्याविवेके नहि पुरुषो रसमास्वादयितुं शक्नोति । प्रधानस्य विवेके सति विघ्नस्यास्यापसारणं भवति ।

संशययोगः संशयप्राप्तिः । इतिवृत्ते यावन्तोऽर्थाः तेऽवश्यं विभावाद्यन्यतम-रूपा भवन्तीत्यभिहितम् । तत्र व्याघ्रादिः भयक्रोधादीनां विभावः । अश्रुपातादिः रतिशोकादीनाम् अनुभावः । चिन्तादिश्च भयोत्साहादीनां व्यभिचारी । एवमेषां सर्वेषामपि व्यभिचरितत्वात् एकस्य द्वयोर्वा निबन्धने नूनं सन्देहस्योत्पत्तिः । विघ्नस्यास्य निवारणाय समूहो निबन्धनीयः येन नियतस्यैव स्थायिनः प्रतिपत्तिरिति समीहितस्य सिद्धिः ।

उक्ताश्च विघ्नाः । उक्तश्च तद्विनिवारणोपायः । एतादृशैः विघ्नैर्निर्मुक्ता या प्रतीतिः तद्विषयीभूतो रत्यादी रसो भवति नान्यः ।

रसोऽयं न कार्यः, विभावादिज्ञानस्य नाशे नाशात् । नापि ज्ञाप्यः, सिद्धत्वविरहात् । ननु कार्यज्ञाप्यविलक्षणत्वे पदार्थोऽयं कीदृशः? [८]अनिर्वचनीय

८. नायं ज्ञाप्यः स्वसत्तायां प्रतित्यव्यभिचारतः ।
यस्मादेष विभावादिसमूहालम्बनात्मकः ॥
तस्मान्न कार्यो नो नित्यः पूर्वसंवेदनोज्झितः ।
असंवेदनकाले हि न भावोऽप्यस्य विद्यते ॥

इति विभाव्यताम् । रसस्य लोकोत्तरत्ववादिनाम् अस्माकमनिर्वचनीयत्वमेतद् भूषणमेव न तु दूषणम् ॥

*** जगन्नाथकृतमभिनवगुप्तमतस्य विवरणं तत्राक्षेपश्च**

[१]जगन्नाथस्तु एतदेव मतमुररीकुर्वन्नपि क्वचित् प्रकारान्तरेणैव निरूपयन् विभासते – 'सहृदयतावशात् या भावना ततः साधारणीभूतैः विभावादिभिः सम्भूय प्रादुर्भावितेन अलौकिकेन व्यापारेण तत्कालनिर्वर्तितानन्दांशावरणाज्ञानेन, अत एव प्रमुष्टपरिमितप्रमातृत्वादिनिजधर्मेण प्रमात्रा स्वप्रकाशतया वास्तवेन निजस्वरूपानन्देन च गोचरीक्रियमाणः प्राग्विनिविष्टवासनारूपो रत्यादिरेव रसः । मम्मटेनापि 'व्यक्तः स तैः विभावाद्यैः स्थायी भावो रसः स्मृतः' इत्युच्यते । तत्र व्यक्त इत्यस्य व्यक्तिविषयीकृत इत्यर्थः । व्यक्तिश्च भग्नावरणा चित् । यथा हि शरावादिना पिहितो दीपः तन्निवृत्तौ सन्निहितान् पदार्थान् प्रकाशयति स्वयं च प्रकाशते एवमात्मचैतन्यं विभावादिसंवलितान् रत्यादीन् । ननु रत्यादीनामन्तःकरणधर्मत्वात् साक्षादात्मनो भास्यमानत्वेऽपि विभावादीनां तु बाह्यत्वात् तत्कथम्? – उच्यते, स्वप्नतुरगादीनामिव रङ्गरजतादीनामिव तेषामपि तत्सम्भवति । मतेऽस्मिन् सूत्रसमन्वयस्तावत् अयम् –

विभावानुभावव्यभिचारिभिः संयोगात् व्यञ्जनात् रसस्य चिदानन्दविशिष्ट-स्थाय्यात्मनः स्थाय्युपहितचिदानन्दात्मनो वा निष्पत्तिः स्वरूपेण प्रकाशनमिति' ॥

अत्र विचार्यते – यत्तावदुच्यते, शकुन्तलादिभिः विभावादिभिः सम्भूय

नापि भविष्यन् साक्षादानन्दमयस्वप्रकाशरूपत्वात् ।
कार्यज्ञाप्यविलक्षणभावान्नो वर्तमानोऽपि ॥
विभावादिपरामर्शविषयत्वात् सचेतसाम् ।
परानन्दमयत्वेन संवेद्यत्वादपि स्फुटम् ॥
न निर्विकल्पकं ज्ञानं तस्य ग्राहकमिष्यते ।
तथाभिलापसंसर्गयोग्यत्वविरहान्न च ॥
सविकल्पकसंवेद्यः साक्षात्कारतया न च ।
परोक्षस्तत्प्रकाशो नापरोक्षः शब्दसम्भवात् ॥
तस्मादलौकिकः सत्यं वेद्यः सहृदयैरयम् ।
प्रमाणं चर्वणैवात्र स्वाभिन्ने विदुषां मतम् ॥ का.२०–२६ सा.द. तृ.प.

१. रस. प्र.आ. रसप्रकरणम् ।

अलौकिकस्य व्यापारस्य प्रादुर्भावनम्, तेन चाज्ञानरूपावरणस्य भङ्ग इति – तत्र प्रष्टव्यम्, कोऽयमलौकिको व्यापारः किं स शब्दार्थगत आहोस्विदन्यः? नाद्यः, शब्दार्थगतव्यापारशब्देन गत्यन्तराभाव इति व्यञ्जनाया एव ग्राह्यत्वात् तया चावरणभङ्गस्यासम्भवात् । नहि शब्दार्थगतस्य व्यापारस्य अर्थप्रतिपादनात् अतिरिक्तं किञ्चित् कार्यं सम्भवति । अत एव गङ्गायां घोष इत्यस्मात् वाक्यात् गङ्गातीरं शीतत्वपावनत्वादिविशिष्टं जानामीतिवत्, उच्चरद्भूरिकीलालः शुशुभे वाहिनीपतिरित्यस्मात् वाहिनीपतौ वाहिनीपतिसादृश्यं जानामीतिवत् रसाभिव्यञ्जकादस्मात् वाक्यात् आवरणभङ्गं जानामीति न स्वारस्यवाहिनी प्रतीतिः । न द्वितीयः, चेष्टागता व्यञ्जना आहोस्वित् भावना इति विकल्पोदयात् । नाद्यः, कटाक्षविक्षेपादिचेष्टया अनुरागमहं जानामीतिवत् इहापि तादृशौचित्यवाहिप्रतीतेः दुरुपपादत्वात् । नापि द्वितीयः, साधारण्यसम्पादनेनैव चारितार्थ्यात् । ननु तेन शब्देन तन्मयीभवनक्रियाया ग्रहणमिति चेत् – अस्तु, बाढं गृह्यते । किन्तु विभावादिविषयिकायां तस्यां तेनैव प्रादुर्भाव्यत्वं कथमुपपाद्यते? नहि तद्विषया कापि तत्प्रादुर्भाव्येति व्यपदिश्यते । विभावादिषु विषयेषु सत्स्वेव तस्याः प्रादुर्भाव इति तद्विषयिकायामपि तस्यां तत्प्रादुर्भाव्यत्वं शक्यकल्पनमिति चेत् – अस्तु, कथञ्चित् गन्तव्यमेव गतं भवता तथापि वाचकशब्दमन्तरेण कथं तस्यावगतिः? सामान्यवाचकस्य क्वचित् विशेषे पर्यवसानमिति स्थितेऽपि तत्केवलं प्रथममेव लक्ष्यं जानतां नान्येषामिति भूतपूर्वस्य प्रश्नस्य तादवस्थ्यम् ।

यत्पुनरुच्यते व्यक्तिश्च भग्नावरणा चिदिति – तच्चिन्त्यम्, व्यक्तिशब्दस्य तादृशचित्परकत्वे बोधकविरहेण व्यञ्जनाया अग्रहणप्रसङ्गात् । तस्मात् व्यक्तिरत्र व्यञ्जनेत्येवार्थो ज्यायान् ।

यदप्युच्यते, विभावानुभावव्यभिचारिभिः संयोगात् व्यञ्जनात् रसस्य निष्पत्तिरिति – तदपि तथा, संयोगशब्दस्य व्यञ्जनार्थकत्वेऽभीप्सितस्य समावेशार्थस्य असिद्धिप्रसङ्गात् । न च तन्त्रेणोभयोरपि सिद्धिरिति वाच्यम्, तन्त्रेण सर्वदो माधवः पायादित्यादाविव समकक्ष्ययोरेव अर्थयोः प्रतिपादनमित्यङ्गीकारात् । नात्र पुनः व्यञ्जनासमावेशयोरर्थयोः समकक्ष्यत्वम्,

अन्येन अन्यस्यावलम्बनात्, तथाहि – रसस्य निष्पत्तिः कस्मादिति प्रश्ने विभावादीनां समावेशात् इत्युत्तरम् । तस्मादपि कथमिति पुनः प्रश्ने व्यञ्जनात् इत्युत्तरम् । अनेन हि स्फुटं परेण पूर्वस्यावलम्बनम् । नहि भिन्नकक्ष्ययोरर्थयोः तन्त्रमवलम्बन्ते वाचि कुशलाः । महर्षेरपि समावेशार्थकत्वमेव अभीप्सितम् यस्मात् [१०]नानाव्यञ्जनौषधिसंयोगात् रसनिष्पत्तिरिति दृष्टान्तवाक्ये शब्दस्यास्य तस्मिन्नेवार्थे प्रयोगः कृतः । तत्संयोगशब्दस्य समावेशार्थकत्वमेवेह साम्प्रतम् । व्यञ्जनारूपस्य तु अभिप्रेतार्थस्य तु घटशब्दात् कलशस्य प्रतीतिरित्यादौ अभिधाव्यापारस्येव आक्षेपादेव सिद्धिरिति न तदर्थं यत्नः कर्तव्यो नापि च कृत इति दिक् ॥

इमानि तावत् प्रसिद्धानि मतानि । अप्रसिद्धानि यद्यपि बहूनि सन्ति किन्तु न तेषां सूत्रानुसारित्वमिति नात्र विचारः क्रियते । एतेषु किं मतं ज्यायः इत्यत्र रसास्वादननिपुणाः सहृदयधुरीणा एव प्रमाणम् तथापि प्रवृत्तिमात्रेणैव अधिकारित्वं मन्यमानेन मया किञ्चिदत्र विचारः क्रियते –

* कस्तावदत्र निर्णयो ज्यायान्?

विभावानुभावव्यभिचारिसंयोगात् रसनिष्पत्तिरिति तावत्सूत्रम् । एतच्च रसनिष्पत्तिबोधनार्थं प्रवृत्तम् न पुनः तत्स्वरूपबोधनार्थम् । तत्र पुनः सूक्ष्मेक्षिकायां तत्स्वरूपस्यापि प्रतीतिर्भवेत् इति तु विषयान्तरम् । अत एवात्र स्थायिनो ग्रहणं न कृतम् । किन्त्वत्र समस्या तावदियम् यत् व्याख्यानबाहुल्येन सूत्रार्थस्य दुरवगाहत्वम् तथापि परमार्थस्य शोधने यत्नः कार्य इत्यभिनिवेशात् किञ्चिदत्र प्रवृत्यते –

यद्यपि सूत्रमेतत् रत्यादिरूपरसविषयकम्,

[११]रसा भावा अभिनया धर्मी वृत्तिप्रवृत्तयः ।
सिद्धिः स्वराः तथातोद्यं गानं रङ्गश्च सङ्ग्रहः ॥

इति निर्दिश्य प्रथमायातरसनिरूपणप्रसङ्गेऽवतारणात् तथापि भावाध्याये पृथक् तन्निष्पत्तेरनभिधानात्, बाधकाभावात्, चित्तवृत्तित्वाविशेषात्, रस्यत

१०. ना.शा. ष.अ. रससूत्रविवरणम् ।
११. ना.शा. ष.अ. का–१०.

इति व्युत्पत्त्या निर्वेदादीनामपि रसत्वानपायाच्च इदं भावेष्वपि प्रवर्तत इत्यवगम्यते । भावानां सत्यपि रसत्वे पृथक् निर्देशस्तु क्वचित् तेषां प्राधान्यख्यापनाय । एतेन भावानां रस एव विश्रान्तिरिति स्थितेऽपि रत्यादेः अनुद्बुद्धतया प्रतीतौ प्रासङ्गिकं प्राधान्यं तेषां सम्भवतीति सूचितम् । ननु व्यभिचारिणो व्यभिचार्यन्तरेणायोगात् कथं भावेषु सूत्रस्यास्य सङ्गतिः? उच्यते, रत्यादेरुद्बुद्धतया प्रतीतौ सत्यां नास्ति व्यभिचारिणो व्यभिचार्यन्तरस्य योगः, प्रधानानुसारित्वभङ्गात् । अनुद्बुद्धतया प्रतीतौ तु तात्कालिकं प्राधान्यमबाधितमिति सम्भवत्येव तस्य व्यभिचार्यन्तरेण योगः ।

तत्र रत्यादीनां सर्वेषां व्यापकतया भावशब्देन व्यपदेशो सत्यपि रत्यादीनामष्टानामेव भावानां रसत्वम्, निर्वेदादीनां त्रयस्त्रिंशतो भावानां भावत्वम्, स्तम्भादीनां चानुभावत्वमिति विवेकः । तत्रेदं बोध्यम् – रसशब्दस्य शृङ्गारादिपरतयेव भावपरतयापि प्रयोगो वर्तते, रस्यमानत्वाविशेषात् । एवं भावशब्दस्यापि भवन्तीति व्युत्पत्त्या एकोनपञ्चाशति भावेष्विव निर्वेदादिषु त्रयस्त्रिंशति व्यज्यमानेष्वपि भावेषु व्यापकतया प्रयोगो वर्तते । प्रकरणादिना अर्थविशेषस्य निर्णयान्नास्ति सन्देहस्य प्रसक्तिः ॥

तत्र रत्यादिः अनुकार्ये अनुकर्तरि सहृदये च वर्तते किन्तु आस्वाद्यताशालित्वं सहृदयगत एव नान्यत्र, यथा लोके पायसं स्थाल्यां दर्व्यां स्थालिकायां चेति त्रिषु स्थलेषु वर्तते तथापि आस्वाद्यताशालित्वं स्थालिकागत एव पायसे नान्यत्र । आस्वाद्यताशालित्वमेव रसस्य जीवितम् अन्यथा स्वरूपलोपापत्तेः । तदेवं सहृदयगतरत्यादेरेव रसत्वमिति निर्णयेऽनुकार्यगतस्य रत्यादेः रसत्वं वदन् भट्टलोल्लटः, अनुकर्तृगतस्य तद्वदन् भट्टशङ्कुकश्च चिन्त्याविति ज्ञेयम् । अत्र पुनः यद्वक्तव्यं तत्सर्वं तत्तन्मतनिरूपणावसर एवोक्तमिति न पुनरत्र निरूप्यते ।

तदेवं मतद्वयस्य गलने भट्टनायकस्य अभिनवगुप्तस्य नवीनानां चेति त्रीण्येव मतान्यत्र शिष्टानि । तत्र पुनरिदं विचार्यते – तत्र भट्टनायकस्य यन्मतम्, रसो न प्रतीयते, नोत्पद्यते, नाभिव्यज्यते किन्तु भोगेन भुज्यत इति – तन्न, प्रतीतिव्यतिरिक्तस्य भोगस्याप्रामाणिकत्वात् । भुज्यमानो रत्यादिरस्ति

किन्तु स न प्रतीयत इति वादस्तु मेरुं धारयन् मशको वर्तते किन्तु स न कस्यापि प्रतीयत इतिवदाविर्भवन्नेव मृतः । ननु भोगो नाम सत्त्वोद्रेक-प्रकाशानन्दनिजसंविद्विश्रान्तिः । सा च रसनातन्मयीभवनाद्यपरपर्याया गाढा प्रतीतिरेव न घटपटादिप्रतीतिरिव साधारणीत्यभिप्रायेण तस्मिन् प्रतीतित्वस्य निषेध इति चेत् – बाढमस्तु, एवमपि शब्दानां श्रवणेन विभावादिरूपवाच्यार्थस्य ज्ञाने सति दुष्यन्तादौ कथं शकुन्तलादिविषयकरत्यादेः उपपादनं व्यञ्जनावैरिणो भवतो मतेन? कथं च गतोऽस्तमर्क इत्यादौ अभिसरणविध्यादेः, उच्चरद्भूरि-कीलालेत्यत्र वाहिनीपतिः वाहिनीपतिरिवेति औपम्यस्य चार्थस्य उपपादनम्?

यत्पुनः साधारण्यसम्पादनाय भावनेति शब्दव्यापारः स्वीकार्य इति – तदपि न, तस्याः सहृदयनिष्ठधर्मविशेषत्वात् । एवं भोजकत्वव्यापारस्वीकारोऽपि भाराय केवलम्, तन्मयीभवनलक्षणस्य भोगस्य वस्तुमाहात्म्यादेव साधनीयत्वात् । तस्मात् साधारणीकरणमार्गेण रसं साधयतोऽपि भवतो मतमनङ्गीकार्यस्य अङ्गीकारात् अङ्गीकार्यस्य चानङ्गीकारात् अश्रद्धेयमेव प्रतिभाति ।

तदित्थं पुनरप्येकस्य मतस्य गलने मतद्वयमात्रमत्र शिष्टम् । अनयोः किं गरीयः? इदं विचार्यते – यत्तावदुच्यते नवीनैः, भावनारूपदोषवशात् सहृदयस्य स्वस्मिन् अनुकार्याभेदबुद्धिरिति – एवं हि भ्रान्तिरेवायातेति रसास्वादे न कोऽपि विचारवान् प्रवर्तेत । नहि मूर्खाणां धुरन्धरोऽपि स्वस्य भ्रान्त्यै यतते । किञ्च शृङ्गारादौ दुष्यन्तादेरिव शकुन्तलादीनाम् आलिङ्गनादिषु, भयानकादौ च व्याघ्रादिभीतस्येव पलायनादिषु सहृदयस्यापि प्रवृत्तेर्दुर्वारत्वापत्तिः । न च व्यञ्जनामाहात्म्यात् नास्ति दोष इति वाच्यम्, वचनमात्रेण तादृशसामर्थ्यस्य आधातुम् अशक्यत्वात् पितृमरणादेः व्याघ्रादिसन्निधानस्य चार्थस्य व्यञ्जनया बोधने पतनपलायनादेः अनुत्पत्तिप्रसङ्गाच्च । न चेदं काव्य एवेति वाच्यम्, सङ्कोचे मानाभावात् । ननु परमतेऽपि साधारणीकरणेन शकुन्तलादेः स्त्रीत्वादिमात्रेण निर्णयात् भ्रान्तिरस्त्येवेति चेत् – हन्त! भवतामेव भ्रान्तिः यतो हि अतस्मिन् तद्बुद्धिः भ्रान्तिरित्युच्यते । इह हि शकुन्तलायां कान्तेति व्याप्यधर्मवति व्यापकधर्ममात्रस्य बुद्धिरिति वैषम्यमस्ति ।

विभावाद्यर्थादपि दुष्यन्तत्वादिना गृहीते नटे रत्यादेर्ग्रहणं व्यञ्जनया । न चानुमानम्, विभावादीनां रत्यादिभिः व्यभिचरितत्वस्य पूर्वं निवेदनात् । नहि व्यभिचरन्तोऽर्थाः साध्यं साधयन्ति । अथ प्रत्येकं व्यभिचरितत्वेऽपि न तत्समूहस्येति वाच्यम्, कार्यैरनुभावैः कथञ्चित् अव्यभिचरितत्वस्य सम्भवेऽपि उद्दीपनविभावादौ सर्वथा तदसम्भवात् । तदेवमभिनवगुप्तस्य मतं मूर्धनि तिष्ठतीति तदेव ग्राह्यमित्यवगन्तव्यम् ।

तत्र धारणसौकर्याय विषयेषु यः क्रमः स तावत् निवेद्यते –

- प्रथमं शब्दानां श्रवणम् चेष्टारूपस्य चाभिनयस्य दर्शनम् ।
- आर्थव्यञ्जनया चेष्टाव्यञ्जनया च दुष्यन्तादौ शकुन्तलादि-विषयकरतेः अवगमनम् ।
- भावनया विभावादीनां सर्वेषां साधारणीकरणम् ।
- तन्मयीभवनम् यस्य निर्विघ्नप्रतीतिः, गाढानुसन्धानमित्यादीनि नामान्तराणि ।
- सहृदये शकुन्तलादिविषयकरत्यादेः व्यञ्जनम् (नेदं शब्दस्यार्थस्य वा व्यापारः, व्यञ्जनेनेममर्थं जानामीत्यप्रतीतेः)
  सोऽयं रत्यादिः रसः ॥

एतेन सहृदयनिष्ठो रत्यादिरेव रस इत्युक्तम् । अथवा दुष्यन्तत्वादिना गृहीतो यो नटः अनुकर्ता तद्गतो रत्यदिरेव रस इत्युच्यते, को दोषः? नन्वेवं तर्हि सहृदयस्य ताटस्थ्यं स्यात् – नैष दोषः, तस्य च रसस्य आत्मगतत्वेन प्रतीत्यैव चमत्कारः सहृदयानामित्यङ्गीक्रियते । एतेन रसमहं जानामीति रसस्य व्यङ्ग्यत्वम्, कृत्रिमत्वात् कल्पितार्थप्रतिपादकत्वं च काव्यस्य सुष्ठु प्रतिपादितं भविष्यति । अन्यत्सर्वं पूर्ववत् ।

* रसे चैतन्यस्वरूपत्वस्य समर्थनम्

नन्वयं कथमानन्दमयः? प्रत्युत करुणादेः रसस्य शोकादिस्थायिकत्वात् दुःखमयत्वमेव स्यात् – उच्यते, तन्मयीभवनकालिको रत्यादिरेव रसः । तन्मयीभवनं च अत्यन्तगाढमवधानम् यत्र वेद्यान्तरपदार्थानां विषयत्वमेव

तावत् न सम्भवति । एतच्च न केवलं रसिकानां किन्तु योगिनामपि । परमस्त्यत्र विशेषः – योगिनां यत् तन्मयीभवनं तत्र चैतन्यमात्रं विषयः । ते हि तन्मात्रलक्ष्या यमनियमादिसाधनैः इन्द्रियाणि निगृह्णन्तः अन्तः प्रविशतो विषयान् निरुन्धन्ति निरुन्धन्तश्च मनो निगृह्य चिरावस्थिततत्संस्कारानपि निस्सारयन्ति । इत्थं विगतकल्मशे चित्ते सर्वगतमद्वितीयं सच्चिदानन्दस्वरूपं तच्चैतन्यं तथा प्रतिफलति यथा निर्जनप्रदेशावस्थितकासारे नभः, यथा च दर्पणे प्रत्यवस्थितं वस्तु ।

रसिकानां तु यत्तन्मयीभवनं तत्र विभावादिः विषयः । ततश्च तस्य यथा यथा गाढगाढीभवनं तथेन्द्रियाणां विभावाद्यर्थे विलयः । तस्मात् पदार्थान्तरणां बुद्धौ प्रवेशो न सम्भवति । एतेन चित्तं व्यवहारदशागतचित्तापेक्षया स्वच्छतरमपि विभावाद्यर्थैः चिरस्थायिसंस्कारैश्च अस्वच्छमेव वर्तते । एवमपि तच्चित्ते तन्मयतावशात् आख्यातचरस्वरूपं तच्चैतन्यं तथा प्रतिफलति यथा क्षुभितप्राये कासारे नभः, यथा च धूलिच्छन्ने दर्पणे प्रत्यवस्थितं वस्तु । तदेवमुभयत्र प्रतिफलने समानेऽपि एकत्र तदत्यन्तस्फुटम् आनन्दानुभवश्च भूयान् अन्यत्र तदत्यन्तास्फुटम् आनन्दानुभवश्चाल्पीयान् । स्यान्नामानन्दोऽयमल्पीयान् तथाप्ययं वैषयिकानन्दं बहुगुणमतिशेत इति तु निर्विवादम्, यदुक्तम् –

[१२]यच्च कामसुखे लोकं यच्च दिव्यं महत्सुखम् ।
तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम् ॥

तदेवं चैतन्यस्य प्रतिफलने ततो जातमानन्दं रत्याद्यास्वादनादेव जात इति तर्कयन्तो रसिका रत्यादिलक्षणोऽयं रस आनन्दमय इत्यभिप्रयन्ति प्रभवे भ्रमन्तः । एतेन रसस्तावत् स्वरूपेणैव नानन्दमयः किन्तु चैतन्यानुभवात् तथेत्युक्तं भवति । भयशोकाद्यनुभवे तु यद्यपि तत्तद्भावस्वभावानुगुण्येन दुःखमप्यनुभूयते तथापि तत्ताटस्थ्येनेति हेतोः न वैमुख्ये प्रयोजकं भवति। अथापि अस्त्येव दुःखस्यानुभव इति चेत् – अस्तु, एवमपि सूर्ये सति कृशानोरिव चैतन्यानन्दे तस्य प्रतीतिरेव न भवतीति न काप्यनुपपत्तिः ।

१२. उल्लेखः, ध्वनि. तृ.उ. शान्तरसनिरूपणम् ।

एवमत्र रसास्वादकाले विभावादिसंवलिस्य चैतन्यस्य अनुभवः समाधिकाले तु शुद्धस्येति महति वैलक्षण्ये सत्यपि केचित् विमर्शकाः चैतन्यविषयकत्वम् उभयत्रापि तुल्यमित्येतावन्मात्रेण रसास्वादो [13]ब्रह्मास्वादसदृश इत्याचक्षते। एतदेवानुसन्धाय पश्चात् जगन्नाथेनापि रसस्वरूपनिरूपणावसरे रसो नाम भग्नावरणचिद्विशिष्टो रत्यादिः रत्याद्यवच्छिन्ना वा भग्नावरणचित् इत्यभिप्रेत्य उपंहारो व्यधीयत । एवं रसस्य चैतन्यरूपत्वे सिद्धे

सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः ।
वेद्यान्तरस्पर्शशून्यः ब्रह्मास्वादसहोदरः ॥
लोकोत्तरचमत्कारप्राणः कैश्चित् प्रमातृभिः ।
स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः ॥

इति कारिकायां यदुक्तम् अखण्डत्वम्, स्वप्रकाशत्वम्, चिन्मयत्वम्, स्वाकारवदभिन्नत्वं च तत्सर्वं व्याख्यातमित्यवगन्तव्यम् ।

रसस्य चैतन्यरूपत्वमभिनवगुप्तस्यापि सम्मतम् – [14]तेन हि विकृतिभूतान् शृङ्गारादीन् निरूप्य तत्प्रकृतिं शान्तं विमृशता तत्स्थायिनि विषयेऽनेकं मतं विचारितम् । तदेव यथाप्रतिपादितं सावतरणं निदर्श्यते, यथा –

यदत्र केचित् स्थायिनो निर्दिश्य अनुपदमेव व्यभिचारिषु प्राथम्येन निदेशात् निर्वेदस्य क्वचित् स्थायित्वमपि सम्भवतीति ज्ञापितं भवति । तस्मात् गृहकलहादिजन्यो निर्वेदो व्यभिचारी तत्त्वज्ञानजन्यस्तु शान्ते स्थायीति अभिप्रयन्ति – तन्न, एवं हि तत्त्वज्ञानमात्रस्य विभावत्वं स्यात् न स्याच्च तत् तस्यापि कारणेषु । तत्कारणत्वात् सिध्यतीति चेत् – कारणकारणे विभावत्वाङ्गीकारे अतिप्रसक्त्यापत्तेः, यथा – अमेध्यं जुगुप्सायाः कारणम् । तत्कारणं तु चेतनः तद्भक्षितं वा । न तस्य जुगुप्सां प्रति विभावत्वं कथञ्चिदपि सम्भवति। तस्मात् कारण एव विभावत्वं न तु तत्कारणे । अन्यच्च, निर्वेदो नाम वैराग्यम् । तस्मात् तत्त्वज्ञानं ततश्च मोक्ष इति निर्विवादः क्रमः । तत्त्वज्ञानजन्यो निर्वेदः स्थायीत्यभ्युपगमे क्रमे सदोषत्वप्रसङ्गः । नहि कोऽपि

१३. सा.द. तृ.प. का–२३. १४. अभि.भारती. ना.शा. ष.अ. शान्तरसनिरूपणम् ।

तत्त्वं ज्ञात्वा निर्विद्यते । किं तर्हि? निर्विद्य तत्त्वं जानाति ।

एवं मतमिदं निराकृत्य मतान्तरं पर्यालोचयति – अन्ये पुनः मन्यन्ते, रत्यादीनां ये विभावा उक्ताः ततो रत्यादयो जायन्ते । अथ विभावान्तरात् ते जायन्ते तर्हि अवश्यं ते विलक्षणा भवन्ति, यथा – लोके सर्वस्यापि जनस्य पूयादेः जुगुप्सा भवति वेदान्तपरिशीलकस्य तु यत्र समेषां प्रवृत्तिः तादृशात् प्रमदादेरपि । अत एव तज्जुगुप्साया विलक्षणत्वम् । एवं विलक्षणेष्वेव रत्यादिषु कस्यचिदेकस्य शान्ते स्थायित्वं स्वीकार्यम् । तत्र पुनः विवेचने क्रियमाणे

यश्चात्मरतिरेव स्यादात्मतृप्तश्च मानवः ।
आत्मन्येव सन्तुष्टः तस्य कार्यं न विद्यते ॥

इति गीतोक्तरीत्या अनाहतानन्दमयस्वात्मविषया रतिरेव मोक्षसाधनमिति निर्णयात् स एव शान्ते स्थायी भावो भवितुमर्हति – तदपि न, अत्र हि रत्यादीनां विस्मयान्तानां अन्यतमस्य स्थायित्वमुपपादनीयम् किन्तु विभावान्तरजन्यानां रत्यादीनां सर्वेषामपि विलक्षणत्वेन मोक्षविषयकत्वमिति महर्षिणा अभ्युपगमात् तन्नोपपद्यते । एवं तर्हि सर्वेषामपि तदस्तु इति चेत् – न, विरक्तस्य पुंसः विकृतत्वेन ज्ञातात् समस्तादपि विषयात् हासः, शोच्यत्वेन ज्ञातात् कृत्स्नादपि शोकः, अपकारित्वेन ज्ञातादखिलादपि सांसारिकव्यवहारात् क्रोधः, कुत्सितत्वेन ज्ञातात् सर्वस्मादपि प्रमदादेः पदार्थात् जुगुप्सेत्यादिना एकस्मिन्नेव नानास्थायिनां सम्भव इति तद्रूपस्य शान्तस्य नानारूपत्वापत्तिः । न च मोक्षैकफलत्वात् तेषामेकत्वेन परिगणने नास्ति दोष इति वाच्यम्, तुल्यन्यायेन क्षयैकफलत्वात् वीररौद्रयोरपि एकत्वापत्तेः । महर्षेः मते तु मोक्षविषयत्वे स्वीकृतेऽपि स्थायित्वस्यानभ्युपगमात् नेयमापत्तिः ।

एवमिदमपि मतं निराकृत्य अन्यत् परिशीलयति – अन्ये तु अनुपजातविशेषचित्तवृत्तिरेव शान्तस्य स्थायीत्याचक्षते – तदपि न, यत्र रत्यादयो विशेषा एव न जाताः तादृशे चित्ते वृत्तिविशेषस्य वक्तुमशक्यत्वात्, तदुक्तम् – वीतरागजन्मादर्शनात् ॥

एवमेतदपि निराकृत्य मतान्तरं परिशीलयति – अपरे पुनः पानकरसवत् अविभागं प्राप्ताः सर्वेऽपि रत्यादयोऽत्र स्थायिन इत्याहुः – तदपि न, चित्तवृत्तीनां यौगपद्येन जननस्यासम्भवात्, परस्परं विरोधित्वेन समूहस्य दुर्लभत्वाच्च ॥

एवं नानामतानि विचार्य पर्यन्ते स्वमतमाचष्टे – एवं तर्ह्यत्र कः स्थायी? उच्यते, इह तत्त्वज्ञानमेव मोक्षसाधनमिति तस्यैव स्थायिता युक्ता । तत्त्वज्ञानं चात्मज्ञानमेव । ज्ञानं च आत्मनो नातिरिक्तमिति मत्वा पुनरुच्यते – 'तेनात्मैव ज्ञानानन्दादिविशुद्धधर्मयोगी परिकल्पितविषयोपरागरहितोऽत्र स्थायी । न चास्य स्थायितया स्थायित्वं वचनीयम् । रत्यादयो हि तत्कारणान्तरोदय-प्रलयोत्पद्यमाननिरुध्यमानप्रवृत्तयः कञ्चित् कालमापेक्षिकतया स्थायि-रूपात्मभित्तिसंश्रयाः सन्तः स्थायिन इत्युच्यन्ते । तत्त्वज्ञानं तु सकलभावान्तर-भित्तिस्थानीयं सर्वस्थायिभ्यः स्थायितमं सर्वा रत्यादिकाः स्थायिचित्तवृत्तीः व्यभिचारीभावयत् निसर्गत एव सिद्धस्थायिभावमिति तन्न वचनीयम्'॥

तदेवं सच्चिदानन्दस्वरूप आत्मैव शान्तरसस्य स्थायी । तस्य च सर्वदा भावात् स्थायित्वे वचनं नापेक्ष्यते । रत्यादयस्तु केनचित्कारणेन उत्पन्नाः अन्येन केनचित्प्रलीनाः कञ्चित्कालं भित्तिस्थानीयमात्मानं समाश्रित्यैव स्थायितां प्रतिपद्यन्ते । परमार्थतः अयमेक एव स्थायी रत्यादयस्तु केवलं व्यभिचारिण इति स्वाशयं निवेद्य शृङ्गारादावपि अस्य प्रतिभानमभ्युपगच्छति । तदेतत् 'तदिदमात्मस्वरूपमेव तत्त्वज्ञानं शमः । कालुष्योपरागविशेषा एवात्मानो रत्यादयः' इति वाक्यस्य परिशीलनेनापि सुविशदं भवति ॥

इत्थं रसस्य चैतन्यरूपत्वं निवेद्य पर्यन्ते तदास्वादप्रकारं निरूपयति – तत्त्वास्वादोऽस्य कीदृशः? उच्यते, उपरागदायिभिः उत्साहरत्यादिभिः उपरक्तं यदात्मस्वरूपं तदेव विरलोम्भितरत्नान्तरालनिर्भासमानसिततरसूत्रवत् आभातस्वरूपं सकलेषु रत्यादिषु उपरञ्जकेषु तथाभावेनापि सकृत् विभातोऽयमात्मेति न्यायेन भासमानं परोन्मुखतात्मसकलदुःखजालहीनं परमानन्दलाभसंविदेकत्वेन काव्यप्रबन्धप्रयोगाभ्यां साधारणतया निर्भासमानम् अन्तर्मुखावस्थाभेदेन लोकोत्तरानन्दनयनं तथाविधहृदयं विधत्ते ॥

एतावता शुद्धं चैतन्यं शान्तो रसः । तदुपरागदायिनो रत्यादयः पुनः

शृङ्गारादय इति सुव्यक्तम् । तत्र पुनः विशेष्यविशेषणभावे कामचार इत्यभिप्रायेण 'रसो वै सः' इत्यादेः श्रुतेः सङ्गमने अभिनिवेशेन वा जगन्नाथेन यदुक्तं रत्याद्यवच्छिन्नं चैतन्यमेव रस इति – तद्युक्तियुक्तं समूलं चेति विभावनीयम् ।

वस्तुतस्तु [१५]शान्तो नाम शमस्थायिभावात्मको मोक्षप्रवर्तक इति महर्षिवाक्येऽपि शमशब्दार्थे पर्यालोचिते शमः शमनम् । तच्च रत्यादीनां दुर्बलीभवनम् । तदेवास्य स्थायीति विज्ञायते । तथा च चैतन्योपरञ्जकानां रत्यादीनां प्राबल्ये शृङ्गारादयो रसाः दौर्बल्ये तु शान्त इति निर्णयो युक्तः न तु अभिनवगुप्तोक्तदिशा शुद्ध आत्मा । ततश्च रत्यादिदौर्बल्यरूपशमविशिष्ट आत्मा शान्तरसस्य स्थायी आत्मविशिष्टः शमो वा इति वेदितव्यम् । एतेन शमं प्रति तत्त्वज्ञानस्य विभावत्वं यदुक्तं महर्षिणा तस्यापि सङ्गतिः इत्यस्माकं भाति । यदि पुनः शुद्ध आत्मेत्यनेन रत्यादिदौर्बल्यविशिष्ट आत्मा इत्येवार्थो विवक्षित इत्युच्यते तर्हि साध्वेवाभिहितम् अभिनवगुप्तेन ।

रसेषु शान्तः प्रकृतिः शृङ्गारादिश्च विकृतिः । प्रकृतिविकृतिभावश्च नात्र मृद्घटयोरिव उपादानोपादेयभावः, असम्भवात् किन्तु

स्वं स्वं निमित्तमासाद्य शान्ताद्भावः प्रवर्तते ।
पुनर्निमित्तापाये शान्त एवोपलीयते ॥

इत्युक्तदिशा अनुपरक्तत्वेनावस्थितं चित्तं प्रकृतिः सविकारत्वेन अर्थात् रत्याद्युपरक्तत्वेन अवस्थितं तु विकृतिरिति बोध्यम् । लोकेऽपि प्रसन्नं सरो वीक्ष्य 'इयमत्र प्रकृतिः' क्षुभितं च तदेव वीक्ष्य 'इयमत्र विकृतिः' पूर्वोक्तार्थ एवानयोः प्रयोगो दृश्यते ।

इह पुरुषस्य धर्मादयो ये चत्वारोऽर्थाः तेषु धर्मादित्रये विषयाभिमुख्यं सम्भवतीति तदा शृङ्गारादयो रसाः सम्भवन्ति । मोक्षे तु विषयवैमुख्यं सम्भवतीति तदा शान्तो रस इति विवेकः । एतेन शास्त्रदृष्टीनां यदा धर्मादयः त्रयः पुरुषार्थाः तदा काव्यदृष्टीनां शृङ्गारादयो रसाः । यदा तु शान्तः तदा तु मोक्ष इत्यभिहितं भवति । अन्यदिदम्, सर्वेषामपि रसानां पूर्वा उत्तरा चेति अवस्थाद्वयं वर्तते । तत्र पूर्वावस्थामात्रं काव्यस्य विषयः उत्तरावस्था तु

१५. ना.शा. ष.अ. शान्तरसनिरूपणम् ।

धर्मकामवेदान्तादेः तत्तच्छास्त्रस्येति विवेकः। एतेन काव्यं शास्त्रस्य उपकारकमेव न तु मारकमिति विज्ञायते।

तत्र रसेषु शृङ्गारादीनामनुभावबाहुल्यात् अभिनेयत्वमित्यभिप्रायेण 'अष्टौ नाट्ये रसाः स्मृता' इत्युक्तिः महर्षेः। शान्तस्य तद्विरल्यात् अनभिनेयत्वम्, सम्भवति वाभिनेयत्वे अङ्गत्वेनैव नाङ्गित्वेनेति नाट्ये नास्य परिगणनम्। श्रव्यकाव्ये तु शृङ्गारादौ दृष्टानामनुभावानाम् अभावेऽपि तद्विनाशस्यानुभावस्य वर्णनं सुशकमिति एतस्याङ्गित्वेनापि निबन्धनं विलोक्यते, यथा महाभारतादौ।

ननु नाट्येऽपि तादृशविनाशस्य अभिनेयत्वात् शान्तोऽपि नूनं प्रसज्यत इति चेत् – एवं तर्हि अष्टाविति पदमावेगादेः रसान्तरत्वव्युदासाय न पुनः प्रकृतिभूतरसस्य वारणायेति गृह्यताम्। तत्र पुनः विकृतिभूतरसेषु रत्यादेः स्थायित्वं पर्यवसानमभिव्याप्य वर्तमानत्वेन, प्रकृतिभूतस्य तु चित्तवृत्तिध्वंस–रूपशमस्थायिकत्वात् पर्यवसानमात्रगतत्वेनेति विशेषः। अत एव शमस्य भूयसि भागे अनभिव्यक्तावपि महाभारतस्य शान्तरसप्रधानत्वम्। पर्यवसाने तु भीष्मद्रोणादीनां निपतनम्, सैनिकानां विनाशेन तद्भार्याप्रभृतीनाम् आक्रन्दनम्, पाण्डवानां लब्धराज्यानामपि चिरमशासनम्, यादवानां कलहः, कृष्णेन बलरामेण च शरीरस्य त्यागः, भीमार्जुनयोः चोरेभ्यः पराजयः, यादवानां विनाशः, तथाविधं चान्यदिति अनिष्टानां परम्पराया अनुभवात् समेषामपि सचेतसां शम एव हृदयमधिरोहति येन सर्वेऽपि ते क्षणमजानन्तो विषयेभ्यः सर्वात्मना विमुखीभूता इव प्रतिभान्ति। किं बहुना? शमस्याश्रयत्वेन शृङ्गारादौ रत्यादेर्नायकादिरिव अत्र तदतिरिक्तः न कोऽप्यवशिष्यते।

ननु अभिज्ञानशाकुन्तलादौ अभिनीयमाने कुतोऽस्माकं साधारणत्वेन ज्ञाते शकुन्तलादौ प्रेयसीति बुद्धिः, कण्वस्य पुत्रीति विदूषकस्य सखीति प्रकारान्तरेणापि बुद्धेः सम्भवात् – उच्यते, दुष्यन्तादेरेव प्रधानत्वमिति तदानुगुण्येनैव चित्तवृत्तेरभिव्यञ्जनात्। अथ सहृदया व्यक्तिः स्त्री तर्हि प्रकृतिसाम्यात् शकुन्तलायाः प्राधान्यमिति तस्याः तदानुगुण्येनैव चित्तवृत्तेः अभिव्यञ्जनम्। ततश्च साधारणत्वेन ज्ञाते दुष्यन्तादौ प्रेयानित्येव तस्या बुद्धिः न प्रकारान्तरेण। न चाधर्मः, माध्यस्थ्येन ज्ञानात्, यथा – उद्यानं

किञ्चित् यदि यत्किञ्चित्व्यक्तिसम्बन्धित्वेन प्रतीयते तर्हि तत्र न कस्यापि विचारवतः प्रवेशः सम्भवति । अत एव सः तत्र क्रियायां परतन्त्रः । यदि च तदेव स्वसम्बन्धित्वेन प्रतीयते तर्हि तत्र प्रवेशः सम्भवति विहारादिकं च । अत एव तत्र स क्रियायां स्वतन्त्रः । अत एव स तत्र स्वेच्छया यत्किञ्चिदपि कर्म कर्तुं शक्नोति । अथ तदेवोद्यानं सर्वव्यक्तिसम्बन्धित्वेन प्रतीयते तर्हि तस्य स्वकीयत्वेन प्रतीतिर्वर्तते येन प्रवेशविहारादिकं सम्भवति । परकीयत्वेनापि प्रतीतिर्वर्तते, येन स्वेच्छया तत्र गृहादिकं निर्मातुं न शक्नोति । इयमेव साधारण्येन प्रतीतिर्नाम । शकुन्तलादेरपि एवं साधारण्येनैव प्रतीतिः । तथा प्रतीतौ सत्यां स दुष्यन्तमात्रसम्बन्धित्वेन न प्रतीयते । नापि स्वमात्रसम्बन्धि-प्रेयसीत्वेन । किन्तु सर्वोपगमनयोग्यस्त्रीत्वेनेति विवेकः,[१६]तदेतदुक्तम् –

परस्य न परस्येति ममेति न ममेति च ।
तदास्वादे विभावादेः परिच्छेदो न विद्यते ॥

तदिदं साधारण्यं भावनाबलेन यच्च प्रागेव विवृतम् । ततश्च परपुरुषे स्वकीयत्वेन ज्ञाते रतौ सत्यामधर्मः न माध्यस्थ्येनेत्युक्तं भवति । करुणादौ तु साधारण्येनैव ज्ञातात् मृतापत्यादेः शोकः अन्यथा सहृदयस्य ताटस्थ्यं आक्रन्दनादिकं वा स्यात् । तत्र सहृदयगतं स्त्रीत्वं पुरुषत्वं वा पूर्ववत् विशेषमाधातुं न शक्नोतीति विशेषः । एवं रौद्रादौ रसे स्त्रीप्रधाने पुरुषप्रधाने वा सहृदयानां स्त्रीणां पुरुषाणां वा स्त्रीत्वपुरुषत्वनिरपेक्षतयैव रसस्यास्वाद इति बोध्यम् ।

नन्वस्तु सर्वमेतत्, बीभत्सभयानकादौ कथं सहृदयानां प्रवृत्तिः, शवदाहादेः विभावस्य निवारणीयत्वेन निवृत्तेरेव उचितत्वात् – सत्यम्, प्रवृत्तिकाले जुगुप्सादिजनकत्वज्ञानस्य विरहात् सत्यपि वा तादृशज्ञाने 'इदं चमत्कार-जनकम्' इत्याप्तवाक्येनैव प्रवृत्तेः सम्भवात् । प्रवृत्त्युत्तरकाले तु विभावादेः साधारण्येनैव प्रतीतिरिति न समाप्तेः प्राक् निवृत्तिः । बालानां पुनः यदाक्रन्दनादिकम् तत्तु असहृदयत्वेन साधारण्याभावादित्यलं विस्तरेण ।

१६. सा.द. तृ.प. का–१२.

एवं रत्यादयोऽष्टौ स्थायिनः, निर्वेदादयः त्रयस्त्रिंशत् व्यभिचारिणः, स्तम्भादयश्चाष्टौ सात्विका इति भावा एकोनपञ्चाशत्, तदुक्तम् ऋषिणा – [१७]एकोनपञ्चाशदिमे भावाः ॥ शमस्य रत्यादिचित्तवृत्तिदुर्बलीभवनरूपत्वात् न पूर्वेभ्यो व्यतिरिक्तत्वम्। अत एव न तस्य पार्थक्येन परिगणनं कृतं महर्षिणा। देवादिविषयाया रतेरपि यथासम्भवं भयादावेवान्तर्भाव इति न पूर्ववदेव व्यतिरिक्तत्वम्, तथाहि – [१८]बालस्य मातपित्रादौ रतिः भये पर्यवस्यति। मातापित्रादेः पुत्रे रतिः दयावीरे। अनुजस्याग्रजे रतिः धर्मवीरे विपरीता पुनः दयावीर इत्यादिकं यथासम्भवं स्वयमेव ज्ञेयमिति तत्रभवान् अभिनवगुप्तः। वयं तु गुरुदेवादिविषयकरतेः यथासम्भवं दयावीरे धर्मवीरे चान्तर्भावात् न प्रार्थक्येन परिगणनमिति महर्षेराशयं सम्भावयामः।

दर्पणकारोऽत्र 'अथ मुनीन्द्रसम्मतो वत्सलः' इति प्रतिज्ञाय वात्सल्यस्थायिकं वत्सलं रसमभ्युपैति – तदसाधु, विकृतिरसाभिप्रायेण 'अष्टावेव रसा नाट्ये' इति स्वयं मुनीन्द्रेण कण्ठरवेणैवाभिधानात्। तद्वत्सलस्य मुनीन्द्रसम्मतत्वमिति यदस्ति तत्स्पष्टमेव मुनेराशयमविज्ञाय निबन्धनम्। अथ मुनिवचने तथा स्थितेऽपि तदनादृत्य वत्सलोऽयं व्यतिरिक्तरसत्वेन स्वीक्रियत इति वादः तर्हि आवेगादिमपि स्वीकृत्य तुष्यतु भवानित्येव वचनमस्माकम्। नहि विशृङ्खलमुखाः चर्चायां वक्तारो भवितुमर्हन्ति।

अपरे तु सकलस्यास्य संसारस्य उत्पादकः नियामकः नाशकश्च यः परमेश्वरो वर्तते तस्मिन् गाढा भक्तिरेव सर्वेषामपि जनानां धर्मः। स एव सर्वेभ्योऽपि रसेभ्यः नियमेन प्राधान्यमावहति। तस्मात् तादृशभक्तिस्थायिकः कश्चिद्रसः सर्वरसमूर्धन्यः अङ्गीकर्तव्यः यस्य चानङ्गीकारेण रसिकैः अत्यन्तमपराद्धमित्यभिप्रयन्ति – नूनमियं भ्रान्तिः, एतादृश्या गाढभक्तेः शान्ते एव पर्यवसानस्य तस्मिन् सर्वरसप्रकृतित्वस्य च निर्विवादमभ्युपगमात्, उक्तं ह्येतत् – विषयेष्वाभिमुख्ये सति धर्मादयः त्रयः पुरुषार्थाः, शृङ्गारादयश्च रसाः। अथ वैमुख्यं तर्हि मोक्षः पुरुषार्थः शान्तश्च रस इति ॥ नह्येषा गाढभक्तिः भेदनिबन्धना चित्तशुद्धये कल्पमाना मोक्षवलयात् दूरं याति

१७. ना.शा. स.अ. का–१०८. १८. अभि.भारती. ना.शा. ष.अ. शान्तरसनिरूपणम्।

किन्तु तस्मिन्नेव लयं याति । अथ पुनरगाढा तर्हि भावध्वनावेवान्तर्भाव इति काप्यसङ्गतिरिति दिक् ॥

तत्र प्रागुक्तरसन्यायेन निर्वेदादेः व्यङ्ग्यत्वे तत्तन्नामानो भावाः । यद्यपि भावस्य स्वात्मनि विश्रान्त्यभावात् रस एव पर्यवसानम् तथापि उद्भूततया प्रतीयमानत्वेन प्राधान्यं सुवचमिति स्वतन्त्रत्वेन व्यवहारः । एवं रसो भावश्चेति द्वावर्थौ । तयोः पुनरनौचित्येन प्रवृत्तौ रसाभासो भावाभासश्चेति प्रभेदान्तरद्वयम् । अनौचित्यं च लोकतः शास्त्रतश्च विज्ञेयम् । यद्यप्यनौचित्यं दोषः तथापि काव्ये इतिवृत्तवशायातानां सर्वेषामपि वृत्तान्तानां निरूपणीयत्वमेव इति नास्ति हेयत्वम् । तदेवं रस्यत्वसामान्येन चतुष्कस्य सङ्ग्रहः ।

* रसस्य रसादिनाष्टविधत्वमिति प्राचीनमतस्य निरूपणम्

प्राचीनास्तु विभावाद्यभिव्यक्तो रत्यादिः स्थायी रसः । तादृश एव च निर्वेदादिः भावः । अनौचित्येन प्रवृत्तौ रसाभासो भावाभासश्च । भावानां शान्तौ उदये सन्धौ व्यामिश्रणे च क्रमेण भावशान्तिः भावोदयः भावसन्धिः भावशबलत्वं चेति चत्वारः । तत्र भावस्य शान्तौ उदये च क्रमेण भावशान्तिः भावोदयश्च । सन्धिश्च समबलयो भावयोः समावेशः । व्यामिश्रणं पूर्वपूर्वभावस्य [१९]उपमर्दकतया [२०]उदासीनतया वा भावान्तरस्य उत्पत्तिः । न चैतत् चतुष्टयं रसस्यापि शक्यशङ्कम्, स्थायिप्रभवत्वात् । एतेषामष्टानां प्राधान्ये ध्वनित्वम् अप्राधान्ये तु अलङ्कारत्वम् । ध्वनित्वे सति तत्तच्छब्देनैव व्यपदेशः । अलङ्कारत्वे तु रसस्य रसवदिति, भावस्य प्रेय इति, रसाभासभावाभासयोः ऊर्जस्वीति,

१९. पूर्वपूर्वभावस्योपमर्दकतया भावान्तरस्योत्पत्तिः, यथा –
क्वाकार्यं शशलक्ष्मणः क्व च कुलं भूयोऽपि दृश्येत सा
दोषाणां प्रशमाय नः श्रुतमहो कोपेऽपि कान्तं मुखम् ।
किं वक्ष्यन्त्यपकल्मषाः कृतधियः स्वप्नेऽपि सा दुर्लभा
चेतः स्वास्थ्यमुपेहि कः खलु युवा धन्योऽधरं धास्यति ॥

२०. उदासीनतया भावान्तरस्योत्पत्तिः । इदं च जगन्नाथमतेन, यथा –
कश्चित्पश्येच्चल चपल रे! का त्वराहं कुमारी
हस्तालम्बं वितर हहहा व्युत्क्रमः क्वासि यासि ।
इत्थं पृथ्वीपरिवृढ! भवद्विद्विषोऽरण्यवृत्तेः
कन्या काचित् फलकिसलयान्याददानाभिधत्ते ॥ रस. प्र.आ. भावशान्त्यादिनिरूपणम् ।

भावशान्तेः समाहितमिति शब्दान्तरेणापि व्यपदेशः। शिष्टानां तु तत्तच्छब्देनैवेति विशेषः। तत्र रसवदित्यादिना मतुबर्थिकशब्देन व्यवहारस्तु गतानुगतिकन्यायेन, रसविशिष्टादेरलङ्कारत्वाभावात्। एवं रस्यत इति व्युत्पत्त्या रसाद्यष्टकं रसपदेन सङ्ग्राह्यमित्यामनन्ति।

* जगन्नाथकृतं तत्प्रत्याख्यानम्

जगन्नाथोऽत्र विवदते – [२१]भावशान्त्यादिध्वनीनां भावध्वनेः यद् व्यतिरेकेण परिगणनं कृतं प्राचीनैः – तन्न शोभनम्, भावध्वनौ हि यथा भावः स्थित्यवस्था चेति तथा भावशान्त्यादावपि भावः शान्त्याद्यवस्था चेति भागद्वयं स्पष्टम्। तत्र भावध्वनौ सत्यामपि स्थित्यवस्थायां भावस्यैव प्राधान्यमिति भावध्वनिरिति व्यवहारः। यदि पुनः स्थितेरेव प्राधान्यमित्यभिप्रेयते तर्हि तत्रैव भावस्थिति-ध्वनिरिति व्यवहारापत्तिः, प्राधान्येन व्यपदेशा भवन्तीति न्यायात्। एवं भावशान्त्यादावपि सत्यामपि शान्त्याद्यवस्थायां भावस्यैव प्राधान्यम् न शान्त्याद्यवस्थायाः, तुल्यन्यायात्। एवं सत्या अपि अवस्थाया अप्राधान्यमिति सिद्धौ निष्प्रतिबन्धो भावशान्त्यादीनां भावध्वनौ अन्तर्भावः।

ननु भावध्वनौ भावस्य स्थित्यवच्छिन्नतयैव उपलम्भात् नान्तरीयकत्वमिति सत्या अपि स्थितेः न प्राधान्यम्, भावशान्त्यादौ तु न तथेति वैषम्यस्य जागरूकत्वात् कथं पूर्वोक्तस्य सङ्गतिरिति चेत् – मैवम्, एवं हि यत्र भावस्य व्यङ्ग्यत्वेऽपि अवस्थाया वाच्यत्वम् तत्राभीप्सितस्य भावशान्त्यादिध्वनेः असिद्ध्यापत्तिः, यथा –

क्षमापणैकपदयोः पदयोः पतति प्रिये।
शेमुः सरोजनयनानयनारुणकान्तयः॥

अत्र रोषरूपभावस्य व्यङ्ग्यत्वेऽपि शेमुरिति शब्देन नाशावस्थायाः प्रतिपादनात् वाच्यत्वमिति भावशान्तिध्वनेः असिद्धिप्रसङ्गः। एवं यत्रावस्थाया व्यङ्ग्यत्वेऽपि भावस्य वाच्यत्वम् तत्रानभीप्सितस्य भावशान्त्यादिध्वनेः अङ्गीकारापत्तिः, यथा –

२१. रस. प्र.आ. भावशान्त्यादिनिरूपणम्।

निर्वासयन्ती धृतिमङ्गनानां शोभां हरेरेणदृशो धयन्त्याः ।
चिरापराधस्मृतिमांसलोऽपि रोषः क्षणप्राघुणिको बभूव ॥

अत्र रोषस्य वाच्यत्वेऽपि नाशावस्थायाः क्षणप्राघुणिकीभवनेन व्यङ्ग्यत्वमिति भावशान्तिध्वनेः अङ्गीकारापत्तिः । एवमुभयतो व्यभिचारात् भावशान्त्यादीनां न भावात् व्यतिरिक्तत्वम् । तस्मात् चत्वार एव भेदा नाष्टाविति ।

* रसे संलक्ष्यक्रमत्वस्य असंलक्ष्यक्रमत्वस्य च विचारः

अयं च रसोऽसंलक्ष्यक्रमत्वेन प्रतीयत इति ध्वनिकारः, [२२]यदुक्तम् –

रसभावतदाभासतत्प्रशान्त्यादिरक्रमः ।
ध्वनेरात्माङ्गिभावेन भासमानो व्यवस्थितः ॥

यत्र वाच्यव्यङ्ग्ययोः प्रतीतौ उत्पलपत्रशतव्यतिभेदवत् आशुभावित्वेन सतोऽपि क्रमस्य न स्फुटत्वेन प्रतीतिः तत्र व्यङ्ग्यस्यासंलक्ष्यक्रमत्वम्, यथा –

शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनै
र्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम् ।
विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता ॥

अत्र वाच्यवैशिष्ट्यसमुत्थितव्यञ्जनया रसस्य प्रतीतिः । वाच्ये वैशिष्ट्यं च विभावादिरूपत्वम् । तच्च वाच्यप्रतीतिकाल एव गृह्यते घटप्रतीतिकाले तद्गतजात्यादिरिव । एवं च तद्वैशिष्ट्यस्य आन्तरालिकत्वाभावात् न तेन व्यवधानमिति रसस्य स्पष्टमेवासंलक्ष्यक्रमत्वम् ।

यत्र तु व्यवधायकस्य सद्भावात् क्रमस्य स्फुटतया प्रतीतिः तत्र संलक्ष्यक्रमत्वम्, यथा –

[२३]अत्ता एत्थ णिमज्जइ एत्थ अहं दिअसअं पलोएहि ।
मा पहिअ! रत्तिअन्धिअ! सेज्जाए मह णिमज्जइसि ॥

---

२२. ध्वनि. द्वि.उ. का–३.
२३. श्वश्रूरत्र निमज्जति अत्राहं दिवसकं प्रलोकय ।
मा पथिक! रात्र्यन्धक! शय्यायां मम निमङ्क्ष्यसि ॥ छाया ।

अत्र वाच्यार्थस्य प्रतीतौ वक्तृवैशिष्ट्यस्य ज्ञाने सत्येव रात्रौ मम शय्यामगच्छेति व्यङ्ग्यस्य प्रतीतिः। तत्र वक्तृवैशिष्ट्यज्ञानस्य आन्तरालिकत्वेन व्यवधायकत्वमिति क्रमस्य तावत् स्फुटत्वम्। एवं निश्शेषच्युतचन्दनमित्यत्र बोद्धव्यवैशिष्ट्यादिज्ञानेन व्यवधायकत्वात् उअ णिच्चलणिप्पंदेत्यत्र अन्यसन्निधिवैशिष्ट्यात् क्रमस्य स्फुटत्वं बोध्यम्। एवमन्यत्रापि।

रसः क्वचित् संलक्ष्यक्रमत्वेनापि प्रतीयत इति लोचनकारादयः, यथा –

[२४]एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी।
लीलाकमलपत्राणि गणयामास पार्वती॥

अत्र 'एवं वादिनि' इत्यतो वाच्यार्थस्य ज्ञाने सत्यपि प्रकरणादिनैव तद्वादविशेषस्य ज्ञानं तत्पश्चादेव अवहित्थाख्यस्य भावस्य प्रतीतिरिति प्रकरणेन व्यवधायकत्वात् व्यङ्ग्यस्य संलक्ष्यक्रमत्वमिति तेषामाशयः।

वस्तुतस्तु चिन्त्यमेतत्, अत्र हि पद्यस्यास्य प्रबन्धगतत्वात् प्रकरणादेः सिद्धत्वमिति एवंवादिनि इति भागात् प्रथमं वाच्यस्य विशेषाकारेणैव प्रतीतिः ततश्च व्यङ्ग्यस्येति स्थितौ वाच्यव्यङ्ग्यप्रतीत्योः मध्ये व्यवधायकस्य विरहात् शून्यं वासगृहमित्यत्रेव क्रमस्य नास्ति स्फुटत्वम्। अस्ति पुनः प्रकरणम् तथापि तस्य वाच्यप्रतीतेः पूर्वभावित्वमेव न परभावित्वम्। न चात्र वाच्यव्यङ्ग्यप्रतीत्योः व्यवधायकस्य विरहेऽपि शब्दव्यङ्ग्यप्रतीत्योः तस्य सत्वात् क्रमस्य संलक्ष्यत्वमुपपन्नमिति वाच्यम्, व्यङ्ग्यव्यञ्जकप्रतीतिगते क्रमे निर्णेतव्ये बहिर्भूतं शब्दमादाय क्रमनिर्णयस्य अनुचितत्वात्। अन्यच्च, व्यङ्ग्यस्य एतदलक्ष्यक्रमत्वं न केवलं वाच्यवैशिष्ट्यस्थलमात्रे किन्तु वाक्यवैशिष्ट्यादिस्थलेऽपि, यथा – मुखं चन्द्र इति रूपके। अत्र हि भिन्नयोरर्थयोः प्रतिपादनाय समानविभक्त्यन्तशब्दयोः प्रयोग एव वाक्ये वैशिष्ट्यम्। तच्च वाच्यप्रतीतितो पूर्वमेव गृहीतमिति न तेन वाच्यात् व्यङ्ग्यप्रतीतौ व्यवधानम्। तस्मात् रसस्य संलक्ष्यक्रमत्वं तावत् अयुक्तम्। यदि पुनः प्रबन्धात् पृथक्कृत्य पठने प्रकरणस्य न पूर्वसिद्धत्वमिति पश्चात् ज्ञातेन तेन वाच्यसामान्यव्यङ्ग्यप्रतीत्योः व्यवधानं भवत्येवेति भाव्यते तदा

२४. कुमार. स–६. श्लो–८६.

पुनरस्तु नाम रसस्य संलक्ष्यक्रमव्यङ्ग्यत्वेनापि व्यवहारः।

एवं प्रकरणवक्तृवैशिष्ट्यादिना व्यवधानमिति यत्र वस्त्वादिव्यङ्ग्यस्य संलक्ष्यक्रमत्वमुच्यते तत्केवलं मुक्तकादिष्वेव, न तु प्रबन्धेषु, व्यवधायकत्वेन कल्प्यमानस्य पूर्वमेव सिद्धत्वात्। तस्मात् सर्वस्यापि व्यङ्ग्यस्य संलक्ष्यक्रमत्वमेतत् मुक्तकादिष्वेव न कथञ्चित् प्रबन्धेऽपि इत्यस्माकं प्रतिभाति। तद्रसस्य तावदयं विभागः –

- रसः
  - रसः
    - उचितः
      - प्रधानः
      - अप्रधानः
    - अनुचितः
      - प्रधानः
      - अप्रधानः
  - भावः
    - उचितः
      - प्रधानः
      - अप्रधानः
    - अनुचितः
      - प्रधानः
      - अप्रधानः

तत्र शृङ्गारो रसो यथा –

शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनै
र्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम्।
विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता॥

अत्र नायकनिष्ठाया रतेः नायिका आलम्बनविभावः नायिकानिष्ठायाः तु नायकः। शून्यवासगृहादिरनुभावः। सुचिरनिर्वर्णनादिः नायिकायामनुभावः नायके तु चुम्बनादिः। औत्सुक्यादिः व्यभिचारी। एतेषाम् बुद्धौ समावेशात् नायकस्य नायिकायां नायिकायाश्च नायके इत्युभयनिष्ठा रतिः व्यञ्जनया प्रतीयते। सर्वेषामेतेषां साधारणीभावे सति सहृदयस्य स्वचित्ते संस्काररूपेणावस्थितः साधारणीकृतनायिकादिवशात् समुद्रिक्तो रतिः स्थायी तन्मयीभवनवशात् स्वात्मानन्देन शबलितः शृङ्गारो रस इत्युच्यते। एवं रसान्तरस्य भावस्य चोदाहरणम् आकरेभ्यः स्वयं विज्ञेयम्।

❖❖❖

२. मध्यमकाव्यम्

प्राचीनास्तु व्यङ्ग्यस्य गुणीभूतत्वे मध्यमं काव्यमित्यामनन्ति, [१]यदाह ध्वनिकारः –

प्रकारोऽन्यो ध्वनिगुणीभूतव्यङ्ग्यः काव्यस्य दृश्यते ।
यत्र व्यङ्ग्यान्वये वाच्यचारुत्वं स्यात्प्रकर्षवत् ॥

सत्यपि व्यङ्ग्ये यत्र वाच्यस्यैव चमत्कारिता तत्र मध्यममिति काव्यस्य द्वितीयः प्रभेदः यस्य गुणीभूतव्यङ्ग्यमिति नामान्तरमित्यर्थः। एवं च व्यङ्ग्यस्य प्राधान्ये ध्वनिः अप्राधान्ये तु मध्यमं काव्यमिति तदाशयः सिध्यति। मम्मटोऽपि अस्यैव पन्थानमनुवर्तते, यथा –

[२]अतादृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम् ।

व्यङ्ग्ये वाच्यादतिशायिनि ध्वनिः अनतिशायिनि पुनः मध्यममिति अस्यार्थः। अतिशयितत्वं च चमत्कारित्वेन । दर्पणकारस्यापि नास्त्यत्र विप्रतिपत्तिः, तदाचष्टे –

[३]अपरं तु गुणीभूतव्यङ्ग्यं वाच्यदनुत्तमे व्यङ्ग्ये।

अनुत्तमत्वमप्रकर्षे साम्ये च सति सम्भवति । जगन्नाथस्तु प्राधान्य-चमत्कारित्वयोः भेदमेव मन्वानः प्रभेदस्यास्य इदं लक्षणमभिधत्ते –

[४]यत्र व्यङ्ग्यमप्रधानमेव सच्चमत्कारकारणं तद् द्वितीयम् ॥

चमत्कारिणो व्यङ्ग्यस्य प्राधान्ये प्रथमः प्रभेदः अप्राधान्ये तु द्वितीय इति भावः। यद्यपि काव्यप्रपञ्चे चमत्कारिव्यङ्ग्यस्यैव परिग्रहात् सर्वेषामपि लक्षणानां समानत्वम्, यथा – चमत्कारिव्यङ्ग्यस्य अप्राधान्ये गुणीभूतव्यङ्ग्यम् इति तथाप्यनेन प्राधान्यचमत्कारित्वयोः भेदस्याभ्युपगमात् पूर्वेभ्यो लक्षणे अस्मिन् वैषम्यं तावत् स्फुटमेव सिध्यति ।

वस्तुतस्तु प्राचीनानां मतं न क्षोदक्षमम्, यत्तावदुच्यते, व्यङ्ग्यस्याप्राधान्ये मध्यमं काव्यमिति – तन्न, वस्त्वलङ्कारयोः हि रसे पर्यवसायित्वात्

१. ध्वनि. तृ. उ. का–४०.
२. का. प्र. प्र.उ. का–४.
३. सा. द. च.प. का–१३.
४. रस. प्र.आ. काव्यप्रभेदनिरूपणम् ।

तयोरप्राधान्यम् रसस्य प्राधान्यमिति निर्विवादम् । स्थिते चैवम्, केवलं वाच्यार्थात् अप्राधान्यमित्येतावन्मात्रं मनसि निधाय सर्वेषामविशेषेण द्वितीयप्रभेदत्वेन परिगणनं कथं तावदुचितं भवति? नहि भृत्यस्य विवाहेऽप्रधानाविति इति नृपः सचिवश्च समानत्वेन परिगणयितुं शक्येते । स्यान्नाम वाच्यस्य प्राधान्यम् तावता वस्त्वलङ्कारयोः रसस्य चाविशेषेण परिगणनं सर्वथा न युज्यते । वस्त्वलङ्कारयोः तारतम्ये सत्यपि अस्माभिः पुनः रसपर्यवसायित्वसाधारण्यमात्रात् अविशेषेण परिगणनमिति तु प्रागेवाभिहितम् । एवं चेदं मध्यमकाव्यस्य लक्षणम् –

वस्त्वलङ्कारव्यञ्जकौ शब्दार्थौ मध्यमं काव्यम् ॥

अनयोश्चार्थयोः क्वचित् प्राधान्यम् क्वचिच्चाप्राधान्यमिति द्वयी गतिरिति पूर्ववत् ।

प्राचीनाः तावत् अत्राष्टौ प्रभेदान् अभ्युपयन्ति, यथा –


[5]अगूढमपरस्याङ्गं वाच्यसिद्ध्यङ्गव्यङ्ग्यमस्फुटम् ।
सन्दिग्धतुल्यप्राधान्ये काक्वाक्षिप्तमसुन्दरम् ॥
व्यङ्ग्यमेवं गुणीभूतव्यङ्ग्यस्याष्टौ भिदाः स्मृताः ।

एतत्तु तदुक्तलक्षणानुगुण्येन सङ्गतमपि अस्मदुक्तलक्षणानुगुण्याभावात् नास्माकमुपादेयम्, वस्त्वलङ्कारयोः प्राधान्येऽपि मध्यमत्वस्यैव स्वीकारात्।

तत्र शब्दानां व्यञ्जकत्वं परिवृत्त्यसहत्वरूपायां शक्तौ सत्यां प्रकृताप्रकृतार्थप्रतिपादकत्वेन । अर्थानां तु तस्यामेव सत्यां विशिष्टवक्तृ-प्रतिपादितत्वादिना । एवं वस्तुरूपोऽलङ्काररूपश्च व्यङ्ग्यः प्रत्येकमपि शब्दशक्त्युद्भवत्वेन अर्थशक्त्युद्भवत्वेन उभयशक्त्युद्भवत्वेन च प्रथमं त्रिविधः। तेषु द्वितीये सम्भव्यर्थसमुद्भवत्वेन कल्पितार्थसमुद्भवत्वेन च द्वौ प्रभेदौ । ततः तत्र प्रत्येकं प्रभेदोऽपि वस्तुप्रत्येयत्वेन अलङ्कारप्रत्येयत्वेन च पुनर्द्विविधः । इत्थं द्वादश प्रभेदाः ।

सर्वेषामेतेषां प्रधानाप्रधानत्वाभ्यां पुनः द्वैविध्यमिति चतुर्विंशतिः प्रभेदाः ।

५. का.प्र. पं.उ. का–४५.



मध्यमे काव्ये यो रसातिरिक्तो व्यङ्ग्यो वर्तते स प्रथमं वस्त्वलङ्कारत्वाभ्यां द्विविधः। ततः तयोः शब्दशक्त्युद्भवत्वेन अर्थशक्त्युद्भवत्वेन उभयशक्त्युद्भवत्वेन त्रैविध्यम् । मध्यमस्तु सम्भव्यर्थसमुद्भवत्वेन कल्पितार्थसमुद्भवत्वेन च द्विविधः, पुनश्च प्रत्येकं वस्तुव्यङ्ग्यत्वेन अलङ्कारुव्यङ्ग्यत्वेन द्वेधा। अन्त्यः पुनरेकविध एव गण्यते। एवं द्वादश भेदाः।

प्राचीनास्तु ध्वनिमभिधामूलो लक्षणामूलश्चेति द्वेधा विभज्य द्वितीये प्रभेदे अर्थान्तरसङ्क्रमितवाच्यः अत्यन्ततिरस्कृतवाच्यश्चेति प्रभेदद्वयम् उररीकुरन्ति – तन्न युक्तम्, लक्षणाया एव निराकरणात् । अथवास्तु तदङ्गीकारः तथापि निरूढाया अभिधायमानत्वेन तदप्रवृत्तेः झटित्येव ज्ञाने विवक्षितार्थस्य प्रयोजनवल्लक्षणया प्रतीतौ प्रयोजनं सूर्यवत् स्फुटमिति कथं ध्वनिपदवीम् अधिरोहति? तल्लक्षणामूलध्वनिरित्येतत् नभोलतायते । तत्र शब्दशक्त्युद्भवो वस्तुरूपो यथा –

शनिरशनिश्च तमुच्चैर्निहन्ति यस्मै कुप्यसि नरेन्द्र! त्वम् ।
यत्र प्रसीदसि पुनः स भात्युदारोऽनुदारश्च ॥

अत्र 'विरुद्धौ द्वौ त्वदनुवर्तनार्थम् एकं कार्यं कुरुतः' इति व्यङ्ग्यम् । शन्यशनिशब्दयोः परिवृत्त्यसहत्वात् अशनिशब्दबोधितयोरर्थयोः प्रकृताप्रकृतभावस्य च सत्त्वात् शब्दशक्त्युद्भवत्वम् अनलङ्काररूपत्वाच्च वस्तुरूपत्वम् । न चात्र परिवृत्त्यसहत्वमात्रं शब्दशक्त्युद्भवध्वनौ पर्याप्तमिति वाच्यम्, 'सर्वदो माधवः पायात्स योऽगङ्गामदीधरत्' इत्यादौ द्वयोः प्रकृतत्वेऽपि सादृश्यस्य व्यङ्ग्यत्वप्रसङ्गात् । स एवालङ्काररूपो यथा –

असावुदयमारूढः कान्तिमान् रक्तमण्डलः ।
राजा हरति लोकस्य हृदयं मृदुलैः करैः ॥

अत्र 'राजा राजेव' इत्युपमालङ्कारो व्यङ्ग्यः । राजकरमण्डलादीनां शब्दानां परिवृत्त्यसहत्वात् तद्बोधितार्थयोः प्रकृताप्रकृतभावस्य च सत्त्वात् तस्य शब्दशक्त्युद्भवत्वम् । [६]'राजा राजैव' इति रूपकं व्यङ्ग्यमिति जगन्नाथः । तयोः सन्देहसङ्कर इति स्वाभिप्रायः ।

अर्थशक्त्युद्भवो वस्तुरूपः सम्भव्यर्थसमुद्भवो वस्तुप्रत्ययो यथा –

[७]अइपिहुलं जलकुंभं घेत्तूण समागदम्हि सहि! तुरिअम् ।
समसेअसलिलणीसासणीसहा वीसमामि खणम् ॥

अत्र चौर्यरतगोपनं व्यङ्ग्यम् । अर्थस्य परिवृत्त्यसहत्वात् विशिष्टवक्तृप्रतिपादितत्वाच्च तस्यार्थशक्त्युद्भवत्वम्, अनलङ्काररूपत्वाच्च वस्तुरूपत्वम् । एवं व्यञ्जकार्थस्य लोके सम्भवात् तस्य सम्भव्यर्थसमुद्भवत्वम् अनलङ्कारत्वाच्च वस्तुप्रत्ययत्वम् । स एवालङ्कारप्रत्ययो यथा –

६. रस. द्वि.आ. शब्दशक्त्युद्भवध्वनिनिरूपणम् ।
७. अतिपृथुलं जलकुम्भं गृहीत्वा समागतास्मि सखि! त्वरितम् ।
श्रमस्वेदसलिलनिःश्वासनिस्सहा विश्राम्यामि क्षणम् ॥ [छाया]

आपतन्तममुं दूरादूरीकृतपराक्रमः ।
बलोऽवलोकयामास मातङ्गमिव केसरी ॥

अत्र बलरामोऽचिरादेव वेणुदरिणो नाशं करिष्यतीति व्यङ्ग्यम् । अर्थस्य परिवृत्त्यसहत्वात् वाच्यवैशिष्ट्यस्य सत्त्वाच्च तस्यार्थशक्त्युद्भवत्वम् । व्यञ्जकार्थस्य केसरिणो मातङ्गस्य दर्शनमित्यस्य लोके सम्भवात् सम्भव्यर्थसमुद्भवत्वम् उपमारूपत्वाच्च तस्यालङ्कारप्रत्येयत्वम् । स एव कल्पितार्थसमुद्भवो वस्तुप्रत्येयो यथा –

[८]सज्जेइ सुरहिमासो ण दाव अप्पेइ जुअइजणलक्खसहे ।
अहिणवसहआरमुहे णवपत्तले अणङ्गस्स सरे ॥

अत्र मदनविजृम्भणं वस्तु व्यङ्ग्यम् । वाच्यवैशिष्ट्यात्तस्य प्रतीतिः । वसन्तः शरकारः, कामो धन्वी, युवतयो लक्ष्यमित्यादिरूपस्य व्यञ्जकार्थस्य कल्पितत्वात् कल्पितार्थसमुद्भवत्वम् । शिष्टं स्पष्टम् । स एवालङ्कारप्रत्येयो यथा –

दशाननकिरीटेभ्यो तत्क्षणं राक्षसश्रियः ।
मणिव्याजेन पर्यस्ताः पृथिव्यामश्रुबिन्दवः ॥

अत्र 'अचिरादेव लङ्कासाम्राज्यलक्ष्मीः विनङ्क्ष्यति' इति वस्तु व्यङ्ग्यम् । अत्रापि पूर्ववत् वाच्यवैशिष्ट्यादेव व्यङ्ग्यस्य प्रतीतिः । राक्षसराजलक्ष्म्या अश्रुबिन्दूनां मणिव्याजेन पतनमिति व्यञ्जकार्थस्य कल्पितत्वात् तस्य कल्पितार्थसमुद्भवत्वम् [९]अपह्नुतिरूपत्वाच्च अलङ्कारप्रत्येयत्वम् । अन्यत्सर्वं स्पष्टम् । स एवालङ्काररूपः सम्भव्यर्थसमुद्भवो वस्तुप्रत्येयो यथा –

दिशि मन्दायते तेजो दक्षिणस्यां रवेरपि ।
तस्यामेव रघोः पाण्ड्याः प्रतापं न विषेहिरे ॥

अत्र 'रवेः प्रतापात् रघोः प्रतापोऽधिकः' इति 'प्रतापेन रघोः रवेरधिकः' इति वा [१०]व्यतिरेको व्यङ्ग्यः । दक्षिणस्यां दिशि अयने रविप्रतापस्य मन्दायमानत्वमिति व्यञ्जकार्थस्य वास्तविकत्वात् तस्य सम्भव्यर्थसमुद्भवत्वम् अनलङ्काररूपत्वाच्च वस्तुप्रत्येयत्वम् । स एवालङ्कारप्रत्येयो यथा –

---

८. सज्जयति सुरभिमासो न चार्पयति युवतिजनलक्ष्यसहान् ।
अभिनवसहकारमुखान् नवपत्रलाननङ्गस्य शरान् ॥ छाया ।

९. कैतवापह्नुतिर्व्यक्तैः व्याजाद्यैः निह्नुतेः पदैः इति कैतवापह्नुतेः लक्षणम् । कुव. अपह्नुतिप्रकरणम् ।

१०. व्यतिरेको विशेषश्चेदुपमानोपमेययोः । कुव. व्यतिरेकप्रकरणम् ।

गाढकान्तदशनक्षतव्यथासङ्कटादरिवधूजनस्य यः ।
ओष्टविद्रुमदलान्यमोचयन्निर्दशन् युधि रुषा निजाधरम् ॥

अत्र 'अधरो निर्दष्टः शत्रवश्च व्यापादिताः' इति [११]समुच्चयो व्यङ्ग्यः । अन्येषां दशनव्यथाया दूरीकरणाय स्वाधरस्यैव दंशनमिति व्यञ्जकार्थस्य वास्तविकत्वात् सम्भव्यर्थसमुद्भवत्वम् [१२]विरोधात्मकत्वाच्च अलङ्कारप्रत्येयत्वम् । स एव कल्पितार्थसमुद्भवो वस्तुप्रत्येयो यथा –

सुभगे! कोटिसंख्यत्वमुपेत्य मदनाशुगैः ।
वसन्ते पञ्चता त्यक्ता पञ्चतासीद्वियोगिनाम् ॥

अत्र 'बाणानां पञ्चता शरान् विमुच्य वियोगिजनान् श्रितेव' [१३]इत्युत्प्रेक्षा व्यङ्ग्या । मदनाशुगानां कोटिसंख्यत्वप्राप्त्या निखिलवियोगिमारणस्य व्यञ्जकस्य कल्पितत्वात् अस्य कल्पितार्थसमुद्भवत्वम् । शिष्टं स्पष्टम् । स एवालङ्कारप्रत्येयो यथा –

[१४]महिलासहस्सभरिए तुह हिअए सुहअ! सा अमाअन्ती ।
अणुदिणमणण्णकम्मा अङ्गं तणुअं पि तणूएइ ॥

अत्र 'तनोः तनूकरणेऽपि तव हृदये सा न वर्तते' इति [१५]विशेषोक्तिः व्यङ्ग्या । अमाअन्तीति व्यञ्जकस्य काव्यलिङ्गत्वात् तस्या अलङ्कारप्रत्येयत्वम् । शेषं पूर्ववत् ।

[१६]प्राचीनास्तु कविकल्पितादर्थात् कविनिबद्धवक्तृकल्पितमर्थं व्यतिरेकेण परिगणय्य तत्र चतुरः प्रभेदान् ऊरीकुर्वन्ति – तदसाधु, कल्पितत्वेन समानत्वात् निबद्धनिबद्धादीनामपि कल्पनापत्त्या आनन्त्यप्रसङ्गाच्च । न रसभावाविष्टत्वं व्यतिरेके प्रयोजकम्, कवेरपि तत्सत्त्वात्, तदुक्तम् – 'यावत्पूर्णो न चैतेन तावन्नैव वमत्यमुम्' ॥

उभयशक्त्युद्भवो वस्तुरूपो यथा –

पन्थिअ! ण एत्थ सत्थरमत्थि मणं पत्थरत्थले गामे ।
उण्णअं पओहरं पेक्खिऊण जइ वससि ता वससु ॥

अत्र 'यद्युपभोगक्षमोऽसि तर्हि आस्व' इति वस्तु व्यङ्ग्यम् । अत्र

११. बहूनां युगपद्भावभाजां गुम्फः समुच्चयः । कुव. समुच्चयप्रकरणम् ।
१२. आभासत्वे विरोधस्य विरोधाभास इष्यते । कुव. विरोधाभासप्रकरणम् ।
१३. सम्भावनं स्यादुत्प्रेक्षा वस्तुहेतुफलात्मना । कुव. उत्प्रेक्षाप्रकरणम् ।
१४. महिलासहस्रभरिते तव हृदये सुभग! सा अमान्ती ।
अनुदिनमनन्यकर्मा अङ्गं तन्वपि तनूकरोति ॥ [छाया]
१५. कार्याजनिर्विशेषोक्तिः सति पुष्कलकारणे । कुव. विशेषोक्तिप्रकरणम् ।
१६. काव्यप्रकाशकारादयः ।

सत्थरपओहरादिशब्दानां परवृित्त्यसहत्वात् तद्बोधितयोरर्थयोः प्रकृताप्रकृतभावस्य च सत्त्वात् शब्दशक्त्युद्भवत्वम् । अर्थस्य परिवृत्त्यसहत्वात् विशिष्टवक्तृ-प्रतिपादितत्वाच्च अर्थशक्त्युद्भवत्वम् । व्यङ्ग्यभेदाभावात् अस्य उभयशक्त्युद्भवत्वेन व्यवहारः । स एवालङ्काररूपो यथा –

भुक्तिमुक्तिकृदेकान्तसमादेशनतत्परः ।
कस्य नानन्दनिस्यन्दं विदधाति सदागमः ॥

अत्र सज्जनस्य भवत आगमनं सच्छास्त्रमिवेति प्रच्छन्नकामुकं प्रति व्यङ्ग्यम् । तस्य सदागमादिशब्दानां परिवृत्त्यसहत्वात् तद्बोधितार्थयोः प्रकृताप्रकृतभावस्य च सत्त्वात् यथा शब्दशक्त्युद्भवत्वं तथार्थस्य परिवृत्त्यसहत्वात् विशिष्टवक्तृप्रतिपादितत्वात् अर्थशक्त्युद्भवत्वमपि । न चात्र गोप्यताभङ्ग इति वाच्यम्, कामुकं प्रति व्यञ्जितार्थे तत्प्रसक्त्यभावात् । यत्पुनः प्राचीनैः –

१७ अतन्द्रचन्द्राभरणा समुद्दीपितमन्मथा ।
तारकतरला श्यामा सानन्दं न करोति किम् ॥

इत्यादिषु, जगन्नाथेन च

१८ रम्यहासा रसोल्लासा रसिकालिनिषेविता ।
सर्वाङ्गशोभासम्भारा पद्मिनी कस्य न प्रिया ॥

इत्यादिषु उभयशक्त्युद्भवत्वं स्वीक्रियते – तन्मन्दम्, एवं हि शब्दशक्त्युद्भवध्वनेः निर्विषयत्वापत्तिः । न च तस्य पूर्वं विषयो दर्शित इति वाच्यम्, तत्रापि उभय-शक्त्युद्भवत्वस्य सुवचत्वात् । किञ्च वक्त्रादिवैशिष्ट्ये सति आर्थव्यञ्जनायाः समुन्मेष इति भवन्तोऽपि व्याहरन्ति । तच्चेह सर्वथा न दृश्यत इति कथमर्थशक्त्यापि समुद्भूतत्वं व्यङ्ग्यस्य? तस्मादस्मदुक्तरीत्यैव उदाहरणं निर्णेयमिति दिक् ।

अधमकाव्यस्य काव्यसामन्यलक्षणमेव लक्षणम् । तच्च कल्पितोऽर्थः तत्प्रतिपादको व्यञ्जकत्वादिविशिष्टश्च शब्द इति पूर्वमेवाभिहितमिति नात्र पुनः विचार्यते ॥

सत्यभामावेङ्कटसुब्रह्मण्यभट्टयोस्सुतस्य लक्ष्मीनारायणभट्टस्य कृतौ
साहित्यवल्लर्यां काव्यप्रभेदनिरूपणो नाम
षष्ठः स्तबकः ॥

१८.का.प्र. च.उ. उभयशक्त्युद्भवध्वनिप्रकरणम् । १९. रस, द्वि.आ. उभयशक्त्युद्भवध्वनिप्रकरणम्।

।।श्रीरस्तु।।

सप्तमः स्तबकः

दोषनिरूपणम्

रदनकिरणजालाच्छ्वेतयन्ती त्रिलोकीं
धवलकुसुममालां धारयन्ती सुगात्री ।
शशिकरसितवस्त्रा वीणया संवदन्ती
सरसिजवदना सा शारदा भातु चित्ते ॥

काव्यं ग्राह्यमलङ्कारात् । अलङ्कारोऽलङ्कृतिः । सा च सौन्दर्यम् । तत्पुनः दोषगुणहानोपादानाभ्याम् । तत्र गुणपदेन गुणालङ्काररीतीनां ग्रहणम् । तासु गुणा माधुर्यादयो रसस्योत्कर्षकाः । यथा शौर्यादय आत्मानमुत्कर्षयन्ति तथेमे रसम् । अलङ्काराः शब्दार्थयोः । रीतयः सजातीयानां वर्णानां समूहा वाक्यस्य उत्कर्षका धर्माः । ताभिः वाक्यस्य रसव्यञ्जकत्वम् । वर्णेषु सजातीयत्वं च कोमलत्वादिना । ततश्च शरीरस्थानीयस्यार्थस्य विभावादिरूपत्वे यथा रसाभिव्यञ्जकत्वं तथा तादृशस्यैव शब्दस्य रीतिघटितत्वे ।

* दोषाणां लक्षणम्

गुणप्रतिद्वन्द्विनो दोषाः । तेषां च लक्षणमिदमुक्तं प्रकाशकारेण –

[1]मुख्यार्थहतिर्दोषो रसश्च मुख्यस्तदाश्रयाद्वाच्यः ।
उभयोपयोगिनः स्युः शब्दाद्यास्तेन तेष्वपि सः ॥

अयमर्थः – हन्यतेऽनयेति हतिरित्यपकर्षको धर्मः । मुख्यार्थश्च रस इति रसापकर्षका धर्मा इति दोषाणां सामान्यलक्षणम् । तत्र रसो व्यञ्जकतया अर्थमाश्रयति । स च रसश्च क्रमेण वाचकतया व्यञ्जकतया च शब्दम् । एवं

१. का.प्र. स.उ. का–४९.

शब्दार्थयोरपि रससम्बन्धित्वात् तद्गतदोषाणामपि रसापकर्षकत्वं सम्भवति॥ दर्पणकारः पुनरिदं लक्षणमाह –

[२]रसापकर्षका दोषाः ॥

तत्र दुःश्रवत्वादयो दोषाः काणत्वखञ्जत्वादय इव प्रथमं स्वाश्रयं शरीरमिव शब्दार्थयुगलं दूषयन्ति तत आत्मानमिव रसमिति तदाशयः ।

वस्तुतस्तु नेदं लक्षणद्वयमपि युक्तं भवितुमर्हति, यत्र रसो नास्ति तादृशेऽधमकाव्ये वर्तमानानां दोषाणामसङ्ग्रहात् । न चाधममिति काव्यप्रकारो नास्तीति शक्यं वदितुम्, मुखं चन्द्र इव सुन्दरम्, [३]नवपलाशपलाशवनमित्यादौ च प्रतिभाव्ययस्य स्फुटं प्रत्ययात् । यत्र हि प्रतिभाव्ययः तत्रावश्यं केनचित् काव्यप्रकारेण भवितव्यम् । किञ्च [४]मित्रे क्वापि गते इति पद्ये बिसलतायाम् अर्गलोपमा वाच्यमेवोपकरोति न तु सन्तमपि विप्रलम्भरसाभासमिति स्वयं प्रकाशकारेणाभिधानात् रसोपस्कारकत्वमलङ्काराणां नियतं नैवेति विज्ञायते। एतेन गुणपदग्राह्यस्य कस्यचिदुपस्कारकत्वादिना रसेनासम्बन्धेऽपि यदि तत्त्वम् तर्हि तत्प्रतिद्वन्द्विभूतस्य दोषस्यापि तथैव स्वीकारो युक्तियुक्तः । किञ्च 'भाति पद्मः सरोवरे' 'धीरो वरो नरो याति' 'गता निशा इमा बाले' इत्यादिषु येऽप्रयुक्तत्व-आहतविसर्गत्वादयो दोषाः कथं तैः रसस्यापकर्ष उपपाद्यते? अन्यच्चेदम्, गुणपदग्राह्याणां गुणालङ्काररीतीनां प्रतिद्वन्द्विभूता ये दोषाः तेषां लक्षणमत्र कर्तव्यम् । रसापकर्षकत्वमिति प्रकृतस्य लक्षणस्य परिशीलनेन तु केवलं माधुर्यादिप्रतिद्वन्द्विभूतानामेव दोषाणां सङ्ग्रहो भविष्यति न तु रीत्यलङ्काररसम्बन्धिनामपि । तस्माल्लक्षणमिदं परिष्कारमर्हति । तच्चैवं भवितुमर्हति –

---

२. सा.द. स.प. का–१.


३. नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपङ्कजम् ।
मृदुलतान्तलतान्तमलोकयत्स सुरभिं सुरभिं सुमनोभरैः ॥ माघ. स–६. श्लो–२.

४. मित्रे क्वापि गते सरोरुहवने बद्धानने ताम्यति
क्रन्दत्सु भ्रमरेषु वीक्ष्य दयितासन्नं पुरः सारसम् ।
चक्राह्वेन वियोगिना बिसलता नास्वादिता नोज्झिता
कण्ठे केवलमर्गलेव निहिता जीवस्य निर्गच्छतः ॥ उल्लेखः, का.प्र. अ.उ. का–६७.

काव्यापकर्षका धर्मा दोषाः ॥

काव्यं च प्रागुक्तदिशा शब्दार्थाविति तद्गतदोषाणामिव तत्प्रभेदयोः मध्यमोत्तमयोः रसस्य सत्त्वात् तद्गतानामपि दोषाणां सङ्ग्रहो भविष्यति ।

एते च दोषाः यदि शब्दे सम्भवन्ति तर्हि शब्दगताः कथ्यन्ते । यद्यर्थे तर्हि अर्थगताः । अथ रसे तर्हि रसगता इति प्राधान्येन त्रिविधाः । तत्र शब्दगता दोषाः क्वचित् पदे सम्भवन्ति क्वचित् तदंशे क्वचिच्च तत्समूहरूपे वाक्ये । वाक्यगता अपि दोषाः पदसाधारणा वाक्यमात्रगताश्चेति द्विविधाः । पदसाधारणाः ते भवन्ति ये वाक्ये तद्भिन्ने पदादावपि सम्भवन्ति । वाक्यमात्रगताः पुनः ते ये वाक्य एव सम्भवन्ति नान्यत्र । तदिदं स्फुटप्रतिपत्त्यर्थमित्थं निदर्श्यते –



क्रमेणैतेषां निरूपणं क्रियते –

१. पदगता दोषाः –

पदं च सुप्तिङन्तम् । तत्र स्थिता दोषाः पदगताः । ते च प्रकाशकारेण एतावन्तो निगदिताः –

[5]दुष्टं पदं श्रुतिकटु च्युतसंस्कृत्यप्रयुक्तमसमर्थम् ।
निहतार्थमनुचितार्थं निरर्थकमवाचकं त्रिधाश्लीलम् ॥
सन्दिग्धमप्रतीतं ग्राम्यं नेयार्थमथ भवेत्क्लिष्टम् ।
अविमृष्टविधेयांशं विरुद्धमतिकृत्समासगतमेव ॥

५. का.प्र. स.उ. का–५०,५१.

एतेषु दोषेषु च्युतसंस्कृतिः असमर्थत्वं निरर्थकत्वं चेति त्रयो दोषाः पदमात्रे सम्भवन्ति अन्ये तु वाक्येऽपि । केचित् पुनः पदांशेऽपि । अन्तिमं त्रयं तु समास एवेति तदाशयः । दर्पणकारस्यापि प्रायेणायमेवाशयः । स्पष्टप्रतिपत्तये तदुभयग्रन्थस्थान्येवोदाहरणानि निर्दिश्य निरूपणं क्रियते –

१. श्रुतिकटुत्वम् – परुषवर्णघटितत्वेन श्रोत्रदुःखजनकत्वम्, यथा –

आलिङ्गितः स तन्वङ्ग्या कार्तार्थ्यं लभते कदा ।

अत्र कार्तार्थ्यमिति परुषा वर्णाः शृङ्गारे प्रतिपाद्ये श्रोत्रयोः दुःखं जनयन्ति ।

२. च्युतसंस्कृतिः – व्याकरणलक्षणहीनत्वम्, यथा –

तत्पल्लीपतिपुत्रि! कुञ्जरकुलं कुम्भाभयाभ्यर्थना–
दीनं त्वामनुनाथते कुचयुगं पत्रावृतं मा कृथाः ॥

अत्र [६]'आशिषि नाथ' इति आशिष्येव नाथतेरात्मनेपदं विहितम् इह तु तल्लङ्घितम् ।

३. अप्रयुक्तत्वम् – आम्नातमपि कविभिरनादृतत्वम्, यथा –

भाति पद्मः सरोवरे ।

अत्र [७]पद्म इति शब्दः पुंसि कोशकारैः आम्नातोऽपि कविभिर्नाद्रियते ।

४. असमर्थत्वम् – शब्दस्य शक्त्यभावात् विवक्षितार्थप्रतिपादनासामर्थ्यम्, यथा –

कुञ्जं हन्ति कृशोदरी ।

अत्र हन्तिः गमनार्थे पठितोऽपि न तदर्थप्रतिपादने समर्थः ।

५. निहतार्थत्वम् – नानार्थकस्य शब्दस्य अप्रसिद्धार्थे प्रयोगः, यथा –

यमुनाशम्बरमम्बरं व्यतानीत् ।

अत्र [८]दैत्यविशेषे प्रसिद्धस्य शम्बरशब्दस्य जलरूपार्थे प्रयोगः ।

६. अनुचितार्थत्वम् –अनभिमतार्थव्यञ्जकत्वम्, यथा –

शूरा अमरतां यान्ति पशुभूता रणाध्वरे ।

अत्र पशुरिति पदं शूरेषु कातर्यमभिव्यनक्ति ।

---

६. का.वा. अष्ट. १.३.२१.

७. वा पुंसि पद्मं नलिनमरविन्दं महोत्पलम् । अ.को. तृ.काण्डः, वारिवर्गः ।

८. अम्भोर्णतोयपानीयनीरक्षीराम्बुशम्बरम् । अ.को. प्र.काण्डः, वारिवर्गः ।

७. निरर्थकत्वम् – पादपूरणमात्रप्रयोजनकत्वम्, यथा –

मुञ्च मानं हि मानिनि!

अत्र हिरिति शब्दः केवलं पादपूरणार्थं प्रयुक्तः ।

८. अवाचकत्वम् – शब्दस्य शक्त्यभावात् विवक्षितार्थप्रतिपादनासामर्थ्यम्, यथा –

दिनं मे त्वयि सम्प्राप्ते ध्वान्तच्छन्नापि यामिनी ।

अत्र त्वय्यागते ध्वान्तच्छन्नापि यामिनी प्रकाशमयी सम्पन्नेति प्रकाशमयार्थो विवक्षितः किन्तु शक्त्यभावात् स दिनशब्देन न प्रतिपाद्यते । ननु त्वय्यागते ध्वान्तच्छन्नापि यामिनी दिनं सम्पन्नेति रूपकमत्र विवक्षितमिति चेत् – न, यस्यां कस्यांञ्चित् यामिन्यामपि दिनरूपकस्य सम्भवेन ध्वान्तच्छन्नेति विशेषणस्य वैयर्थ्यापत्तेः ।

असमर्थत्वे हन्त्यादेः गमनादावर्थे शक्त्यभावः क्वाचित्कः, पद्भ्यां हन्यते पद्धतिरित्यादौ तदर्थस्य दर्शनात् । इह तु आत्यन्तिकः, सर्वथा तदर्थस्य अदर्शनादिति भेदः ।

९. अश्लीलत्वम् – व्रीडाजुगुप्सामङ्गलरूपार्थप्रतिपादकत्वम्, यथा –

दृप्तारिविजये राजन्! साधनं सुमहत्तव ।

प्रससार शनैर्वायुर्विनाशो तन्वि! ते तदा ।

अत्र साधनशब्देन उपस्थस्य प्रतिपादनात् व्रीडायाः, वायुशब्देन शर्धस्य विनाशशब्देन च मरणस्य प्रतिपादनात् यथाक्रमं जुगुप्साया अमङ्गलस्य चाभिव्यक्तिः ।

१०. सन्दिग्धत्वम् – अयमर्थो ग्राह्य आहोस्वित् स इति सन्देहः, यथा –

आशीःपरम्परां वन्द्यां कर्णे कृत्वा कृपां कुरु ।

अत्र वबयोरभेदात् वन्द्यामिति पूज्याम् आहोस्वित् बन्द्यामिति सन्देहः ।

११. अप्रतीतत्वम् – एकदेशमात्रप्रसिद्ध्या शब्दाद्विवक्षितस्यार्थस्याप्रतीतिः, यथा –

योगेन दलिताशयः ।

अत्र आशयशब्दस्य वासनारूपार्थकत्वं केवलं योगशास्त्रे प्रसिद्धम् ।

१२. ग्राम्यत्वम् – ग्रामीणजनमात्रविषयत्वम्, यथा –

कटिस्ते हरते मनः ।

अत्र कटिशब्दो ग्राम्यः । श्रोण्यादिशब्दप्रयोगे तु नास्ति दोषः ।

१३. नेयार्थत्वम् – रूढिप्रयोजनाभावेऽपि लक्षणयार्थप्रतिपादकत्वम्, यथा –

कमले चरणाघातं मुखं सुमुखि! तेऽकरोत् ।

अत्र चरणाघातशब्देन पराजितत्वं लक्ष्यते ।

१४. क्लिष्टत्वम् – विलम्बेनार्थोपस्थापकत्वम्, यथा –

क्षीरोदजावसतिजन्मभुवः प्रसन्नाः ।

अत्र क्षीरोदजा लक्ष्मीः, तस्या वसतिः पद्मम्, तस्य जन्मभुवो जलानीत्यभिप्रेतोऽर्थो विलम्बेनोपस्थितो भवति, क्षीरोदजात् जातेषु मदिरादिषु लक्ष्म्या एव ग्रहणे प्रमाणस्य झटिति अस्फुरणात् । पर्यन्तेऽन्यथानुपपत्त्या स्फुरतीति तु विषयान्तरम् ।

१५. विधेयाविमर्शः – प्रधानस्याप्राधान्येन प्रतिपादनम्, यथा –

१. यत्र ते पतति सुभ्रु! कटाक्षः षष्ठबाण इव पञ्चशरस्य ।

२. अमुक्ता भवता नाथ! मुहूर्तमपि सा पुरा ।

अत्राद्ये कटाक्षः षष्ठो बाण इवेति बाणे षष्ठत्वं प्राधान्येन उत्प्रेक्षणीयम् । इह तु तत्पुरुषे तस्य पूर्वपदार्थत्वात् गुणीभावेन प्रतीतिः । अन्त्ये तु भवता सा पुरा मुहूर्तमपि न मुक्तेति नञर्थस्य प्राधान्येन विवक्षितत्वात् प्रसज्य-प्रतिषेधपरत्वं युक्तम् । इह तु समासे गुणीभावेन पर्युदासपरत्वमिति न तदर्थस्य प्राधान्येन प्रतीतिः ।

* पर्युदासप्रसज्यप्रतिषेधविचारः

ननु को नाम प्रसज्यप्रतिषेधः? कश्च पर्युदासः? – उच्यते, अत्र हि वैयाकरणानां नाना मतानि सन्ति, तत्र शाब्दिकेषु मूर्धन्यस्य भर्तृहरेः मतं तावदिदम् – नञः पर्युदासः प्रसज्यप्रतिषेधश्चेति अर्थद्वयम् । तत्र पर्युदासस्य लक्षणं तावदिदम् –

[१]प्रधानत्वं विधेर्यत्र प्रतिषेधेऽप्रधानता ।
पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ् ॥

यत्र विधेयस्य प्राधान्यम्, प्रतिषेधस्याप्राधान्यम्, उत्तरपदार्थेन चान्वयः

१. वाक्य.

तत्र नञ् पर्युदास इत्यर्थः, यथा –

जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः ।
अगृध्नुराददे सोऽर्थानसक्तः सुखमन्वभूत् ॥

अत्र रघुरत्रस्त आत्मानं जुगोपेति वाक्यम् । अत्र अत्रस्ते रघौ आत्मगोपनं बुबोधयिषितमिति आत्मगोपनं विधेयम् अत्रस्तश्च रघुः उद्देश्यः । विधेयं तद्भवति यद्बोध्यते । उद्देश्यं पुनस्तत् यत्र बोध्यते । अत्र रघौ आत्मगोपनं बोध्यत इति पूर्वोक्तस्य सङ्गतिः । नञः त्रस्तशब्देन समासात् त्रस्तरूपोत्तर-पदार्थेनान्वयः । एवमत्र विधेयस्यात्मगोपनस्य प्राधान्यम्, अत्रस्तपदार्थस्य उद्देश्यत्वात् नञर्थस्याप्राधान्यम्, त्रस्तरूपोत्तरपदार्थेन चान्वय इति स्फुटं नञः पर्युदासार्थकत्वम् । एवं देवदत्तोऽयमभीत एव काननं गच्छतीति वाक्यान्तरेऽपि बोध्यम् । इदं पुनः प्रसज्यप्रतिषेधस्य –

[१०]अप्राधान्यं तु विधेर्यत्र प्रतिषेधे प्रधानता ।
प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ् ॥

यत्र विधेयस्याप्राधान्यम्, प्रतिषेधस्य प्राधान्यम्, क्रियया चान्वयः तत्र नञ् प्रसज्यप्रतिषेध इत्यर्थः, यथा –

किन्तु वध्वां तवैतस्यामदृष्टसदृशप्रजम् ।
न मामवति सद्वीपा रत्नसूरपि मेदिनी ॥

अत्र मेदिनी मां नावतीति वाक्यम् । अत्र मेदिन्यां मदरक्षणं बुबोधयिषितमिति तदेव विधेयम्, मेदिनी चोद्देश्या । नञश्च नावतीति क्रियया सहान्वयः । एवमत्र मदरक्षणस्य विधेयत्वात् प्राधान्येऽपि तत्कुक्षिपतितयोः मद्रक्षणं तत्प्रतिषेधश्चेत्यनयोरर्थयोः प्रतिषेधस्यैव प्राधान्यात् नञर्थस्य प्राधान्यम्, तदर्थस्य च क्रियार्थेनान्वय इति स्फुटमत्र नञः प्रसज्यप्रतिषेधार्थकत्वम् । एवं देवदत्तो ग्रामं न गच्छतीति वाक्यान्तरेऽपि बोध्यम् । एतेन नञर्थस्तावत् प्रतिषेधः । तस्य प्राधान्ये, विधेयस्याप्राधान्ये, क्रियाया चान्वये सति नञः प्रसज्यप्रतिषेधोऽर्थः । तस्याप्राधान्ये, विधेयस्य प्राधान्ये, उत्तरपदार्थेनाचान्वये नञः पर्युदास इत्यस्य मतं सिद्धं भवति ।

१०. वाक्य.

वस्तुतस्तु चिन्त्यमेतत्, 'घटो न पटः' इत्यादौ समासस्याभाव इत्युत्तर-पदार्थस्यैवाभावात् पर्युदासलक्षणं यथा नान्वेति तथा 'देवदत्तो न गम्भीरः' इत्यादौ क्रियाया एवाभाव इति प्रसज्यप्रतिषेधलक्षणं च। नन्वत्र अस्तिर्भवन्तीपर इति कात्यायनवचनात् अस्तीति पदमध्याहार्यमिति चेत् – अस्तु, एवं तर्हि 'अहं न पण्डितः' इत्यत्र किं क्रियते? अस्तिपदाध्याहारस्य अनावश्यकत्वात्। तत्र हि अस्मीत्यस्यैवान्वययोग्यत्वं न तु अस्तीत्यस्य ।

[११]भूषणकारस्तु अब्राह्मण इत्यत्र नञ् पर्युदासः। तस्य चारोपितत्वमर्थः। तत्रापि आरोपमात्रं नञर्थः विषयत्वं तु संसर्गः। एवं च अब्राह्मण इत्यस्य आरोपितब्राह्मणत्ववान् इत्यर्थः। गेहे घटो नास्तीत्यादौ नञ् प्रसज्यप्रतिषेधः। तस्य चाभावोऽर्थः । स च विशेष्यत्वेनैव प्रतीतिसिद्ध इति गेहाधिकरणिका या घटकर्तृकसत्ता तत्प्रतियोगिकोऽभाव इति बोधः । एवमङ्गीकारे नञः पर्युदासार्थकत्वात् 'असर्वस्मै' इत्यादौ आरोपितसर्वत्ववानिति उत्तरपदार्थस्य प्राधान्यम्, तदायत्तं सर्वनामत्वम्, तत्प्रयुक्तं स्मायादेशादिकार्यमित्येतत्सर्वं हेलयैव सिद्ध्यति । अनेकमित्यादौ आरोपितैकत्ववदिति यथैकवचनस्य तद्वत् अवर्षा हेमन्त इत्यादौ आरोपितवर्षात्ववान् इति बहुवचनस्यापि सङ्गतिर्भवति । अथवेदमुच्यते –

[१२]अभावो वा तदर्थोऽस्तु भाष्यस्य हि तदाशयात् ।
विशेषणं विशेष्यो वा न्यायतस्त्ववधार्यताम् ॥

इति कथयन् सर्वत्राप्यविशेषेण अभावार्थकत्वं युक्तं मन्यते । तस्य विशेषणतया प्रतीतिः विशेष्यतया वा इति द्वयी गतिः ।

तत्राभावस्य विशेषणतया प्रतीतिरिति पक्षे अब्राह्मण इत्यस्य अभाव-प्रतियोगिब्राह्मणत्ववान् इत्यर्थः । असर्व इत्यादौ तथैवार्थ इति सर्वनामत्वस्य तत्कार्यस्य च निर्बाधं सिद्धिः । सर्वोऽप्ययं विचारः केवलं समासस्थले । क्रियाविषये समासो नास्तीति तत्राभावस्य विशेष्यतयैव बोध इति न कोऽपि विशेषः । तस्मात्पक्षोऽयं दुर्बलः । अत एव कारिकायां वाकारस्य प्रयोगः ।

११. वै.भू.सा. नञर्थनिर्णयः

१२. वै.भू.सा. नञर्थनिर्णयः का–४०.

अभावस्य विशेष्यतया प्रतीतिरिति पक्षान्तरम् । अत्र तु अब्राह्मण इत्यत्राभावस्य ब्राह्मणपदार्थैकदेशेनान्वय इति तत्पदस्य ब्राह्मण्य-प्रतियोगिकाभाववान् इत्यर्थः । न चैवं सति 'असर्वस्मै' इत्यादौ सर्वशब्दार्थस्य गौणत्वात् [१३]सर्वनामत्वं तत्प्रयुक्तकार्यं च कथमिति शङ्क्यम्, [१४]एतत्तदोरिति सूत्रे अनञ्समासशब्दग्रहणात् ज्ञापकादिष्टसिद्धौ बाधकाभावात्, तथाहि - एतत्तदोरिति सूत्रेण तदेतद्भ्यां परस्य सोर्लोपो विधीयते, नञ्समासे तु स ना भूदिति प्रतिषिध्यते । विधिप्रतिषेधयोः एकसूत्रसम्बन्धित्वात् प्रतिषेधोऽयम् एतत्सूत्रेण सुलोपस्य प्रसक्तौ सत्यामेवार्थवान् । प्रसक्तिश्चानेन सूत्रेण वस्तुतो दुरुपपादैव, यस्मात् अधुनोक्तदिशा 'असः शिवः' इत्यत्राभावस्य प्राधान्यमिति तच्छब्दस्य सर्वनामत्वम्, तत्प्रयुक्तं त्यदाद्यत्वं सत्त्वं च न भवतीति 'अतद् सु शिव सु' इत्यवस्थायां अन्तरङ्गत्वात् [१५]हल्ङ्याब्भ्य इति सूत्रान्तरेण लोपः सम्भवति । तदेवमसत्यामपि प्रसक्तौ प्रतिषेध आरभ्यमाणो व्यर्थः सन् नञ्समासे उपसर्जनत्वे सत्यपि तदादिशब्दस्य सर्वनामसंज्ञां ज्ञापयति । ज्ञापने तु [१६]त्यदाद्यत्वे सत्त्वे च 'अस सु शिव सु' इत्यवस्थायां हलन्तत्वाभावात् हल्ङ्याब्भ्य इत्यस्याप्रवृत्तौ अनेनैव सूत्रेण सुलोपस्य प्रसक्तिः सम्भवति ।

एवमभावविशेष्यकबोधस्य स्वीकारेण एकत्वप्रतियोगिकाभावाश्रयरूपार्थ-प्रतिपादकस्य अनेकशब्दस्य आश्रयगतसंङ्ख्यापि सिध्यतीति 'पतन्त्यनेके जलधेरिवोर्मयः' इत्यादिकं बहुवचनान्तं रूपं साधुतामञ्चति । एवं द्विवचनेऽपि विषये बोध्यम् । [१७]अनेकमन्यपदार्थे इत्यत्रानेकमिति एकवचनं तु द्विवचनस्य ग्रहणे बहूनामसङ्ग्रहः स्यात्, बहुवचनस्य ग्रहणे द्वयोरिति हेतोः सर्व-सङ्ग्रहोद्देशेन जात्यभिप्रायेण औत्सर्गिकत्वेन वा कृतमिति न दोषः ।

अत्वं भवसि, अनहं भवामीत्यादौ त्वदभावकर्तृकसत्ता, मदभावकर्तृकसत्तेति

१३. संज्ञोपसर्जनीभूताः न सर्वादयः इति वार्तिकेन निषेधात् ।

१४. एतत्तदोः सुलोपोऽकोरनञ्समासे हलि [अष्ट. ६.१.१३२] अककारयोः एतत्तदोः यः सुः तस्य लोपः स्याद्धलि न तु नञ्समासे इत्यर्थः । सि.कौ. स्वादिसन्धिप्रकरणम् ।

१५. हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् [अष्ट. ६.१.६८]

१६. त्यदादीनामः [अष्ट. ७.२.१०२] इत्यनेन अन्त्यस्य सूत्रस्य दकारस्य अकारः । अतो गुणे [अष्ट. ६.१.९७] इति पररूपम् । तदोः स सावनन्त्ययोः [अष्ट. ७.२.१०६] इति सत्वम् ।

१७. अष्ट. २.२.४.

त्वदभावमदभावयोरेव तिङ्सामानाधिकरण्यं न तु त्वद्रूपस्य मद्रूपस्य चार्थस्येति यद्यपि पुरुषव्यवस्था दुष्करा तथापि नञ्घटितयुष्मदादिशब्दस्य त्वदभावाद्यर्थे लक्षणाया अभ्युपगमात् युष्मदाद्यर्थस्य तिङ्सामानाधिकरण्यं सम्भवतीति न दोषः ।

[१८]निवृत्तपदार्थक इति वदतो भाष्यकारस्यापि निवृत्तं निवृत्तिः, नपुंसके भावे क्तः, पदार्थो यस्येति अभावार्थकत्वमेव नञः सम्मतमिति सर्वमनवद्यमित्याह ।

वस्तुतस्तु अभावस्य विशेष्यतया प्रतीतिरिति पक्षो नोपादेयतां बिभर्ति, तथा सति अब्राह्मण इत्यादौ ब्राह्मण्यप्रतियोगिकाभावाश्रय इति ब्राह्मणशब्दस्य ब्राह्मण्यं तदाश्रययश्चेति द्वयोरर्थयोरन्तः नञर्थस्य निपतनं भवति । नह्येतादृश [१९]एकदेशान्वयो बालिशैरप्यङ्गीक्रियते ।

किञ्चैवमङ्गीकरे किंप्रधानोऽयं समासः? उत्तरपदार्थप्रधान इति प्रश्नप्रतिवचनभाष्यस्य असङ्गतत्वापत्तिः, असर्वस्मै इत्यादौ सर्वनामसंज्ञानापत्तिश्च । न चानञ्समासशब्दग्रहणं तत्सिद्धौ ज्ञापकमिति वाच्यम्, तस्मिन् ज्ञापकत्वस्यानभ्युपगमात् तदर्थस्य स्वरसत एव सङ्गमनात्, तथाहि – 'तद् सु शिव सु' इत्यत्र सर्वनामसंज्ञायाः सद्भावात् त्यदाद्यत्वे सत्वे च सति अनेन सूत्रेण यथा सोर्लोपः सम्भवति तथा 'अतद् सु शिव सु' इत्यत्रापि, विशेषणतया प्रतीतिरिति अनुपदोक्तपक्षाङ्गीकारे सर्वनामसंज्ञाया निष्प्रतिबन्धं प्रवर्तनात् । तत्र तत्संज्ञावारणमिष्टमिति तदर्थं कृतमनञ्समासशब्दग्रहणं सार्थकमेव । नहि सार्थकं किञ्चित् ज्ञापकत्वाय कल्पते । नहि ऋजौ मार्गे सति तिर्यक्पथेन गमनं विदुषां श्लाघनीयं भवति । न चाभावविशेषणतेति पक्षो दुर्बल इति पूर्वमुक्तमिति वाच्यम्, अभावस्य विशेषणत्वे पर्युदासः, विशेष्यत्वे तु प्रसज्यप्रतिषेध इत्यङ्गीकारे बाधकाभावात् ।

अनेकशब्दस्य द्विवचनान्तं बहुवचनातं च यद्रूपं साधुत्वेनाङ्गीकृतम् –

---

१८. नञ् [अष्ट. २.१.६] इति सूत्रे भाष्ये ।

१९. चैत्रस्य गुरुकुलमित्यत्र चैत्रस्य यो गुरुः तस्य कुलमिति चैत्रपदार्थस्य गुरुकुलपदार्थैकदेशेन गुरुणान्वयः । अयमेकदेशान्वय उच्यते किन्त्वयं सह्यः । प्रकृते तु ब्राह्मणपदस्य ब्राह्मण्यं तदाश्रयश्चेति यौ द्वावर्थौ तयोः मध्ये अभावरूपार्थस्य निपतनमिति ब्राह्मण्यस्य योऽभावः तद्विशिष्ट आश्रय इति ब्राह्मण्यस्याभावेऽन्वयः तस्य चाश्रये इत्येकदेशान्वयो भवति । अयं च सुतरामसह्य इति भावः ।

तदपि न युक्तम्, तथा सति [२०]'अवर्षा हेमन्तः' इत्यत्रापि तुल्यन्यायेन अवर्षाशब्दे विशेष्यवाचकशब्दवचनाङ्गीकारापत्तिः ।

अत्वं भवसि, अनहं भवामीत्यादौ पुरुषव्यवस्था लक्षणयोपपादनीयेति यदुच्यते – सा नूनं भ्रान्तिः, 'त्वमेवं मिथ्याभाषी अवश्यम् अत्वं भवसि' 'अपथेन गच्छन्नहं नूनमनहं भवामि' इत्यादिना वाक्यस्य पूर्णत्वे कल्पिते तस्याः स्वत एवोपपत्तेः ।

निवृत्तपदार्थक इत्यस्य यद्विवरणम् – तदप्यसङ्गतम्, प्रकरणविरुद्धत्वात् । [२१]भाष्ये हि उत्तरपदार्थस्य प्राधान्यमिति पक्षे अब्राह्मणमानयेत्युक्तौ ब्राह्मणमात्रस्यानयनं कुतो न भवतीत्याक्षेपे, राजपुरुषमानयेत्युक्तौ यथा राजसम्बन्धिपुरुषस्यानयनं भवति न पुरुषमात्रम् तद्वदिहापि नञ्विशिष्टस्यानयनं भविष्यतीति समाहितम् । तत्र नञ्विशिष्टोऽर्थः तावत् क इति प्रश्ने निवृत्तपदार्थक इत्युत्तरमभिहितम् । एतेन निवृत्तपदार्थक इति विवरणं नञ्घटितब्राह्मणादेः शब्दस्य न तु नञ्मात्रस्येति स्पष्टम् । अत एव 'निवृत्तः पदार्थो यस्मिन् स' इति विवरणं प्रकरणोचितार्थमात्रदर्शिनो व्याख्यानचणस्य कैयटस्य । युक्तं चेदम्, 'देवदत्तोऽयं ब्राह्मणः' इत्युक्ते हि देवदत्ते ब्राह्मण्यं शब्दप्रयोगवशात् प्रवृत्तमिव भवति, अज्ञातपूर्वं ज्ञातं भवतीत्यर्थः । अब्राह्मण इत्युक्ते तु गृहीतपूर्वमपि तद् ब्राह्मण्यं तस्मात् निवृत्तमिव भवति, ज्ञातमपि स्वीकृतं न भवतीत्यर्थः ।

तस्मादभावस्य विशेष्यतया प्रतीतिरिति मतं नोपादेयम् । नन्वेवमनाक्षेपात् विशेषणतया प्रतीतिरिति पक्षः साधुः सम्पन्न इति चेत् – उच्यते, स तावत् न स्वतन्त्रः कश्चित् सिद्धान्तः किन्तु अभावस्य विशेष्यतया प्रतीतौ नञ् प्रसज्यप्रतिषेधः, विशेषणतया प्रतीतौ तु पर्युदास इति तदेकदेशः । सर्वमेतदुत्तरत्र स्वयमेव स्फुटीभविष्यति ।

---

२०. न वर्षाः अवर्षाः । वर्षाकालादन्य इत्यर्थः । अत्र वर्षाशब्द आकारान्तः स्त्रीलिङ्गो नित्यबहुवचनश्च । अत एव 'स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षा अथ शरत् स्त्रियाम्' इति कोशः । अ.को. प्र.काण्डः, कालवर्गः ।

२१. प्रदीपे. पा.भा. नञ्सूत्रे

मञ्जूषाकारस्तु [२२]नञ् पर्युदासः प्रसज्यप्रतिषेधश्चेति द्विविधः । ततः प्रत्येकं प्रभेदोऽपि समस्तोऽसमस्तश्चेति द्विविधः । तत्र पर्युदासनञः आरोपितत्वमर्थः । एवमब्राह्मण इत्यस्य आरोपितब्राह्मण्यवानित्यर्थः । [२३]समासस्य वैकल्पिकत्वात् देवदत्तो न ब्राह्मण इति तदभावदशायामपि स एवार्थः । अत्रान्योन्याभावः केवलं फलति न तु शब्देन प्रतिपाद्यते ।

प्रसज्यप्रतिषेधनञः समस्तस्यात्यन्ताभावोऽर्थः, यथा – [२४]असूर्यम्पश्या राजदाराः ॥ अयं क्रियायां विशेष्यतयान्वयी । राजदाराः सूर्यं न पश्यन्तीत्यर्थः । तथा चास्य राजदाराः सूर्यकर्मकदर्शनं यत् तत्प्रतियोगिकाभाववन्त इत्यर्थः । तिङन्तपदसमभिव्याहाराभावात् बोधः [२५]प्रथमान्तार्थविशेष्यको भवति । असमस्तस्य तु नञः गुणक्रियाविषयकत्वेऽत्यान्ताभावोऽर्थः, प्रसज्यायं क्रियागुणौ पश्चान्निवृत्तिं कुरुत इति भाष्यात् । तद्भिन्नविषयकत्वेऽन्योन्याभावः । क्रमेणैतान्युदाहरणानि –

* देवदत्तस्य न सन्देहः – देवदत्तस्य यः सन्देहः तत्प्रतियोगिकोऽभावः ।
* गेहे घटो नास्ति – गेहाधिकरणिका या घटकर्तृकसत्ता तत्प्रतियोगिकोऽभावः ।
* घटो न पटः – पटप्रतियोगिकभेदवान् घटः ।

गुणवाचकपदेनासमासे सत्येव नञोऽत्यान्ताभावार्थकत्वम् । यत्र तु समासः, यथा – देवदत्तस्यासन्देहः इत्यादौ, तत्र नायमर्थः किन्तु पूर्वोक्तरीत्या आरोपितत्वमेवार्थ इत्यारोपितसन्देहत्ववानिति तदर्थः सिध्यति । तत्राभेद-सम्बन्धेनाभावः अन्योन्याभावः तदितरसम्बन्धेन अभावः तु अत्यन्ताभाव इति विवेकः । एवं चास्य मतेन नञः क्वचिदारोपितत्वमर्थः, क्वचित्

२२. नञ् इति शब्दः । पर्युदास इति तदर्थः । शब्दार्थयोः तादात्म्यं सम्बन्धः । तादात्म्यं च भेदे सति अभेदेन प्रतीयमानत्वम् । तस्मात् शब्दार्थयोः क्वचित् अभेदं विवक्ष्य नञ् पर्युदास इति निर्देशः क्रियते क्वचिच्च भेदं विवक्ष्य नञः पर्युदास इति निर्देशः । एवं प्रसज्यप्रतिषेधेऽपि विषये बोध्यम् ।

२३. विभाषा [अष्ट. २.१.११] इत्यधिकारात् समासस्य वैकल्पिकत्वम् ।

२४. राजदाराः सूर्यं न पश्यन्तीति विवक्षितोऽर्थः । असूर्यललाटयोः दृशितपोः [अष्ट.३.२.३६] इति असूर्यशब्दे उपपदे दृशिधातोः कर्तरि खश् । नञः दर्शनक्रियायामन्वयादसामर्थ्येऽपि असूर्येति निपातेन निर्देशात् नञः सूर्यपदेन समासः ।

२५. देवदत्तो गच्छतीत्यादौ तिङन्तस्थले शाब्दबोधे कस्य विशेष्यत्वमित्यत्र विवादेऽपि देवदत्तो गन्तेत्यादौ कृदन्तस्थले नास्ति विवादः । तत्र तु प्रथमान्तार्थस्यैव विशेष्यत्वमिति निर्णयः ।

अत्यान्ताभावः, क्वचिदन्योन्याभाव इति सिद्धम् ।

अत्र विचार्यते – यत्तावदुक्तम्, देवदत्तोऽब्राह्मण इत्यादौ नञ आरोपितत्वमर्थ इति – तन्न, तथाहि, शक्तिनिश्चयात् दुरुपदेशात् सन्देहाद्वा शब्दस्य कुत्रचिदर्थे प्रयोगः क्रियते । तत्र यदि शक्तिनिश्चयात् प्रयोगः तदा प्रवृत्तिनिमित्तमर्थे प्रवर्तमानमिव भाति, यथा – यथा ब्राह्मणत्वेनाज्ञाते ब्राह्मणे ब्राह्मणशब्दस्य प्रयोगे । यदि तु दुरुपदेशात् सन्देहाद्वा प्रयोगः तदा प्रवृत्तिनिमित्तं तदर्थात् निवर्तमानमिव भाति, यथा – क्षत्रियादौ ब्राह्मणशब्दस्य प्रयोगे । निवर्तमानस्येव स्थितस्य ब्राह्मण्यस्य निवृत्तौ सत्यां तत्र तस्याभावः सम्भवतीति स्थितिः ।

प्रकृते तु ब्राह्मणे यो ब्राह्मणशब्दं प्रायुङ्क्त स एव क्षत्रियादौ तद्ब्राह्मण्यस्य निवृत्तिं विभावयन् अब्राह्मण इति नञ्विशिष्टं शब्दं प्रयुङ्क्ते । स्थिते चैवम्, तत्र दृष्टस्य नञः निवृत्तिं तत्समनियतमभावं वान्तरेण अन्यः कोऽर्थो निर्णेतुं शक्यते? स्यान्नाम तत्रारोपोऽपि वर्तत इति वादः तथापि तस्य नञ्प्रयोगात् प्रागेव क्षत्रियादौ पदार्थे भानं न तु तत्प्रयोगकाले । तस्मादारोपार्थकत्वं नञो न साम्प्रतम् । एतेन यस्मिन्नसति यो भाति तादृशात् आरोपात् सति तु यो भाति तादृशस्य निवृत्तेरभावस्य वा अर्थस्य तदर्थत्वेन निर्णयः साधीयानित्युक्तं भवति । तदेवमारोपे दूरं गते शिष्टयोः निवृत्त्यभावयोः कस्तावदर्थो नञो निर्णेतव्य इति पुनर्विचारे गुणक्रियासमभिव्याहारे दृष्टत्वात् अभाव एवेत्यभिधानं रमणीयम् ।

किञ्च वाक्यं नञ्रहितं विधिपरं तत्सहितं तु निषेधपरमिति व्यवहारो दृश्यते लोके सर्वजनीनः । निषेधश्चाभाववत्त्वेन प्रतिपादनम्, यथा – घटं निषेधति, घटमभाववत्त्वेन प्रतिपादयतीत्यर्थः । प्रतिपादनस्य शब्दप्रयोगे साधारणत्वात् तत्त्यागे योऽर्थोऽवशिष्टः स तावन्नञ इति निर्णयो युक्तः । अवशिष्टश्चार्थोऽभावः । स्थिते चैवम्, विहाय तमारोपस्यार्थत्वेन निर्णये कथं वाक्ये निषेधपरत्वव्यवहारस्य सङ्गतिः?

किञ्च शब्दानां स्वभावनैयत्यात् नञ एकत्रारोपितत्वमर्थः अन्यत्राभाव इति वैषम्येनाभिधानं न स्वारस्याय कल्पते ।

तस्मादभाव एव नञर्थः । स चासमस्तगुणक्रियास्थले विशेष्यतया प्रतीयते अन्यत्र विशेषणतयेति विशेषः । तत्र विशेष्यतया प्रतीतौ नञ् प्रसज्यप्रतिषेधः, विशेषणतया प्रतीतौ पर्युदास इति विवेकः । एतेन प्रसज्यप्रतिषेधः असमस्त–गुणक्रियास्थल एव । पर्युदासस्तु समस्तगुणक्रियास्थले जातिव्यक्तिस्थले अपीत्युक्तं भवति । असर्वस्मै इत्यत्र अभावप्रतियोगिसर्व इति बोधात् भवत्येव सर्वनामसंज्ञा तत्प्रयुक्तं च कार्यमिति न दोषः ।

नन्वत्र जातिव्यक्तिसमभिव्याहारस्थलेऽपि 'देवदत्तो न ब्राह्मणः' 'देवदत्तो न यज्ञदत्तः' इत्यादौ अभावस्य विशेष्यतया विवक्षणं शक्यमिति चेत् – सत्यम्, तथा सति ब्राह्मण्यप्रतियोगिकाभाववान्, यज्ञदत्तत्वप्रतियोगिकाभाववान् इत्यभावस्य धर्मधर्मिणोरन्तः निपातनीयत्वेन असह्यैकदेशान्वस्याङ्गीकारप्रसङ्गः । न चेष्टापत्तिः, मूर्खेणापि एतादृशैकदेशान्वयस्यानङ्गीकारात् । अत एव भाष्यकारः प्रसज्यायं क्रियागुणाविति वदन् गुणक्रियासमभिव्यहारे एव प्रसज्य–प्रतिषेधमनुमन्यते । यदि पुनः ब्राह्मणानामभाव इति ब्राह्मणादिधर्मिणं प्रत्येवाभावस्य विशेष्यतया विवक्षा तदा न नञ्समासः किन्तु अर्थाभावे अव्ययीभावः । अब्राह्मणमिति रूपम् । यज्ञदत्तस्याभाव इत्यत्र तु अभावस्य विशेष्यतया विवक्षायां सत्यामपि नाव्ययीभावः, अर्थाभावशब्देन कार्त्स्न्येनाभावस्य विवक्षितत्वात् कार्त्स्न्यस्य बहुत्व एव सम्भवात् ।

देवदत्तस्यासन्देह इति समासे पूर्वोक्तरीत्या पर्युदास एवेति तत्पदस्य अभावप्रतियोगिसन्देह इत्यर्थः । यदि पुनः क्वचित् सन्देहाभाव इति विवरणं दृश्यते तत्तु विशेष्यविशेषणभावे कामचारात् न वस्तुस्थित्यनुरोधादिति मन्तव्यम् । यदि पुनः सन्देहस्याभाव इत्यभावस्य विशेष्यतया विवक्षा तदा न नञ्समासः किन्तु अर्थाभावेऽव्ययीभावः, असन्देहमिति रूपं चेति पूर्ववत् ।

अन्यच्चेदम्, 'देवदत्तस्य न सौन्दर्यम्' इत्यादिकं गुणविषयकस्य प्रसज्यप्रतिषेधस्योदाहरणमिति पूर्वं यन्निर्णीतम् तत्रास्त्यादिक्रियापदस्य प्रयोगे तदेव क्रियाविषयकस्योदाहरणमिति बोध्यम् । यदि पुनः 'देवदत्ते न सन्देहः' इति प्रयोगः तदा क्रियापदस्याप्रयोगेऽपि सप्तम्या उपपादनाय अस्त्यादि–क्रियापदाध्याहारस्यावश्यकत्वात् तत्रापि प्रसज्यप्रतिषेधः क्रियाविषयक एवेति

बोध्यम् । सन्देहो गुण इति मञ्जूषाकारोक्तिः भ्रान्त्या, तस्याः कालभेद्यत्वेन क्रियारूपत्वात् । यदि गुणस्योदाहरणमिष्यते तदा सौन्दर्यगाम्भीर्यादय शौक्ल्यरक्तत्वादयश्च प्रयोज्याः । तथा चायं निष्कर्षः –

पर्युदासनञः विशेषणतावच्छिन्नोऽभावोऽर्थः प्रसज्यप्रतिषेधनञः तु विशेष्यतावच्छिन्नः । एतेन नञोऽर्थस्तावत् अभावः । तस्य विशेषणतया प्रतीतौ पर्युदास इति व्यवहारः । विशेष्यतया प्रतीतौ तु प्रसज्यप्रतिषेध इति व्यवहार इत्युक्तं भवति । एतदेव संक्षेपेणैवं निदर्श्यते –

१. यत्र नञो जातिव्यक्तिगुणक्रियावाचकैः समासः, समस्तस्य च पदान्तरसामानाधिकरण्येन प्रयोगः तत्र नञ् पर्युदासः, यथा –

* देवदत्तः अब्राह्मणः – अभावप्रतियोगिब्राह्मण्यवान् ।
* देवदत्तः अयज्ञदत्तः – अभावप्रतियोगियज्ञदत्तत्ववान् ।
* देवदत्तः असुन्दरः – अभावप्रतियोगिसुन्दरत्ववान् ।
* देवदत्तः अगन्ता – अभावप्रतियोगिगमनवान् ।

२. यत्र पूर्वोक्तेषु वाक्येष्विव नञो जात्यादिवाचकेन समासो न सम्पन्नः, वैकल्पिकत्वात् तत्रापि नञ् पर्युदासः, यथा –

* देवदत्तो न ब्राह्मणः – अभावप्रतियोगिब्राह्मण्यवान् ।
* देवदत्तो न यज्ञदत्तः – अभावप्रतियोगियज्ञदत्तत्ववान् ।
* देवदत्तो न सुन्दरः – अभावप्रतियोगिसुन्दरत्ववान् ।
* देवदत्तो न गन्ता – अभावप्रतियोगिगमनवान् ।

३. यत्र नञो गुणवाचकेन क्रियावाचकेन च समासः, समस्तस्य च वैयधिकरण्येन प्रयोगः तत्र नञ् पर्युदासः, यथा –

* देवदत्तस्य असौन्दर्यम् – अभावप्रतियोगिसौन्दर्यम् ।
* देवदत्तस्य अगमनम् – अभावप्रतियोगिगमनम् ।

४. यत्र पूर्वस्मिन् वाक्यद्वय इव नञः क्रियावाचकेन गुणवाचकेन च समासो न सम्पन्नः, वैकल्पिकत्वात् तत्र पुनः नञ् प्रसज्यप्रतिषेधः, यथा –

* देवदत्तस्य सौन्दर्यं न – सौन्दर्यप्रतियोगिकोऽभावः ।
* देवदत्तस्य गमनं न – गमनप्रतियोगिकोऽभावः ।

५. यत्र नञः तिङन्तपदसमभिव्याहारः, यत्र च समासे सत्यपि न क्रियावाचकेन समासः तत्र नञ् प्रसज्यप्रतिषेधः, यथा –

* गेहे घटो नास्ति – गेहाधिकरणकघटकर्तृकसत्ताप्रतियोगिकोभावः।
* राजदारा असूर्यम्पश्याः – सूर्यकर्मकदर्शनप्रतियोगिकाभाववन्तः ।

[अयमसमस्त एव नञ्, पदान्तरेण समासेऽपि क्रियावाचकेन समासाभावात् । यद् येनान्वेति तस्य तेनासमासे नञोऽसमस्ततयैव परिगणनम्]

६. यत्र नञो जात्यादिवाचकेन न समासः, क्रियापदस्य च प्रयोगः तत्रापि नञ् प्रसज्यप्रतिषेधः, यथा –

* देवदत्तो ब्राह्मणो न भवति – देवदत्ताभिन्नब्राह्मणकर्तृकं यद्भवनं तत्प्रतियोगिकोऽभावः।
* देवदत्तो यज्ञदत्तो न भवति – देवदत्ताभिन्नयज्ञदत्तकर्तृकं यद्भवनं तत्प्रतियोगिकोऽभावः ।
* देवदत्तः सुन्दरो न भवति – देवदत्ताभिन्नसुन्दरकर्तृकं यद्भवनं तत्प्रतियोगिकोऽभावः ।
* देवदत्तो गन्ता न भवति – देवदत्ताभिन्नगन्तृकर्तृकं यद्भवनं तत्प्रतियोगिकोऽभावः ।

७. यत्र नञो जात्यादिमात्रवाचकेन न समासः किन्तु सप्तम्यन्तपदस्य प्रयोगः तत्रापि नञ् प्रसज्यप्रतिषेधः, यथा –

* देवदत्ते न ब्राह्मण्यम् – देवदत्ताधिकरणिका ब्राह्मण्यकर्तृका या भवनक्रिया तत्प्रतियोगिकोऽभावः ।
* देवदत्ते न यज्ञदत्तत्वम – देवदत्ताधिकरणिका यज्ञदत्तत्वकर्तृका या भवनक्रिया तत्प्रतियोगिकोऽभावः ।
* देवदत्ते न सौन्दर्यम् – देवदत्ताधिकरणिका सौन्दर्यकर्तृका या भवनक्रिया तत्प्रतियोगिकोऽभावः ।
* देवदत्ते न गमनम् – देवदत्ताधिकरणिका गमनकर्तृका या भवनक्रिया तत्प्रतियोगिकोऽभावः ।

प्रकृते तु मुक्तत्वप्रतियोगिकाभाववतीत्यर्थस्य विवक्षितत्वात् न मुक्तेति प्रसज्यप्रतिषेध एवोचितः किन्तु अमुक्तेति अभावप्रतियोगिमुक्तत्ववतीति पर्युदासः प्रयुक्त इति भवत्येवात्र विधेयाविमर्शो दोषः। एतेन अन्यस्यैवार्थस्य विधेयत्वं भाति न तु नञर्थस्येति विचारे कृते सर्वं स्पष्टं भाति ॥

१६. विरुद्धमतिकृत्त्वम् – अनभिमतार्थप्रत्यायकत्वम्, यथा –

भूतयेऽस्तु भवानीशः ।

अत्र भवस्य पत्नी भवानी, तस्या ईश इत्युक्तौ पत्न्याधिक्यकरणात् भवातिरिक्तस्य अर्थान्तरस्यैव विवक्षितत्वेन प्रतीतिः यच्च वक्तुर्नाभिमतम् ।

* दोषाणामाश्रयस्य निर्णयः

इदमत्र विचार्यते – एते दुःश्रवत्वादयो दोषाः पदवाक्यरसादिषु कुत्र सन्तीति कथमवगमः? अन्वयव्यतिरेकभावादिति चेत् – न, तेन कार्यकारण-भावस्यावगमात् । ननु आश्रयाश्रयिभावस्यापि अवगमो भविष्यति – मैवम्, एवं हि क्लिष्टत्व–अनुचितार्थत्व–विधेयाविमर्श–विरुद्धमतिकृत्त्वानाम् अर्थदोषताप्रसङ्गः, तथाहि – क्षीरोदजावसतिजन्मभुवः प्रसन्ना इत्यत्र यथा क्षीरोदजावसतिजन्मभुव इति शब्दे सति क्लिष्टत्वं तथा दुग्धोदधिजामन्दिर-जन्मदेशा इति तदर्थके शब्दान्तरे सत्यपि तदिति तस्यार्थेनैव अन्वय-व्यतिरेकभावो वर्तते न तु पदेन । एवं 'शूरा अमरतां यान्ति पशुभूता रणाध्वरे' इत्यत्र छागभूता रणाध्वरे इति प्रयोगेऽपि अनुचितार्थत्वम् । एवं 'रक्षांस्यपि पुरः स्थातुमलं रामानुजस्य मे' 'भूतयेऽस्तु भवानीशः' इत्यादावपि बोध्यम् ।

दुःश्रवत्वस्य च रसदोषताप्रसङ्गः – कार्तार्थ्यं यातु तन्वङ्गी कदानङ्गवशंवदेति तदुदाहरणे यथा कार्तार्थ्यशब्दे सति शृङ्गारस्यास्फुटतया प्रतीतिः सफलतादौ च तदर्थके शब्दान्तरे सति स्फुटतयेति रसेन सहान्वयव्यतिरेकभावस्य सद्भावात् । ननु दुःश्रवत्वस्य पदेनापि अन्वयव्यतिरेकभावो वर्तते – एवं हि तस्योभयदोषताप्रसङ्गः ।

समाप्तपुनरात्तत्वस्य चार्थदोषताप्रसङ्गः –

नाशयन्तो घनध्वन्तं तापयन्तो वियोगिनः ।
पतन्ति शशिनः पादाः भासयन्तः क्षमातलम् ॥

इति तदुदाहरणे भासयन्तः क्षमातलमिति पदसमूहे सति यथायं दोषः तथा शोभयन्तो धरातलमिति न्यासान्तरे सत्यपि स इत्यर्थेन अन्वयव्यतिरेकभावस्य सद्भावात् ।

परिपन्थिरसाङ्गविभावादिपरिग्रहस्य अर्थदोषताप्रसङ्गः – मानं मा कुरु तन्वङ्गि! ज्ञात्वा यौवनमस्थिरम् इति तदुदाहरणे यौवननश्वरत्वज्ञानरूपेऽर्थे सति यथायं दोषः तथा गृहीतचरणे मयीत्यर्थान्तरे सति नैवेति अर्थेन अन्वयव्यतिरेकभावस्य सद्भावात् । नन्वस्य रसेनापि अन्वयव्यतिरेकभावो

वर्तते – एवं हि तस्योभयदोषताप्रसङ्गः ।

तस्मादन्वयव्यतिरेकभावेन आश्रयाश्रयिभावस्य विज्ञानमित्यसङ्गतम् ।

यद्येवम्, दोषाणामाश्रयत्वविज्ञाने का युक्तिः? उच्यते, काव्यापकर्षकधर्मत्वं तावत् दोषाणां सामान्यलक्षणम् । काव्यञ्च शब्दार्थाविति तद्गतानामिव तदभिव्यङ्ग्यरसगतानामपि दोषाणां सङ्ग्रहो भविष्यतीति प्रागेवाभिहितम् । तत्र शब्दार्थयोः वाच्यवाचकभावः सम्बन्धः तयोश्च रसेन व्यङ्ग्यव्यञ्जकभावः । तत्र वाच्यवाचकभावसम्बन्धे सति अपकर्षकारिणा धर्मेण साक्षात् यो दुष्यति तत्र सम्भवन् दोषः तद्गत इति निर्णीयते । व्यङ्ग्यव्यञ्जकभावसम्बन्धे सति तु तादृशेन धर्मेण शब्दार्थयोः दूषणे सत्यपि यदि रसस्य दूषणं तर्हि तस्य तद्गतत्वेनैव निर्णयो नान्यथेति व्यवस्था ।

अनया च व्यवस्थया च्युतसंस्कार–अप्रयुक्तत्व–असमर्थत्व–निरर्थकत्व–अवाचकत्व–ग्राम्यत्वानां पदगतत्वं यदुक्तं तदुपपन्नं भविष्यति, व्याकरणलक्षणहीनत्व–कव्यनादृतत्व–प्रतिपादनाशक्तत्व–नैष्फल्य–प्रतिपादनासमर्थत्व–ग्रामीणजनव्यवहारविषयत्वानां धर्माणां दोषप्रयोजकानां साक्षात् शब्देन सम्बन्धात् । निहतार्थत्व–अश्लीलत्व–सन्दिग्धत्व–अप्रतीतत्व–नेयार्थत्व–क्लिष्टत्वेषु निहतत्वादीनां धर्माणां साक्षादर्थेन सम्बन्धे सत्यपि तावन्मात्राणां दोषं प्रति अप्रयोजकत्वात् तत्प्रयोजकस्य तादृशार्थ–प्रतिपादकत्वादेः पदगतत्वात् पददोषत्वमेव । नहि 'यमुनाशम्बरमम्बरं व्यतानीत्' 'प्रससार शनैर्वायुर्विनाशे तन्वि! ते तदा' इत्यादौ तत्तत्पदप्रतिपाद्योऽर्थो दुष्टः किन्तु तादृशार्थप्रतिपादकः शब्दोऽत्र प्रयुक्तः । विधेयाविमर्शे विधेयत्वस्यार्थगतत्वेऽपि तादृशार्थप्रतिपादनासामर्थ्यस्य पदगतत्वात् दोषस्य तद्गतत्वेन निर्णयः । विरुद्धमतिकृत्त्वे तु 'भूतयेऽस्तु भवः' इति लघुनैव न्यासेन विवक्षितार्थस्य प्रतिपादने सुशके तद्घटितशब्दान्तरस्य प्रयोगात् गात्रगौरवस्य च सत्त्वात् दोषस्य पूर्ववत् पदगतत्वेन निर्णयः ।

दुःश्रवत्वस्य प्रागुक्तरीत्या रसगतत्वम् । तत्र पुनः श्रुतिकटुभिः शब्दैः यथा शृङ्गारादेः दूषणं तथा श्रुतिमृदुभिः रौद्रादेरिति उभयोरपि सङ्ग्रहो न्याय्यः । अतः तत्स्थाने रीतिभङ्ग इति नवीनदोषस्य कल्पनं रमणीयमित्यस्माकं भाति । अनुचितार्थत्वस्य तु अर्थगतत्वमेव युक्तम्, कातर्याभिव्यञ्जकत्वस्य

अर्थगतत्वात् । न च तादृशार्थप्रतिपादकत्वेन पदगतत्वं शङ्क्यम्, दोषाधिकरणतानिर्णये सम्बन्धगतसाक्षात्त्वस्यैव प्रयोजकत्वमिति पूर्वमेवावेदनात् । अवाचकत्वासमर्थत्वयोः भेदेन परिगणनमपि न युक्तम्, शक्त्यभावेन विवक्षितार्थस्य प्रतिपादनेऽसामर्थ्यस्य उभयत्रापि समानत्वात् । स्यान्नाम एकत्र शक्त्यभावः क्वाचित्कः अन्यत्रात्यन्तिक इति भेदः तथापि न तस्य स्वतन्त्रदोषत्वनिर्णये हेतुत्वम् किन्तु अवान्तरतानिर्णये । तदेवं पदगता दोषाः चतुर्दशेति अस्माकं मतं स्थितम् ।

२. पदांशगता दोषाः

पदगतेषु श्रुतिकटुत्व-निहतार्थकत्व-निरर्थकत्व-अवाचकत्वादयः पदांशगतत्वेन निर्णीताः सन्ति । ते क्रमेण निरूप्यन्ते ।

१. श्रुतिकटुत्वं यथा –

तद्गच्छ सिद्ध्यै कुरु देवकार्यम् ।

अत्र गच्छ इत्यत्र सिद्ध्यै इत्यत्र च पदांशः श्रोत्रयोः दुःखं जनयति ।

२. निहतार्थत्वं यथा –

धातुमत्तां गिरिर्धत्ते ।

अत्र क्षीबार्थे प्रसिद्धस्य मत्ताशब्दस्य तल्मतुपोः प्रत्यययोरर्थे प्रयोगः ।

३. निरर्थकत्वं यथा –

आदावञ्जनपुञ्जलिप्तवपुषां श्वासानिलोल्लासित-
प्रोत्सर्पद्विरहानलेन च ततः सन्तापितानां दृशाम् ।
सम्प्रत्येव निषेकमश्रुपयसा देवस्य चेतोभुवो
भल्लीनामिव पानकर्म कुरुते कामं कुरङ्गेक्षणा ॥

अत्र दृशामिति वहुवचनं निरर्थकम्, एकस्या एव कुरङ्गेक्षणाया उपादानात् ।

४. अवाचकत्वं यथा –

वर्ण्यते किं महासेनो विजेयो यस्य तारकः ।

२६. विजेय इत्यत्र अचो यत् [अष्ट.३.१.९७] इति कर्मणि यत् । विजित इत्यत्र तु निष्ठा [अष्ट.३.२.१०२] इति क्तः कर्मण्येव किन्तु भूतकाले इति विशेषः ।

अत्र [२६]यत्प्रत्ययो निष्ठार्थं न वक्ति । विजितो येनेति प्रयोगः साधुः ।

५. अश्लीलत्वं यथा –

पाणिः पल्लवपेलवः ।

अत्र पेलेति पदैकदेशो दण्डाकारपुरीषस्मारकत्वात् जुगुप्सां जनयति ।

६. सन्दिग्धत्वं यथा –

कस्मिन् कर्मणि सामर्थ्यमस्य नोत्तपतेतराम् ।
अयं साधुचरः तस्मादञ्जलिर्बध्यतामिह ॥

अत्र साधुचर इत्यत्र किं पूर्वं साधुः किंवा साधुषु चरतीति सन्देहः ।

७. नेयार्थत्वं यथा –

सङ्ग्रामे निहताः शूरा वचोबाणत्वमागताः ।

अत्र वचश्शब्दो लक्षणया 'गीर्' इति शब्दस्य बोधने न समर्थः, रूढिप्रयोजनयोः एकतरस्याप्यभावात् । एवमन्यदपि ज्ञेयम् । एषु च्युतसंस्कृति–निरर्थकत्व–अवाचकत्वानि केवलं पदे एव सम्भवन्ति । अन्ये तु वाक्येऽपीति विशेषः ।

एते च दोषा वक्तृश्रोतृवाच्यव्यङ्ग्यादीनां महिम्ना क्वचित् गुणा भवन्ति क्वचिच्चादोषाः । तत्र निहतार्थत्वाप्रयुक्तत्वयोः श्लेषादौ अदोषत्वं भवति । अप्रतीतत्वस्य वक्तृश्रोत्रोः अभिज्ञत्वे स्वयं परामर्शे च तथा । अश्लीलत्वस्य सुरतारम्भगोष्ठीनिर्वेदकथादौ गुणत्वम् । एवं सन्दिग्धत्वस्य व्याजस्तुति–पर्यवसायित्वे, ग्राम्यत्वस्य अधमवाक्यगतत्वे विधेयाविमर्शस्य च भीतक्रुद्धादिवाक्यगतत्वे गुणत्वमित्यादिकं यथासम्भवं प्रकाशदर्पणादिग्रन्थेभ्यो विज्ञेयम् ।

वस्तुतस्तु अप्रतीतत्वादेः वक्तृश्रोत्रभिज्ञत्वादौ गुणत्वमिति यदुच्यते – तदसङ्गतमेव भाति, वक्तृश्रोत्रभिज्ञत्वादौ सत्यपि सहृदयस्य प्रतीत्यजननात् । न च श्रोतृपदेन तस्यैव ग्रहणमिति वाच्यम्, स्वयं वापि परामर्शे इत्यस्य असङ्गत्यापत्तेः । तस्मात् सहृदयस्य यत्र स्फुटतया प्रतीतिः तत्रादोषत्वम्, यत्र च उत्कर्षकतया तत्र गुणत्वमिति निर्णेयम् ॥

३. वाक्यगता दोषाः

पदानां समूहो वाक्यम् । तत्र स्थिता दोषा वाक्यगताः । ते च दोषा

पदसाधारणाः वाक्यमात्रगताश्चेति द्विविधाः सन्ति । क्रमेणैतेषां निरूपणं यथा –

* **पदसाधारणा दोषाः** – एते दोषाः वाक्ये यथा सम्भवन्ति तथा पदेऽपीति पदसाधारणत्वममीषाम् । ते च यथा –

१. दुःश्रवत्वं यथा –

स्मरार्त्त्यन्धः कदा लप्स्ये कार्तार्थ्यं विरहे तव ।

अत्र शृङ्गारानुगुणे वाक्ये बहूनि पदानि श्रवणयोः दुःखं जनयन्ति ।

२. अप्रयुक्तत्वं यथा –

[२७]स रातु वो दुश्च्यवनो भावुकानां परम्पराम् ।
अनेडमूकताद्यैश्च द्यतु दोषैरसम्मतान् ॥

अत्र इन्द्रार्थे दुश्च्यवनशब्दः बधिरार्थे च अनेडमूकशब्दः कोशकारैः अङ्गीकृतोऽपि कविभिः न प्रयुज्यते । दोषस्य शब्दद्वयगतत्वात् वाक्यगतत्वम् ।

३. निहतार्थत्वं यथा –

[२८]सायकसहायबाहोः मकरध्वजनियमितक्षमाधिपतेः ।
अब्जरुचिरभास्वरस्ते भातितरामवनिप! श्लोकः ॥

अत्र सायक–मकरध्वज–क्षमा–अब्जरुचि–श्लोकशब्दानां शर–स्मर–तितिक्षा–कमल–पद्यार्थेषु प्रसिद्धानां खड्ग–समुद्र–भूमि–चन्द्र–कीर्तिरूपार्थेषु अप्रसिद्धेषु प्रयोगः ।

४. अनुचितार्थत्वं यथा –

कुविन्दस्त्वं तावत्पटयसि गुणग्राममभितो
यशो गायन्त्येते दिशि दिशि वनस्थाः तव विभो! ।
शरज्ज्योत्स्नागौरस्फुटविकटसर्वाङ्गसुभगा
तथापि त्वत्कीर्तिर्भ्रमति विगताच्छादनमिह ॥

---

२७. स इन्द्रो युष्माकं कल्याणपरम्परां दिशतु । युष्माकं च शत्रून् बधिरत्वाद्यैः दोषैः नाशयतु इति श्लोकार्थः ।

२८. करवालहस्तस्य सागरपर्यन्तां मेदिनीं च शासतो भवतः कीर्तिः चन्द्रिकावद्धासमाना सातिशयं प्रतिभाति इति श्लोकार्थः ।

२९. अयं सूर्यः तावत् प्रकृष्टमेघयुक्तं गगनमवाप्य कमलानां सङ्कोचं दूरीकरोति इत्यर्थः ।

अत्र त्वं पृथ्वीपालकः सन् सर्वत्रापि गुणसमूहं पटुं करोषीति प्रकृतवाक्यार्थस्य परिसमाप्तौ व्यक्त्या शक्त्या वा 'तन्तुवायः सर्वमपि सूत्रसमूहं पटं करोति' इत्यर्थान्तरस्यापि प्रतीतिः । ततश्चाप्रस्तुतस्यार्थस्य प्रतिपादनं मा भूदिति 'राजा तन्तुवाय इव' इति सादृश्ये स्वीकृते निकृष्टत्वस्य प्रतीतिर्भवति । एवं वनस्थादिपदेऽपि ।

५. अवाचकत्वं यथा –

[२९]प्राभ्रभ्राड्विष्णुधामाप्य विषमाश्वः करोत्ययम् ।
निद्रां सहस्रपर्णानां पलायनपरायणाम् ॥

अत्र प्रशब्दस्य क्रियायोगे सत्येव प्रकर्षार्थवाचकत्वम् । इह तु अभ्रशब्दयोग इति तस्य न तदर्थप्रतिपादने सामर्थ्यम् । विष्णुपदशब्दस्य गगनरूपार्थवाचकत्वे सत्यपि न विष्णुधामशब्दस्य तदर्थप्रतिपादने सामर्थ्यम् । एवं विषमशब्दस्य समभिन्नार्थवाचकत्वे सत्यपि न सप्तरूपार्थप्रतिपादने सामर्थ्यम् । एवं निद्रादावपि शब्दे बोध्यम् ।

६. अश्लीलत्वं यथा –

१. भूपतेरुपसर्पन्ती कम्पना वामलोचना ।
तत्तत्प्रहरणोत्साहवती मोहनमादधौ ॥

२. कृतप्रवृत्तिरन्यार्थे कविर्वान्तं समश्नुते ।

३. [३०]पितृवसतिमहं व्रजामि तां सह परिवारजनेन यत्र मे ।
भवति सपदि पावकान्वये हृदयमशेषितशोकशल्यम् ॥

अत्र शत्रुषु निहितदृष्टिः सेना कम्पनशीला तत्तदायुधे समुत्सुका राजानमुपगच्छन्ती मोहमाप्नोतीति प्रकृतेऽर्थे प्रतीते सति 'स्वदर्शनशङ्कया कम्पमाना वामलोचना काचित् प्रीत्या दयितस्य प्रहारे समुत्सुका सुरतमाप्नोति' इत्यर्थान्तरस्य प्रतीतिर्भवतीति व्रीडा तावत् स्फुटा । मध्यमे तु वाक्ये

३०. पतिगृहे शोकमनुभवन्त्या वचनमिदम्–अहं सपुत्रा पितुर्गृहं गमिष्यामि यत्र पावनानां पित्रादीनां समागमे सति मम हृदये स्थितं सर्वमपि शोकशल्यं नष्टं भविष्यति इत्यर्थः । अहं सपुत्रा श्मशानं गमिष्यामि यत्र अग्निना सम्बन्धे सति मम हृदये स्थितं सर्वमपि शोकशल्यं नष्टं भविष्यति इत्यर्थान्तरम् ।

वान्तस्याशनमिति जुगुप्सा । अन्तिमे पुनः पितुर्गृहं गच्छामीत्यर्थे प्रतीते सति श्मशानं गच्छामीत्यर्थान्तरस्य प्रतीतिरिति अमङ्गलम् ।

७. सन्दिग्धत्वं यथा –

सुरालयोल्लासपरः प्राप्तपर्याप्तकम्पनः ।
मार्गणप्रवणो भास्वद्भूतिरेष विलोक्यताम् ॥

अत्र शत्रूणां नाकं प्रदर्शयितुमुत्सुकः कोपवशादवाप्तकम्पनः बाणप्रयोगव्यग्रः भासमानसम्पत्कश्चायं विलोक्यतामिति राजपरोऽर्थो विवक्षितः आहोस्वित् मदिरागारासक्तः स्वदर्शनशङ्कया कम्पमानो याचनतत्परो भस्मालङ्कृतकायोऽयमिति कपटयतिपरोऽर्थ इति सन्देहो भवति ।

८. अप्रतीतत्वं यथा –

[३१]तस्याधिमात्रोपायस्य तीव्रसंवेगताजुषः ।
दृढभूमिः प्रियप्राप्तौ यत्नः स फलितः सखे ॥

अत्र अधिमात्रतीव्रसंवेगप्रभृतयः शब्दाः योगशास्त्रमात्रे प्रसिद्धा इति न सर्वेषां तदर्थप्रतीतिः ।

९. ग्राम्यत्वं यथा –

ताम्बूलभृतगल्लोऽयं भल्लं जल्पति मानुषः ।
करोति खादनं पानं सदैव यथा तथा ॥

अत्र गल्ल–भल्लादयः शब्दा ग्राम्याः ।

१०. नेयार्थत्वं यथा –

उद्यत्कमललौहित्यैः रत्नाभिर्भूषिता तनुः ।

अत्र कमललौहित्यशब्देन पद्मरागस्य वक्त्राशब्देन वामानां च लक्षणया बोधः रूढिप्रयोजनयोरभावेऽपि ।

---

३१. योगी मृदुः मध्यः अधिमात्रोपायश्चेति प्रथमं त्रिविधः । ततः प्रत्येकं मृदुः मध्यः तीव्रसंवेगश्चेति त्रिविधः । एवं योगी नवविधः । तत्राधिमात्रोपायं प्रति कस्यचिदुक्तिः – अये! अधिमात्रोपायस्य तीव्रसंवेगस्य भवतो मोक्षप्राप्तौ यो निरन्तरः प्रयत्नः स किं फलितः? इत्यर्थः ।

११. क्लिष्टत्वं यथा –

धम्मिल्लस्य न कस्य प्रेक्ष्य निकामं कुरङ्गशावाक्ष्याः ।
रज्यत्यपूर्वबन्धव्युत्पत्तेर्मानसं शोभाम् ॥

अत्र अन्वययोग्यानामव्यवस्थिततया निपातात् 'कुरङ्गशावाक्ष्या अपूर्वबन्ध-व्युत्पत्तेः धम्मिल्लस्य शोभां प्रेक्ष्य कस्य मानसं न रज्यति' इत्यन्वये महान् क्लेशः ।

१२. अविमृष्टविधेयांशभावो यथा –

न्यक्कारो ह्ययमेव यदरयः ।

अत्र अयमेव न्यक्कार इति उद्देश्यविधेयभावस्य सद्भावात् द्वयोः पदयोः यत्पौर्वापर्यं नियतम् तदत्र विपर्यस्तम् । वर्तते तावन्नियमः यत् उद्देश्यस्य प्रथमं प्रयोगः विधेयस्य च पश्चात्, तदुक्तं कुमारिलभट्टैः –

अनुवाद्यमनुक्त्वैव न विधेयमुदीरयेत् ।
नह्यलब्धास्पदं किञ्चित्कुत्रचित् प्रतितिष्ठति ॥

अत एव यत्रोद्देश्यविधेयभावो वर्तते तत्रोद्देश्यपूर्वक एव प्रयोगः, यथा – मुखं चन्द्रः ॥ यत्र तु न तथा तत्र स्वाच्छन्द्यम्, यथा – देवदत्तो गच्छति ग्रामम्, देवदत्तो ग्रामं गच्छति ॥ अत्र हि देवदत्तस्योद्देश्यत्वं ग्रामगमनस्य च विधेयत्वम् । अत एव तत्र विपर्ययेण प्रयोगोऽपि न दोषाय । ननु न्यक्कार इत्यत्र एवकारस्यापि सत्त्वात् पदद्वयमित्यसङ्गतम् – मैवम्, स्वातन्त्र्येण प्रयोक्तुमशक्यत्वात् तस्यापदत्वेन परिगणय्येत्थं व्यवहार इति दोषाभावः । न चात्र एकतरस्यैव पदस्य स्थानान्तरगतत्वात् दोषस्य पदगतत्वमिति वाच्यम्, पदार्थयोः हि उद्देश्यविधेयभावापन्नत्वेन अन्यस्योद्देश्यत्वेन स्थानान्तरप्राप्तौ अन्यस्य विधेयत्वेन स्थानान्तरप्राप्तिः अवश्यं भवति ।

एवं 'यत्तदोर्नित्यसम्बन्धः' इति न्यायेन यत्र यच्छब्दस्य प्रयोगः तत्र समानलिङ्गविभक्तिकतया तच्छब्दस्य तदर्थकानाम् इदमेतददःशब्दानां वा व्यवधानेन प्रयोगोऽवश्यं कर्तव्यः, अव्यवधानेन प्रयोगे तु निराकाङ्क्षत्वप्रतीतिः न भवतीत्ययं दोषो भवति, यथा –

आनन्दयति ते नेत्रे योऽसौ सुभ्रु! समागतः ।

अत्र यच्छब्दात् परम् अदःशब्दस्य प्रयोगेऽपि न व्यवधानेनेति भवत्येवायं दोषः । यदि पुनः

आनन्दयति ते नेत्रे योऽधुनासौ समागतः ।

इति परिवर्त्यते तर्हि अधुनाशब्देन व्यवधानमिति नायं दोषः । यत्र तु तच्छब्दस्य तदर्थकशब्दान्तरस्य वा भिन्नलिङ्गवचनकतया प्रयोगः तत्राव्यवधानेन प्रयोगोऽपि न दोषाय व्यवधानेन तु नतराम्, यथा –

विभाति मृगशावाक्षी येदं भुवनभूषणम् ।
या भाति मृगशावाक्षी तदिदं भूमिभूषणम् ।
इन्दुर्विभाति यस्तेन दग्धाः पथिकयोषितः ।
इन्दुर्यो भासते तेन दग्धाः पथिकयोषितः ।

अत्र प्रथमे वाक्ये इदंशब्दस्य भिन्नलिङ्गकस्याव्यवधानेन प्रयोगः द्वितीये तु व्यवधानेन । तृतीये तच्छब्दस्य भिन्नविभक्तिकस्याव्यवधानेन चतुर्थे तु तस्यैव व्यवधानेन ।

ननु यदि यत्तदोर्नित्यसम्बन्धः तर्हि यत्रैकतरस्य प्रयोगः तत्र सर्वत्रापि दोषः स्यात् – मैवम्, यत्र यच्छब्दस्योत्तरवाक्यगतत्वेन प्रयोगः तत्र पूर्ववाक्ये तच्छब्दार्थस्यार्थतः सिद्धिरिति न दोषः, यथा –

आत्मा जानाति यत्पापम् ।

अत्र यच्छब्दस्योत्तरवक्ये प्रयोगः । एवं तच्छब्दस्य प्रक्रान्तप्रसिद्ध-स्मर्यमाणार्थकत्वे यच्छब्दस्याप्रयोगेऽपि न दोषः, यथा –

• स हत्वा वालिनं वीरः तत्पदे चिरकांक्षिते ।
  धातोः स्थान इवादेशं सुग्रीवं सन्न्यवेशयत् ॥
• स वः शशिकलामौलिः तादात्म्यायोपकल्पताम् ।
• तामिन्दुसुन्दरमुखीं हृदि चिन्तयामि ।

अत्राद्ये तच्छब्दस्य प्रक्रान्तार्थप्रतिपादकत्वम्, मध्यमे प्रसिद्धार्थ-प्रतिपादकत्वम्, अन्त्ये तु स्मर्यमाणार्थप्रतिपादकत्वम् । एवं यत्र यच्छब्दस्य

द्विः प्रयोगः तत्र तच्छब्दस्य द्विरिव सकृत्प्रयोगोऽपि वर्तते, यथा –

यद्यद्विरहदुःखं मे तत्को दूरीकरिष्यति ।

एवमन्यदपि बोध्यम् ।

१३. विरुद्धमतिकृत्त्वं यथा –

श्रितक्षमा रक्तभुवः शिवालिङ्गितमूर्तयः ।
विग्रहक्षपणेनाद्य शेरते ते गतासुखाः ॥

अत्र 'सहनाशीला अनुरक्तलोका मङ्गलालङ्कृतकायाः पुरुषाः शरीरशोषणेन विनष्टदुःखाः सुखं शेरते' इत्यर्थस्य प्रतीतौ 'पुरुषा भूमिमाश्लीष्टा रुधिरेण तामाद्रीकुर्वन्तः शृगाल्यालिङ्गितकायाः शरीरनाशेन प्रणष्टप्राणेन्द्रियाश्च शेरते' इति विरुद्धस्यार्थान्तरस्य प्रतीतिः भवति । एवमन्येऽपि दोषा यथासम्भवम् अनुसन्धेयाः ।

* वाक्यमात्रगता दोषाः

ये पुनर्दोषाः केवलं वाक्ये एव सम्भवन्ति ते वाक्यमात्रगताः। ते च प्रकाशकारेणैतावन्तो निगदिताः –

[३२]प्रतिकूलवर्णमुपहतलुप्तविसर्गं विसन्धि हतवृत्तम् ।
न्यूनाधिककथितपदं पतत्प्रकर्षं समाप्तपुनरात्तम् ॥
अर्धान्तरैकवाचकमभवन्मतयोगमनभिहितवाच्यम् ।
अपदस्थसमासं सङ्कीर्णं गर्भितं प्रसिद्धिहतम् ॥
भग्नप्रक्रममक्रमममतपरार्थं च वाक्यमेव तथा ।

दर्पणकारेण तु विसन्धित्वस्य स्थाने सन्धिविश्लेषः सन्ध्यश्लीलत्वं सन्धिकष्टत्वं चेति त्रयः स्वतन्त्रा दोषाः स्वीकृता इति विशेषः । क्रमेण यथा –

१. प्रतिकूलवर्णत्वम् – वर्णानां विवक्षितार्थे प्रातिकूल्यम्, यथा –

अकुण्ठोत्कण्ठया पूर्णमाकण्ठं कलकण्ठि! माम् ।
कम्बुकण्ठ्या क्षणं कण्ठे कुरु कण्ठार्तिमुद्धर ॥

३२. का. प्र. स. उ. का–५३,५४,५५.

अत्र शृङ्गारे ठकारादयो वर्णाः प्रतिकूलाः । एवं रौद्रादौ नकारादयः ।

२. आहतविसर्गत्वम् – विसर्गाणाम् ओभावप्राप्तिः, यथा –

धीरो वरो नरो याति ।

अत्र प्रत्ययभूतरेफस्य [३३]हशि च इत्युत्वे आद्गुण इति गुणे ओकारस्य श्रवणम् ।

३. लुप्तविसर्गत्वम् – विसर्गाणां लोपः, यथा –

गता निशा इमा बाले ।

अत्र [३४]भोभगोअघोअपूर्वस्य योऽशीति सूत्रेण यकारे तस्य हलि सर्वेषामिति लोपे विसर्गस्य श्रवणाभावः ।

४. विसन्धित्वम् – सन्धेरकरणं करणेन च कष्टत्वम् । अकरणं च शास्त्रीयम् ऐच्छिकं चेति द्विविधम् । तत्राद्यमसकृच्चेदेव दोषः । अन्त्यं तु सकृदपीति विशेषः । क्रमेण यथा –

दलिते उत्पले एते अक्षिणी अमलाङ्गि! ते ।

वासवाशामुखे भाति इन्दुश्चन्दनबिन्दुवत् ।

उर्व्यसावत्र तर्वाली मर्वन्ते चार्वस्थितिः ।

अत्राद्ये [३५]ईदूदेद्द्विवचनं प्रगृह्यमिति प्रगृह्यसंज्ञायां [३६]प्लुतप्रगृह्या अचि नित्यमिति प्रकृतिभावः । मध्यमे भाति इन्दुरिति सन्धेरकरणम् ऐच्छिकम् । अन्त्ये तु तत्करणादसौष्टवम् ।

५. हतवृत्तत्वम् – लक्षणानुसरणेऽपि अश्रव्यत्वम्, अप्राप्तगुरुभावान्तलघुत्वम्, रसाननुगुणत्वं च । क्रमेण यथा –

- हन्त सततमेतस्या हृदयं भिन्ते मनोभवः कुपितः ।
- विकसितसहकारभारहारिपरिमल एष समागतो वसन्तः ।
- अयि मायि मानिनि! मा कुरु मानम् ।

अत्राद्ये

३३. अष्ट. ६.१.११४. ३४. अष्ट. ८.३.१७.
३५. अष्ट. १.१.११. ३६. अष्ट. ६.१.१२५.

यस्याः पादे प्रथमे द्वादशमात्राः तथा तृतीयेऽपि ।
अष्टादश द्वितीये चतुर्थके पञ्चदश सार्या ।

इति नियमानुसारेण आर्यावृत्तस्य लक्षणेऽनुसृतेऽपि हन्त! सततमेतस्या इत्यत्रानुष्टुभोऽपि लक्षणं दृश्यते । द्वितीये प्रथमपादान्तस्य लघोः गुरुभावो न प्राप्नोति । यद्यपि ३७'वा पादान्ते त्वसौ ग्वक्रः' इति पादान्तस्य लघोरपि गुरुभावोऽनुशिष्टः किन्तु स वसन्ततिलकादिषु वृत्तेष्वेव न तु प्रकृतपुष्पिताग्रादौ। प्रमुदितसौरभ आगतो वसन्त इति न्यासे तु संयोगस्य परत्वात् लघोः गुरुभाव इति दर्पणकारः। तृतीये तु वृत्तं हास्यरसस्यैवानुकूलं न तु शृङ्गारादेः।

६. न्यूनपदत्वम् – विवक्षितार्थप्रतिपादनाय यावन्ति पदानि अपेक्षितानि तेषु एकस्य द्वयोर्वा विरहः, यथा –

यदि मय्यर्पिता दृष्टिः किं ममेन्द्रतया तदा ।

अत्र त्वयेति पदं न्यूनम् । ननु तस्याध्याहारो भविष्यतीति नास्ति दोष इति चेत् – मैवम्, तयेत्यादीनामपि सम्भवेन तस्यैवाध्याहारे मानाभावात् ।

७. अधिकपदत्वम् – प्रागुक्तस्य वैपरीत्यम्, यथा –

पल्लवाकृतिरक्तोष्ठी ।

अत्राकृतिपदमधिकम् ।

८. कथितपदत्वम् – प्रयुक्तस्य पदस्य पुनः प्रयोगः, यथा –

रतिलीलाश्रमं भिन्ते सलीलमनिलो वहन् ।

अत्र लीलेति पदं पुनः प्रयुक्तम् । तदर्थे विलासादिपदान्तरस्य प्रयोगे न दोषः ।

९. पतत्प्रकर्षता – उत्तरोत्तरं बन्धस्य शैथिल्यम्, यथा –

३८प्रोज्ज्वलज्ज्वलनज्वालाविकटोरुसटाच्छटः ।
श्वासाक्षिप्तकुलक्ष्माभृत् पातु वो नरकेसरी ॥

अत्र क्रमेणानुप्रासस्य प्रकर्षः पतितः ।

१०. समाप्तपुनरात्तत्वम् – वाक्यस्य समाप्तावपि निरर्थकस्य विशेषणस्य उपादानम्, यथा –

३७. वृत्त. प्र.अ. का–९. ३८. रस. प्र.आ. अधमकाव्यस्योदाहरणम् ।

नाशयन्तो घनध्वान्तं तापयन्तो वियोगिनः ।
पतन्ति शशिनः पादा भासयन्तः क्षमातलम् ॥

अत्र शशिनः पादः पतन्तीति वाक्यसमाप्तावपि भासयन्तः क्षमातलमिति वाक्यरूपविशेषणस्य पुनरुपादानम् । न तेनार्थेन प्रकृते किञ्चित् प्रयोजनम् । निरर्थकस्य पदस्योपादाने अधिकपदत्वम् वाक्यस्योपादाने तु इदमिति भेदः ।

११. अर्धान्तरैकवाचकता – वाक्यसम्बन्धिनः पदस्यार्धान्तरेऽवस्थानम्, यथा –

इन्दुर्विभाति कर्पूरगौरैर्धवलयन् करैः ।
जगन्मा कुरु तन्वङ्गि! मानं पादानते प्रिये! ॥

अत्र प्रथमवाक्यान्वयिनो जगदिति शब्दस्योत्तरार्धे प्रयोगः ।

१२. अभवन्मतयोगः – यस्य येनार्थेन सम्बन्धोऽभिप्रेतः तस्य तदभावः, यथा –

या जयश्रीर्मनोजस्य यया जगदलङ्कृतम् ।
यामेणाक्षीं विना प्राणा विफला मे कुतोऽद्य सा ॥

अत्र यच्छब्दघटितानां वाक्यानाम् एणाक्षीशब्देन सम्बन्ध इष्टः किन्तु तस्य तृतीयवाक्यान्तर्गतत्वात् स न सिध्यति । यां विनामी वृथा प्राणा एणाक्षी सा कुतोऽद्य मे इति पाठे तु दोषाभाव इति दर्पणकारः ।

१३. अनभिहितवाच्यम् – द्योतकपदस्याप्रयोगः, यथा –

व्यतिक्रमलवं कं वीक्ष्य वामाक्षि! कुप्यसि ।

अत्र व्यतिक्रमस्य लवमपि कमिति अवश्यमपिशब्दः प्रयोक्तव्यः अन्यथा मयि व्यतिक्रमलवा बहवः सन्ति तेषु कं वीक्ष्य कुप्यसीति अनिष्टार्थस्य प्रतीतिप्रसङ्गः ।

१४. अपदस्थपदत्वम् – अस्थाने पदस्य प्रयोगः, यथा –

[३९]तीर्थे तदीये गजसेतुबन्धात्प्रतीपगामुत्तरतोऽस्य गङ्गाम् ।
अयत्नबालव्यजनीबभूवुर्हंसा नभोलङ्घनलोलपक्षाः ॥

अत्र तदीय इति पदात् पूर्वं गङ्गापदस्य प्रयोगो युक्तः । यथास्थितपाठे तु तदित्यनेन कस्यार्थस्य परामर्श इति न ज्ञायते ।

३९. रघु. सर्गः–६. श्लोकः–३३ .

१५. अस्थानस्थसमासत्वम् – अस्थाने समासस्य सद्भावः, यथा –

अद्यापि स्तनशैलदुर्गविषमे सीमन्तिनीनां हृदि
स्थातुं वाञ्छति मान एष क्रोधादिवालोहितः ।
प्रोद्यद्दूरप्रसारितकरः कर्षत्यसौ तत्क्षणात्
फुल्लत्कैरवकोशनिस्सरदलिश्रेणीकृपाणं शशी ॥

अत्र क्रुद्धस्य वचने समासो न कृतः कवेर्वचने तु कृतः ।

१६. सङ्कीर्णत्वम् – वाक्यान्तरपदस्य वाक्यान्तरेऽनुप्रवेशः, यथा –

चन्द्रं मुञ्च कुरङ्गाक्षि! पश्य मानं नभोङ्गने ।

अत्र नभोऽङ्गने चन्द्रं पश्य मानं मुञ्चेत्यन्वयः ।

१७. गर्भितत्वम् – वाक्यान्तरे वाक्यान्तरस्यानुप्रवेशः, यथा –

रमणे चरणप्रान्ते प्रणतिप्रवणेधुना ।
वदामि सखि! तत्त्वं ते कदाचिन्नोचिताः क्रुधः ॥

अत्र 'वदामि सखि! तत्त्वं ते' इति वाक्यं वाक्यान्तरमनुप्रविष्टम् ।

१८. प्रसिद्धिहतत्वम् – प्रसिद्धेरनादरः, यथा –

घोरो वारिमुचां रवः ।

अत्र रवशब्दो मण्डूकादिषु प्रसिद्धः । वारिमुक्षु पुनः गर्जितादिः ।

१९. भग्नप्रक्रमत्वम् – क्रमस्य भङ्गः, यथा –

एवमुक्तौ मन्त्रिमुख्यैः रावणः प्रत्यभाषत ।

अत्र वचधातुना प्रक्रान्तस्य तेनैव धातुनोपसंहार उचितः न तु भाषधातुना। एवम् ४०'उदेति सविता ताम्रः ताम्र एवास्तमेति च' इति वाक्ये द्वितीयताम्र-शब्दस्य स्थाने रक्तादिशब्दस्य प्रयोगेऽप्ययमेव दोषो बोद्धव्यः ।

२०. अक्रमत्वम् – क्रमस्याभावः, यथा –

द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिनः ।
कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी ॥

अत्र समुच्चेयस्य युष्मदर्थस्य पश्चादेव चशब्दस्य प्रयोगो युक्तः न तु

४०. सम्पत्तौ च विपत्तौ च महतामेकरूपता इत्युत्तरार्धम् ।

अतथाभूतस्य लोकरूपार्थस्य ।

२१. अमतपरार्थता – अर्थान्तरस्य प्रकृतार्थानुपस्कारकत्वात् अनभिमतत्वम्, यथा –

रामामन्मथशरेण ताडिता दुस्सहेन हृदयेन निशाचरी ।
गन्धवद्रुधिरचन्दनोचिता जीवितेशवसतिं जगाम सा ॥

अत्र प्रतिपाद्यस्य बीभत्सस्य विरोधित्वात् शृङ्गाररसरूपमर्थान्तरम् अनभिमतम् ।

* दोषेषु विशेषविचारः

अत्र विचार्यते – एषां सर्वेषां दोषाणां यथावत् स्वीकारो न साधुरिति प्रतिभाति, तथाहि – प्रतिकूलवर्णत्वं पतत्प्रकर्षत्वम् अस्थानस्थसमासत्वं चेति ये त्रयो दोषाः तेषां प्रागुक्तात् रीतिभङ्गाख्यात् दोषात् न व्यतिरेकः । रीतिभङ्गो नाम तत्तद्रसोचिताया रीतेरननुसरणम् । अकुण्ठोत्कण्ठयेत्यत्र सत्यपि शृङ्गाररसे तदनुगुणाया वैदर्भ्या अननुसरणम् । प्रोज्जलज्ज्वलनज्वलेत्यत्र उद्धतार्थस्य सत्त्वात् तदनुगुणाया गौडीयाया आदौ अनुसरणेऽपि पर्यन्ते त्यागः । एवम् अद्यापि स्तनशैलदुर्गविषमेति पद्ये कोपिनो वचनेऽनुगुणाया अपि गौडीयाया अननुसरणम्, कवेः वचने अननुगुणाया अपि तस्या अनुसरणम् ।

एवमनभिहितवाच्यत्वस्य न्यूनपदत्वात् न व्यतिरेकः । यद्यपि एकत्र वाचकस्याभावः अन्यत्र द्योतकस्येति भेदः तथापि न तस्य स्वतन्त्रप्रभेदत्वनिर्णये प्रयोजकत्वं युक्तमिति ऐक्यमेव साधु ।

एवमुपहतविसर्गत्वलुप्तविसर्गत्वयोः स्वातन्त्र्येण परिगणनं नातीव समञ्जसम्, उभयत्रापि विसर्गयोग्यरेफविकारस्य समानत्वात् । स्यान्नाम एकत्र रेफस्य उकारः अन्यत्र लोप इति वैलक्षण्यम् तथापि न तस्य स्वतन्त्रप्रभेदत्वनिर्णये प्रयोजकत्वम् । ततश्च निर्णयस्य कस्यचित् सामान्य-प्रभेदस्य अवान्तरप्रभेदत्वमेव तयोर्युक्तम् । इत्थं वाक्यमात्रगता दोषा अष्टादशेति अस्माकं मतं स्थितम् ।

एषु दोषेषु न्यूनपदत्वं भीतक्रुद्धानन्दमग्नादीनां वचने गुणो भवति । अधिकपदत्वम् अर्थविशेषस्य अभिव्यक्तौ, कथितपदत्वं च विहितस्यानुवाद्यत्वे

विषादे विस्मये क्रोधे दैन्ये दयायां सान्त्वने हर्षे निश्चये लाटानुप्रासे च गुणः। गर्भितत्वम् अवश्यप्रतिपादनीयस्यार्थस्य प्रतिपादने गुणः। समाप्तपुनरात्तत्वं तु वाक्यान्तरत्वेनैव अन्यस्योपादाने न गुणः नापि दोष इति विवेकः।

४. अर्थगता दोषाः –

अर्थे स्थिता दोषाः अर्थदोषाः। प्रकाशकारेण तावत् इमे दोषाः पुनरर्थगतत्वेन निगदिताः –

[४१]अर्थोऽपुष्टः कष्टो व्याहतपुनरुक्तदुष्क्रमग्राम्याः।
सन्दिग्धो निर्हेतुः प्रसिद्धिविद्याविरुद्धश्च॥

अनवीकृतः सनियमानियमविशेषाविशेषपरिवृत्ताः।
साकाङ्क्षोऽपदयुक्तः सहचरभिन्नः प्रकाशितविरुद्धः॥

विध्यनुवादयुक्तः त्यक्तपुनःस्वीकृतोऽश्लीलः।

दर्पणकारेणापि एतावन्त एव दोषाः निर्णीताः। तेषामुदाहरणानि यथा –

१. अपुष्टार्थत्वम् – प्रकृतानुपयोगी अर्थः, यथा –

विलोक्य वितते व्योम्नि चन्द्रं मुञ्च रुषं प्रिये।

अत्र रोषत्यागे चन्द्रदर्शनमात्रं पर्याप्तम्। चन्द्रे यत् व्योमाधिकरणकत्वं व्योम्नि विततत्वं च तद्रोषत्यागेऽनुपयुक्तम्।

२. कष्टत्वम् – क्लेशेन प्रत्येयत्वम्, यथा –

वर्षत्येतदहर्पतिर्न तु घनो धामस्थमच्छं पयः
सत्यं सा सवितुः सुता सुरसरित्पूरो यया प्लावितः।
व्यासस्योक्तिषु विश्वसित्यपि न कः श्रद्धा न कस्य श्रुतौ
न प्रत्येति तथापि मुग्धहरिणी भास्वन्मरीचिष्वपः॥

अत्र यस्मात् दृष्टेः यमुनायाश्चोत्पत्तिः तादृशस्य सूर्यस्य तत्किरणानां च जलरूपत्वम् अवश्यं स्वीकरणीयम् किन्तु अस्या मुग्धहरिण्याः तत्र तादृशी बुद्धिरेव नोत्पद्यत इति प्रकृत एवार्थो महता क्लेशेन विज्ञायते दूरे पुनः अप्रकृतः।

४१. का.प्र. स.उ. का–५५,५६,५७.

३. व्याहतत्वम् – पूर्वं प्रतिपादितस्यार्थस्य परेण बाधनम्, यथा –

हरन्ति हृदयं यूनां न नवेन्दुकलादयः ।
वीक्ष्यते यैरियं तन्वी लोकलोचनचन्द्रिका ॥

अत्र येषामिन्दुकला नानन्दहेतुः तेषामेव तज्ज्योत्स्नारूपेयं तन्वी आनन्दहेतुरिति प्रतिपादनेन परेण पूर्वार्धस्य बाधनम् ।

४. पुनरुक्तत्वम् – ज्ञातस्याप्यर्थस्य पुनर्ज्ञापनम्, यथा –

सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ॥

अत्राविवेकः परमापदां पदमित्युक्ते विवेकः सम्पदां पदमिति स्वयं ज्ञायते तथापि उत्तरार्धेन तस्यार्थस्य पुनः प्रतिपादनम् ।

५. दुष्क्रमत्वम् – क्रमस्य भङ्गः, यथा –

देहि मे वाजिनं राजन्! गजेन्द्रं वा मदालसम् ।

न्यूनाधिकमूल्ययोः वस्तुनोः प्रथममधिकमूल्यस्य याचनं ततो न्यूनस्येति क्रमः । स चात्र त्यक्तः ।

६. ग्राम्यता – ग्रामीणजनव्यवहारविषयत्वम्, यथा –

स्वपिहि त्वं समीपे मे स्वपिम्येवाधुना प्रिये ।

अत्रार्थो ग्राम्यः ।

७. सन्दिग्धत्वम् – सन्देहविषयीभूतत्वम्, यथा –

मात्सर्यमुत्सार्य विचार्य कार्यमार्याः समर्यादमुदाहरन्तु ।
सेव्या नितम्बाः किमु भूधराणामुत स्मरस्मेरविलासिनीनाम् ॥

अत्र प्रकरणाद्यभावात् शान्तशृङ्गारिणोः को वक्तेति सन्देहः । ननु प्रकरणज्ञाने सति निश्चयो भविष्यति – मैवम्, विकल्पद्वयस्यासङ्गत्यापत्तेः । एवं तर्हि तटस्थस्य वचनमिति चेत् – न, तस्यैतादृशवाक्ये प्रवृत्त्यभावात् ।

८. निर्हेतुत्वम् – कारणाभावः, यथा –

गृहीतं येनासीः परिभवभयान्नोचितमपि
प्रभावाद्यस्याभून्न खलु तव कश्चिन्न विषयः ।

परित्यक्तं तेन त्वमपि सुतशोकान्न तु भयाद्
विमोक्ष्ये शस्त्र! त्वामहमपि यतः स्वस्ति भवते ॥

अत्र द्वितीये शस्त्रत्यागे कारणं नोक्तम् ।

९. प्रसिद्धिविरुद्धत्वम् – प्रसिद्धेरननुसरणम्, यथा –

ततश्चचार समरे शितशूलधरो हरिः ।

अत्र हरेः शूलधारणं न प्रसिद्धम् ।

१०. विद्याविरुद्धत्वम् – शास्त्रविरोधः, यथा –

अधरे करजक्षतं मृगाक्ष्याः ।

अत्राधरे नखक्षतं कामशास्त्रेण विरुद्धम् ।

११. अनवीकृतत्वम् – प्रतिपादनवैचित्र्यविरहः, यथा –

सदा चरति खे भानुः सदा वहति मारुतः ।
सदा धत्ते भुवं शेषः सदा धीरोऽविकत्थनः ॥

नवीकृतत्वं यथा शाकुन्तले –

भानुः सकृद्युक्ततरङ्ग एव रात्रिन्दिवं गन्धवहः प्रयाति ।
शेषः सदैवाहितभूमिभारः षष्ठांशवृत्तेरपि धर्म एषः ॥

१२. नियमेऽनियमः – नियमे कर्तव्ये तदकरणम्, यथा –

आपातसुरसे भोगे निमग्नाः किं न कुर्वते ।

अत्र आपात एव सुरस इति नियमः कर्तव्यः ।

१३. अनियमे नियमः – अनियमे कर्तव्ये नियमः, यथा –

आवर्त एव नाभिस्ते नेत्रे नीलसरोरुहे ।
भङ्गाश्च वलयास्तेन त्वं लावण्याम्बुवापिका ॥

अत्र आवर्त एव नाभिरिति नियमो न कर्तव्यः ।

१४. विशेषेऽविशेषः – विशेषे वक्तव्ये सामान्यस्य वचनम्, यथा –

यान्ति नीलनिचोलिन्यो रजनीष्वभिसारिकाः ।

अत्र तमिस्रासु इति विशेषे वक्तव्ये रजनीष्विति सामान्यस्य वचनम् ।

१५. अविशेषे विशेषः – सामान्ये वक्तव्ये विशेषस्य वचनम्, यथा –

हीरकाणां निधेरस्य सिन्धोः किं वर्णयामहे ।

अत्र रत्नानामिति सामान्ये वक्तव्ये हीरकाणामिति विशेषस्य वचनम् ।

१६. साकाङ्क्षत्वम् – आकाङ्क्षाया अनुपशमनम्, यथा –

ऐशस्य धनुषो भङ्गं क्षत्त्रस्य च समुन्नतिम् ।
स्त्रीरत्नं कथं नाम मृष्यते भार्गवोऽधुना ॥

अत्र स्त्रीरत्नशब्दश्रवणे समुत्थिताया आकाङ्क्षाया उपशमनाभावः । उपेक्षितुमिति प्रयोगे उपशमनं भविष्यति । किन्तु तदा क्रमस्य भङ्गो भवति। तस्मात् 'स्त्रीरत्नस्य तिरस्कारं मृष्यते भार्गवः कथम्' न्यासे दोषाभावः।

१७. अपदयुक्तत्वम् – अस्थाने समाप्तिः, यथा –

आज्ञा शक्रशिखामणिप्रणयिनी शास्त्राणि चक्षुर्नवं
भक्तिर्भूतपतौ पिनाकिनि पदं लङ्केति दिव्या पुरी
उत्पत्तिर्द्रुहिणान्वये च तदहो नेदृग्वरो लभ्यते
स्याच्चेदेष न रावणः क्व नु पुनः सर्वत्र सर्वे गुणाः ॥

अत्र न रावण इत्येतावतैव समापनीयम् । क्व नु पुनः सर्वत्र सर्वे गुणा इत्यनेन समाप्तौ तु 'दोषाः अपि केचन स्युः' इत्यार्थान्तरस्य प्रतीत्या 'निर्दोषत्वात् सीताया अयमेव योग्यो वरः' इति वक्त्रभिप्रेतस्य अर्थस्य असिद्धिप्रसङ्गः ।

१८. सहचरभिन्नत्वम् – अर्थस्य अननुरूपेण साहचर्यम्, यथा –

सज्जनो दुर्गतौ मग्नः कामिनी गलितस्तनी ।
खलः पूज्यः समज्यायां तापाय मम चेतसः ।

अत्र निकृष्टस्य उत्कृष्टाभ्यां सज्जनकामिनीभ्यां तापजननविषये साहचर्यम्।

१९. प्रकाशितविरुद्धत्वम् – यस्तावदर्थः प्रतिपिपादयिषितः तद्विरुद्धार्थस्य प्रतिपादनम्, यथा –

कुमारस्ते नराधीश! श्रियं समधिगच्छतु ।

अत्र राज्ञः चिरं जीवनं कामयमानस्य कस्यचिद्वाक्ये 'त्वत्पुत्रः साम्राज्यश्रियं प्राप्नोतु' इत्युक्तौ त्वं म्रियस्वेति अनभिमतस्यार्थस्य प्रतीतिः।

२०. विध्ययुक्तत्वम् – विधेयस्याविमर्शः, यथा –

आनन्दितस्वपक्षोऽसौ परपक्षान् हनिष्यति ।

अत्र परपक्षं निहत्य स्वं पक्षं नन्दयिष्यति इति युक्तम् । तस्मात् 'विध्वस्तपरपक्षोऽसौ स्वपक्षं नन्दयिष्यति' इति न्यासे दोषाभावः ।

२१. अनुवादायुक्तत्वम् – अनूद्यमानस्यार्थस्य प्रकृतार्थबाधकत्वम्, यथा –

चण्डीशचूडाभरण चन्द्र लोकतमोपह ।
विरहिप्राणहरण कदर्थय न मां वृथा ॥

अत्र विरहिवाक्ये विरहिप्राणहरणेति अनूद्यमानोऽर्थः प्रकृतं चतुर्थपादार्थं बाधते ।

२२. त्यक्तपुनःस्वीकृतत्वम् – वाक्यसमाप्तावपि पुनरुपादानम्, यथा –

लग्नं रागावृताङ्ग्या सुदृढमिह ययैवासियष्ट्यारिकण्ठे
मातङ्गानामपीहोपरि परपुरुषैर्या च दृष्टा पतन्ती ।
तत्सक्तोऽयं न किञ्चिद्गणयति विदितं तेऽस्तु तेनास्मि दत्ता
भृत्येभ्यः श्रीनियोगाद्गदितुमिति गतेवाम्बुधिं यस्य कीर्तिः ॥

अत्र तत्सक्तो न मां गणयतीति वक्तव्यमर्थमभिधाय विदितं तेऽस्तु इति वाक्यं समापितमपि 'तेनास्मि दत्ता भृत्येभ्यः' वक्तव्यार्थान्तरोपन्यासेन वाक्यस्य पुनरुपादानम् ।

वस्तुतस्तु अपदयुक्तत्वात् त्यक्तपुनःस्वीकृतत्वं न व्यतिरिच्यते, उभयत्रापि अस्थाने समाप्तिरित्यस्य तुल्यत्वात् । एवं प्रकाशितविरुद्धत्वात् अनुवादायुक्तत्वमपि तथा, प्रकृतबाधकार्थान्तरोपन्यासस्य उभयत्र समानत्वात् । प्रकाशकारादिभिः तु विध्ययुक्तत्वप्रतिद्वन्द्वितया दोषोऽयमुक्तः स्यादिति प्रतिभाति । एवमर्थदोषा विंशतिरित्यस्माकं मतं स्थितम् ।

एषु अर्थविशेषप्रतिपत्तौ पुनरुक्तत्वं न दोषः, यथा – धनुर्ज्या इत्युक्ते धनुष्यायत्ता रज्जुरिति अर्थविशेषस्य प्रतिपत्तिः भवति । ग्राम्यत्वमधमवचने, निर्हेतुत्वं कारणस्य प्रसिद्धत्वे, कविसमयसिद्धत्वे ख्यातिविरुद्धत्वं च न दोष इति यथासम्भवमाकरेभ्यो विज्ञेयम् ।

५. रसगता दोषाः

विभावानुभावव्यभिचारिसंयोगात् रसस्य निष्पत्तिः । तत्र स्थिताश्च दोषाः त्रयोदशेति प्रकाशकारः । अर्थानौचित्येन सह चतुर्दशेति दर्पणकारः । ते च यथा –

[४२]रसस्योक्तिः स्वशब्देन स्थायिसञ्चारिणोरपि ।
परिपन्थिरसाङ्गस्य विभावादेः परिग्रहः ॥
आक्षेपः कल्पितः कृच्छादनुभावविभावयोः ।
अकाण्डे प्रथनच्छेदौ तथा दीप्तिः पुनः पुनः ॥
अङ्गिनोऽननुसन्धानमनङ्गस्य च कीर्तनम् ।
अतिविस्तृतिरङ्गस्य प्रकृतीनां विपर्ययः ॥
अर्थानौचित्यमन्यच्च दोषा रसगताः स्मृताः ।

तत्र रसस्य स्वशब्देनोक्तिः यथा –

तामुद्वीक्ष्य कुरङ्गाक्षीं रसो नः कोऽप्यजायत ।
चन्द्रमण्डलमालोक्य शृङ्गारे मग्नमन्तरम् ॥

अत्र साधारणेन विशेषेण च शब्देन रसस्य प्रतिपादनम् । स्थायिनः सा यथा –

अजायत रतिस्तस्याः त्वयि लोचनगोचरे ।

व्यभिचारिणः सा पुनः यथा –

जाता लज्जावती मुग्धा प्रियस्य परिचुम्बने ।

परिपन्थिरसाङ्गस्य विभावादेः परिग्रहो यथा –

मानं मा कुरु तन्वङ्गि! ज्ञात्वा यौवनमस्थिरम् ।

अत्र शृङ्गारे शान्तरसविभावस्य परिग्रहः । अनुभावस्य कष्टेन कल्पनं यथा –

धवलयति शिशिररोचिषि भुवनतलं लोकलोचनानन्दे ।
ईषत्क्षिप्तकटाक्षा स्मेरमुखी सा निरीक्ष्यतां तन्वी ॥

अत्र चन्द्ररूपेण उद्दीपनविभावेन नायिकायां कटाक्षविक्षेपोत्पत्तेर्वर्णनेन मानस्य नाशाद् तस्यामानन्दः समुत्पन्न इति क्लेशेन कल्पनीयम् । विभावस्य कष्टेन कल्पनं यथा –

परिहरति रतिं मतिं लुनीते स्खलतितरां परिवर्तते च भूयः ।
इति बत विषमा दशास्य देहं परिभवति प्रसभं किमत्र कुर्मः ॥

---

४२. सा.द. स.प. का–१२,१३,१४,१५.

अत्र रतिपरिहारादीनां करुणादावपि सम्भवात् कामिनीरूपो विभावः कष्टेन कल्पनीयः । अकाण्डे प्रथनं यथा – वेणीसंहारे द्वितीयेऽङ्के घोरे युद्धे प्रवर्तमाने दुर्योधनस्य भानुमत्यां शृङ्गारस्य वर्णने । अकाण्डे छेदो यथा – वीरचरिते रामभार्गयोः क्रोधे काष्ठामारूढे कङ्कणमोचनाय गच्छामीति रामस्य वचने । पुनः पुनः दीप्तिर्यथा कुमारसम्भवे रतिविलापे । अङ्गिनोऽननुसन्धानं यथा – रत्नावल्यां बाभ्रव्यागमने सागरिकाया विस्मरणे । अनङ्गस्य कीर्तनं यथा – कर्पूरमञ्जर्यां राजनायिकयोः स्वयं कृतं वसन्तवर्णनमनादृत्य बन्दीकृतस्य प्रशंसने । अङ्गस्य विस्तृतिः यथा – किराते सुराङ्गनाविलासादौ । प्रकृतिविपर्ययो यथा – धीरोदात्तस्य छद्मना वालिनो हनने । अर्थानौचित्यं यथा – देशकालादीनामन्यथा वर्णने । एषु अर्थानौचित्यं ख्यातिविरुद्धत्वे एवान्तर्भवतीति न पृथक् गणनीयम् । दुःश्रवत्वस्य प्रागुक्तरीत्या रसदोषत्वे तद्गतदोषाः चतुर्दशेति बोध्यम् ।

एतेषु व्यभिचारिणः स्वशब्देनोक्तिः तत्र दोषो न भवति यत्रानुभावेन तस्य प्रतिपादनं नोचितम् । एवं बाध्यत्वेन निबन्धनेऽपि न दोषः । परिपन्थिरसाङ्गस्य स्मरणे, तद्रसस्य साम्येन वचने अङ्गभावेन प्रतिपादने च न दोषः । एवमन्यदपि यथासम्भवमाकरेभ्यो विज्ञेयम् ॥

एतावन्त एव दोषाः । सर्वेषामपि एतेषामनुकरणावस्थागतत्वे न दोषत्वम् । यदि अलङ्कारादौ उपमानगतं जातिप्रमाणादिना न्यूनत्वमधिकत्वं च, साधारणधर्मस्यानुपपत्तिः, लिङ्गवचनभेदः, अर्थान्तरन्यासे उत्प्रेक्षितस्यार्थस्य समर्थनम् इत्यादयो दोषाः दृश्यन्ते तेषां यथासम्भवं पूर्वोक्तेष्वेव दोषेषु अन्तर्भावः । विस्तरभयान्न निरूप्यते । तच्च आकरेभ्यः स्वयमेव विज्ञेयम् ।

सत्यभामावेङ्कटसुब्रह्मण्यभट्टयोस्सुतस्य लक्ष्मीनारायणभट्टस्य कृतौ

साहित्यवल्लर्यां दोषनिरूपणो नाम

सप्तमः स्तबकः ॥

॥श्रीरस्तु॥

अष्टमः स्तबकः

गुणनिरूपणम्

वाणीं भजेऽहं वचसामधीशां वक्त्रेण दासीकृतशीतरश्मिम् ।
विपञ्चिकापुस्तकपङ्कजेषु शुके मराले च गतां ममत्वम् ॥

कवेः कर्म काव्यम् । तत्र रसः शब्दार्थौ गुणा रीतयोऽलङ्काराः तथाविधा अन्येऽपि बहवोंऽशा वर्तन्ते । यदिदं काव्यं पुरुषत्वेन कल्प्यते तर्हि सारभूतत्वात् रसः तस्मिन् आत्मवद्भाति । शब्दार्थौ शरीरवत् । गुणाः शौर्यादिवत् । रीतयोऽवयवसंस्थानविशेषवत् । अलङ्काराः कटाकुण्डलादिवच्चेति नव्यानां ध्वनिकृदादीनां सिद्धान्तः । एवं चैतेषां मतेन शौर्यादयो यथात्मनो धर्माः तथा माधुर्यादयो रसस्येत्युक्तं भवति । सर्वमिदं तत्कृतेषु लक्षणेषु परिशीलितेषु सुव्यक्तं भविष्यति ।

* प्राचीनमतेन लक्षणम्

- [१]तमर्थमवलम्बन्ते येऽङ्गिनं ते गुणाः स्मृताः – इति ध्वन्यालोके ।
- [२]ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः ।
- [३]उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः ॥ इति प्रकाशे ।

रसस्याङ्गित्वमाप्तस्य धर्माः शौर्यादयो यथा – इति दर्पणे ।

रसदोषेषु अतिव्याप्तिवारणाय द्वितीये लक्षण उत्कर्षहेतव इति विशेषणम् । अन्यत्र तु प्रसक्तायाः तस्या वारणाय कश्चिद्यत्नः कर्तव्य इति विशेषः । यद्वा, उत्कर्षहेतुभूतशौर्यादिधर्मस्य दृष्टान्तत्वेनोपन्यासात् परम्परया तदर्थस्य सिद्धिरित्यदोषः । अचलस्थितय इति विशेषणान्तरं तु अव्यावर्तकत्वात् स्वरूपसङ्कीर्तनमात्रफलकमिति न तल्लक्षणकुक्षौ प्रवेशं लभते । न च

१. ध्वनि. द्वि.उ. का–६.   २. का.प्र. अ.उ. का–६६.   ३. सा.द. अ.प. का–१.

अलङ्कारेषु अतिव्याप्तेर्वारणाय तदिति वाच्यम्, रसधर्मत्वाभावादेव अप्रसक्तेः। एवं च तन्मतेनेदं लक्षणं निर्गलितिम् –

रसस्य उत्कर्षका धर्मा गुणाः ॥

* प्राचीनमतेन प्रभेदाः तेषां च लक्षणम्

एते च गुणा माधुर्यमोजः प्रसादश्चेति त्रय इति तेषां मतम्। तत्र माधुर्यस्य लक्षणमिदमुक्तं ध्वनिकारेण –

[४]सम्भोगे विप्रलम्भे करुणे च प्रकर्षवत्।
माधुर्यमाद्रतां याति यतस्तत्राधिकं मनः ॥

प्रकाशकारेण तु एतत् –

[५]आह्लादकत्वं माधुर्यं शृङ्गारे द्रुतिकारणम्।

दर्पणकारेण पुनरत्र किञ्चिदत्र विप्रतिपन्नम् –

[६]चित्तद्रवीभावमयो ह्लादो माधुर्यमुच्यते।

त्रिभिरप्येतैः गुणानां रसधर्मत्वमङ्गीकृतम्। तस्मात् द्वितीयलक्षण आह्लादकत्वं रसनिष्ठमेव गृह्यते। एवं च तन्मतेन द्रुतिकारणीभूतं रसनिष्ठम् आह्लादकत्वमिति माधुर्यस्य लक्षणं फलितम्। प्रथमलक्षणे तु यतस्तत्र मन आद्रतां यातीति शृङ्गारादौ रस आस्वाद्यमाने चित्तद्रुतेरङ्गीकारात् यथा तस्या माधुर्यलक्षणकुक्षौ निपातः तथा गुणानां रसधर्मत्वाभ्युपगमात् रसनिष्ठो धर्म इत्यस्यापि। तत्र द्रुतेः तादृशधर्मस्य च किमभेदः किंवा कार्यकारणभावः किंवा प्रयोज्यप्रयोजकभाव इति यद्यपि सन्देहः तथापि 'रौद्रादयो रसाः परां दीप्तिमुज्ज्वलतां जनयन्तीति लक्षणया त एव दीप्तिरित्युच्यते' इति तदीये वचने जनयन्तीति शब्दबलात् तयोरुभयोः कार्यकारणभाव इति निर्णीयते। एवं च तन्मतेन चित्तद्रुतिकारणीभूतः रसनिष्ठो धर्म इति लक्षणं फलितं भवति। तृतीये तु मयटः स्वार्थिकत्वात् प्रकाशकृन्मतनिराकरणाच्च चित्तद्रुतिरूपो ह्लादो रसनिष्ठ इति दर्पणाकाराभिप्रेतं लक्षणम्।

तत्र द्वितीये लक्षणे रसनिष्ठो धर्म आह्लादकत्वमिति विशेषरूपेण अभिहितम्

४. ध्वनि. द्वि.उ. का–८. ५. का.प्र. अ.उ. का–६८. ६. सा.द. अ.प. का–२.

प्रथमे सामान्याकारेण तृतीये तु आह्लादकत्वस्य स्थाने ह्लाद इत्येतत् परस्परं वैलक्षण्यम् । एतेन प्रथमे लक्षणे सामान्येनोक्तस्य धर्मस्य समवायेन रसनिष्ठत्वं द्वितीये जनकतयेति स्पष्टम् । तृतीये तु ह्लादस्य समवायेन चित्ते जनकतया च रसेऽवस्थानं सम्भवतीति कुत्रत्यस्य ग्रहणमिति सन्देहः तथापि ह्लादस्य द्रुत्यभिन्नत्वाङ्गीकारात् चित्तगतस्यैव तदित्यध्यवसायः । ततश्च रसनिष्ठत्वं जनकतयेति स्फुटम् । अयमत्र सङ्ग्रहः –

- चित्तद्रुतिकारणीभूतः समवायेन रसनिष्ठो धर्मो माधुर्यमिति ध्वनिकारः।
- चित्तद्रुतिकारणीभूतं समवायेन रसनिष्ठमाह्लादकत्वं तदिति प्रकाशकारः।
- चित्तद्रुतिरूपो ह्लादो जनकतया रसनिष्ठः तदिति विश्वनाथः ।

ओजसो लक्षणं ध्वनिकारेणेदं निगदितम् –

[७]रौद्रादयोऽपि रसा दीप्त्या लक्ष्यन्ते काव्यवर्तिनः ।

प्रकाशकारेण पुनरिदम् –

[८]दीप्यात्मविस्तृतेर्हेतुरोजो वीररसस्थिति ।

दर्पणकारेण तु इदम् –

[९]ओजश्चित्तस्य विस्ताररूपं दीप्तत्वमुच्यते ।

रौद्रादयो रसाः परां दीप्तिमित्यादिविवरणात् ध्वनिकारमतेन दीप्तिकारणीभूतो रसनिष्ठो धर्म इत्योजसो लक्षणम् । प्रकाशकारस्य मतेनापि तदेव लक्षणं किंतु दीप्तिः विस्तृतिरूपेति विवरणमधिकम् । तत्र विस्तृतिरूपाया दीप्तेः चित्तगतत्वात् रसनिष्ठत्वं जनकतासम्बन्धेनेति विशेषः । दर्पणकारस्य तु मतेन विस्तृतिरूपा चित्तस्य दीप्तिरेव तदिति लक्षणम् । तस्या रसनिष्ठत्वं जनकतासम्बन्धेनेति पूर्ववत् । अयमत्र सङ्ग्रहः –

- चित्तदीप्तिकारणीभूतः समवायेन रसनिष्ठो धर्म ओज इति ध्वनिकारः ।
- विस्ताराभिन्नश्चित्तदीप्तिकारणीभूतः जनकतया रसनिष्ठो धर्मः तदिति प्रकाशकारः।
- चित्तदीप्तिरूपो विस्तारो जनकतया रसनिष्ठः तदिति दर्पणकारः ।

प्रसादस्य लक्षणं ध्वन्यालोक इदमुक्तम् –

७. ध्वनि. द्वि.उ. का–९. ८. का.प्र. अ.उ. का–६९. ९. सा.द. अ.प. का–४.

[१०]समर्पकत्वं काव्यस्य यत्तु सर्वरसान् प्रति ।
स प्रसादो गुणो ज्ञेयः सर्वसाधारणक्रियः ॥

प्रकाशे पुनरिदम् –

[११]शुष्केन्धनाग्निवत्स्वच्छजलवत्सहसैव यः ।
व्याप्नोत्यन्यत्प्रसादोऽसौ सर्वत्र विहितस्थितिः ॥

अत्रान्यदित्यनेन चित्तं परामृश्यते । दर्पणकारेण केवलमिदमेवानूदितम्–

[१२]चित्तं व्याप्नोति यः क्षिप्रं शुष्केन्धनमिवानलः ।
सः प्रसादः समस्तेषु रसेषु रचनासु च ॥

तत्र प्रथमलक्षणानुसारेण काव्यगतं समर्पकत्वं प्रसादः । प्रसादस्तु स्वच्छता शब्दार्थयोरिति विवरणात् अस्य समर्पकत्वशब्दस्य पर्यवसाने स्वच्छतायां वृत्तिरिति ज्ञायते । द्वितीयतृतीयलक्षणानुसारेण प्रसादः चित्तं व्याप्नोतीति वचनात् चित्तकर्मकव्याप्त्याश्रयः, गुणानां रसधर्मत्वाभ्युपगमात् रसनिष्ठश्च कश्चिद्धर्म इति विवेकः । अयमत्र सङ्ग्रहः –

• काव्यगतशब्दार्थयोः स्वच्छता प्रसाद इति ध्वनिकारः ।

• चित्तकर्मकव्याप्त्याश्रयो रसनिष्ठो धर्मः प्रसाद इति प्रकाशकारो दर्पणकारश्च ।

* प्राचीनमतानां परीक्षणम्

अत्र विचार्यते – यत्तावदुक्तं प्रकाशकारेण आह्लादकत्वस्य माधुर्यमिति – तन्न साधु, आह्लादकत्वस्य सर्वरससाधारणत्वेन गुणविशेषत्वासम्भवात् । अथ आह्लादकत्वस्य साधारणत्वेऽपि द्रुतिप्रयोजकस्य तस्य तत्त्वाङ्गीकारे नास्ति दोष इत्युच्यते तर्हि तुल्यन्यायेन दीप्तिप्रयोजकस्य तस्यैव ओजस्त्वम् उच्यताम् । न चेष्टापत्तिः, साधारणत्वेन तत्पर्यन्तानुधावनस्य व्यर्थत्वप्रसङ्गात् आह्लादकत्वस्य द्रुतिप्रयोजकत्वेन तद्विरुद्धदीप्तिप्रयोजकत्वासम्भवाच्च । नहि कश्चिदर्थो विरुद्धं कार्यद्वयं जनयितुमीष्टे । किञ्च माधुर्यमात्रस्य आह्लादकत्वरूपतया ओजःप्रसादयोः तद्विरह इति तद्युक्तरसानाम् अनाह्लादकत्वापत्तिः । अन्यच्च, माधुर्यलक्षणकथनप्रसङ्गे समवायेन

१० .ध्वनि. द्वि.उ. का–१०. ११ .का.प्र. अ.उ. का–७०. १२ .सा.द. अ.प. का–७.

रसनिष्ठस्याह्लादकत्वस्य माधुर्यत्वमुरीक्रियते ओजोलक्षणकथनप्रसङ्गे तु जनकतया रसनिष्ठस्य दीप्त्यभिन्नविस्तारस्येति वैषम्यम्। नहि यत्किञ्चिन्निष्ठत्वेन सजातीयानां पदार्थानां तन्निष्ठत्वे सम्बन्धभेदः सामञ्जस्याय कल्पते । न चाह्लादकत्वं चित्तगतं ग्राह्यमिति वाच्यम्, असङ्गतेः। एतेन ह्लादो माधुर्यमिति दर्पणकारेण यदुक्तं तत्प्रत्युक्तं वेदितव्यम् । किञ्च चित्तद्रवीभावमयो ह्लाद इत्यत्र मयटः स्वार्थिकत्वं स्वीकृत्य द्रुत्याह्लादयोः यदद्वैतं स्वीक्रियते तत्किमर्थमिति न विद्मः, लोके ह्लादात् द्रुतिरिति वैषम्यस्यैव दर्शनात् ।

तदेवमनुपपत्त्या आह्लादकत्वस्य ह्लादस्य च लक्षणकुक्षितो बहिर्भावे प्रकाशकारस्य मतं न ध्वनिकारमतात् भिद्यते । ततश्च पक्षद्वयमात्रमत्र स्थितम्, यथा –

- चित्तद्रुतिकारणीभूतः समवयेन रसनिष्ठो धर्मो माधुर्यमित्येकं मतम्।
- चित्तद्रुतिः जनकतया रसनिष्ठा तदित्यपरम् ।

एवमत्र पक्षद्वयम् । तत्र किं ग्राह्यमित्येतत् पश्चात् विचारयिष्यते ।

यदपि दीप्त्यात्मविस्तृतेर्हेतुरोज इत्युक्तं प्रकाशकारेण – तदपि न हृदयङ्गमम्, दीप्तौ सत्यां चित्ते विस्तारस्याननुभवात् प्रत्युत हासादावेव तदनुभवात् । नहि लोकेऽपि कश्चित् पदार्थो ज्वलन् विस्तृत इवावभाति येन तस्य तद्रूपत्वं निश्चीयेत। अनुभवस्यापलापे द्रुतेरपि विस्ताररूपत्वमस्तु इति पर्यनुयोगापत्तिः। यदि पुनः दीप्तिरेव विस्तृतिरूपा न द्रुतिरित्याग्रहः तर्हि प्रसाद चित्तगतेषु धर्मेषु किंरूप इत्युच्यताम्? न विकासः, विस्तारापरपर्यायस्य तस्यानुपदोक्तरीत्या दीप्तिरूपत्वम् इत्यभिधानात् । नापि ध्वनिकारोक्तं समर्पकत्वम्, तस्य शब्दार्थगतं स्वच्छत्वं स्वयं तेनैव प्रतिपन्नमिति चित्तवृत्तित्वाभावात् । अथ तदभावेऽपि गुणत्वाभ्युपगमः यत्र तत्र स्थितस्यापि धर्मस्य तत्त्वमङ्गीक्रियताम्। किञ्चैवमभ्युपगमे सजातीयात् गुणद्वयात् वैरूप्यमिति अननुगतत्वप्रसङ्गः । नापि नैर्मल्यम्, तद्धि मालिन्यस्य सर्वात्मना प्रायेण वा अपगमे सम्भवति। सर्वात्मनापगमस्तु केवलं शान्ते, तत्र हि सर्वासामपि कश्मलायमानां चित्तवृत्तीनां ध्वंसः सम्भवति । प्रायेणापगमस्तु विकृतिभूते शृङ्गारादौ रसे, विभावादिमात्रानुसन्धानेन वेद्यान्तरविषयाणां विगलनात् । एवमपि न तस्य

द्रुत्यादेरिव साक्षात् रत्यादिजन्यत्वम् किन्तु तप्रयोज्यत्वम् । नह्येतदकिञ्चित्करं वैलक्षण्यमिति वाच्यम्, ऐकरूप्यविध्वंसकत्वात् । तदेवं प्रसादस्वरूपतापत्त्या दीप्तेर्विस्तृतिरूपत्वमसङ्गतम् । एतेन विचारमकृत्वा प्रकाशकारोक्तमेव अनुवदन् दर्पणकारः प्रत्युक्तः । इत्थं दीप्तेर्विस्ताररूपत्वे गलिते पूर्ववदेवात्र पक्षद्वयं स्थितम् –

- चित्तद्रुतिकारणीभूतः समवायेन रसनिष्ठो धर्म ओज इत्येकम् ।
- चित्तदीप्तिः जनकतया रसनिष्ठा तत् इत्यपरम् ।

एवमत्र पक्षद्वयम् । तत्र किं ग्राह्यमित्येतत् पश्चात् विचारयिष्यते ।

यच्च पुनः प्रसादस्य लक्षणमुक्तमेतैः त्रिभिरपि तत्तु वक्तव्यांशाघटितत्वात् मधुरहितं क्षौद्रपटलमिव प्रतीयते । ननु समर्पकत्वं प्रसाद इत्युक्तम् – किं तेन, तस्य प्रसादत्वं सर्वथा न सम्भवतीत्यनुपदमभिधानात् । एवं द्वितीयं तृतीयं वा लक्षणं गृह्यतामिति चेत् – तेनापि किं प्रयोजनम्? स्वरूपस्य अनवधारणात् । नहि अग्निः शुष्केन्धनवत्, जलं स्वच्छपटवत् प्रसादः चित्तं व्याप्नोतीत्युक्तौ माधुर्यादेरिवास्य स्वरूपं विज्ञातं भवति । तस्मात् अलक्षणमेवैतत् । लक्षणं तु एतत्समानजातीयमाधुर्यादेः लक्षणेन सदृशमेव न्याय्यमिति स्थिते जगन्नाथेनास्य विकासरूपत्वाङ्गीकारात् तद्रूपत्वेनाख्यानं साम्प्रतं स्यात् । ततश्चात्रापि पूर्ववत् पक्षद्वयम् –

- चित्तविकासकारणीभूतः समवायेन रसनिष्ठो धर्मः प्रसाद इत्येकम्।
- चित्तविकासो जनकतया रसनिष्ठः स इत्यपरम् ।

एवमत्रापि पक्षद्वयम् । तत्र किं ग्राह्यमित्येतदचिरात् विचारयिष्यते ।

यदत्र पुनः [१३]लोचनकारेणोच्यते, प्रसादो नाम ओजोमाधुर्ययोः समावेशवैचित्र्यमिति – तदसत्, विरुद्धयोः समावेशस्यासम्भवात् । नहि नियतविषययोः विप्रतिषिद्धस्वभावयोरर्थयोः समावेशः सम्भवति । सम्भवेऽपि सङ्करूपत्वात् तृतीयप्रभेदत्वेन परिगणनमपि न युज्यते । किञ्च प्रसादस्य साधारणत्वे तद्युक्तरसानां रसान्तरेण विरोधो न स्यात्, गुणनिमित्तकत्वात् । तस्मादेतदसङ्गतम् ॥

१३. लो. ध्वनि. द्वि.उ. नवमकारिकानिरूपणावसरे ।

* जगन्नाथोऽत्र किं मन्यते?

नन्वनयोः कः पक्षो ज्यायान् किं द्रुत्यादिकारणीभूतः समवायेन रसनिष्ठो धर्मो ध्वनिकाराभिप्रेत आहोस्वित् चित्तद्रुत्यादिः जनकतया रसनिष्ठ इति दर्पणकाराभिप्रेतः?

अत्र [१४]जगन्नाथः – माधुर्यादयः शृङ्गारादिरसनिष्ठा इति ध्वनिकारादिभिः यदभिधीयते तदचारु, द्रुत्यादिप्रयोजकत्वस्य प्रयोजकतासम्बन्धेन द्रुत्यादेरेव वा माधुर्यादिपदार्थत्वात् । एवमङ्गीकारे तस्य रस इव शब्दार्थादावपि सत्त्वात् 'मधुरो रसः' 'ओजस्वी रसः' 'प्रसन्नो रसः' इत्यादय इव 'मधुरः शब्दः' 'मधुरोऽर्थः' 'ओजस्वी रसः' इत्यादयोऽपि प्रयोगा मुख्या एव भवन्तीति लक्षणाकल्पनमनावश्यकमिति लाघवम् ।

ननु रसनिष्ठस्य धर्मविशेषस्य द्रुत्यादिप्रयोजकत्वमिति तस्यैव माधुर्यादित्वं युज्यते, शृङ्गारादौ आस्वाद्यमाने माधुर्यस्यानुभवः, वीरादौ च ओजस इति प्रत्यक्षप्रमाणस्य सद्भावात् । किञ्च द्रुत्यादिनिष्ठकार्यतानिरूपितकारणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वात् घटनिष्ठकार्यतानिरूपितकारणतावत् इत्यनुमानमपि रसनिष्ठयत्किञ्चिद्धर्मस्यैव माधुर्यादित्वं साधयति। ततश्च रसनिष्ठस्य द्रुत्यादिप्रयोजकत्वस्यैव माधुर्यादित्वम् न तु रसनिष्ठस्य द्रुत्यादिप्रयोजकधर्मस्य प्रयोजकतासम्बन्धेन वा द्रुत्यादेरिति चेत् – मैवम्, यथा हि वह्नौ दाहरूपात् कार्यात् उष्णस्पर्शस्य भेदेनानुभवः न तथात्र शृङ्गारादौ द्रुत्यादिरूपात् कार्यात् माधुर्यादिपदव्यवहार्यस्य धर्मस्येति प्रत्यक्षेण माधुर्यादेः सिद्धावपि न भेदेन सिद्धिः । अनुमानेनापि नेष्टसिद्धिः, तेन हि कारणतावच्छेदकरूपेण शृङ्गारत्वादेः प्रातिस्विकधर्मस्यैव सिद्धिरिति उररीकरणात्। एतेन माधुर्यादिपदव्यवहार्यतया पृथक् धर्मस्य कल्पनम् अप्रामाणिकमिति बोध्यम् ।

यद्यपि एवमभ्युपगमे द्रुतिं प्रति शृङ्गारत्वविशिष्टः कारणम्, शान्तत्वविशिष्टः, करुणत्वविशिष्टश्चेति त्रयः कार्यकारणभावाः, दीप्तिं प्रति वीरत्वविशिष्टः, बीभत्सत्वविशिष्टः, रौद्रत्वविशिष्टश्चेति पुनः त्रयः, प्रसादस्य सर्वरस–

१४. रस. प्र.आ. गुणनिरूपणम् ।

साधारणत्वात् विकासं प्रति रसत्वविशिष्ट इत्येकश्चेति कार्यकारणभाव-सप्तकस्य अभ्युपगन्तव्यत्वात् गौरवम्, परमते तु द्रुतिं प्रति मधुरो रसः कारणम्, दीप्तिं प्रति ओजस्वी, विकासं प्रति रसमात्रमिति त्रयाणामेव अभ्युपगन्तव्यत्वात् लाघवमिति प्रतीयते किन्तु तदापाततः, यतः तत्रापि शृङ्गारादिरसत्रये यथोत्तरं माधुर्यप्रकर्षस्य वीरादिरसत्रये ओजःप्रकर्षस्य चाभ्युपगमात् द्रुतिं प्रति माधुर्यवान् रसः कारणम्, अतितरां द्रुतिं प्रति अतिशयितमाधुर्यवान् करुणः, अतितमां द्रुतिं प्रति ततोऽप्यतिशयितमाधुर्यवान् शान्त इति त्रयः, एवं दीप्तौ विषये त्रयः, विकास एकश्चेति कार्यकारणभाव-सप्तकमपरिहार्यम्। अन्यच्च, रसस्यात्मस्थानीयत्वात् आत्मनश्च निर्गुणत्वात् गुणानां रसधर्मत्वमयुक्तमेव। तस्मात् द्रुत्यादिप्रयोजकत्वं प्रयोजक्तासम्बन्धेन द्रुत्यादिकमेव वा माधुर्यादिकमिति समुचितम्॥

*** कस्तावदत्र निर्णयः?**

अस्माकं तु एवं भाति – योऽयं द्रुत्यादिः स तावत् समवायेन चित्ते वर्तते, जनकतासम्बन्धेन रत्यादौ, प्रयोजकतासम्बन्धेन रसादिव्यञ्जकयोः शब्दार्थयोः। तत्र यद्यपि द्रुत्यादिः चित्ते न सम्भवति, मूर्ताश्रिततत्वनियमात् तथापि तेन शब्देन लक्षणया तत्प्रवणत्व-तदसहत्वादिधर्मो लक्ष्यत इति नासङ्गतिः। द्रुत्यादिशब्देन व्यवहारस्तु प्रातिभासिकत्वेन। तत्र चित्ते समवेतो द्रुत्यादिः तत्समवेतत्वं वा चित्तगतं न माधुर्यादिकम्, तथा सति 'मधुरं चित्तम्' 'ओजस्वि चित्तम्' 'प्रसन्नं चित्तम्' इत्यादिप्रयोगणां साधुत्वापत्तेः। न चेष्टापत्तिः, अर्थान्तरे साधुत्वेऽपि द्रुत्यादिविशिष्टरूपे प्रकृतार्थे तदभावात्। किञ्च द्रुतिविशिष्टेषु हिमघृतादिषु, दीप्तिविशिष्टेषु किरणज्वालादिषु, विकासविशिष्टेषु पुष्पादिष्वपि माधुर्यादिशब्दानां प्रयोगापत्तिः। न चैतेषु द्रुत्यादेः प्रातिभासिकत्वविरहात् प्रत्युत वास्तविकत्वात् अदोष इति वाच्यम्, प्रातिभासिके सम्भवतः प्रयोगस्य वास्तविकेऽवश्यम्भावात्।

नापि शब्दार्थाभ्यां प्रयुक्तो द्रुत्यादिः तत्प्रयोजकत्वं वा शब्दार्थगतं माधुर्यादिकम्, 'मधुरः शृङ्गारादिः' इत्यादिप्रयोगस्य मुख्यस्यापि लाक्षणिकत्वापत्तेः। न चैतस्य लाक्षणिकत्वम्, शृङ्गारादौ आस्वाद्यमान एव

चित्ते द्रुत्यादेः सम्भव इति साक्षादेव तज्जनके शृङ्गारादौ सम्भवतः प्रयोगस्य मुख्यत्वौचित्यात् । शब्दार्थादीनां तु द्रुत्यादिजनकरसादिव्यञ्जकत्वेन द्रुत्यादिमत्त्वमिति तद्विषयकप्रयोगस्यामुख्यत्वमेव । नहि साक्षात्परम्परा-सम्बन्धयोः परम्परासम्बन्धात् जायमानस्य मुख्यत्वं युज्यते, तारतम्यस्य स्फुटमुपलब्धेः । एतेन जनकप्रयोजकयोरुभयोरपि अविशेषेण मधुरादिशब्द-प्रयोगं मुख्यमेवाचक्षाणो जगन्नाथः प्रत्युक्तः । यदुक्तं पुनः तेनैव द्रुत्यादि-कारणतावच्छेदकतया शृङ्गारत्वादेरेव सिद्धिः न तु वह्न्यादौ दाहादेः कार्यात् उष्णत्वस्येव व्यतिरिक्तधर्मस्येति – तत्कुतः? व्यतिरिक्तधर्मस्य स्वीकारे द्रुतिं प्रति मधुरो रसः कारणम् इत्यादिना लाघवस्यैव सिद्धत्वात्, प्रातिस्विकधर्म-सिद्ध्यङ्गीकारे गुणस्याननुगतत्वप्रसङ्गाच्च । द्रुत्यादिषु तारतम्येऽवान्तरस्य अनेकस्य कार्यकारणभावस्य कल्पनं न गौरवाय प्रत्युत तत्रैव पृथक् पृथक् स्वतन्त्रस्य ।

एवमत्र परिशेषात् रत्यादिजन्यो द्रुत्यादिः तज्जनकत्वं वा रत्यादिगतं माधुर्यादिकमिति स्थितम् । तत्र पुनः सूक्ष्मेक्षिकायां द्रुतौ सत्यां रौद्रादेरदर्शनात् शृङ्गारादेश्च दर्शनात् पूर्वत्राविद्यमानस्य प्रत्युत परत्र विद्यमानस्य कस्यचित् धर्मस्यैव द्रुतिं प्रति कारणत्वमिति निर्णीयते, यथा वह्न्यादौ दाहं प्रति औष्ण्यस्य । एवं द्रुत्यादावपि बोध्यम् । एतेन द्रुत्यादिकारणीभूतः रसनिष्ठो धर्मविशेषो माधुर्यादिकमिति स्थितम् । द्रुत्यादिजनकतावच्छेदकमिति यावत् । न चात्र द्रुत्यादेः जनकत्वेन शृङ्गारादावङ्गीकारे आत्मतया परिगणिते तस्मिन् कूटस्थत्वभङ्गप्रसङ्गः, आत्मेत्यनेन सारभूतपदार्थस्य विवक्षणात् । यदि पुनः रसो न रत्यादिः किन्तु तदवच्छिन्नं चैतन्यमिति स्वीकारः तदापि विशेषणीभूतरत्यादेः द्रुत्यादिजनकत्वेऽपि तदवच्छिन्नचैतन्यस्य कूटस्थत्वं निर्बाधमिति नासङ्गतिः । शब्दो मधुरः' 'अर्थो मधुरः' इत्यादयस्तु प्रयोगाः स्वजनकरत्यादिव्यञ्जकत्वेन लाक्षणिकाः । एवं चेमानि तावत् माधुर्यादीनां लक्षणानि –

- **चित्तद्रुतिकारणीभूतो जनकतया रसनिष्ठो धर्मविशेषो माधुर्यम् ।**
- **चित्तद्रुतिकारणीभूतो जनकतया रसनिष्ठो धर्मविशेष ओजः ।**
- **चित्तविकासकारणीभूतो जनकतया रसनिष्ठो धर्मविशेषः प्रसादः ।**

माधुर्यादयः स्थायिनो धर्मा इति नु न युक्तम्, अनभिव्यक्तत्वे गुणैरयोगात् अभिव्यक्तत्वे रसपदव्यवहार्यत्वात् ॥

*** रसेषु माधुर्यादीनां स्थितिः**

एतेषु त्रिषु गुणेषु माधुर्यं सम्भोगशृङ्गारे वर्तते, ततोऽप्यतिशयितं विप्रलम्भे, ततोऽपि करुण इति ध्वनिकारः, यदुक्तम् –

[१५]शृङ्गार एव मधुरः परः प्रह्लादनो रसः । इति ।

शृङ्गारे विप्रलम्भाख्ये माधुर्यं च प्रकर्षवत् । इति च ।

प्रकाशकारस्तु –

[१६]करुणे विप्रलम्भे तच्छान्ते चातिशयान्वितम् ।

इत्याचष्टे । अत्र उत्तरकारिकागतस्य क्रमेणेत्यस्यापकर्षे शृङ्गारकरुण-विप्रलम्भशान्तेषु यथोत्तरं माधुर्यस्यातिशयः अनपकर्षे तु शृङ्गारादन्येषु करुणादिषु समानमेव माधुर्यम् न तु तत्र न्यूनाधिकभाव इति विज्ञायते । वस्तुतस्तु अनयोः प्रथमः पक्षः हृदयसंवादी तथापि अस्वरसापकर्ष-कल्पनावलम्बितत्वात् वक्तृविवक्षितत्वेन दुर्ग्रह इति द्वितीय एव पक्षः तद्विवक्षितत्वेन ग्राह्य इत्यस्माकं भाति । दर्पणकारः पुनः –

[१७]सम्भोगे करुणे विप्रलम्भे शान्तेऽधिकं क्रमात् ।

इति क्रमशब्दघटितमेव कारिकां रचयन् सम्भोगादिषु उत्तरोत्तरं प्रकर्षम् अभ्युपैति । एतदेव प्रतिपत्तिदार्ढ्याय पुनरित्थं निदर्श्यते –

- ध्वनिकारमतम् – सम्भोगः< विप्रलम्भः< करुणः ।
- प्रकाशकारमतम् – क्रमेणेत्यस्यापकर्षे –

  सम्भोगः< करुणः< विप्रलम्भः< शान्तः ।

  क्रमेणेत्यस्यानपकर्षे –

  सम्भोगः< करुणः – विप्रलम्भः – शान्तः ।
- दर्पणकारमतम् – सम्भोगः< करुणः< विप्रलम्भः< शान्तः ।

---

१५. ध्वनि. द्वि.उ. का–७,८. १६. का.प्र. अ.उ. का–६९. १७. सा.द. अ.प. का–३.

अथ ओजः । इदं रौद्रादिषु वर्तत इत्येतावन्मात्रं कथितं ध्वनिकारेण न पुनस्तत्र तारतम्यम् । रौद्रादिष्वित्यादिशब्देन वीराद्भुतयोः ग्रहणम् । दीप्तिश्च प्रतिपत्तुः हृदये विकासविस्तारप्रज्वलनस्वभावेति लोचनकारः । प्रकाशकारस्तु

[18]दीप्त्यात्मविस्तृतेर्हेतुरोजो विररसंस्थिति ।
बीभत्सरौद्ररसयोः तस्याधिक्यं क्रमेण च ॥

इति कथयन् वीरबीभत्सरौद्रेषु यथोत्तरमतिशयितं मन्यते । दर्पणकारोऽपि

[19]वीरबीभत्सरौद्रेषु क्रमेणाधिक्यमस्य तु ।

इति वदन् प्रकाशकारोक्तमेवानुवदति । तदिदं सुखबोधाय एवं निदर्श्यते –

- ध्वनिकारमतेन रौद्रादिषु ओज इत्येतावन्मात्रं ज्ञायते न तु तत्र तारतम्यम् ।
- लोचनकारस्य मतं ध्वनिकारवत् ।
- मम्मटविश्वनाथयोः मतम् – वीरः< बीभत्सः< रौद्रः ।

प्रसादस्तु तृतीयो गुणः । अयं सर्वरससाधारणः । अस्मिंश्च विषये प्रायेणैतेषु न कस्यापि विमतिः ।

लोचनकारः पुनः प्रसादो नाम ओजोमाधुर्ययोः समावेशवैचित्र्यम् । तच्च पुनः हास्यभयानकबीभत्सशान्तेषु दृश्यते इत्यभिदधानः अन्यामेव काञ्चित् सरणिमाश्रयति ।

* कस्तावत् सिद्धान्तः?

अत्र विचार्यते – प्रायेण सर्वैरपि शृङ्गारकरुणशान्तेषु माधुर्यम्, वीरबीभत्सरौद्रेषु ओजः, सर्वेषु च रसेषु प्रसाद इति यदङ्गीकृतम् – तदंशमात्रेण ग्राह्यम्, यतः शृङ्गारः करुणश्चेति रसद्वय आस्वाद्यमाने चित्तं द्रुतमिव भवति, वीरो रौद्रश्चेति रसद्वये दीप्तमिव, हास्योऽद्भुतश्चेति रसद्वये विकसितमिवेति अनुभवात् । बीभत्सभयानकयोः आस्वादे तु यतो भयं जुगुप्सा च तादृशस्य व्यात्ताननव्याघ्रादेः कृमिकुलावृतपूयादेश्च दर्शनेन चित्तं सङ्कुचितमिव भवतीति तद्रूपः कश्चित् गुणः स्वीकार्यः यस्य विप्रतिपत्तेरभावे शोषणमिति नामास्तु । अत एव लोके रतिशोकयोराविर्भावे शरीरे स्वेदनादेः, क्रोधोत्साहयोः कठोरीभवनादेः, हासविस्मययोः नर्तनादेः भयजुगुप्सयोः गलितत्वादेश्च कार्यस्य

१८. का.प्र. अ.उ. का–६९. १९. सा.द. अ.प. का–५.

दृश्यमानस्योपपत्तिः। अत एव च नटैः तत्तद्भावद्वयस्य अभिव्यञ्जनावसरे तदनुसारेणैव अभिनयः क्रियमाणः सङ्गच्छते। लोकसिद्धस्य बाधकाभावे शास्त्रेऽपि अभ्युपगमः। यद्येतन्नाभ्युपेयते तर्हि भये सति चित्तस्य विकास इति नर्तनादेः, जुगुप्सायां सत्यां चित्तस्य दीप्तिरिति कठोरीभवनादेश्च कार्यस्याभिनयः नटैः क्रियमाणः समञ्जसः स्यात्। तस्मात् माधुर्यौजःप्रसाद-शोषणरूपाः चत्वारो गुणाः।

तत्रापि सूक्ष्मं विचारे प्रागुक्तयोः द्वयोः द्वयोः रसयोः पूर्वपूर्वापेक्ष्या उत्तरोत्तरस्मिन् द्रुत्यादेः प्रकर्षः यश्चानुभवगोचरो निशितमतीनाम्। विप्रलम्भे आलम्बनस्य वियोगे सत्यपि करुणे तद्विच्छेदस्यैव सत्त्वात् तत्रैव माधुर्यमधिकम्। स्थिते चैवम्, करुणादपि विप्रलम्भे माधुर्यमधिकमिति प्रकाशदर्पणकाराभ्यां यदुदीर्यते तत्र हेतुं न विद्मः। विप्रलम्भे सम्भोगात् माधुर्यमधिकमिति तु युक्तिसिद्धम् अनुभवसिद्धं च।

शान्तस्तु निखिलचित्तवृत्तिप्रध्वंसलक्षणनिर्वेदस्थायिक इति न तत्र विकारस्य सम्भवः, यदुक्तम् –

[२०]भावा विकारा रत्याद्याः शान्तस्तु प्रकृतिर्मतः।
विकारः प्रकृतेर्जातः पुनस्तत्रैव लीयते॥
स्वं स्वं निमित्तमासाद्य शान्ताद्भावः प्रवर्तते।
पुनर्निमित्तापाये शान्त एवोपलीयते॥


तस्मादत्र न कोऽपि गुणः। यदि कश्चिद्गुणोऽङ्गीकर्तव्य इत्याग्रहः तर्हि समतेति गुणोऽस्तु यश्च सर्वेषां प्रकृतिभूतः। प्रकृतिविकृतिभावश्चात्र प्रसन्नप्रक्षुभितयोः सरोवरयोरिव। यद्यप्यत्र रसान्तर इव पूर्वा परा चेति अवस्थाद्वयं सम्भवति। तयोः द्वितीयावस्थायां वेदान्तमात्रविषये चित्तवृत्तीनां सर्वात्मना विलयात् नास्ति माधुर्यादिगुणस्य प्रसक्तिः। पूर्वावस्थायां तु लेशतः तासां विद्यमानत्वादस्त्येव तत्प्रसक्तिरिति गुणाभावकथनं न सङ्गतम् तथापि तासां ध्वंसोन्मुखत्वात् सतामपि तेषां न सत्त्वेन प्रतीतिरिति नासङ्गतिः। लोचनकारेणापि एतन्निगदितम् – [२१]न च तदीया पर्यन्तावस्था वर्णनीया

२०. ना.शा. ष.अ. शान्तरसनिरूपणम्। २१.लो. ध्वनि. तृ.उ. का–२६.

येन सर्वचेष्टोपरमात् अनुभावाभावेन अप्रतीयमानता स्यात् । शृङ्गारादेरपि फलभूमौ अवर्णनीयतैव पूर्वभूमौ तु 'तस्य प्रशान्तवाहिता संस्कारात्' 'तच्छिद्रेषु प्रत्ययान्तरणि संस्कारेभ्यः' इति सूत्रद्वयनीत्या चित्राकारा यमनियमादिचेष्टा राज्यधुरोद्वहनादिलक्षणा वा शान्तस्यापि जनकादेः दृष्टैवेत्यनुभवसद्भावात् यमनियमादिमध्यसम्भाव्यमानभूयोव्यभिचारिसद्भावाच्च प्रतीयत एवेति ॥

ननु प्रसादस्य रसद्वयमात्रगतत्वे सर्वरससाधारणत्वं सर्वाभिमतं विरुध्येत – अस्तु, का हानिः, वस्तुस्थितेरेवानुसर्तव्यत्वात् । यथा हि शृङ्गारादौ आस्वाद्यमानं चित्तं द्रुतमिव भवति यथा च वीरादौ दीप्तमिव न तथा तत्काले विकसितमिवापि भवति येन विकासस्य व्यापकत्वात् तद्रूपप्रसादस्य सर्वरससाधारणत्वं निर्णीयेत ।

तदेवं विकृतिभूतरसगतगुणानां गणने माधुर्यौजःप्रसादशोषणरूपाः चत्वारो गुणाः । प्रकृतिभूतगूणस्यापि गणने समतया सह पञ्चेति बोध्यम् । तदेवं सुखबोधाय एवं प्रदर्श्यते –



प्राचीना वामनादयः शब्दगतत्वेन दश अर्थगतत्वेन च दशेति यान् विंशतिं गुणान् आमनन्ति तेषु केषाञ्चित् त्रिष्वेव अन्तर्भावात्, केषाञ्चित् दोषाभावरूपत्वात्, केषाञ्चित् अलङ्काररूपत्वात्, केषाञ्चित् दोषत्वेनैव निर्णयात् न तत्संख्याकत्वमिति प्रकाशकारदिभिः सयुक्तिकं निर्णीतम् । तत्तु तत एवावगन्तव्यमिति दिक् ॥

सत्यभामावेङ्कटसुब्रह्मण्यभट्टयोस्सुतस्य लक्ष्मीनारायणभट्टस्य कृतौ
साहित्यवल्लर्यां गुणनिरूपणो नाम
अष्टमः स्तबकः ॥

॥श्रीरस्तु॥

नवमः स्तबकः

रीतिनिरूपणम्

कुरुष्व वक्रेऽपि मयि प्रसन्नतां पुनः पुनर्वच्मि शुभाय ते हितम् ।
न चेत्सभायां सति सिंहगर्जने सुतादकीर्तिः श्रयतोऽम्ब मौनिताम् ॥

अर्थस्य प्रतिपादनाय शब्दानां प्रयोगः । तेषां च शब्दानां समूहो वाक्यम् । तच्च वाक्यमर्थस्य समानत्वेऽपि क्वचित् कोमलं भवति, यथा – 'पुरो भाति तरुश्चारुः' इत्यादौ । अत्र मृदुवर्णघटितत्वेन वाक्यस्य कोमलत्वम् । क्वचित् कठोरम्, यथा – 'स्थूलोऽग्रे भ्राजते वृक्षः' इत्यादौ । अत्र तद्वैपरीत्येन वाक्यस्य कठोरत्वम् । क्वचिच्च मध्यमं दृश्यते, यथा – 'शाखी विभासते स्थूलः' इत्यादौ । अयं पदरचनाविशेषो रीतिरित्युच्यते । रीतिशब्दोऽयं [1]गतिरेषणार्थकात् क्रैयादिकात् रिणातेः रिणन्ति गच्छन्ति गुणा एतामिति कर्मणि क्तिनि निष्पन्नो गुणोपसृतायां पदरचनायां वर्तते । यद्वा, [2]श्रवणार्थकात् रीयतेः दैवादिकात् रीयते श्रूयते वाक्यं रसानुकूलत्वेन अनयेति करणार्थे तत्प्रत्यय इति गृह्यताम् । रसाभिव्यञ्जिका पदरचनेति तदर्थः । रीतिरियं ध्वनिकारादिभिः सङ्घटनाशब्देन, प्रकाशकारादिभिः वृत्तिशब्देन, दण्डिकुन्तक-प्रभृतिभिस्तु मार्गशब्देन व्यपदिश्यते बाहुल्येन । बन्धरचनादीनि तैरेव वाचकत्वेनादृतानि शब्दान्तराणि ।

* रीतेः लक्षणं विभागश्च

अस्या लक्षणे विभागे च मनागिव वैमत्यं दृश्यते विद्वत्सु, तथाहि – तत्र वामनः [3]'विशिष्ट पदरचना रीतिः । विशेषो गुणवत्ता । सा त्रिधा

१. री गतिरेषणयोः । रेषणं वृकशब्दः । सि.कौ. क्र्यादिप्रकरणम् ।
२. रीङ् श्रवणे । सि.कौ. दिवादिप्रकरणम् । ३. का.सू. प्र.अ. अ–२.

वैदर्भी गौडीया पाञ्चाली च । तत्र समग्रगुणा वैदर्भी । ओजःकान्तिमती गौडीया । माधुर्यसौकुमार्योपपन्ना पाञ्चाली । विदर्भादिषु दृष्टत्वात् तत्समाख्या । तासां पूर्वा ग्राह्या, गुणसाकल्यात् । न पुनरितरे, स्तोकगुणत्वात्' इत्याचष्टे।

एवं चास्य मतेन गुणवती पदरचना रीतिः न पदरचनामात्रम् । गुणाश्च तदुक्ताः [४]श्लेषादयः शब्दाश्रिता दश, तन्नामान एवार्थाश्रिताश्च दशेति विंशतिः । तेषां गुणानां पदविन्यासेन समवाये सत्यपि रीत्या तु [५]अवयवावयवि-भावः सम्बन्धः । शब्दगुणानां तद्रचनारूपरीतौ अवस्थानं च पारम्परिकेण सम्बन्धेन अर्थगुणानां तु पारम्परिकतरेणेति विशेषः । इयं च रीतिः काव्यस्यात्मा । येऽस्याः त्रयो भेदाः तेषु वैदर्भी समस्तगुणशालिनीति ग्राह्या । गुणवैकल्यात् अन्यद् द्वयमग्राह्यमिति तात्पर्यम् । ध्वनिकारस्तु

[६]असमासा समासेन मध्यमेन विभूषिता ।
तथा दीर्घसमासेति त्रिधा सङ्घटनोदिता ॥

इति व्याहरन् सङ्घटनां त्रिप्रकारामभिधत्ते । यद्यप्यनेन न रीतेः सामान्य-लक्षणमभिहितम् तथापि प्रभेदानां परिशीलनेन समासवती पदरचनेति लक्षणं सुवचं भविष्यति । न चेदमसमासेति प्रथमप्रभेदेऽव्याप्तमिति वाच्यम्, वाक्ये आत्यन्तिकसमासाभावस्यासम्भवेन नञ ईषदर्थे पर्यवासानस्य अभ्युपगतेः। एतेनास्य मतेन रीतिस्वरूपनिर्णये समासमात्रस्य प्रयोजकत्वं न तु वर्णादेरपीति सिद्धं भवति । अत एव

[७]यस्त्वलक्ष्यक्रमव्यङ्ग्यो ध्वनिर्वर्णपदादिषु ।
वाक्ये सङ्घटनायां च स प्रबन्धेऽपि दीप्यते ॥

इति सङ्घटनातः पृथक् वर्णमात्रस्य अलक्ष्यक्रमव्यङ्ग्यध्वनौ व्यञ्जकत्वम् अङ्गीकृतमुपपद्यते ।

मतेनास्य रीतिगुणयोः नियम्यनियामकभावः सम्बन्धः । तत्र नियामको

४. श्लेषः प्रसादः समता माधुर्यं सुकुमारता ।
अर्थव्यक्तिरुदारत्वमोजःकान्तिसमाधयः ॥
५. अयं सम्बन्धो नैयायिकदृष्ट्या । वेदान्तिदृष्ट्या तु अभेदः ।
६. ध्वनि. तृ.उ. का-५.
७. ध्वनि. तृ.उ. का-२.

भवति गुणः नियम्या पुना रीतिः । [८]तदेतत् 'यदा तु नानात्वपक्षे गुणाश्रय-सङ्घटनापक्षः तदा गुणानाश्रित्य तिष्ठन्ती गुणपरतन्त्रस्वभावा' इति 'तस्मात् गुणव्यतिरिक्तत्वे गुणरूपत्वे च सङ्घटनाया अन्यः कश्चिन्नियमहेतुर्वक्तव्यः' इति च तदीयेनैव वाक्येन विशदं विज्ञायते । एतेन मन्दारकुसुमरेणु-पिञ्जरितालकेत्यादौ गौडीयरीतेः सद्भावेऽपि न दोषोन्मेषः, माधुर्यगुणेन अभिमतरसव्यञ्जकतया नियमनात् । एवं [९]यो यः शस्त्रं बिभर्तीत्यादावपि बोध्यम् । रीतेः धर्मित्वे अवयवित्वे वा अभ्युपगते पूर्वोक्तप्रथमोदाहरणे तद्धर्मत्वात् तदवयवत्वाद्वा शृङ्गारे ओजसः स्वीकारप्रसङ्ग इत्यवश्यं दोषो जागर्ति । तस्माद्गुणरीत्योः नोद्भटाभिममतो धर्मधर्मिभावः सम्बन्धः नापि वामनाभिमतोऽवयवावयविभावः किन्तु नियम्यनियामकभावः ।

सेयं रीतिः असमासा दीर्घसमासा मध्यमसमासा चेति त्रिविधा । एषा त्रिविधापि रीतिः गुणानाश्रित्य तिष्ठन्ती रसमभिव्यनक्तीति तदाशयः । मम्मटस्तु

[१०]माधुर्यव्यञ्जकैर्वर्णैरुपनागरिकोच्यते ।
ओजःप्रकाशकैर्वर्णैस्तैस्तु परुषा कोमला परैः ॥
केषाञ्चिदेता वैदर्भीप्रमुखा रीतयो मताः ।

रीतिप्रभेदान् उपनागरिकादिशब्दान्तरेणापि व्यपदिशन् त्रीन् प्रभेदान् अध्यवस्यति । यद्यप्यनेन रीतेः सामान्यलक्षणं नोक्तम् तथापि माधुर्यव्यञ्जकैः वर्णैरित्यादिना प्रभेदानामाख्यानात् समासस्य चानुल्लेखात् गुणाभिव्यञ्जिका पदरचनेति लक्षणमस्याभिप्रेतमिति सुनिर्णयम् । वृत्तिप्रभेदानामेतेषां क्रमेण उपनागरिका परुषा कोमला चेति नामान्तरम् । यद्यप्यत्र समासस्योल्लेखाभावात् वर्णमात्राणां रीतिस्वरूपनिर्णायकत्वमिति विशेषः । तत्र माधुर्यव्यञ्जकैः वर्णैः रचना वैदर्भी, ओजोव्यञ्जकैः गौडीया, तदतिरिक्तैस्तु पाञ्चालीति

---

८. ध्वनि. तृ.उ. सङ्घटनाप्रकरणे ।
९. यो यः शस्त्रं बिभर्ति स्वभुजगुरुमदात्पाण्डवीनां चमूनां
यो यः पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्यां गतो वा ।
यो यस्तत्कर्मसाक्षी चरति मयि रणे यश्च यश्च प्रतीपः
क्रोधान्धः तस्य तस्य स्वयमपि जगतामन्तकस्यान्तकोऽहम् ॥
१०. का.प्र. न.उ. का-३.

तन्मतम् । विश्वनाथः पुनः –

[११]पदसङ्घटना रीतिरङ्गसंस्थाविशेषवत् ।
उपकर्त्री रसादीनां सा पुनः स्याच्चतुर्विधा ॥

वैदर्भी चाथ गौडी च पाञ्चाली लाटिका तथा ।
माधुर्यव्यञ्जकैर्वर्णै रचना ललितात्मिका ॥
अवृत्तिरल्पवृत्तिर्वा वैदर्भी रीतिरिष्यते ।
ओजःप्रकाशकैर्वर्णैर्बन्ध आडम्बरः पुनः ॥
समासबहुला गौडी वर्णैः शेषैः पुनर्द्वयोः ।
समस्तपञ्चषपदो बन्धः पाञ्चालिका मता ॥
लाटी तु रीतिर्वैदर्भीपाञ्चाल्योरन्तरे स्थिता ।

इत्यभिदधानः रीतिं चतुष्प्रकारां निर्णयति । अस्य मतेन माधुर्यव्यञ्जकादि-विशेषणवशात् पूर्ववदेव गुणाभिव्यञ्जकविशेषणस्य लाभः । रसोपकारक-विशेषणस्य तु साक्षादुपादानात् । रीतेश्च रसोपकारकत्वं तन्निष्ठगुणाभिव्यञ्जन-द्वारेति स्थितौ उभयोरप्युपादानं निरर्थकं सत् लक्षणवाक्येऽवश्योपादेयत्वे तात्पर्यं ग्राहयति । ततश्च साक्षादुपादानात् बलीयस्त्वमिति परस्य विशेषणस्य ग्राह्यत्वे रसोपकारिका पदरचनेति लक्षणं सुग्रहं भविष्यति । तत्र असमासाल्पसमासा वा माधुर्यव्यञ्जकवर्णघटिता रचना वैदर्भी । ओजोव्यञ्जकवर्णघटिता दीर्घसमासा गौडीया । तदतिरिक्तवर्णघटिता समस्तपञ्चषपदा पाञ्जाली । वैदर्भीपाञ्चाल्योरन्तरालवर्तिनी लाटिकेति तात्पर्यम् ।

* कस्तावत् निर्णयः?

अत्रेदं विचार्यते – यत्तावदुच्यते वामनेन काव्यस्यात्मा रीतिरिति – तदहृदयङ्गमम्, अवयवसंस्थानतुल्यत्वेन आत्मत्वासम्भवात्, सम्भवेऽपि वा तत्प्रभेदेषु कस्यचित् ग्राह्यत्वं कस्यचिच्च अग्राह्यत्वमिति तारतम्यस्य अनुपपन्नत्वम् । नहि सारभूतः पदार्थः कश्चित् अंशेनाप्यपकृष्टो भवति,

११. सा.द. न.प. का–१,२,३,४,५.

व्याघातात् । यत्पुनरुच्यते वैदर्भ्या एव ग्राह्यत्वमिति – तत् कस्मात् ? रौद्रादौ हि रसे आस्वादनीये गौडीयाया एव ग्राह्यत्वेन समेषामनुभवः । अन्यच्च, समग्रगुणेति लक्षणमपि वैदर्भ्या न युक्तम्, [१२]ओजःप्रसादादीनां समता–समाध्यादीनां च मिथो विरुद्धत्वेन एककालिकतया समावेशस्यासम्भवात् ।

यत्पुनः ध्वनिकारेणोच्यते, असमासादीर्घसमासादिप्रभेदाङ्गीकारेण समासमात्रस्य रीतिस्वरूपं प्रति निर्णायकत्वमिति तदिदं न नो मनो हरति, वर्णानामेव तदभ्युपगमात्, समासमन्तरेणापि पदरचनायाः सम्भवात् । नहि वर्णविशेषान् अनादृत्य पदरचनाविशेषो लक्षयितुं शक्यते । समासस्तु बाह्यत्वादनित्यः । नह्यनित्यो धर्मः स्वरूपस्य निर्णायको भवति । किञ्च गुणरीत्योः यो नियम्यनियामकभावः सम्बन्धः स्वीक्रियते तत्कुतः? प्रतिकूलायामपि रीतौ अभिमतरसाभिव्यञ्जकत्वस्य सिद्ध्यर्थमिति चेत् – एवं तर्हि श्रुतिदुष्टाख्यदोषस्य स्वेनापि स्वीकृतस्य निरवकाशत्वापत्तिः, गुणवशात् श्रुतिदूषकैरपि शब्दैः अभिमतरसस्यैवाभिव्यञ्जनमिति वक्तुं शक्यत्वात् । किञ्च कठोरत्वादिः वर्णानां स्वभावः । नहि स्वभावो दोष इति वक्तुं शक्यते, अग्नौ औष्ण्यस्य, जले शैत्यस्य, एवमन्यत्रान्यस्य च दोषत्वेन परिगणनप्रसङ्गात् ।

तत्र पुनर्विचारे [१३]शून्यं वासगृहं विलोक्येत्यादौ अनुकूलां वैदर्भीं परित्यज्य प्रतिकूलाया गौडीयायाः परिग्रहात् श्रुतिदुष्टत्वं दोष एव यच्च रीतिभङ्गाख्ये नूतनत्वेन कल्पिते दोषेऽन्तर्भवति । तत्र रसं प्रति विभावादिरूपत्वेन संयोजनादर्थे दोषाभाव इति रसप्रतीतेः स्फुटप्रायत्वम् । तस्मात् शब्दांशे दोषोऽयं सन्नपि न झटिति बुद्धिमारोहति सहृदयानामिति विशेषः । किञ्च गुणरीत्योः नियम्यनियामकभावमभ्युपयतो भवतो मतेन रसरीत्योः कः सम्बन्धोऽभिप्रेतः? व्यङ्ग्यव्यञ्जकभाव इति चेत् साध्वभिहितम्, किन्तु

१२. गाढबन्धत्वमोजः । शैथिल्यं प्रसादः । मार्गाभेदः समता । आरोहावरोहक्रमः समाधिः ।   का.सू. तृ.अधि.

१३. शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनै
निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम् ।
विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता ॥

गुणरीत्योरपि स एव सम्बन्ध आयात इति स्वाभिव्यङ्ग्यस्य गुणस्य स्वां प्रत्येव नियामकत्वाभ्युपगमप्रसङ्गः । न चेष्टापत्तिः, नियामकत्वस्य सिद्धपूर्वार्थमात्रवृत्तित्वात् । तस्मात् गुणरीत्योः केवलो व्यङ्ग्यव्यञ्जकभावः न सम्बन्धान्तरमपीत्येव रमणीयम् ।

बाढमस्तु सर्वम्, एवं तर्हि रीतेः लक्षणं किंरूपं ग्राह्यम्? – यत् प्रकाशकाराभिमतम् । तत्रापि सूक्ष्मदृशा विचारे विशदं भविष्यति, येयं पदरचना तस्या गुणाभिव्यञ्जकत्वं समानजातीयवर्णघटितत्वेन । वर्णेषु समानजातीयत्वं च कोमलत्वादिना । अत एव [१४]रीतेरनुप्रासाद् भेदः यतस्तत्र समानत्वं स्थानस्वरूपादिना इह तु कोमलत्वादिना स्वभावेन । तदेवमात्मस्थानीये रसे प्रतिपादनीये अर्थस्य तद्व्यञ्जकत्वं विभावानुभाव-व्यभिचारित्रितयरूपत्वेन । शब्दस्य समानजातीयवर्णघटितत्वेन । तदपि गुणभिव्यञ्जनद्वारैवेति परम्परया । शब्दार्थयोरुभयोरपि व्यञ्जकत्वं यदि प्रकृष्टं तर्हि रसस्य स्फुटा प्रतीतिः । नो चेत् मन्थरा । यदि शब्दस्य व्यञ्जकत्वेऽप्रकर्षः तर्हि रीतिभङ्गाख्यो दोषः। अथार्थस्य तर्हि अपुष्टत्व-विभावादिकष्टकल्पनाप्रभृतिः इत्येतत्समस्तं स्वयमेवानुसन्धेयम् । तथा चेदं स्फुटतरं लक्षणम् –

गुणाभिव्यञ्जकं समानजातीयवर्णघटितत्वं रीतिः ॥

नेदमभिनवं लक्षणं किन्तु अभिहितचरस्यैव विशदीकरणम् । सेयं रीतिः वाक्य एव न वर्णादौ । ततश्च यत्र रसस्याभिव्यक्तिः तत्र प्राधान्येन द्वावंशौ अपेक्षितौ भवतः – कण्ठध्वनिः स्वभावश्च । तयोराद्यो वक्तृनिष्ठः अन्त्यस्तु वाक्यनिष्ठः। ध्वनिश्च नर्तकस्य गायकस्य वा शृङ्गारकरुणयोः नीचो भवति उच्चारणं च मन्दम् । वीररौद्रयोस्तु उच्चः उच्चारणं च शीघ्रम् । ध्वनेः उच्चनीचत्वादिकं नटादिभिः स्वयमेव निष्पाद्यमिति नात्र निरूपणीयतामर्हति। समासस्तु अनित्यो धर्म इति रीतिस्वरूपनिर्णये न प्रयोजकः । सः स्वस्य सद्भावासद्भावाभ्याम् उच्चारणे शीघ्रत्वमन्दत्वजननद्वारा तत्तद्रीतेरनुकूलो भवति


१४. वर्णसाम्यमनुप्रासः । का.प्र. का–२.

केवलम्, तथाहि – समासवतां हि शब्दानां प्रयोगे संहिताया नित्यत्वात् उच्चारणे शैघ्र्यं सिद्ध्यति । असमासानाम् अल्पसमासानां वा प्रयोगे मान्द्यम् । एतेन रसाभिव्यञ्जनो कर्तव्यो समासोऽसौ उच्चारणगतशैघ्र्यादिमात्रप्रयोजको वाक्यस्य बाह्यः कश्चिदंशः आभ्यन्तरस्तु केवलं वर्णसमुदायमात्रमिति तल्लक्षणे वर्णमात्रस्य परिग्रह इति बोध्यम् ।

सेयं रीतिः त्रिधेति चतुर्धेति च पक्षद्वयम् । तत्र त्रिधेति प्रकाशकारादयः चतुर्धेति दर्पणकारः । अस्माकं तु इदं भाति – पूर्वत्र गुणास्तावत् माधुर्यम् ओजः प्रसादः शोषणं चेति चत्वारः न तु त्रय एवेति सोपपत्तिकमभिहितम् । तत्र चित्तद्रुतिजनकधर्मविशेषरूपं यन्माधुर्यं तत् शृङ्गारकरुणयोरिति तत्र कोमला पदरचनेति शोभनं वचः । तस्मात् तत्र वैदर्भी रीतिरिति निर्विवादम् । चित्तदीप्तिजनकधर्मविशेषरूपं यदोजः तत् वीररौद्रयोरोति तत्र कठोरा पदरचना युज्यते । तस्मात् तत्र गौडीया रीतिरित्यपि पूर्ववदेव निर्विवादम् । शिष्टेषु च विकृतिभूतेषु चतुर्षु रसेषु हास्याद्भुतयोः चित्तविकासजनकधर्मरूपप्रसाद-गुणवत्त्वेन गृहीतयोः काङ्क्षणीयालम्बनकत्वेन शृङ्गारकरुणाभ्यां सादृश्यात् वैदर्भीप्रत्यासन्ना कोमलप्राया काचित् पदरचनाभ्युपेया यस्या असत्यां विप्रतिपत्तौ पाञ्चालीति व्यपदेशो भवितुमर्हति । लक्षणं तु भिद्यते, अन्तराल-वर्तित्वेन निर्णीतायाः तस्याः सम्प्रति वैदर्भीप्रत्यासन्नत्वेन निर्णेतव्यत्वात् । बीभत्सभयानकयोः पुनः चित्तसङ्कोचजनकधर्मरूपशोषणाख्यगुणवत्त्वेन गृहीतयोः वर्जनीयालम्बनकत्वेन वीररौद्राभ्यां सादृश्यात् गौडीयप्रत्यासन्ना कठोरप्राया काचिदन्यैव पदरचनाभ्युपेया यस्या अपि असत्यां विप्रतिपत्तौ लाटिकेति व्यपदेशोऽस्तु । लक्षणं तु पूर्ववदेव भिद्यते, गौडीयापाञ्चाली-मध्यवर्तित्वेन निर्णीतायाः तस्याः सम्प्रति गौडीयाप्रत्यासन्नत्वेन निर्णेतव्यत्वात् ।

शान्ते तु सर्वरसप्रकृतिभूते द्रुत्यादीनामसम्भवात् चित्तस्य निर्विकारताभिमुखी स्थितिरिति मध्यमैव पदरचना । अन्वर्थकत्वाच्च अस्याः समताशब्देन व्यवहारः साम्प्रतम् । न चात्र रसान्तरे प्रयोज्यानामेव शब्दानां प्रयोग इति कोमलात्वाद्यन्यतमस्य प्रतीतिरवश्यम्भाविनीति वाच्यम्, नैरन्तर्येण प्रतीतेरभावात् । तस्मादत्र सर्वविधा अपि शब्दाः विवक्षितार्थप्रतिपादनशक्ताः

स्वेच्छया सुप्रयोज्या इति बोध्यम्। तदेवं विकृतिभूतरसानाम् अष्टसंख्याकत्वात् तन्मात्रसम्बन्धिप्रभेदानां परिगणने चतुर्विधेति, प्रकृतिभूतरससम्बन्धि-प्रभेदस्यापि परिगणने पञ्चविधेति अस्मन्मतं स्थितम्। तदेतत् रेखाचित्रेण स्फुटीक्रियते –



वस्तुतोऽमीषां प्रभेदानां स्वरूपेषु मनाङ्मात्रं वैलक्षण्यमिति न तत्साधारणानां जनानामसङ्कीर्णतया सुबोधम् तथापि काष्ठारूढपरिपाकवतां कवीनां सहृदयानां चावश्यमेतत् प्रतीतिविषयो भवतीति नासङ्गतिः ।

यत्र पुना रसस्यासद्भावः तत्र यद्यपि वाच्यस्वभावानुसारेणैव रीतेर्व्यवस्थापनमिति वक्तव्यम् किन्तु वाच्ये स्वत एव कोमलत्वादेरसम्भवात् पार्यन्तिकप्रतीतिरसापेक्षयैव तस्य वक्तव्यत्वेन कृतपूर्व एव विभागो रीतेः सिध्यति । किन्तु तत्र रसस्य अत्यन्तदवीयस्त्वात् कोमलत्वकोमलतरत्वयोः कठोरकठोरतरत्वयोश्च न पार्थक्येनोपलब्धिरिति वैदर्भी गौडीया समता चेति त्रयाणामेव प्रभेदानां सिद्धिः । एतेन काव्ये रसस्यासद्भावो नाम तस्य दवीयस्त्वेन प्रतीतिः न तु अत्यन्तासत्त्वेनेति ज्ञेयम् ।

तदेवं नेदिष्ठरसापेक्षया रीतेः पञ्चविधत्वं दविष्ठरसापेक्षया त्रिविधत्वमिति स्थितौ, यदि कुत्रचित् व्यभिचारस्य सम्पातः तर्हि तत्र रीतिभङ्गाख्यो दोष

इति मन्तव्यम्। किन्तु तद्दोषः वक्तुः धीरोदात्तादिनायकप्रकृत्यनुगुणत्वे दोषत्वेन न स्फुरति, यथा – केनायं दुन्दुभिस्ताडित इति वाच्यस्य कोमलत्वेऽपि [15]मन्थायस्तार्णवाम्भ इत्यादौ धीरोद्धतस्य भीमसेनादेः वक्तृत्वात् सन्नपि रीतिभङ्गो न दोषाय। न च प्रतिपादकापेक्षया प्रतिपाद्यस्य प्राधान्यात् प्रतिपाद्यस्यात्र कोमलत्वात् कथं गौडीयेति शङ्क्यम्, प्रतिपाद्यार्थाभि-व्यङ्ग्यरसस्य विप्रकृष्टत्वमिति वक्तृनिष्ठं रसीभवनयोग्यं क्रोधादिभावमादायैव रीतेर्निर्णयात्। यो यः शस्त्रं बिभर्तीत्यत्र कठोरवर्णानां प्राचुर्यात् सम्भवत्येव रसस्याभिव्यञ्जनमिति न दोषः। शून्यं वासगृहं विलोक्येत्यत्र तु संयोगादीनां प्राचुर्यात् गौडीयेति यद्यपि रीतिभङ्गाख्यो दोषः तथापि वाच्यस्य सर्वात्मना विभावादित्रितयरूपत्वेन सन्नप्ययं दोषो न स्फुरति झटितीति विशेषः। ततश्चात्र अर्थस्य विभावादिरूपत्वेन योजनात् प्रतिभा वर्तते, किन्तु कोमलवर्णविन्यासस्य अवश्यं कर्तव्यस्याकरणात् व्युत्पत्त्यभावः इति स्पष्टम्। तस्मादस्य दोषस्य संवृततया भानमित्यङ्गीक्रियते, यदुक्तम् –

[16]अव्युत्पत्तिकृतो दोषः शक्त्या संव्रियते कवेः।
यस्त्वशक्तिकृतस्तस्य झटित्येवाभासते॥

यदि पुनः अत्रानुगुणो वर्णविन्यासः स्यात् तर्हि भवत्येवेदं पद्यमवश्यं रसस्यन्दीत्यलं विस्तरेण।

वामनस्तु विदर्भादिषु दृष्टत्वात् तत्समाख्येति ब्रुवाणो देशस्वभावानुसारेणैव रीतेर्विभाग इत्याचष्टे। [17]कुन्तकस्तु एतदसहमानः देशानामानन्त्यात् प्रभेदानन्त्यप्रसङ्गः। किञ्च विदर्भादिषु दृष्टाया अपि रीतेः देशान्तरेऽप्युपलम्भात् व्यभिचारः। तस्मात् कविस्वभावानुसारेणैव रीतेर्विभागो न्याय्यः। सुकुमारस्वभावस्य कवेः सुकुमारा शक्तिरुदेति ततश्च तादृश्येव व्युत्पत्तिः। अनया काव्यं सुकुमारमार्गान्वितं भवति। एवं कठोरस्वभावस्य कवेः विचित्रा

---

१५. मन्थायस्तार्णवाम्भःप्लुतकुहरचलन्मन्दरध्वानधीरः
कोणाघातेषु गर्जत्प्रलयघनघटान्योन्यसंघट्टचण्डः।
कृष्णाक्रोधाग्रदूतः कुरुकुलनिधनोत्पातनिर्घातवातः
केनास्मत्सिंहनादप्रतिरसितसखो दुन्दुभिस्ताडितोऽयम्॥ उल्लेखः का.प्र. न.उ.

१६. ध्वनि. तृ.उ.

१७. व.जी. प्र.उ. का–२४.

शक्तिः ततश्च विचित्रा व्युत्पत्तिः । तया च काव्यं विचित्रमार्गान्वितम् । एवं मध्यमस्वभावस्य कवेः मध्यमा शक्तिः ततो मध्यमा च व्युत्पत्तिः । काव्यं च मध्यममार्गान्वितम् । अथ देशनिबन्धनायां संज्ञायां सत्यामपि लक्षणं पुनः कविस्वभावानुसारेणैवेति कथ्यते तर्हि नास्ति दोषः, नाम्नि विवादाभावात् इत्यभिप्रैति ।

वस्तुतस्तु देशस्वभावानुसारेण रीतेर्विभागो न युज्यते, कुन्तकोक्तादेव हेतोः । कविस्वभावानुसारेणेति यदुक्तं तदपि न युज्यते, प्रतिपादकापेक्षया प्रतिपाद्यस्यैव प्राधान्यात् । अत एव प्रकाशकारादिभिः रसस्वभावानुसारेणैव विभागो विहितः योऽयं पन्था अस्माभिरप्यनुसृतः । वैदर्भीप्रभृतीनि नामानि पुनः अविवक्षितयोगार्थकानि कोमलत्वादिधर्ममात्रोपलक्षकाणीति बोध्यम्।

रसेषु तावदयं विभागः काममस्तु । निर्वेदादिषु भावेषु कः? उच्यते, चित्तवृत्तिषु रत्यादीनां प्राधान्यम्, स्थायित्वात् । व्यभिचारिणामप्राधान्यम्, विपर्ययात् । अप्रधानस्य प्रधानानुसारित्वमिति सिद्धान्तः । रसेषु तावत् कोमलत्वादयः स्वभावभेदाः अभिहिताः । ते च प्रायेण तावन्त एवेति निर्णयः, प्रकारान्तरस्यासम्भवात् । व्यभिचारिषु स्वभावान्तरं किञ्चित् दृश्येत तथापि अप्रधानगतस्वभावभेदस्य प्रभेदान्तरं प्रति अप्रयोजकत्वात् इयन्त एव प्रभेदा इत्युचितम् । तस्मान्नास्ति प्रसक्तिः प्रभेदान्तरस्येति दिक् ॥

सत्यभामावेङ्कटसुब्रह्मण्यभट्टयोस्सुतस्य लक्ष्मीनारायणभट्टस्य कृतौ
साहित्यवल्लर्यां रीतिनिरूपणो नाम
नवमः स्तबकः ॥

॥श्रीरस्तु॥

दशमः स्तबकः

अलङ्काराणां लक्षणं तद्विभागश्च

तदाश्वम्ब! समुत्तिष्ठ मन्दता नातिशोभना ।
स्ववीणारवमाधुर्यं वचने मे निधीयताम् ॥

कविशब्दात् कर्मार्थे ब्राह्मणादित्वात् ष्यञि काव्यशब्दस्य निष्पत्तिः। तस्मिंश्च काव्ये रस आत्मवद्भाति, शब्दार्थौ शरीरवत्, गुणाः शौर्यादिवत्, रीतयश्च अवयवसंस्थानविशेषवत् । अत एव काव्यं पुरुषायते । एतादृशे काव्ये अलङ्काराः पुनः आभरणानीव प्रतिभान्तीति नव्यमतस्थितिः। प्राचीनानां तु मतमत्र किञ्चिदिव भिद्यते । तेषु भामहजयदेवरुद्रटप्रभृतयः अलङ्कारमेव काव्यस्य आत्मानमामनन्ति । [१]तदेतदमीभिर्वाक्यैः स्पष्टं भवति –

० न कान्तमपि निर्भूषं विभाति वनितामुखम् ।

० अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती ।
असौ न मन्यते कस्मादनुष्णमनलं कृती ॥

० गुणालङ्काररहिता विधवेव सरस्वती ।

कुन्तकस्य तु वक्रोक्तिरेव काव्यस्यात्मेत्यभिमतम् । अस्य मतेन सर्वेषामपि आलङ्काराणां वाक्यवक्रोक्तावेव अन्तर्भाव इति तेषामात्मस्थाने अवस्थानम्। वामनः क्षेमेन्द्र आनन्दवर्धनश्च यथाक्रमं रीतिमौचित्यं ध्वनिं च आत्मतया मन्यमाना अपि अलङ्काराणामाभरणस्थानीयत्वे न विवदन्ते । एतेन भामहजयदेवप्रभृतीनां कतिपयानां विमतौ सत्यामप्यन्येषां सर्वेषामपि आभरणस्थानीयत्वमेव सम्मतमिति ज्ञायते । युक्तञ्चैतत्, अलङ्काराणां शोभाकारित्वात् आभरणतौल्यस्य अनपलपनीयत्वात् ॥

---

१. अ] काव्यालं. १–२३.   आ] चन्द्र.प्र.म. का–८.   इ] काव्याल.

ननु नाट्यशास्त्रकारेण भरतेन रसस्य महता परिकरबन्धेन निरूपणात् कण्ठेनानुक्तमपि तस्यैवात्मत्वं युक्तमिति स्थिते कथं तावत् भामहादिभिः प्राचीनैरलङ्कारादेः पदार्थान्तरस्यात्मत्वमुच्यते इति चेत् – मैवम्, तैरपि रसस्याप्यात्मत्वेनाभ्युपगमात्, तथाहि – भामहादीनां मतेन रसादिः कश्चिदलङ्कारः । वामनस्य मतेन रसो रीतिगर्भस्थः कश्चिद्गुणः, दीप्तरसत्वं कान्तिरित्यभिधानात् । कुन्तकस्य मतेन रसादिः कश्चिदलङ्कारः यश्च वाक्यवक्रोक्तौ अन्तर्भवति । आनन्दवर्धनस्य मतेन रसादिः ध्वनेरेव कश्चित् प्रभेदः । क्षेमेन्द्रस्य मतेन तु औचित्यं रसस्य जीवितम् । ततश्च तत्तस्यात्मत्वे स्वीकृते रसस्याप्यात्मत्वं स्वत एव सिद्ध्यतीति न कस्यापि मते भरतसिद्धान्तेन विरोधः । रसमात्रस्यात्मत्वम् अभ्युपेयमिति तु विषयान्तरम् ।

* अलङ्काराणां लक्षणे प्राचीनानां मतं निष्कर्षश्च

अलङ्कारशब्दोऽयम् अलंशब्दे उपपदे डुकृञ् करणे इति धातोः अलङ्क्रियते अनेनेति [२]करणार्थे घञि निष्पन्नः शोभासाधने वर्तते । साधनं चेह शब्दार्थगतो धर्मः ।

नन्वेतेषां किं लक्षणम्? उच्यते, बहुभिरत्र लक्षणानि उक्तानि सन्ति । तान्यत्र [३]प्रदर्श्यन्ते –

- काव्यशोभायाः कर्तारो धर्मा गुणाः । तदतिशयहेतवस्त्वलङ्काराः इति वामनः ।
- काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते इति दण्डी ।
- तमर्थमवलम्बन्ते येऽङ्गिनं ते गुणाः स्मृताः ।
  अङ्गाश्रितास्त्वलङ्काराः मन्तव्याः कटकादिवत् ॥ इति ध्वनिकारः ।
- उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित् ।
  हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः ॥ इति मम्मटः ।
- शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः ।
  रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत् ॥ इति विश्वनाथः ।

---

२. अकर्तरि च कारके संज्ञायाम् [अष्ट. ३.३.१९]

३. अ] का.सू. तृ.अ. सू–१,२. आ] काव्याद. द्वि.प. का–१. इ] ध्वनि. द्वि.उ. का–६. ई] का.प्र. अ.उ. का–६७. उ] सा.द. द.प्र. का–१.

नन्वेषु किं लक्षणमत्र ज्यायः? विचार्यते, तत्र प्रथमं लक्षणं न साधु, अतिशयस्य निर्वक्तुमशक्यत्वात्, नह्यत्र शब्दार्थयोः शोभा वर्तते अत्र च तदतिशयो वर्तते इति विभागेन विज्ञातुं शक्यम् । किंच अर्वाचीनैः गुणाः रसधर्माः अलङ्कारास्तु शब्दार्थधर्मा इति सयुक्तिकं व्यवस्थापनात् एवं विभागस्यासाधुत्वमेव भवति ।

नापि दर्पणोक्तम्, अस्थिरा इति विशेषणस्य वैयर्थ्यात् । न च गुणेषु अतिव्याप्तिः, तेषां वस्तुतो रसधर्मत्वेन शब्दार्थधर्मत्वाभावात् । रसोपस्कारकत्वविशेषणमपि तथा, उत्कर्षमात्रप्रयोजकत्वात्, नहि शोभाकारकत्वं किञ्चित् आत्मनः शोभामवश्यं कुर्यादिति नियमः येन तन्निवेशनं समर्थ्येत । यदि तथेत्याग्रहः तर्हि प्रतिमायां यत्यादौ च स्थितस्य कटककैयूरादेः अशोभाकारित्वेन निर्णेयत्वापत्तिः । ततश्च अलङ्काराणामलङ्कारत्वे शरीरमात्रोपस्कारकत्वं पर्याप्तं निमित्तमिति बोध्यम् । न चैवं कुरूपायां स्त्रियां कटककेयूरादेः शोभाकारित्वविरहात् अलङ्कारत्वमेव न सिद्ध्येदिति वाच्यम्, सत्यप्यलङ्कारे अलङ्कार्यत्वस्यैव अनुत्पत्तिरिति दोषाभावात् । नायमलङ्कारस्य दोषः यदेतेन संसक्तमपि किङ्चिद्वस्तु अलङ्कृतं भवति, प्रत्युतालङ्कार्यस्य । द्वयोर्वस्तुनोः आनुरूप्ये सत्येव अलङ्कार्यालङ्कारभावस्य सम्पत्तिः अन्यथा सर्वस्य सर्वोऽपि अलङ्कारः सम्पद्येत । किञ्च रसोपस्कारकत्वविशेषणस्य सद्भावे ४'शारदा शारदाम्भोजवदना' इति यमकादौ, 'विनापि तन्वि! हारेण वक्षोजौ तव हारिणौ' इति विरोधाभासादौ चाव्यप्तिः । एतेन चतुर्थमपि लक्षणमपि प्रत्युक्तं भवति ।

तत्र ध्वनिकारो यद्यपि अलङ्काराः अङ्गभूतशब्दार्थौ आश्रित्य तिष्ठन्तीति एतावन्मात्रस्य अभिधानात् अलङ्काराणां लक्षणं नाचख्यौ तथापि कटकादिदृष्टान्तोपन्यासात् अलङ्कारशब्दस्य यौगिकार्थः तस्य विवक्षित इति सम्भाव्यते । तेन शब्दार्थगतानां शोभाकारिधर्माणामलङ्कारत्वमिति तदाशयो विज्ञायते । तथा सति अलङ्कारत्वप्रयोजकांशमात्रघटितत्वात् तदुक्तं दण्ड्युक्तं

४. शारदा शारदाम्भोजवदना वदनाम्बुजे ।
सर्वदा सर्वदास्माकं सन्निधिं सन्निधिं क्रियात् ॥ रघु. संजीवनी. स-४. मङ्गलपद्यम् ।

च लक्षणमत्र ज्याय इत्यस्माकं मतिः। ननु ध्वनिकारेणापि [५]विवक्षा तत्परत्वेन इत्यादिना अलङ्कारे रसोपस्कारकत्वावंश्यम्भावस्य सूचनात् कथं तदुक्तस्य लक्षणस्य ग्राह्यत्वमिति चेत् – भ्रान्तोऽसि, उचितानुचितविवेचनमात्रस्य तत्र विधानात् । एवं चेदमलङ्काराणां लक्षणं सिद्धं भवति –

शब्दार्थयोः शोभाकारिणो धर्मा अलङ्काराः ॥

नन्वत्र धर्माणां सुन्दरत्वेन विशेषणमावश्यकम्, अन्यथा [६]दिने दिने सा परिवर्धमाना, घटः पट इव द्रव्यम् इत्यादौ यमकोपमाद्यापत्तिः – मैवम्, शोभाकारीति प्रथमविशेषणेनैव वारणात् । नहि स्वतोऽसुन्दरं किञ्चिदन्यस्मिन् शोभामाधातुं शक्नोति ।

यदत्र जगन्नाथेन, अलङ्कारशब्दयोगिकार्थं मनसि निधाय अन्यार्थोपस्कारकत्वे सत्येव अलङ्कारत्वम् अन्यथा तु तस्य स्ववैचित्र्यमात्रविश्रान्तत्वम् इत्याशय्यते – तन्न स्थाने, यौगिकार्थान्वये सत्येव यद्यलङ्कारत्वमङ्गीक्रियते तर्हि तुल्यन्यायेन गच्छतीति गौः, साययन्तीति सायका इति विवक्षया निष्पादितानां गवादिशब्दानां गमनादिविरहे गवादौ प्रयोगस्यासाधुत्वापत्तिः । न च तत्र लक्षणेति वाच्यम्, मुख्यार्थबाधस्याननुभवात्, सर्वसिद्धान्तविरुद्धत्वाच्च । तस्मात् तत्तद्यौगिकार्थान्वय–सम्भवतामात्रेण तत्तच्छब्दस्य तत्तदर्थे प्रयोग इति स्वीकार्यम् । एतेन अगन्तृत्वदशायां गोशब्दस्य, अमारकत्वदशायां सायकशब्दस्य, अव्रश्च्यमानत्वदशायां च वृक्षशब्दस्य प्रयोगः सर्वैरपि क्रियमाणः सङ्गच्छते । तस्मात् अन्यार्थानुपस्कारकत्वेऽपि स्वाश्रयशब्दार्थशोभाकारित्वमात्रेण धर्मस्यालङ्कारत्वं सुस्थमिति दिक् ।

एतेषां धर्माणां शब्दाश्रयत्वे शब्दालङ्काराः, यथा – शारदा शारदाम्भोजवदनेत्यादौ । अत्र शारदेति स्वरव्यञ्जनसमूहस्य तेनैव क्रमेणावृत्तिरस्ति या च आवर्तनीयस्य शब्दस्य धर्म इति यमकस्य शब्दालङ्कारत्वम् । अर्थाश्रयत्वे तु अर्थालङ्काराः, यथा – मुखं चन्द्र इवेत्यादौ ।

---

५. ध्वनि. द्वि.उ. का–१८,१९.

६. दिने दिनि सा परिवर्धमाना लब्धोदया चान्द्रमसीव लेखा ।
पुपोष लावण्यमयान्विशेषान् ज्योत्स्नान्तराणीव कलान्तराणि ॥ कुमार. स–१. श्लो–२५.

अत्र चन्द्रसादृश्यं मुखस्य धर्म इति सादृश्यस्यार्थालङ्कारत्वम् । एवं कविप्रतिभाव्ययः यदीयधर्मस्यान्वेषणे भवति तस्य तत्तत्सम्बन्ध्यलङ्कारत्वमिति निर्णयः ।

* अलङ्काराणां विभागः

तत्र शब्दालङ्काराः अल्पीयांसः अर्थालङ्कारास्तु भूयांसः । विमर्शकैः इयत्त्वेन परिगणनं तु तावतामेव प्राचुर्येण उपलम्भात् उपलब्धानामपि गुणीभूतव्यङ्ग्यगोष्पदे निवेशनाभिप्रायाद्वा इति नास्ति दोषः । तत्रार्थालङ्काराणमेवं विभागो दृश्यते –

- सादृश्यमूलाः – उपमा–रूपक–उत्प्रेक्षाप्रभृतयः ।
- विरोधमूलाः – विरोधाभास–विभावना–विशेषोक्तिप्रभृतयः ।
- शृङ्खलामूलाः – सार–कारणमाला–एकावलीप्रभृतयः ।
- [७]न्यायमूलाः – १. तर्कन्यायमूलाः – काव्यलिङ्ग–अनुमानप्रभृतयः ।
  २. वाक्यन्यायमूलाः–पर्याय–यथासंख्य–परिवृत्तिप्रभृतयः ।
  ३.लोकन्यायमूलाः– मीलित–सामान्य–प्रत्यनीकप्रभृतयः ।
- अनियतमूलाः – सूक्ष्म–व्याजोक्ति–पिहितप्रभृतयः ।

यद्यप्ययं विभागो न कुत्रापि आलङ्कारिकैः कण्ठरवेण उद्घोषितः तथाप्येतदनुसारेणैव अलङ्काराणां निरूपणस्य कृतत्वादयं तेषां सम्मत इत्यध्यवसीयते ।

वस्तुतस्तु विभागोऽयं न श्रद्धेयतां धत्ते, व्यभिचारात् तथाहि – सादृश्यमूलतया परिगणितेष्वेव केषुचन सादृश्यं न दृश्यते, यथोल्लेख–परिकरादिषु । न च [८]स्त्रीभिः कामोऽर्थिभिः स्वर्द्रुरित्यादौ उल्लेखे सादृश्यं दृश्यत इति वाच्यम्, [९]गजत्रातेति वृद्धाभिरित्युदाहरणान्तरे तददर्शनात् । एवं

७. द्वयोः वाक्यार्थयोः अव्यभिचरितः सम्बन्धो न्यायः । काव्यप्रपञ्चे तु यदा तस्योपादानं तदा सम्बन्धो व्यभिचरितो भवति, कल्पितत्वादिति तु विषयान्तरम् । अत्र तर्कशब्देन न्यायवैशेषिकयोर्ग्रहणम्, वाक्यशब्देन च मीमांसायाः ।

८. स्त्रीभिः कामोऽर्थिभिः स्वर्द्रुः कालः शत्रुभिरैक्षि सः इति समग्रं वाक्यम् । कुव. उल्लेखप्रकरणम् ।

९. गजत्रातेति वृद्धाभिः श्रीकान्त इति यौवतैः ।
यथास्थितश्च बालाभिः शौरिः दृष्टः सकौतुकम् ॥ कुव. उल्लेखप्रकरणम् ।

व्याजस्तुतिप्रभृतिष्वपि बोध्यम् । एवं विरोधमूलेषु निरूपिते समालङ्कारे विरोध एव न दृश्यते । एवं च विभागोऽयं प्रायिक इति बोध्यम् । समुचितं विभागान्तरं तु सर्वालङ्कारविषयकगाढज्ञानवतां विभजनचतुराणां महात्मनामेव सुकरं न तु साधारणानामिति न तत्रोत्साहः प्रदर्श्यते ॥

एते चालङ्काराः अनन्ता इति न तेषां निरूपणे प्रवृत्यते, ग्रन्थविस्तरभयात् । तत्तु ग्रन्थान्तरात् जिज्ञासुभिः स्वत एव विज्ञातव्यम् ।

* शास्त्रेऽस्मिन् कीदृशः शाब्दबोधः स्वीकार्यः?

ननु आस्तामेतत्सर्वम्, रसिकैः तिङन्तघटिते वाक्ये किमाकारस्य बोधस्याङ्गीकारो युक्तः येन [१०]लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः इत्यादौ उत्प्रेक्षायाम्, [११]अयमैन्द्रीमुखं पश्य रक्तश्चुम्बति चन्द्रमा इत्यादौ समासोक्तौ तथाविधे चान्यस्मिन् स्थले सन्देह एव न नो जायेत? उच्यते, अत्र हि वैयाकरणानां नैयायिकानां मीमांसकानां च मतभेदो वर्तते । तत्र हि [१२]प्राचीना आलङ्कारिकाः प्रायेण वैयाकरणानामेव मतमद्रियन्ते । नवीनेषु जगन्नाथप्रभृतयः नैयायिकानामिति विशेषः । यद्यप्यत्र एतदेव मतं ग्राह्यमिति नास्त्याग्रहो रसिकानाम्, विषयस्य शास्त्रान्तरसम्बन्धित्वात् तथापि वस्तुस्थितेः शोधनार्थं सङ्क्षेपेण विचारः क्रियते –

* शाब्दबोधे विषये मतभेदः

तिङन्तघटिते वाक्ये श्रुते सति पदार्थानामुपस्थितौ परस्परमन्वये च क्रियाविशेष्यको बोधः इति शाब्दिकाः । क्रिया च व्यापारः । क्रियते निष्पाद्यते इति [१३]व्युत्पत्त्या फलमपि क्रियाशब्दवाच्यम् । तदिदमुभयं धातोरर्थः । अयं भाव इत्युच्यते, 'धात्वर्थः केवलः शुद्धो भाव इत्यभिधीयते' इति वचनात् । अस्यैव वाक्यार्थे परमविशेष्यत्वम्, भावप्रधानमाख्यातमिति यास्कवचनात् । तत्र कर्तरि कर्मणि च लकारस्य विधानमिति तदादेशस्य तिङः स एवार्थः ।

१०. कुव. उत्प्रेक्षाप्रकरणम् । ११. कुव. समासोक्तिप्रकरणम् ।
१२. मम्मटदीक्षितप्रभृतयः ।
१३. कृञः श च [अष्ट. ३.३.११०] इत्यनेन शप्रत्ययस्य भावे इव अकर्तरि च कारकेऽपि विधानात् ।

किन्तु व्यापाराश्रयः कर्ता, फलाश्रयः कर्मेति स्थितौ फलव्यापारयोः धातुनैव लाभात् [१४]आश्रयमात्रं तिङोऽर्थ इति स्थितिः । ततश्च [१५]तन्मतेन कर्त्रर्थकलकारसमभिव्याहारे देवदत्तो ग्रामं गच्छतीति वाक्यात् देवदत्ताभिन्नाश्रयवृत्तिः ग्रामाभिन्नाश्रयवृत्तिसंयोगानुकूलो व्यापार इति बोधः। देवदत्तेन ग्रामो गम्यते इति कर्मार्थकलकारसमभिव्याहारे वाक्यात् देवदत्ताभिन्नाश्रयवृत्तिव्यापारजन्यः ग्रामाभिन्नाश्रयवृत्तिः संयोग इति बोधः । देवदत्तेन भूयते इति भावार्थकलकारसमभिव्याहारे तु देवदत्ताभिन्नाश्रयवृत्ति भवनम् इति विशेषः ॥

नैयायिकास्तु तिङः [१६]कृत्यर्थकत्वमङ्गीकृत्य प्रथमान्तार्थस्यैव विशेष्यत्वमभिदधते । तन्मतेन तु चैत्रो ग्रामं गच्छतीति वाक्यात् चैत्रो ग्रामनिष्ठसंयोगानुकूलव्यापारानुकूलकृतिमान् इत्यादिः बोधः । घटो नश्यतीत्यत्र कृतेरनन्वयात् प्रतियोगित्वे निरूढा लक्षणेति घटः नाशप्रतियोगितावान् इति बोधः । रथो यातीत्यत्र पूर्ववदेव आश्रयत्वे लक्षणेति रथो यानाश्रयत्ववान् इति बोधः । चैत्रेण ग्रामो गम्यते इति वाक्यात् ग्रामः चैत्रनिष्ठकृतिजन्यसंयोगाश्रय इति बोधः । देवदत्तेन सुप्यते प्रथमान्तपदस्याभावात् देवदत्तनिष्ठः स्वाप इति बोधः ॥

मीमांसकाः पुनः [१७]धातोः फलावच्छिन्नव्यापारम् आख्यातस्य च भावनामर्थं निर्णयन्ति । आख्यातं च तिङ् । भावनेति शब्दः णिजन्ताद् भूधातोः [१८]ण्यासश्रन्थो युच् इति भावे युचि सति निष्पन्नः कृतौ वर्तते । कृतिश्च

---

१४. फलव्यापारयोर्धातुराश्रये तिङः स्मृताः ।
फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम् ॥ वै.भू.सा. धात्वर्थनिर्णयः, का–२.

१५. वस्तुतः क्वचित् व्यापारविशेष्यको बोधः, क्वचित् फलविशेष्यकः, क्वचिच्च धात्वर्थविशेष्यकश्चेति इति वदतो नागेशस्य मतेन शक्तिरेव कारकम् तथापि शक्तिमत् कारकमिति मतं शक्तिशक्तिमतोरभेदं वा आश्रित्य तन्मतानुसारेण बोधोऽयं प्रदर्शितः । फलव्यापारयोर्धातु इति वैयाकरणसिद्धान्तः ।

१६. एवं व्यापारेऽपि न शक्तिः, गौरवात् । रथो गच्छतीत्यादौ तु व्यापारे आश्रयत्वे वा लक्षणा। जानातीत्यादौ तु आश्रयत्वे, नश्यतीत्यादौ प्रतियोगित्वे निरूढलक्षणा । न्या.सि.मु. शब्दखण्डः का – ८१.

१७. अत उभयं फलं व्यापारश्च धात्वर्थः । उभयत्र प्रत्येकं शक्तिः । नात ओदनादिपदार्थस्यैकदेशान्वयाशङ्का । तयोश्च जन्यजनकभावः संसर्गः व्यापारविशेष्यकश्च बोधः । भा.र. धात्वर्थनिरूपणम् । तद्भूतानां क्रियार्थेन समवायः [जै.सू. १.१.२४] इति जैमिनिवचनात् भावनाया विशेष्यत्वम् ।

१८. अष्ट. ३.३.१०७.

व्यापारसामान्यम् । अत एव पचतीत्यस्य पाकं करोतीति चैत्रः ओदनं पचतीत्यस्य पाकेन ओदनं करोतीति सर्वैः क्रियमाणं विवरणं सङ्गच्छते । एतेन धात्वर्थः पाको भावनायां क्वचित् कर्मत्वेनान्वेति, क्वचिच्च करणत्वेनेति स्पष्टम् । अस्याश्च भावनाया वाक्यार्थे विशेष्यत्वमिति तस्या एव परमं प्राधान्यम्, 'भावप्रधानमाख्यातम्' यास्कवचनात् । ननु तिङो भावनार्थकत्वे पचतीत्यादौ तिङभिहितसंख्यायाः कुत्रान्वय इति चेत् – नैष दोषः, यथा गवादिशब्दस्य लाघवात् गोत्वादौ शक्तौ स्वीकृतायामपि संख्याद्यन्वयस्य उपपादनाय निरूढलक्षणया व्यक्तिभानमभ्युपेयते तथात्रापि भावनायां शक्तौ स्वीकृतायामपि निरूढलक्षणया कर्तृभानमभ्युपेयते । एतेन [१९]लः कर्मणि च भावे कर्तरि चाकर्मकेभ्यः इति कर्तरि लकारस्य विधानमपि पाणिनेः सङ्गतं भवति ।

न च भावप्रधानमिति वचनं धात्वर्थीभूतभावस्य प्राधान्यं बोधयितुं प्रवृत्तमिति वाच्यम्, [२०]'प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्' इति सूत्रेण विरोधप्रसङ्गात् । नापि तिङर्थभावनायाः, 'प्रत्ययार्थः प्रधानम्' इत्यनुपदोक्तन्यायेनैव तल्लाभात् । तस्मात् वचनमिदं तिङोऽर्थेषु भावनासंख्या-कालादिषु बहुषु भावनाया एव प्राधान्यं बोधयितुं प्रवृत्तमिति बोध्यम् । ततश्च चैत्र ओदनं पचतीति वाक्यात् चैत्रनिष्ठं यत् कर्तृत्वं स्वनिरूपकपाकानुकूलत्व-सम्बन्धेन तद्वती, ओदननिष्ठं यत्कर्मत्वम् अनुपदोक्तसम्बन्धेनैव तद्वती, पच्यर्थो यः पाकः स्वनिष्ठकरणतानिरूपकौदनोद्देश्यत्वसम्बन्धेन तद्वती च वर्तमानकालिकी भावनेति बोधः । यद्यप्यत्र धात्वर्थस्य पाकस्य न साक्षात् भावनायां करणत्वेनान्वयः तथापि स्वनिष्ठकरणतानिरूपकौदनोद्देश्यत्वसम्बन्धे करणताया प्रवेशात् प्रागुक्तस्य नासङ्गतिः । पाकेन ओदनं करोतीति विवक्षितोऽर्थः । चैत्रेण ओदनः पच्यते इत्यतस्तु प्रागुक्तसम्बन्धेनैव चैत्रनिष्ठकर्तृत्ववती, तेनैव सम्बन्धेन ओदननिष्ठकर्मत्ववती स्वनिष्ठकरणता-निरूपितौदनोद्देश्यकत्वसम्बन्धेन पाकवती च वर्तमानकालिकी भावनेति वोधः । पाकेनौदनः क्रियत इति विवक्षितोऽर्थः। चैत्रेण सुप्यते इत्यत्र तु

१९. अष्ट. ३.४.६९.

२०. अष्ट. १.२.५६.

कृतेरनन्वयात् तिङ आश्रयत्वे निरूढा लक्षणा । ततश्च चैत्रनिष्ठं यत् कर्तृत्वं स्वनिरूपकस्वापानुकूलत्वसम्बन्धेन तद्वती स्वापाश्रयतेत्यर्थः । न चात्र भावनाया एवाभावादसङ्गतिरिति वाच्यम्, आश्रयत्वस्यापि भावनायामेव अन्तर्भावात् । चैत्रः स्वापाश्रय इति विवक्षितोऽर्थः॥ रथो यातीत्यत्रापि कृतेरनन्वयात् आश्रयत्वे निरूढलक्षणा । रथो यानाश्रयत्ववान् इति बोधः । एवं देवदत्तो जानाति, इच्छतीत्यादावपि बोध्यम् । घटो नश्यतीत्यत्र प्रतियोगित्वे, घटो नाशप्रतियोगित्ववान् इति बोधः ।

* कस्तावत् निर्णयः साधुः?

वस्तुतस्तु कर्तरि कर्मणि च लकारे प्रथमान्तार्थविशेष्यक एव बोधो युक्तः । धातोश्च फलव्यापारोभयार्थकत्वात् देवदत्तो ग्रामं गच्छतीति कर्तृवाच्यकलकारघटितात् वाक्यात् देवदत्तः ग्रामाभिन्नाश्रयवृत्तिः यः संयोगः तनुकूलव्यापाराश्रयः इति बोधः । देवदत्तेन ग्रामो गम्यते इत्यतः कर्मवाच्यकलकारघटितात् ग्रामो देवदत्ताभिन्नाश्रयवृत्तिव्यापारप्रयोज्यो यः संयोगः तदाश्रयः इति बोधः । देवदत्तेन भूयते इत्यतस्तु प्रथमान्तपदस्याभावात् देवदत्ताभिन्नाश्रयवृत्ति भवनम् इति विशेषः । यद्यपि भवने फलं व्यापारश्चेति द्वयोः अंशयोः सत्त्वात् कर्तृवाच्यके लकारे इवैकतरस्य प्राधान्यं स्वीकर्तव्यं तथापि विनिगमकाभावात् समानमेव प्राधान्यमिति भवनमित्येतावन्मात्रं विवरणं कृतम् । यद्वा, देवदत्तो भवतीत्यतो कर्तृवाच्यके लकारे देवदत्ताभिन्नाश्रयवृत्तिः आत्मभरणानुकूलो व्यापार इति, देवदत्तेन भूयते इति भाववाच्यके लकारे तु देवदत्ताभिन्नाश्रयवृत्तिः यो व्यापारः तत्प्रयोज्यं तन्निष्ठमेवात्मभरणमिति वैलक्षण्यमस्तु यदि विद्वांसो न विवदन्ते ।

एतेन तिङः कर्तृकर्मार्थकत्वे तदर्थस्य धात्वर्थं प्रति विशेष्यत्वम् भावार्थकत्वे तु तस्यैवेति मदाशयः फलितः । एतेन कर्तरि लकारे कर्तुः प्राधान्यम्, कर्मणि कर्मणः, भावे तु भावस्येति व्यवस्थापि सर्वजनानुभवानुरूपा सिध्यतीति मामकीना मतिः ।

* शाब्दिकमतं न साधु

न च 'भावप्रधानमाख्यातम्' इति यास्कसिद्धान्तस्यानुसरणात्

वैयाकरणमतमेव युक्तमिति वाच्यम्, सूत्रकारादिमतविरुद्धत्वात् अनुभव-विरुद्धत्वात् युक्तिविरुद्धत्वाच्च ।

तत्र सूत्रकारादिमतविरुद्धत्वं यथा – पाणिनिना हि [२१]व्याहरति मृगः, [२२]अभिनिष्क्रामति द्वारम् इत्यादिभिः सूत्रैः व्याहरतीत्यादावर्थे ठञादिप्रत्ययं विधाय प्रत्ययान्तशब्दबोध्यतया मृगद्वारादिकं निर्णीतम् । उदाहरणं च निशायां व्याहरति नैशो नैशिको वा मृगः, स्रुघ्नमभिनिष्क्रामति स्रौघ्नं कान्यकुब्जद्वारम् इत्यादिकम् । एतच्च तदैव सङ्गच्छते यदि बोधः प्रथमान्तार्थविशेष्यकत्वेन स्वीक्रियते । किञ्च कृदन्ते तिङन्ते च बोधयोः समानाकारकत्वमेव तस्याभिप्रेतम्, अत एव विवक्षितेऽर्थे क्वचित् तिङन्तं प्रयुङ्क्ते, यथा – [२३]तदर्हति ॥ श्वेतच्छत्रमर्हतीति विवक्षायां ठञि श्वैतच्छत्रिक इत्युदाहरणम् । क्वचित् कृदन्तम्, यथा – [२४]तदर्हम् ॥ विधिमर्हतीति विवक्षायां वतुपि विधिवत् पूज्यते हरिः इत्युदाहरणम् । विध्यर्हं हरिकर्मकं पूजनमिति वैयाकरणमतेन बोधः । यत्किञ्चिन्निष्ठविध्यर्हव्यापारजन्यं हर्यभिन्नाश्रयवृत्ति सेव्यत्वमिति यावत् । हरिः विध्यर्हपूजनाश्रय इति तु बोधो मन्मतेन । एवं [२५]निकटे वसतीत्यर्थे नैकटिको भिक्षुः समानतीर्थे वासीत्यर्थे सतीर्थ्य इति च । न च वासीत्यत्र ताच्छील्यस्याधिक्येन भानादर्थभेदः, [२६]णिनेः गृह्यादेः विधानात् । यदि तिङन्ते कृदन्ते च बोधभेदः तर्हि प्रयोगभेदं कृत्वा समानस्यैवार्थस्य ग्रहणादसङ्गतिः । अस्माकं मते तु नायं दोषः, पर्यायशब्देषु स्वाच्छन्द्यात् । न च एतादृशस्थले

[२७]आख्यातं तद्धितकृतोः यत्किञ्चिदुपदर्शकम् ।
गुणप्रधानभावादौ तत्र दृष्टो विपर्ययः ॥

इति हरिणा विपर्ययेण बोधस्य अभिहितत्वात् दोषाभाव इति वाच्यम्, वचनमात्रेण सिद्धान्तस्य प्रतिष्ठापयितुम् अशक्यत्वात् । तदपेक्षया

२१. अष्ट. ४.३.५१.
२२. अष्ट. ४.३.८६.
२३. अष्ट. ५.१.६३.
२४. अष्ट. ५.१.११७.
२५. निकटे वसति. [अष्ट. ४.४.७३] इत्यनेन ठक् । समानतीर्थे वासी [अष्ट. ४.४.१०७] इत्यनेन यत् ।
२६. नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः [अष्ट. ३.१.१३४]
२७. वै.भू. समासशक्तिनिर्णयः का–३५.

कर्तृविशेष्यकस्यैव बोधस्याङ्गीकारे वरम् येन विपर्ययवचनस्य अनावश्यकत्वेन लाघवं भवति । न खलु प्रेक्षावन्तः सिद्धान्तमभिधाय ततः तन्निर्दोषीकरणे यतन्ते किन्तु निर्दुष्टमेवाभिदधते समीक्ष्य ।

यत्र तु क्रियाया एव विवक्षितत्वं तत्र कृदन्तस्यैव प्रयोगः न तिङन्तस्य, यथा – [२८]रोगाच्चापनयने ॥ प्रवाहिकातः कुरु इत्युदाहरणम् । प्रवाहिकाया अपनयनं कुरु इत्यर्थः । यथा वा – [२९]शूलात्पाके ॥ शूलशब्दात् डाचि कृञोऽनुप्रयोगे शूलाकरोतीति शब्दः । शूलेन पाकं करोतीति तदर्थः । यथा वा – [३०]समयाच्च यापनायाम् ॥ पूर्ववदेव प्रक्रियायां समयाकरोतीति शब्दः । समयस्य यापनं करोतीति तदर्थः ।

वृत्तिकारस्यापि सूत्रकारवदेव आशयः । अयं च [३१]आहौ प्रभूतादिभ्यः, पृच्छतौ सुस्नातादिभ्यः इत्यादिना तदीयेनैव वाक्येन स्पष्टो भवति । स्वागतमित्याह स्वागतिक इत्यादिकमुदाहरणम् ।

भाष्यकारोऽपि प्रथमान्तार्थविशेष्यकमेव बोधं युक्तं मन्यते । अत एव सन्ति वै [३२]शब्दा अप्रयुक्ताः इत्यस्य निरूपणावसरे ऊष, तेर, पेच, चक्र इति शब्दानुपन्यस्य क्व यूयमुषिताः, क्व यूयं तीर्णा इत्यादिना कर्तृविशेष्यकतयैव विवरणं व्यधत्त । यत्पुनः [३३]ह्रस्वो नपुंसके प्रातिपदिकस्य इति सूत्रे क्रियाप्रधानमाख्यातम् इत्युक्त्वा रमते ब्राह्मणकुलम् इत्युदाहरणं निर्दिष्टम् – तत्तु ब्राह्मणकुलं रमणकर्तृ इत्येवंरूपार्थविषयके बोधे सति रमणस्य विवक्षिततया बोधनीयत्वात् विधेयत्वमिति तत्प्रयुक्तप्राधान्याभिप्रायेणैव सङ्गमनीयम् न पुनः रमणस्य विशेष्यत्वात् तत्प्रयुक्तप्राधान्याभिप्रायेण । युक्तं चैतत्, तिङन्तेन क्रियातत्कर्त्रोरुपस्थितौ कर्तुः सामान्यत्वादेव अविवक्षितत्वमिति विवक्षितत्वप्रयुक्तं प्राधान्यं क्रियाया एव सिध्यति । एवं [३४]प्रशंसायां रूपप् इत्यादावपि बोध्यम् ।

तदेवं यास्कवचनस्य सूत्रकारादिमतविरुद्धत्वम् ।

---

२८. अष्ट. ५.४.४९. २९. अष्ट. ५.४.६५. ३०. अष्ट. ५.४.६०.
३१. का. वा. प्राग्वहतेष्ठक् [अष्ट. ४.४.१] ३२. पा.भा. पस्पशाह्निकम् ।
३३. अष्ट. १.२.४७. ३४. अष्ट. ५.३.६६.

अनुभवविरुद्धत्वं खल्वपि, तथाहि – तरति ब्रह्महत्यां योऽश्वमेधेन यजते इति यद्वाक्यं तत्र योऽश्वमेधस्य कर्ता स एव ब्रह्महत्यायाः तरितेत्येवं कर्तृप्रधानको बोधः। एतेन प्रवृत्तिनिवृत्त्यधिकारी यः प्रायश्चित्तीयः तं प्रत्येव प्रायश्चित्तस्य विधानमिति सङ्गतिः । यत्कर्तृको यागः तत्कर्तृकं तरणमिति नागेशस्य [३५]विवरणमाग्रहकृतमेवेति विभावनीयम् । ननु तथैव अस्माकमनुभव इति चेत् – एवं हि

[३६]त्वत्पादनखरत्नानां यो रञ्जयति यावकैः ।
इन्दुं चन्दनलेपेन पाण्डुरीकुरुते हि सः ॥

इति न्यासे कर्त्रोः शाब्दाभेदे सत्यपि क्रिययोः आर्थाभेद इति निदर्शना,

[३७]त्वत्पादनखरत्नानां यदलक्तकेन मार्जनम् ।
इदं श्रीखण्डलेपेन पाण्डुरीकरणं विधोः ॥

इति न्यासे तु कर्त्रोः आर्थाभेदे सत्यपि क्रिययोः शाब्दाभेद इति रूपकमित्यनुभवकुशलैः रसिकैः निर्णीतस्य अलङ्कारभेदस्य अनुपपत्तिप्रसङ्गः । एवमेव

[३८]सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः ।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ॥

इत्यत्र शूरः कृतविद्यः सेवनफलकं तत्कर्तृकं ज्ञानं चेति त्रयः पुरुषाः चिन्वन्तीति बोधे

[३९]यश्च निम्बं परशुना यश्चैनं मधुसर्पिषा ।
यश्चैनं गन्धमाल्याद्यैः सर्वस्य कटुरेव सः ॥

इत्यत्र च तत्कर्तृकच्छेदनम्, तत्कर्तृकसेचनम्. तत्कर्तृकपूजनमित्यर्थस्य उपस्थितौ तदर्थस्य 'सर्वस्य कटुरेव सः' इत्युत्तरवाक्यार्थेनानन्वयात् असङ्गतिः । अत एवास्माकं गच्छतीत्यादौ शब्दे श्रुते क इति कर्तृविषयकः प्रश्नः । अथ भावस्य प्राधान्यं तर्हि गमनं कस्येति कस्मिन्निति वा प्रश्न

३५. उद्योतः. पा.भा. पस्पशाह्निकम् ।
३६. रस. द्वि.आ. निदर्शनाप्रकरणम् ।
३७. रस. द्वि.आ. निदर्शनाप्रकरणम् ।
३८. कुव. दीपकप्रकरणम् ।
३९. कुव. तुल्ययोगिताप्रकरणम् ।

उदीयात् । अस्ति यद्यपि सर्वनाम्नामप्रधानस्याप्यर्थस्य परामर्शकत्वादयं प्रश्न इत्युत्तरम् तथाप्यप्रधाने सम्भवतः प्रश्नस्य प्रधानेऽवश्यं सम्भवात् तत्प्रश्नः प्रधाने कुतो न सम्भवतीति पृच्छयते। न च यश्च जानाति सेवितुमित्यत्र लक्षणा, मुख्यार्थबाधस्य अननुभवात् रूढ्यादेः निमित्तस्याभावात्, गौरवाच्च।

युक्तिविरुद्धत्वं चापि, तथाहि – देवदत्तो ग्रामं गच्छतीति वाक्ये श्रुते देवदत्तः ग्रामगमनकर्तेति देवदत्तस्य उद्देश्यत्वं गमनकर्तृरूपार्थस्य विधेयत्वमिति समेषां प्रतीतिसिद्धम् । एतच्च तदैव सङ्गच्छते यदि गच्छतीति तिङन्तात् कर्तृप्रधानको बोधः स्वीक्रियते । क्रियाप्रधानकस्य बोधस्य स्वीकारे तु कर्तृरूपार्थस्य देवदत्तेऽन्वय इति गमनं देवदत्तकर्तृकं ग्रामकर्मकं चेति अन्यस्यैव उद्देश्यत्वम् अन्यस्यैव विधेयत्वमिति स्फुटैव असङ्गतिः।

अन्यच्च, जातिगुणक्रियाद्रव्यरूपेषु चतुर्विधेषु अर्थेषु जात्यादीनां त्रयाणां द्रव्याश्रितत्वमिति द्रव्यस्यैव प्राधान्यमितरेषां तु अप्राधान्यम्। आश्रयाश्रयिणोः आश्रयस्य प्राधान्यमित्येतत् लोकत एव सिद्धमिति न तत्समर्थनीयतामर्हति। स्थिते चैवम्, लोकसिद्धस्य बाधकाभावे शास्त्रेऽपि स्वीकार इति देवदत्तो गच्छतीति वाक्यात् देवदत्तो गमनकर्तेति द्रव्यप्रधानक एव बोध स्वीक्रियते। सत्यप्येवं यदि क्रियाया एव प्राधान्यमिति तत्प्रधानको बोधो स्वीक्रियते तर्हि तुल्यन्यायेन घटो रक्त इत्यत्रापि घटाभिन्नधर्मिकरक्तत्वम् इति गुणप्रधानको बोधः स्वीक्रियताम् ।

*** पश्य मृगो धावतीत्यत्र दोषः**

अन्यच्च, क्रियाविशेष्यकबोधे पश्य मृगो धावतीत्यत्र धावनस्य कर्मतासंसर्गेण दर्शनेऽन्वये मृगकर्तृकं धावनकर्मकं दर्शनमिति बोधः सम्पद्यते। तत्र धावनस्य तिङन्तेनाभिधानात् असत्त्वरूपतेति कारकत्वमेव तावत् कथम्? पश्येत्यस्य स्थाने गृहाणशब्दस्य प्रयोगे तादृशधावनस्यामूर्तत्वात् ग्रहणे कर्मत्वमपि कथम्? क्रियायाः कारकत्वं नास्तीत्येवम्परस्य [४०]क्रिया क्रियया समवायं न गच्छतीति भाष्यवचनस्य का गतिः? न च तद्वचनस्य क्रियायां कर्तृत्वकर्मत्वातिरिक्तकारकत्वस्य व्युदास एव तात्पर्यमिति वाच्यम्, तथा

४०. सार्वधातुके यक् [अष्ट. ३.१.६७] सूत्रे भाष्ये ।

सङ्कोचे प्रमाणाभावात्, असत्त्वभूतस्य कारकत्वमेव तावत् कथमिति कृतचरस्य प्रश्नस्य तादवस्थ्याच्च ।

तस्मात् [४१]पदैकवाक्यतां विहाय वाक्यैकवाक्यताया अवलम्बनमेव ज्यायः। तथा सति धावनाश्रयमृग इति वाक्यार्थस्य दर्शने कर्मत्वमिति न काप्यनुपपत्तिः। न चैवमङ्गीकारे धावतीति लटः शत्रापत्तिः, प्रथमा-सामानाधिकरण्ये निषेधात्। सन् ब्राह्मणः, अधीयानः चैत्रः, मा जीवन् इत्यादयस्तु प्रयोगाः सदादयश्च बहुलम्, इङ्जुहोत्योर्वा, माङ्याक्रोशे इत्येतद्वार्तिकत्रयात् स्वयं भाष्यकारेणैव समर्थितात् साधवो भवन्ति । तदेतत् [४२]लक्षणहेत्वोरिति सूत्रे भाष्ये तानि त्रीणि वार्तिकान्युपन्यस्य 'एतद्वक्तव्यमेव' इत्यवधारणार्थगर्भितात् तदीयादेव वचनात् विज्ञायते । वर्तमाने लट् इत्यतो लडित्यनुवर्तमाने पुनः लड्ग्रहणं वर्तमाने लट् इत्यतो यत्र लट् तत्रैव शतृशानचौ न तु वर्तमानसामीप्ये वर्तमानवद्वेति वर्तमानत्वातिदेशेन यत्र लट् न तत्रेति ज्ञापनार्थम् न तु अधिकविधानार्थम् । यद्यस्य नाङ्गीकारः तर्हि सूत्रकारेण स्वयं कण्ठरवेण प्रयुक्तस्य अप्रथमासमानाधिकरणशब्दस्य वैयर्थ्यापत्तिः । एतेन लडित्यनुवर्तमाने पुनः लड्ग्रहणं अधिकविधानार्थम्, तेन प्रथमासामानाधिकरण्येऽपि क्वचिदिति दीक्षितोक्तं चिन्त्यमिति विज्ञेयम्। न च प्रथमासामानाधिकरण्ये शतुः निषेधे गच्छन् हसतीत्यादेः प्रयोगस्य कथं साधुत्वमिति शङ्क्यम्, लक्षणहेत्वोः क्रियाया इति सूत्रान्तरस्य प्रवर्तनात्।

अन्यच्चेदम्, पदैकवाक्यतापक्षे पश्य मृगो धावतीत्यत्र मृगस्य किं धावनक्रियापेक्षं कर्तृत्वं स्वीकार्यम् किंवा दर्शनक्रियापेक्षं कर्मत्वम् इति सन्देहे प्रधानक्रियानुरोधेनैव निर्णयः साधीयान् । अत एव फलानि खादितुं शक्यन्ते, फलानि खादितुमिष्यन्ते इत्यादेः वाक्यस्य साधुत्वम् अन्यथा शक्यन्ते

४१. पश्य मृगो धावतीति एकमेव वाक्यम् । तत्र पदार्थानामुपस्थितौ मृगकर्तृकधावनकर्मकं दर्शनमित्येको वाक्यार्थः सिद्ध्यतीति पदैकवाक्यतावादिनो वैयाकरणाः । पदानामेकवाक्यत्वम् इति तदर्थः । तत्र मृगो धावतीत्येकं वाक्यम् । पश्येत्यन्यदिति वाक्यद्वयम् । प्रथमवाक्यात् धावनाश्रयो मृग इति वाक्यार्थः । तस्य च कर्मतासंसर्गेणान्वये तस्य चाध्याहृते युष्मत्पदार्थेऽन्वये त्वं तत्कर्मकदर्शनाश्रय इति वाक्यार्थः सिद्ध्यतीति वाक्यैक्यवादिनोऽन्ये।

४२. अष्ट. ३.२.१२६.

इष्यन्ते इति बहुवचनम् अनुपपन्नमेव स्यात्। तदेवं मृगस्य कर्मत्वे प्रथमासामानाधिकरण्याभावेन शतरि तदर्थे पश्य मृगं धावन्तम् इत्येव प्रयोगस्य आपत्तिः। न चात्र परत्वात् कर्तृसंज्ञाया एव प्रसक्तिरिति दोषाभाव इति वाच्यम्, एकस्यामेव क्रियायां कः कर्ता, किं कर्म, किं करणमित्यादेः जिज्ञासायां तत्तत्संज्ञाविधायकसूत्राणां प्रवृत्तिः न तु क्रियाभेदे इत्यभ्युपगमात्। एवं पदैकवाक्यतापक्षे जानीहि देवदत्तो गन्ता इत्यादिप्रयोगस्यापि असिद्धिप्रसङ्गः, गन्त्रभिन्नदेवदत्तस्य पूर्वोक्तादेव हेतोः कर्मत्वे विशेषणस्यापि कर्मत्वमिति जानीहि देवदत्तं गन्तारमित्यैव प्रयोगस्य सम्भवात्। न चेष्टापत्तिः, प्रथमवाक्यस्य असाधुत्वप्रसङ्गात्। न च तस्यासाधुत्वम्, ज्ञानाकारसमर्पकस्य इतिशब्दस्य प्रयोगे यस्य साधुत्वम् तस्य तदप्रयोगेऽपि साधुत्वानपायात्। अत एव लोके 'जानीहि भोः! देवदत्तो गन्ता' इत्यादेर्वाक्यस्यानिरुद्धः संचारः। किञ्च गानकर्ता देवदत्तो रोदनकर्तेव इत्याद्यभिप्रायेण प्रयुक्तानां देवदत्तो रुदन्निव गायति, नृत्यन्निव गच्छतीत्यादीनां वाक्यानां सर्वेषामपि असङ्गत्यापत्तिः। न च 'न वै तिङन्तेनोपमानमस्ति' इति भाष्यात् वाक्यानामेतेषामसाधुत्वमेवेति वाच्यम्, तस्य तिङन्तार्थस्य उपमानत्वं न सम्भवतीत्येतदर्थकत्वात्। ततश्च तेन रोदितीव गायतीत्यादेरेव वारणमिति मन्तव्यम्।

तदेवं सूत्रकारादिमतविरुद्धत्वात् अनुभवविरुद्धत्वात् युक्तिविरुद्धत्वाच्च यास्कवचनम् अश्रद्धेयम्।

* **प्रथमान्तविशेष्यकबोधेऽनुपपत्तिः नास्ति**

न च प्रथमान्तविशेष्यकबोधस्य स्वीकारे गमनकर्ता हसतीति विवक्षायां गच्छति हसतीति प्रयोगापत्तिरिति वाच्यम्, लक्ष्यलक्षणभावस्य सत्त्वेन लक्षणहेत्वोः क्रियाया इति शतरि गच्छन् हसतीति अभिमतप्रयोगस्यैव सिद्धत्वात्। सतोऽपि लक्ष्यलक्षणभावस्य अविवक्षायां तिष्ठन्मूत्रयतीत्यादौ तिष्ठति च मूत्रयति चेत्यादिवत् अत्रापि गच्छति च हसति चेति चघटित एव प्रयोग इति न काप्यसङ्गतिः।

नन्वेवमपि पचति भवतीत्यादेः प्रयोगस्य विवक्षितार्थे सर्वथानुपपादनीयत्वम्, यतो लक्ष्यलक्षणभावस्य विवक्षायां पचन् भवतीति प्रयोगान्तरस्य प्रसङ्गः,

अविवक्षायां पचति च भवति चेति चघटितवाक्यस्य प्रसङ्गः, यथाकथञ्चित् उपपादनेऽपि [४३]'पच्यादयः पाकक्रियायाः कर्त्र्यो भवन्ति' इति भाष्यात् पाको भवतीत्यादेरर्थस्य दुरुपपादत्वप्रसङ्ग इति चेत् – उच्यते, लक्ष्यलक्षणभावस्य विवक्षायां पचन् भवतीति प्रयोगः यश्च सर्वेषामिष्टः। अविवक्षायां पचति च भवति चेति प्रयोगः योऽपीष्ट एव समेषाम् । यः पुनः भाष्यकाराभिप्रेतोऽर्थः स एवम् उपपाद्यते, तथाहि – सच्चिदानन्दस्वरूपस्य ब्रह्मणः या सत्ता सा सर्वेष्वपि तद्विवर्तभूतेषु पदार्थेषु अनुस्यूततया भासते। अत एव घटोऽस्ति पटोऽस्ति, पर्वतोऽस्ति इति सर्वेऽपि पदार्थाः सत्प्रतीतिविषया एव भान्ति । किं बहुना? अभावोऽस्ति, दग्धोऽस्ति, मृतोऽस्तीत्यादीनां व्यवहाराणामपि साधुत्वम् । न चेयं सत्ता लौकिकी, यत्ननिष्पाद्यत्वाभावात्, यस्याः पुनः तन्निष्पाद्यत्वं तस्या एव कालेन देशेन निषेधेन च सम्बन्धः, यथा – यो घटः ह्यः तत्र नासीत् स इदानीमत्र प्रकोष्टेऽस्तीत्यादौ । तदेतदभिसन्धाय कात्यायनेन भणितम् – [४४]अस्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्ति ॥ न चैवं त्वं पण्डितः, अहं पण्डित इत्यादौ अयोग्यत्वादेव अस्तिपदस्याध्याहाराभावे वचनमिदं न विधायकमिति वाच्यम्, तत्र त्वंपदार्थे सम्मुखीनत्वादेव अहंपदार्थे च स्वानुभवबलादेव अस्त्यर्थस्य सिद्धिरिति वचनेन विधानस्यानावश्यकत्वात्। नहि वृक्ष इत्युक्ते स्यात् न वा स्यादिति विकल्पे सम्भवत्यपि त्वम् इत्युक्ते अहमित्युक्ते वा तथा विकल्पः कस्यापि पुंसो जायते । न च पदार्थेषु प्रतिभासमानायाः ब्रह्मसत्तायाः कालसम्बन्धाभावे अस्तीति कथं लडिति वाच्यम्, यत्ननिष्पाद्यक्रियावाचका ये धातवः तज्जन्यशब्दानामेव सूत्रकारेण निर्वचनमिति तदनुशासनेन लटो विधानाभावेऽपि कात्यायनवचनेन तस्य निर्बाधत्वात् । यद्वा, लिङ्गसामान्यं यथा नपुंसकं तथा वर्तमानकालः कालसामान्यमिति वर्तमाने लडित्यनेनैव लट् भविष्यति ।

सेयं सत्ता यदि जातिरूपेऽर्थे प्रतीयते तर्हि ब्राह्मणोऽस्ति, घटोऽस्तीत्यादयः प्रयोगाः । यदि गुणरूपे तर्हि श्वेतोऽस्ति, पीतोऽस्तीत्यादयः। यदि सिद्धरूपायां

४३. भूवादयो धातवः [अष्ट. ३.३.१] सूत्रे भाष्ये ।
४४. भूवादयो धातवः [अष्ट. ३.३.१] सूत्रे भाष्ये ।

क्रियायां तर्हि पाकोऽस्ति, गमनमस्तीत्यादयः । अथ साध्यरूपायां तर्हि पचति भवति, पक्ष्यति भवतीत्यादयः। अत एव धात्वर्थस्य भविष्यत्कालिकत्वेऽपि नास्याः तथा प्रतीतिः। तत्र वाक्यस्यापूर्णत्वात् देवदत्तादिकं पदमध्याहार्यमिति विशेषः । ततश्च एतादृशाद्वाक्यात् देवदत्तोऽयं सत्ताश्रयो यो भविष्यत्कालिकः पाकः तदाश्रय इत्येवंरूपो बोधः न तु देवदत्ताभिन्नाश्रयवृत्तिः यो भविष्यत्कालिकः पाकः तदभिन्नाश्रयवृत्तिः सत्तेति दिक् । तस्मात् प्रथमान्तार्थविशेष्यक एव बोधो युक्तः। जगन्नाथस्यापि अयमेव अभिप्रायः यत्तेन रसगङ्गाधरे उत्प्रेक्षालङ्कारे एतादृशस्यैव बोधस्य युक्तत्वेन अभिहितम् । प्रपञ्चनं तु अग्रे करिष्यते इत्युक्तम्, ग्रन्थस्यापूर्णत्वात् तन्नोपलभ्यते इत्यन्यदेवैतत् ।

* नैयायिकमीमांसकमतयोः अनुपादेयत्वम्

यत्पुनः नैयायिकैः प्रथमान्तार्थविशेष्यकबोधमङ्गीकुर्वद्भिरपि तिङः कृत्याद्यर्थकत्वमभिधीयते – तदप्यसत्, रथो गच्छति, रथो गन्तेत्युभयत्रापि कर्तरि प्रत्यय इति समानाकारस्यैव बोधस्याङ्गीकर्तव्यत्वात्, तथाहि – [४५]कर्तरि कृत् इति सूत्रेण धातोः कर्तरि प्रत्ययो विधीयते । स एवार्थः उत्तरत्र 'लः कर्मणि च भावे चाकर्मकेभ्यः' इत्यत्र चकारेण समुच्चीयत इति लादेशानां तिङां कर्त्रर्थकत्वमेव न्याय्यम् । एतेन एकेनैवार्थेन निर्वाहे स्थलभेदेन कस्यचित् नानार्थकत्वकल्पनं गौरवायेत्युक्तं भवति । एवं घटो नश्यति, घटो नष्टेत्यादावपि तिङ आश्रयार्थकत्वं बोध्यम् । किञ्च तिङः कृत्याद्यर्थकत्वे गच्छतीति शब्दे श्रुते गमनानुकूलकृतेश्च बोधे कस्मिन्नित्यधिकरणाकाङ्क्षा स्यात् न तु क इति कर्त्राकाङ्क्षा । तस्मात् यथा यथा विचार्यते तथा तथा तिङः कृत्याद्यर्थकत्वं हृदयङ्गममपि दूरं गच्छति ।

यत्पुनः मीमांसकैरुच्यते, भावनाया एव वाक्यजन्यबोधे परमं प्राधान्यमिति – तत्र यद्यपि श्रुतिरहस्यभेदिभिः तैः सह वाद एवास्माकं न शोभते तथापि अतत्त्वेन भासमानस्य निराकरणे, महद्भिः साकं वादे च कुतूहलिनामस्माकं

४५. अष्ट. ३.४.६७.

तूष्णीका दोषायैव कल्पेतेति किञ्चित् पर्यनुयुज्यते, यदि चैत्र ओदनं पचति, चैत्रेण ओदनः पच्यते इत्यादौ समानाकारक एव बोधः स्वीक्रियते तर्हि पुरुषेण कृतस्य वाक्यभेदस्य निष्फलत्वापत्तिः । नहि एकरूपायां विवक्षायां शब्दभेदः सम्भवन्नपि वाक्यभेदः सम्भवति । किञ्च भावप्रधानमाख्यातमित्यस्य योऽर्थो भवतां सम्मतः स तावत्तस्य नार्थः, तथाहि – [४६]तत्र यान्येतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्चेति वदतो यास्कस्य वाङ्मये स्थितानां शब्दानां चतुर्धा विभजनमभिप्रेतमिति स्पष्टम् । तत्र नामपदेन सर्वेषां नामपदानाम्, आख्यातपदेन सर्वेषां तिङन्तानां ग्रहणमभीप्सितमिति निश्चप्रचम् । ततश्च आख्यातमित्यस्य तिङन्तमित्येवार्थः न तु तिङिति । स्थिते चैवम्, शब्दस्य अन्यमेव कञ्चनार्थं मनसिकृत्य यन्मतं प्रदर्शितं तत्सर्वं छिन्नमूलस्तरुरिव सुतरां न राजते । अन्यच्च, उद्देश्यविधेय–भावस्यानुपपत्तिरित्यादिकं यद्दोषजातं शाब्दिकसिद्धान्ते प्राक् प्रदर्शितं प्रायेण तत्सर्वमप्यत्र पदं निधत्ते । तस्मात् मतमेतत् न श्रद्धातुं शक्यमिति सर्वमवदातम् ॥

सत्यभामावेङ्कटसुब्रह्मण्यभट्टयोस्सुतस्य लक्ष्मीनारायणभट्टस्य कृतौ
साहित्यवल्लर्याम् अलङ्कारलक्षणादिनिरूपणो नाम
दशमः स्तबकः ॥

॥ समाप्तश्चायं ग्रन्थः ॥

४६. निरुक्त. निरुक्तम्. प्र.अ. पा–१.

श्लोकानुक्रमणिका

अ आ

अइ पिहुलं जलकुंभं ४१, २४५.
अकुण्ठोत्कण्ठया २७४
अज्ञानकूपे पतनम् १
अतन्द्रचन्द्राभरणा २४८
अत्ता एत्थ णिमज्जइ १४
अद्यापि स्तनशैलदुर्गविषमे २७८
अद्वितीयं रुचात्मानम् ५८
अनङ्गमङ्गलभुवः ५७
अबलानां श्रियं हृत्वा १५८
अमितः समितः प्राप्तैः ५८
असावुदयमारूढः २४५
अस्तु त्रयीमयतनुः ७४
आज्ञा शक्रशिखामणि २८३
आदावञ्जनपुञ्जलिप्त २६७
आपतन्तममुं दूरात् २४४
आवर्त एव नाभिस्ते २८२

इ

इतः स दैत्यः प्राप्तश्रीः १९४
इन्दुर्विभाति कर्पूरगौरैः २७७

उ ऊ

उदेति सविता ताम्रः ३२
उन्नतः प्रोल्लसद्धारः १४६
उषसि प्रतिपत्तनायिका ६१
ऊर्ध्वं विरिञ्चिभवनात्तव १२५

ए ऐ औ

एकदा नारदो योगी ७४
एद्दहमेत्तथणिआ एद्दह १९३
एवंवादिनि देवर्षौ २४०
ऐशस्य धनुषो भङ्गम् २८३
ओष्ठेन बिम्बं नयनेन पद्मम् १

क

कचतस्त्रस्यति वदनम् १०८
करोति कंसादिमहीभृताम् १४९
कस्मिन् कर्मणि सामर्थ्यम् २६८
कस्स व ण होइ रोसो १८३
किन्तु वध्वां तवैतस्याम् २५५
कुविन्दस्त्वां तावत्पटयसि २६९
क्षामापणैकपदयोः ६१, २३८

ग

गअणं च मत्तमेहं २२०
गाढकान्तदशनक्षत २४७
गुणानुरागमिश्रेण २
गृहीतं येनासीः २८१

च

चण्डीश चूडाभरण! २८४
चौर्यं यद्यपि कर्तव्यम् २

ज

जलकेलितरलकर ३१, १०८, १८१
जुगोपात्मानमत्रस्तः २५५

त

तदाश्चम्ब समुत्तिष्ठ ३११
तस्याधिमात्रोपायस्य २७१
तामुद्वीक्ष्य कुरङ्गाक्षीम् २८५

ताम्बूलभृतगल्लोऽयम् २७२
तीर्थे तदीये गजसेतु २७७
त्वत्पादनखरत्नानि यः ३२२
त्वत्पादनखरत्नानां यद् ३२२
द
दशाननकिरीटेभ्यः २४६
दिशि मन्दायते तेजः २४६
दीर्घाक्तं शरदिन्दुकान्ति २२१
दूरादुत्सुकमागते २२०
देवो दयावान् विजयो १५
द्वयं गतं सम्प्रति २७८
ध
धम्मिल्लस्य न कस्य प्रेक्ष्य २७२
धवलयति शिशिररोचिषि २८५
धीरः स किर्मीर १५
न
न याच्यसे देवि १
नाले शौर्यमहोत्पलस्य १५
नाशयन्तो घनध्वान्तम् २६५, २७७
निर्वासयन्ती धृतिमङ्गनानाम् २३९
निश्शेषच्युतचन्दनम् १७०
न्यक्कारो ह्ययमेव यदरयः २४,१८२
प
परिम्लानं पीनस्तनजघन १५,२२०
परिहरति रतिं मतिं लुनीते २८५
पत्तद्वयक्रशिमपोष ९५
पश्यात्र नलिनीदले १८३
पहिअ ण एत्थ सत्थर ३१, ५७, २४७
पितृवसतिमहं व्रजामि २७०
प्राभ्रभ्राड्विष्णुधामाप्य २७०
प्रोज्ज्वलज्ज्वलनज्वाला २७६
भ
भम धम्मिअ वीसत्थो १८०
भाति पतितो लिखन्त्याः २१२
भानुः सकृद्युक्ततुरङ्ग २८२
भुक्तिमुक्तिकृदेकान्त १४७, १५७, २४८
भूपतेरुपसर्पन्ती २७०
म
मथ्नामि कौरवशतम् १९०
मय्येव जीर्णतां यातु १०४
महिलासहस्सभरिए २४७
महीभृतां खलु गणे १६२
मात्सर्यमुत्सार्य विचार्य २८१
य
यत्ते पदाम्बुरुहमम्बुरुह ९३
यश्च निम्बं परशुना ३१२
या जयश्रीर्मनोजस्य २७७
यो यः शस्त्रं बिभर्ति ५८
र
रतिकाले विलोक्य श्रीः १८३
रदनकिरणजालात् २४९
रमणे चरणप्रान्ते २७८
रम्यहासा रसोल्लासा २४८
रविसङ्क्रान्तसौभाग्य १६७
राघवविरहज्वाला ५७
राममन्मथशरेण ताडिता २७९
रूपजला चलनयना १३९
ल
लग्नं रागावृताङ्ग्या २८४

व

वर्षत्येतदहर्पतिर्न तु घनः २८०

वाणीं नमामि सितवस्त्र १९५

वाणीं भजेऽहं वचसाम् २८७

विद्यादिदेवतां वन्दे ४९

विवृद्धात्माप्यगाधोऽपि २१२

वीणां वहन्तीं कमनीय ७९

श

शनिरशनिश्च तमुच्चैः ४१, २४५

शयिता सविधेऽप्यनीश्वरा ३२

शरच्चन्द्रमयूखायमान ६६

शिखरिणि क्व नु नाम ४७

शून्यं वासगृहम् २३९, २४१

श्रितक्षमा रक्तभुवः २७४

स

सज्जनो दुर्गतौ मग्नः २८३

सज्जेइ सुरहिमासो २४६

सदा चरति खे भानुः २८२

सद्यः पुरीपरिसरेऽपि १५

समस्तशास्त्रावगमक्षमाम् ७२

सरसिजदलतुल्ये १

स रातु वो दुश्च्यवनः २६१

सरोजकाहलीरम्भा ११५

स हत्वा वालिनं वीरः २७३

सहसा विदधीत न क्रियाम् २८१

स्रायकसहायबाहोः २६१

साहित्यवल्लरीमेनाम् १

सुभगे! कोटिसङ्ख्यत्वम् २४७

सुरालयोल्लासपरः २७१

सुवर्णपुष्पां पृथिवीम् ३१२

स्तनाभोगे पतन्भाति ३७

ह

हन्तुमेव प्रवृत्तस्य २

हरन्ति हृदयं यूनाम् २८१

हाराभिराम! परिणाहि १०२

हृत्पङ्कजानि भजताम् १२५

उद्धृतकारिकानाम् अनुक्रमणिका

अ आ

अगूढमपरस्याङ्गम् २४३

अङ्गिनोऽननुसन्धानम् २८५

अङ्गीकरोति यः काव्यम् ५,३११

अदेशजो हि वेषस्तु १४

अनवीकृतः सनियमः २८०

अनुवाद्यमनुक्त्वैव न २५, २७२.

अनेकार्थस्य शब्दस्य १४५,१४१.

अनौचित्यादृते नान्यत् १४

अपारे काव्यसंसारे ४७, ७६.

अप्राधान्यं विधेर्यत्र २५५

अभावो वा तदर्थोऽस्तु २५६

अर्थोऽपुष्टः कष्टः २८०

अर्धान्तरैकवाचकम् २९४

अलङ्कारास्त्वलङ्काराः १४

अवृत्तिरल्पवृत्तिर्वा ३०४

अव्युत्पत्तिकृतो दोषः ३०१

असमासा समासेन ७, ३०२

आक्षिप्त एवालङ्कारः १४७

आक्षेपः कल्पितः कृच्छ्रात् २८५
आख्यातं तद्धितकृतोः ३२०
उ
उचितं प्राहुराचार्याः १४
उपकुर्वन्ति तं सन्तम् ३१२
ए औ
एकमाहुरनेकार्थम् ९९
औचित्यस्य चमत्कार ११
क
कण्ठे मेखलया नितम्बफलके १६
काव्यं यशसेऽर्थकृते ७२
च
चतुर्वर्गफलप्राप्तिः ७३
चतुर्वर्गसाधनोपायः ७३
चित्तं व्याप्नोति यः क्षिप्रम् २९०
चिरं चित्तेऽवतिष्ठन्ते २०४
त
त एव तु निवेश्यन्ते ३८, २०१
तत्सादृशायमभावश्च २५
तमर्थमवलम्बन्ते ३१२
तात्पर्यविषयीभूतार्थ १०२
तात्पर्याव्यतिरेकाच्च १७७
त्रासश्चैव वितर्कश्च २०५
द ध
दुष्टं पदं श्रुतिकटु २५१
दीप्त्यात्मविस्तृतेर्हेतुः २९७
धर्मार्थकाममोक्षेषु ७२
दीप्त्यात्मविस्तृतेर्हेतुः २९७
दुष्टं पदं श्रुतिकटु २५१
न
न यत्र दुःखं न यत्र चिन्ता ४
न सोऽस्ति प्रत्ययो लोके ३३
नानाभिनयसम्बद्धान् २०२
निर्वेदग्लानिशङ्काः २०५
नैसर्गिकी च प्रतिभा ६६
प
पदसङ्घटना रीतिः ३०४
परस्य न परस्येति २३५
पारिमित्याल्लौकिकत्वात् २१०
प्रकारोऽन्यो गुणीभूत २४२
प्रतिकूलवर्णमुपहत २९४
प्रत्ययैरनुपाख्येयैः १९७
प्रधानत्वं विधेर्यत्र २५४
प्रस्तावदेशकालादेः १६९
प्राक्प्रीतिर्दर्शिता सेयम् २०९
ब
बहवोऽर्थो विभाव्यन्ते २०७
बोद्धृस्वरूपसङ्ख्या १८४
भ
भावा विकारा रत्याद्याः ४, २९८
म
माधुर्यव्यञ्जकैर्वर्णैः ३०३
मुख्यार्थबाधे तद्युक्तः १०१
मुख्यार्थबाधे तद्योगे १००
मुख्यार्थहतिर्दोषः २४९
य
यच्च कामसुखं लोके २२९
यत्रार्थः शब्दो वा तमर्थम् ९, १९५
यथा नराणां नृपतिः २०४
यथा सास्नादिमान् पिण्डः ९९
यश्चात्मरतिरेव स्यात् २३१
यस्त्वलक्ष्यक्रमव्यङ्ग्यो ८, ३०२

यस्मिन्नस्ति न वस्तु १२
यस्य प्रतीतिमाधातुम् १६७
यस्याः पादे प्रथमे २७६
ये रसस्याङ्गिनो धर्माः २८७
योगरूढस्य शब्दस्य १५८
यः संयोगविभागाभ्याम् १९८

र

रतिर्हासश्च शोकश्च २०४
रसभावतदाभास २३९
रसस्योक्तिः स्वशब्देन २८५
रसा भावा ह्यभिनयाः २२५

ल

लोकोत्तरचमत्कारप्राणः २३०

व

वक्तृबोद्धव्यवाक्यानाम् ६९
वाक्यस्य वक्रभावो यः १९
वागङ्गाभिनयेनेह यतः २०७
विच्छित्तिशोभिना १४४
विरतास्वभिधाद्यासु १४०
विरुद्धैरविरुद्धैः २०४
विश्वं प्रकाशयन्ती १८५
वृत्तयः काव्यसरणौ १८५
वैदर्भी चाथ गौडी च ८, ३०४
व्रीडा चपलता हर्षः २०५

श

शक्तिर्निपुणता लोक ६६
शब्दप्राधान्यमाश्रित्य २९, ७५
शब्दव्यापारतो यस्य १७३
शब्दस्योर्ध्वमभिव्यक्तेः १९८
शब्दार्थयोरस्थिरा ये ३१२
शषौ सरेफसंयोगः ३८, २०९
शृङ्गार एव मधुरः २९६
शृङ्गारहास्यकरुण २०५
शिक्षाभ्यासादिमात्रेण २१४
शुष्केन्धनाग्निवत्स्वच्छ २९०
श्लेषः प्रसादः समता ६
श्लेषः सर्वासु पुष्णाति २८

स

सङ्केतितश्चतुर्भेदः ८७
सजातीयविजातीयैः २०४
सत्त्वोदेकादखण्ड २३०
सत्यर्थे पृथगर्थायाः ८६
सन्दिग्धमप्रतीतम् २५१
समर्पकत्वं काव्यस्य २९०
समासबहुला गौडी ३०४
सम्भोगे विप्रलम्भे २८८
सर्वशक्तेस्तु तस्यैव ९९
संयोगो विप्रयोगश्च १८६
सामर्थ्यमौचिती देशः १८६
सुप्तं प्रबोधोऽमर्षः २०५
सुप्तिङ्वचनसम्बन्धैः १४४
सैषा सर्वत्र वक्रोक्तिः २०
स्वं स्वं निमित्तमासाद्य ४, २३२, २९८

◆◇◆◇◆



कर्णाटके सुप्रसिद्धे उडुपिनगरस्थे संस्कृतमहाविद्यालये साहित्यशास्त्रे प्राध्यापकः सन् सन्ततमध्ययनेऽध्यापने च निरतो वर्तते डा. लक्ष्मीनारायणभट्टः । अयं नाना विद्वद्गोष्ठीषु भाषणगोष्ठीषु च भागं गृहीतवान् । अस्य च यथा साहित्यशास्त्रे विशेषतः आस्था तथा व्याकरणशास्त्रेऽपि । अनेन च साहित्यशास्त्रे कीदृशं पाण्डित्यमवाप्तमित्यत्र अस्येयं कृतिः भवतां प्रमाणम् ।

अप्पय्यदीक्षितस्य साहित्यशास्त्रीयकृतीनां विमर्शात्मकमध्ययनम् इत्येतस्य शोधप्रबन्धस्य कृते तिरुपतिस्थेन राष्ट्रियसंस्कृतविद्यापीठेन विद्यावारिधिः इत्युपाधिना भूषितोऽयं भट्टमहोदयः न केवलं लक्षणग्रन्थेषु कृतश्रमः किन्तु लक्ष्यग्रन्थेष्वपि । अयं सहृदयः स्वयं काव्यरचनायामासक्तश्च । एतेन चाणक्यविरागः, पान्थपरिदेवनम्, धूर्तचेष्टितम्, शिशुचन्द्रीयम्, मर्कटोपदश इत्यादीनि बहूनि लघुलघूनि आधुनिकवस्तुगर्भाणि काव्यानि तथा अभीष्टयाचनम्, शुकविलापः, कर्मोपदेशः, तरुभाषितम्, तरुक्रन्दनम् इत्यादीनि तादृशान्येव गानप्रधानानि आधुनिकमात्रावृत्तैः निबद्धानि कवनानि च प्रणीतानि । एवं गोभाषितम्, उपदेशविक्रयः, शुकचरितमित्यादयः काश्चित् लघुभूताः कथा अपि अस्य कृतयः सन्ति।

– डा. एच्. आर्. विश्वासः ।